निरुक्तस्य

तृतीयो भागः।



दैवतकाण्डभाष्यम्।

उत्तरषट्कम्।

[सप्तमाध्यायावधिद्वादशाध्यायपर्य्यन्तम्]

तथा

परिशिष्टम्।

जम्बूमार्गाश्रमवासि-भगवद्दुर्गाचार्य्य-विरचितया

ऋज्वर्थाख्यटीकया सहितम्।

पण्डितकुलपतिना बि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

संस्कृतं प्रकाशितञ्च।

द्वितीयसंस्करणम्।

कलिकातानगरे

सरस्वतीयन्त्रे मुद्रितम्।

इं १८८१।

अथ निरुक्ततृतीयभागस्य सप्तमादि-
षडध्यायानां सूची,
परिशिष्टस्य च ।


BHARATIYA VIDYA BHAVAN
S. N.
LIBRARY

अथ निरुक्ततृतीयभागस्य अकारादिवर्णक्रमेण सप्तमाष्टमयोरध्याययोः खण्ड-प्रतीक-सूचीपत्रम्।

अथ निरुक्तात्तृतीयभागस्य अकारादिवर्णक्रमेण नवमादिपञ्चाध्यायानां खण्डप्रतीक-सूचीपत्रम् ।

अथ उत्तरषट्कम्।

—०**०—

अथ सप्तमाध्यायस्य

प्रथमः पादः ॥

—०*०—

दैवत काण्डम्।

ॐ३म् ॥ अथातो दैवतं तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते सैषा देवतोपपरीक्षा यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति तास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृता आध्यात्मिक्यश्च तत्र परोक्षकृताः सर्वाभिर्नामविभक्तिभिर्युज्यन्ते प्रथमपुरुषैश्चाख्यातस्य ॥ १ ॥

ॐनमः। समाप्तं चैकपदिकं प्रकरणमस्यानु दैवतं तद्भवति, यस्यायमादिः "अथातो दैवतम्" इति। यावन्तो मन्त्राः सर्वशाखासु, तेषु यानि गुणपदानि लक्षणोद्देशतः, तानि सर्वाण्येव व्याख्यातानि द्वयोः प्रकरणयोः—नैघण्टुकैकपदयोः, संविज्ञातपदानि तु प्रधानस्तुतिभाग्देवताविषयाणि अग्न्यादीनि, सर्वमन्त्रेष्ववशिष्यन्ते, तानि च पुनरमूनि समाम्नातान्यस्मिञ्छास्त्रे अग्न्यादीनि देवपत्न्यन्तानि। अतस्तद्व्याचिख्यासयेदमारभ्यते।—"अथातो दैवतम्"—इति। 'अथ'-

शब्दोऽधिकारार्थः । 'अतः'शब्दः क्रमे, हेतौ वा । प्रकरणद्वयादनन्तरमिदमवश्यं समाम्नायानुक्रमप्राप्तं व्याख्यातव्यमित्येवं क्रमे, दैवतमन्तरेण न शक्यो देवतापदार्थः सम्यगवबोद्धुम्, देवतापरिज्ञानानुबद्धस्त्वखिलः पुरुषार्थ इत्यतः, दैवतं प्रकरणं व्याख्यास्याम इति वाक्यशेषः ।

एवं हेतौ आह,—किं सतत्त्वं पुनस्तद्दैवतं प्रकरणम्? इति, उच्यते,—"तद्यानि॰—॰मित्याचक्षते"। 'यानि नामानि प्राधान्यस्तुतीनाम्' अग्न्यादीनां देवपद्वाच्यानां 'देवतानां' 'तत्' दैवतं प्रकरणम् 'इति' एवमाचार्याः 'आचक्षते' निरूढा ह्येयमेतस्मिन् प्रकरणे संज्ञेत्यभिप्रायः ॥

"सैषा देवतोपपरीक्षा"। सा, या पुरस्तात् प्रकरणमध्योपन्यासे नैघण्टुकमिदं देवतानामप्राधान्येनेदमिति— "तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद् दैवतमित्याचक्षते, तदुपरिष्टाद् व्याख्यास्यामः"—इति प्रतिज्ञाता, सा इदानीं प्रकरणद्वये निर्णिक्ते यथाप्रकरणोपन्यासेनैवावसरप्राप्ता, सामान्यविशेषतः सलक्षणसतत्त्वोपपत्तिभिः एकैकस्या देवताया उपगम्योपगम्य परीक्षा, वर्त्तिष्यत इति वाक्यशेषः । इदमिहोक्तम्,—प्राधान्यस्तुतिभाञ्जि यानि देवताभिधानानि, तत्समुदायो दैवतं प्रकरणम्, तद् व्याख्यास्यामः इति । तस्य पुनरियमेव समासतो व्याख्या यद्देवतोपपरीक्षणम्, तदभिधानव्युत्पत्ति-तत्स्तुत्युदाहरण-तन्निर्वचनानि ॥

तत्पुनरेतत् सर्वमपि मन्त्राधिदैवतलक्षणमनुक्त्वा न शक्यं व्याख्यातुम्, मन्त्राधीनत्वात् सर्वस्यास्य, अतो मन्त्रदेवतालक्षणविदिधारयिषया ब्रवीति,—"यत्काम॰—॰भवति"। यदर्थवस्तु कामयमानः, 'ऋषिः' 'यस्यां देवतायाम्' अभिष्टुतायाम्, 'आर्थपत्यम्' अर्थपतिभावमात्मनः 'इच्छन्' अमुष्याः

देवताया प्रसादेनाहमसुष्यार्थस्य पतिर्भविष्यामीत्येता बुद्धि पुरोधाय 'स्तुति प्रयुङ्क्ते' 'तद्दैवत' एव 'स मन्त्रो भवति'। एतत् मन्त्रे देवतालक्षणम्। एतेन लक्षणेन सर्वमन्त्रेषु देवतो पलक्ष्या। अथवा देवतायामस्यार्थस्येय देवता दातु समर्थेति जानान, स्तुति प्रयुङ्क्ते येन मन्त्रेण, सा प्राधान्यस्तुतिभाग् देवता। सा पुनरपि स्तुति चतुर्विधा,—नाम्ना, बन्धुभि, कर्मणा, रूपेणेति, "स्तुतिर्नामरूपकर्मबन्धुभि"—इत्युक्तम॥

ऋच एव हि प्रायेणातितरामपि हितार्था, न तथा यजूषि, तासु हि विज्ञातासु यजूष्यपि विज्ञातान्येव भवन्ति। तस्मादृच एव पुरस्कृत्य ब्रवीति,—"तास्त्रिविधा ऋच"—इति। या काश्चन सर्ववेदेषु 'ऋच' 'ता' सर्वा अपि 'त्रिविधा' एव भवन्ति॥

तद्यथा,—"परोक्षकृता, प्रत्यक्षकृता, आध्यात्मिक्यश्च"—इति॥

तत् त्रैविध्यं सामान्यत उद्दिश्य अधुना प्रत्येक लक्षयतो ब्रवीति, उदाहरणैश्च दर्शयति। 'तत्र' तस्मिन् त्रैविध्ये परोक्ष कृतानामृचामेतल्लक्षणं भवति,—"परोक्षकृता ०—०आख्यातस्य"॥ १॥

इन्द्रो॑ दि॒व इन्द्र॑ ईशे पृथि॒व्या इन्द्र॑मि॒द्गा॒थिनो॑ बृ॒हदिन्द्र॑म॒र्केभि॑ त्वावो वेविपाणा इन्द्रा॑य॒ साम॒ गायत नेन्द्रा॑दृ॒ते प॑वते धाम॒ किञ्चनेन्द्र॑स्य॒ नु वीर्या॑णि॒ प्रवो॑चमिन्द्रे॑ कामा अयंसतेत्यथ प्रत्यक्षकृता मध्यमपुरुषयोगास्त्वमिति चैतेन सर्वनाम्ना। त्वमिन्द्र बलादधि।

विनं इन्द्रस्तथो जहीत्यथापि प्रत्यक्षकृता स्तोतारो भवन्ति परोक्षकृतानि स्तोतव्यानि। मा चिदन्यद्विशंसत सखायो मा रिषण्यत। इन्द्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत॥ — क्वचित्तु — ... कण्वा अभि प्र गायतोपप्रेत कुशिकाश्चेतयध्वमित्यथाध्यात्मिक्य उत्तमपुरुषयोगा अहमिति चैतेन सर्वनाम्ना॥ २॥

तद्यथैतान्युदाहरणानि आनुपूर्व्येणैव सप्तस्वपि विभक्तिषु इन्द्रो दिव इत्येवमादीनि,—

"इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत् पर्वतानाम्। इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्रः।"—इति (ऋ० सं० ८, ४, १५, ५)। रेणो-र्वैश्वामित्रस्येयमार्षम्। ऐन्द्री। त्रिष्टुप्। सूर्यस्तुत्ये काह निष्केवल्ये विनियुक्ता। 'इन्द्रो दिव' 'ईशे' ईष्टे। 'इन्द्र' एव 'पृथिव्याः' ईष्टे। 'इन्द्रः' एव 'अपाम्' ईष्टे वर्षकर्मा-दिना। 'इन्द्रः' एव 'पर्वताना' मेघानाम् ईष्टे। 'इन्द्रः' एव 'वृधाम्' अतिप्रवृद्धानामपि भूतानामीष्टे। 'इन्द्र' एव च 'मेधिराणा' यज्ञैस्तद्वतामीष्टे। 'इन्द्रः' एव हि 'योगे' अर्थसंयोगे प्राप्तव्ये, 'क्षेमे' च परिपालने कर्त्तव्ये 'हव्य' आह्वातव्यो नान्यः कश्चित्समर्थः एतत्कर्तुमित्यभिप्राय'। प्रथ मायामेतदुदाहरणम्। इन्द्र इत्येतस्मादुपपदादीश इत्येव प्रथमपुरुष इति प्रतीयते, नोत्तमपुरुष इति॥

"इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः। इन्द्रं वाणीरनूषत।"—इति (ऋ० सं० १, १, १२, १)। मधुच्छन्दस आर्षम्। महाव्रते महदुक्थे शिरसि शस्यते। हे 'गाथिनः' सामगाः। 'इन्द्रमित्' इन्द्रमेव यूयं बृहता साम्ना अभिष्टत।

यूयमपि हे स्तोतारः! 'अर्किणः' 'अर्कैभिः' अर्कैऋग्भिः मन्त्रैः इन्द्रमेवाभिष्टुत। यूयमपि च हे अध्वर्यवः! इन्द्रमेव 'वाणीभिः' वाग्भिर्यजुर्मयीभिः 'अनूषत' अभिष्टुत। द्वितीयायामेतदुदाहरणम्॥

"इन्द्रे॑ ग॒तेऽ०——॰सु॒दासे॑"। इति तृतीयायामेतदुदाहरणम्। व्याख्यातः शेषः॥

"इन्द्राय॒ सामं गायत॒ विप्रा॑य बृ॒ह॒ते बृ॒हत्। ध॒र्म॒कृते॑ विप॒श्चिते॑ पन॒स्यवे॑॥"—इति (ऋ० सं० ६, ७, १, १)। नृमेधस्य आर्षम्। सात्विकेष्वहःसु स्तोत्रियानुरूपवर्गे तृतीयसवने ब्राह्मणाच्छसिनः शस्त्रे विनियुक्ता। हे उद्गातारः! 'इन्द्राय' 'बृहत्साम' 'गायत'। 'विप्राय' मेधाविने 'बृहते' महते 'धर्मकृते' कृतधर्मणे 'विपश्चिते' विदुषे 'पनस्यवे' पन इच्छते, आत्मनः स्तुतिमिच्छते। चतुर्थ्यामेतदुदाहरणम्॥

"सूर्यस्येव र॒श्मयो॑ द्रावयि॒त्नवो॑ मत्स॒रासः॑ प्र॒सुपः॑ सा॒क-मी॑रते। तन्तुं॑ त॒तं परि॒सर्गा॑स आ॒शवो॒ नेन्द्रा॑दृ॒ते पवते॒ धाम॒ किच्चन॥"—इति (ऋ० सं० ७, २, २२, १)। रेभ्योश्वस्यामिवस्येयमार्षम्। पावमानी सौमी। जगती। यथा सूर्यस्य रश्मयस्तमसां 'द्रावयित्नवः' द्रावणशीलाः, एवमेते 'मत्सरासः' सोमाः, पापानां द्रावणशीलाः। किञ्च, 'प्रसुपः' प्रसुता एतैर्ऋत्विग्भिः 'साकम्' इन्द्रं प्रति 'ईरते' गच्छन्ति इत्यर्थः। यस्मा च 'तन्तुं ततं' तन्तुमिव तन्त्वयवाः 'परिसर्गासः' 'आशवः' परिसृताः 'यथा' व्याप्नुवन्ति, एवमेतं यातारमिन्द्रं स्वामिनं प्रत्यश्नुवन्ति व्याप्नुवन्तीत्यर्थः। कस्मात् पुनरेव क्रमः? इतः,—यस्मात् 'नेन्द्रादृते' सोमः प्रातःसवनादीनां सोमसवनस्थानानां 'किञ्चन' किञ्चिदपि 'धाम' 'पवते'

पूयते। तस्मादेवं ब्रूमहे,—इन्द्रमेवैते व्याप्नुवन्तीति। पञ्चम्या-मेतदुदाहरणम्॥

"इन्द्रस्य नु वीर्य्याणि प्र वोचं यानि चकार प्रथमानि वज्री। अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत् पर्वतानाम्॥"—इति (ऋ॰ सं॰ १, २, ३६, १)। हिरण्यस्तूपस्येयमार्षम्। निष्केवल्ये शस्यते। 'इन्द्रस्य' अहं 'वीर्य्याणि' वीरकर्माणि 'प्रवोचम्'। 'यानि' 'चकार' 'प्रथमानि' अनन्तपूर्वाणि अन्यैः। 'वज्री' वज्रसंयुक्तः। 'अहन् अहिम्' हन् मेघम्। 'अनु ततर्द अपः' वर्षार्थं पुनः पुनश्च 'प्राभिनत्'। 'वक्षणाः' उदकवहनगिराः 'पर्वतानाम्' मेघानाम्। एवमादीनि वीर्य्याण्यहमिन्द्रस्य प्रवोचमिति। षष्ठ्यामेतदुदाहरणम्॥

"इन्द्रे कामा अयंसत दिव्यासः पार्थिवा उत। त्व मू षु स्तवता नरः॥"—इति। हे स्तोतारः! ये दिव्याः कामाः, ये च पार्थिवाः, ते इन्द्रे एव उपनिबद्धाः, तं प्रार्थयत, स हि कामानामीष्टे। 'त्व मू षु' तं सुष्ठु कामप्रास्त्यर्थं 'स्तवत, स्तुत, हे 'नरः!'। सप्तम्यामेतदुदाहरणम्॥

उक्तं परोक्षकृतमन्त्रलक्षणं सोदाहरणम्॥

अधुना प्रत्यक्षकृतमन्त्रलक्षणमुच्यते, तदधिकारार्थोऽयम्। 'अथ'शब्दः। "अथ प्रत्यक्ष॰—॰सर्वनाम्ना"। 'मध्यमपुरुषयोगाः' मध्यमेन पुरुषेण संयुक्ता ये मन्त्राः, ते प्रत्यक्षकृताः। 'त्वमिति चैतेन सर्वनाम्ना' संयुक्ताः, ते च प्रत्यक्षकृताः। तत्र त्वमित्येव श्रूयते, तत्राविद्यमानोऽपि मध्यमः पुरुषोऽध्याहार्यः, यत्र तु मध्यमः पुरुषः श्रूयते, तत्राविद्यमानमपि 'त्वम्'—इत्येतत् सर्वनामाध्याहार्यम्, सम्बन्धिशब्दत्वाद-

नयोः। "त्वमिन्द्र बलादधि" "वि न इन्द्र मृधो जहि"—
"इति" चैते उदाहरणे।—

"त्वमिन्द्र बलादधि सहसो जात ओजसः। त्वं वृषन्
वृषेदसि॥"—इति (ऋ० सं० ८, ८, ११, २)। देवजामय.
सूक्तं दृष्टा। तत्रैव महाव्रतिके पर्याये प्रशास्तुः स्तोत्रे
विनियुक्ता। हे 'इन्द्र'। 'त्वम्' 'बलादधि जायसे' 'सहस.'
अभिभवनसमर्थात्, 'ओजसः' तेजसः। किञ्च, त्वं हे 'वृषन्'
वर्षितः। 'वृषा असि' वर्षिता असीत्यर्थः॥

"वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः। यो
अस्माँ अभिदासत्यधरं गमया तमः॥"—इति (ऋ० सं० ८,
८, १०, ४)। शासस्य भारद्वाजस्येयमार्षम्। वैमृ-
धस्य हविषो याज्या। हे 'इन्द्र!' 'वि जहि' 'न' एतान्
'मृध.' मृधकर्तॄन् शत्रून्। किञ्च, 'नीचा' नीचैः 'यच्छ' तान्।
'पृतन्यत' येऽस्माभिः सह पृतन्यन्ति, पृतना कर्तुमिच्छन्तीत्यर्थः।
किञ्च, 'योऽस्मान्' 'अभिदासति' अभ्युपक्षपयितुमिच्छतीत्यर्थ.। तम् 'अधर' 'तम.' 'गमय' नाशयेत्यर्थ.॥

"अथापि ०—० स्तोतव्यानि"। बुद्धप्रयोगैर्हि कचित्
स्तोतारः सम्बध्यते। तद्यथा,—"मा चिदन्यद् विशंसत"
'कण्वा अभि प्रगायत" "उप प्रेत कुशिकाश्चेतयध्वम्"—
इति" चैतान्युदाहरणानि।—

मा चिदन्यद् वि शंसत सखायो मा रिषण्यत। इन्द्र
मेत् स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत॥"—
ति (ऋ० सं० ५, ७, १०, १)। प्रगाथस्येयमार्षम्। बृहती।
प्रायणीतिषु विनियुक्ता। हे स्तोतारः! 'सखायः' 'मा'
अन्यत्' किं 'चित्' अपि 'विशंसत' विविधाभिः स्तुतिभि।
मा' च 'रिषण्यत' चेतसामागच्छत अन्यद् देवतान्तरम्।

किमर्हि ? ''इन्द्रम् इत्' इन्द्रमेव 'हवणं' वर्षितारं 'स्तोत' स्तुत। 'सचा' सहभूताः, एतस्मिन् 'सुते' सोमे। 'सुइः' सुहुष हे होतारः! 'उकथा' उकथानि 'च' 'शंसत'॥

"क्रीलं वः शर्धो मारुत मनर्वाणं रथेशुभम्। कण्वा अभि प्रगायत॥"—इति (ऋ० सं० १, ३, १२, १)। कण्वस्येयमार्षम्। क्रीलीनस्य हविषो याच्ञा। 'क्रीलं' शत्रूनपि दृष्ट्वा यत् क्रीडनशीलम्, 'मारुतं' 'शर्द्धः' बलम्, 'अनर्वाणम्' अप्रत्यर्थितमन्यत्र, स्वप्रभावयुक्तमित्यभिप्रायः, 'रथेशुभं' रथे स्थितं शोभितम्, हे 'कण्वाः' मेधाविनः ऋत्विजः! एतत् 'अभिप्रगायत' एतत् 'वः' ब्रवीमि॥

"उपप्रेत कुशिकाश्चेतयध्वमश्वं राये प्रमुञ्चता सुदासः।—राजा वृत्रं जङ्घनत् प्रागपागुदगथा यजाते वर आ पृथिव्याः॥" इति (ऋ० सं० ३, ३, २१, १)। विश्वामित्रस्येयमार्षम्। हे 'कुशिकाः' स्तुतिकोष्टार ऋत्विजः! 'उपप्र' 'इत' गच्छत। 'चेतयध्वम्' विजानीध्वमेतत्,—यदेषः 'राजा' 'वृत्रं' शत्रुं 'जङ्घनत्' हतवान्, सर्वासु दिक्षु, 'अथ' एवं सर्वहन्ता अमित्रो भूत्वा 'वरे' श्रेष्ठे प्रदेशे 'पृथिव्याः' 'यजाते' यजते। ते यूयमेतद् विज्ञाय उपप्रगच्छत। उपप्रगत्य चैतमाश्वमेधिकम् 'अश्वम्' 'प्रमुञ्चत' उत्सृजत, विधानतः प्रोक्ष्याश्वमेधयागाय। योऽयमेतस्मिन् 'सुदासे' कल्याणदाने वर्तते॥

एवमेतेषु युष्मद्गुणपदप्रयोगेषु मन्त्राः स्तोतारः स्तोतव्यानि तु यानि देवतान्तानि, तानि परोक्षकृताभिसम्बन्धीनि। एवलक्षण मन्त्रजातमुपेक्षितव्यम्॥

"अथा •——•योगाः"। उत्तमेन पुरुषेण या ऋचो युक्ताः, ता आध्यात्मिक्यः। "अह०——०नाम्ना" या उक्ताः, ताश्च आध्यात्मिक्यः। अत्रापि यत्राहमित्येतत् सर्वनाम श्रूयते,

तत्राविद्यमानमपि युत्तमपुरुषसम्बद्धमाख्यातपदमध्याहर्त्तव्यम्, यत्र चोत्तमपुरुषसम्बद्धमाख्यातपदं श्रूयते, तत्राविद्यमानमपि 'अहम्'—इत्येतत् सर्वनाम अध्याहार्य्यम्, सम्बन्धिशब्दत्वादनयोः ॥ २ ॥

यथैतदिन्द्रो वैकुण्ठो लवसूक्तं वागाम्भृणीयमिति परोक्षकृताः प्रत्यक्षकृताश्च मन्त्रा भूयिष्ठा अल्पश आध्यात्मिका अथापि स्तुतिरेव भवति नाशीर्वाद इन्द्रस्य नु वीर्य्याणि प्रवोचमिति यथैतस्मिन् सूक्ते ऽथाप्याशीरेव न स्तुतिः सुचक्षा अहमक्षीभ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासमिति तदेतद्बहुलमाध्वर्य्यवे याज्ञेषु च मन्त्रेष्वथापि शपथाभिशापौ। अद्या मुरीय यदि यातुधानो अस्मि। अधा स वीरैर्दशभिर्वियूया इत्यथापि कस्यचिद्भावस्याचिख्यासा। न मृत्युरासीदमृतं न तर्हि। तम आसीत्तमसा गूळ्हमग्रे। अथापि परिदेवना कस्माच्चिद्भावात्। सुदेवो अद्य प्रपतेदनावृत्। न विजानामि यदि वेदमस्मीत्यथापि निन्दाप्रशंसे। केवलाघो भवति केवलादी। भोजस्येदं पुष्करिणीव वेश्मेत्येवमक्षसूक्ते द्यूतनिन्दा च कृषिप्रशंसा चैवमुच्चावचैरभि-

प्रायेर्कर्षीणां मन्त्रदृष्टयो भवन्ति ॥ ३ ॥

"यथा एतत्" उदाहरणत्रयमाध्यात्मिकम्,—"इन्द्रो०—०मिति" एवमादि। एवमप्यन्येऽप्याध्यात्मिका मन्त्रा उपेक्षितव्याः।

विकुण्ठा नाम आसुरी बभूव, तस्याः किल तपसः प्रभावेणापत्यत्वमिन्द्र आजगाम, स वैकुण्ठो नाम बभूव। तस्यामस्तुतिमयुक्तमेवमादि ब्रह्म प्रादुरभूत्,—"अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि संजयामि शश्वतः। मां हवन्ते पितरं न जन्तवोऽहं दाशुषे विभजामि भोजनम्।"—इति (ऋ० सं० ८, १, ५, १)। 'अहम्' एव 'भुवम्' अभवम् 'वसुनः' धनस्य 'पूर्व्यः' प्रथमः 'पतिः'। किञ्च, साम्प्रतमप्यहमेव पतिः। 'अहम्' एव च मनुष्यः सकाशात् समस्तानि 'धनानि' 'संजयामि'। 'शश्वत' नित्यकालमेव। किञ्च, 'माम्' एव 'हवन्ते' आह्वयन्ति 'पितरं न' पितरमिव, तासु तास्वार्त्तिषु 'जन्तवः' मनुष्याः। किञ्च, 'अहम्' एव 'दाशुषे' दत्तवते हवींषि, यजमानाय 'विभजामि' यथार्हं 'भोजनम्' धनमित्यर्थः।

"इति वा इति मे मनो गामश्वं सनुयामिति। कुवित् सोमस्यापामिति।"—इति (ऋ० सं० ८, ६, २६, १)। लबसूक्ते स एव लबो ब्रवीति,—'इति वा इति' एवञ्चैवञ्च 'मे मनः' वर्त्तते। आह,—कथम्? इति। उच्यते,—'गामश्वम्' गां च अश्वं च 'सनुयाम्' सम्भोजयेयम् एतान् यजमानानिति। अथैवमतितरां प्रत्युपकाराभिप्राये सति किमयं ब्रूते? 'कुवित्' बहु अहं 'सोमस्य अपाम् इति'।

"अहं रु द्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।

अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥"
—इति (ऋ० सं० ८, ७, ११, १)। वागाम्भृणीये वागेव
ब्रवीति। 'अहम्' एव 'रुद्रैः' 'वसुभिः' 'आदित्यैः' 'विश्व-
देवैः' विश्वैर्देवैः सह भूता 'चरामि' स्तुतिरूपेण। 'अहम्'
एव मित्रावरुणा' मित्रावरुणौ 'उभा' उभावपि, 'इन्द्राग्नी'
'अश्विना' अश्विनौ च 'उभा' उभावपि 'बिभर्मि' हविषा,
मत्पूर्वकं हविःसम्प्रदानं सर्वदेवताभ्य इत्यभिप्रायः॥

"परोक्षकृताः०—०प्रत्यक्षकृताश्च मन्त्राः" भूयिष्ठाः शाखा-
न्तरेषु बहवः, "अल्पशः" क्वचित् "आध्यात्मिकाः" लक्ष्यन्ते।
आत्मानमेव स्तोतव्यमधिकृत्य येऽभिव्यक्तास्त इह शास्त्रे
आध्यात्मिका उच्यन्ते॥

"अथापि" क्वचित् "स्तुतिरेव भवति" "नाशीर्वादः" तत्र
पुनराशीर्योज्या। किं कारणम्? आशिषो ह्यर्थे स्तुतिः प्रयु-
ज्यते। आह,—किमुदाहरणम्? इति। उच्यते,—"इन्द्रस्य
०—०सूक्तं" (ऋ० सं० १, ७, २, १)। अत्र हि स्तुतिरेव श्रूयते,
नाशीः, सा पुनर्योज्येति प्रतिपादितम्—"अथापि" क्वचित्
"आशीरेव, न स्तुतिः"। तद्यथा,—"सुचक्षा०—०भूयासमिति"
—"तदेतत्" एवंलक्षणं मन्त्रजातम् "आध्वर्यवे" वेदे "बहुलं"
प्रायेण दृश्यते। "याज्ञेषु च मन्त्रेषु" कर्मकरणेष्वितरयोरपि
वेदयोरिष्टाशीरेव भवति, न स्तुतिरेव केवला, यत्राप्याशीरेव
केवला, तत्रापि तस्यार्थस्य या देवतेष्टा, तस्याः स्तुतिर्योज्या।
किं कारणम्? न ह्यनभिष्टुता देवता आशिषं समर्दयति॥

"अथापि शपथाभिशापौ" भवतः। "अद्या मुरीय०—०
इति"—इत्येकमुदाहरणं द्वयोरपि। वसिष्ठः किल राक्षसः
त्वम्—इत्यभियुक्तः, सोऽनयर्चा शपथं प्रतिपेदे, परञ्चाभिश-
शाप।

"अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्ततप पूरुषस्य। अधा स वीरैर्दशभिर्वियूया यो मा मोघं यातुधानेत्याह॥"—इति (ऋ० सं० ५, ७, ७, ५)। अथैवाहं म्रिये, 'यदि यातुधानः' स्याम्? यदि वा 'आयुः' 'ततप' तप्तवानहं कस्यचिदपि पुरुषस्य। अथ पुनरयातुधानमेव मां सन्तं यो मोघमनृतं यातुधानस्त्वमित्येवमाह, 'सः' 'वीरैः' पुत्रैः 'दशभिः' 'वियूयाः' वियूयात् वियुज्यतामित्यभिप्रायः॥

"अथापि कस्यचित्" "भावस्य" अर्थस्य "आचिख्यासा" मन्त्रेषु भवति। "न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः। आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास॥"—इति (ऋ० सं० ८, ७, १७, १)। प्रजापतेः परमेष्ठिन आर्षम्। तम आसीदितीयम्। त्रिष्टुप्। भाववृत्तम्।

'तर्हि' प्रागुत्पत्तेरस्य जगतः 'मृत्युः' इत्ययं व्यपदेशः 'नासीत्' मर्त्यस्याभावात्। 'न' 'अपि' 'अमृतम्' इत्ययं व्यपदेश आसीत्, मृत्योरभावादेव। इतरेतरापेक्षया हि मृत्युश्चामृतं च व्यपदिश्येते। 'न' एव 'रात्र्याः' 'प्रकेतः' प्रज्ञानम् 'आसीत्' इय रात्रिरिति। नापि 'अह्नः'। एते अपि ह्यहोरात्रे यतो भगवतो विवस्वत उदयास्तमयाभ्यामुपलक्ष्येते, तदभावे च्येते अपि नास्तामित्येतदुपपद्यते। आह,—अथ किमासीत्? इति। उच्यते,—अविशिष्टमप्रज्ञातम् 'एकम्', एव सर्वशक्तिमत् 'ब्रह्म' आसीत्, तत्कार्यकारणाभावात् 'अवातम्' 'आनीत्' अनिति प्राणितीत्यर्थः, सति हि कार्यकारणभावे परमात्मनि या प्राणनशक्तिः सा पञ्चधा भिद्यमाना प्राणापानादिभावमापद्यते, तदभावे न वातोऽस्तीति अवातमनितीत्युपपद्यते। 'स्वधया' अन्नेन अस्मिन्नेव पर-

मात्मनि या अव शक्तिः, तया निमित्तभूतया प्राणि-तीत्यवसियते 'तत्' ब्रह्म। आह,—किमन्यदपि ततः परस्तात् किञ्चिदासीत् ? नेत्युच्यते,—'तस्मात् ह अन्यत्' 'न', 'परः' परस्तात् 'किञ्चन आस' किञ्चिदप्यासीत्। इदमेव तावदतिक्रान्तसर्वविशेषं ब्रह्म व्यपदेष्टुमशक्यमतोऽपि परस्तात् किमन्यद् भविष्यतीत्यभिप्रायः॥

द्वितीयमुदाहरणमाचिख्यासायामेव। "तम॑ आसी॒त् तम॑सा गू॒ळ्हमग्रे॑ऽप्रके॒तं स॑लि॒लं सर्व॑मा इ॒दम्। तु॒च्छ्येना॒भ्वपि॑हितं॒ यदासी॒त् तप॑स॒स्तन्म॑हि॒नाजा॑य॒तैक॑म्॥"—इति (ऋ० सं० ८, ७, १७, ३)। 'तम आसीत्' अन्धेमेव 'तमसा' 'गूळ्हम्' निगूढम् अविशिष्टम् 'अप्रकेतम्' अप्रज्ञातम् 'अग्रे' प्राक् सृष्टेरित्यर्थः, तदा हि न द्रष्टा, न दर्शनम्, नापि दृश्योऽर्थ आसीदित्यभिप्रायः। सांख्यास्तु तमःशब्देन प्रधानसाम्यापन्नं गुणत्रयमुच्यमानमिच्छन्ति, ते हि परमार्षं सूत्रमधीयते,—"तम एव खल्विदमग्र आसीत्" तस्मिंस्तमसि क्षेत्रज्ञ एव प्रथमोऽध्यवर्त्तत"—इति। 'सलिलं' सद्भावे लीनं 'सर्वमिदं' जगत्, सम्भावस्यैव भावस्योपरि लीनमासीत्। 'तुच्छ्येन' तुच्छेन सूक्ष्मीभूतेन पटमण्डपस्थानीयेन कर्मणा 'यत् अपि हितम्' इदमेव जगत् 'आसीत्' सर्गकालापेक्षितमनादिमत्त्वात् संसारस्य। 'तपसः' तस्यैव कर्मणः 'महिना' महिम्ना महाभाग्येन कारणावस्थायाम् 'एकम्' अपि 'सत्' अनेकधा उपस्थिते सर्गकाले प्रतिनियतकर्मोपभोगार्थम् 'अजायत' इति॥

"अथापि परिदेवना, कस्माच्चित् भावात्,—'सु॒देवो॑ अ॒द्य प्र॒पते॒दना॑वृत्' 'न वि॒जा॑नामि॒ यदि॑ वे॒दमस्मि॑'—इति"। उदाहरणे।

"सुदेवो अद्य प्रपतेदनावृत् परावतं परमां गन्तवा उ।
अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः॥"
—इति (ऋ० सं० ८, ५, ३, ४)। पुरूरवस आर्षम्। त्रिष्टुप्।
परिदेवना। 'सुदेव' स शोभनो देवः स्यात्, यो ह्यनया प्रियया उर्वश्या वियुक्तो भृगुप्रपातम् 'अनावृत्' अनावर्त्तमान 'अद्य प्रपतेत्'। 'परावतं परमां गन्तवै उ' पतितश्च दूरात् दूरतरं गच्छेत्, 'अद्य' अद्य गत्वा 'शयीत' मृतः सन् 'निर्ऋतेः' भूमेः 'उपस्थे' उपरि। 'अधा' अथ 'एनं' तामवस्थामापन्नं 'वृका' विकर्त्तितारः श्वशृगालादयः 'रभसासः' रभस्वन्तो वेगवन्तः 'अद्युः' भक्षयेयुः। नाहं सुदेवः किन्तु स सुदेवो यस्तया वियुक्तः एतामवस्थामाप्नुयादित्येवमेषा "परिदेवना" मरणयोत्थापनम्॥

"न वि जानामि यदि वेदमस्मि निण्यः सन्नद्धो मनसा चरामि।
यदा मागन् प्रथमजा ऋतस्यादिद् वाचो अश्नुवे भागमस्याः॥"
—इति (ऋ० सं० २, ३, २१, २)। दीर्घतमस आर्षम्।
अस्यवामीये। 'न' एतत् अहं 'वि' विस्पष्टं 'जानामि'—'यदि वा इदम् अस्मि' कारणं परं ब्रह्माख्यम्? अथवा इदं तत्कार्य्यं द्वैतमस्मीति। अनयोः कार्य्यकारणयोर्द्वैताद्वैतयोरन्तरा वर्त्तमानः 'निण्यः' अन्तर्हितः, अविद्यया 'सन्नद्धः' च। अनेकैः सन्देहग्रन्थिभिः 'मनसा' उभे अपि द्वैताद्वैते 'चरामि' गच्छामीत्यर्थः। एवं मतिं 'यदा' 'मा आ अगन्' माम् आगच्छेत 'प्रथमजा' बुद्धिः, सा हि सर्वेन्द्रियेभ्यः प्रथमं जायते 'ऋतस्य' भगवत आदित्यस्य स्वभूता, तस्य हि प्रकृष्टा बुद्धिः, प्रक्षीणसर्वसंशया, तया सर्वमिदमसंशयं परिज्ञाय किमहं कारणमतत्त्वं उत द्वैततत्त्वं इति। तत 'अस्याः' ऋतस्य प्रज्ञायाः 'वाचः' 'भागम्' अहम् 'अश्नुवे' अश्नुयाम्, यदिय

हत्वा दागभिवदति तत्कर्मस्वमाप्नुयामित्यर्थं ॥

एवमयमात्मनिन्दापूर्वको विलाप परिदेवनेत्युच्यते, यद्धि नाम एव स्यात् साधु स्यादिति ॥

"अथापि" मन्त्रेषु "निन्दाप्रशंसे" भवतः। तद्यथा,— "केवलाघो भवति केवलादी" "भोजस्येद पुष्करिणीव वेश्म" —"इति"। एते उदाहरणे।

"मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य। नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥"—इति (ऋ० सं० ८, ६, २३, १)। भिक्षुर्नामाङ्गिर सस्तस्येयमार्षम्। त्रिष्टुप्। अददतो निन्दा। 'मोघं' वितथम 'अन्नं' 'विन्दते' प्राप्नोति। आह,—क ? इति। उच्यते, —य 'अप्रचेता' अप्रहृद्धज्ञानः। 'सत्यम' अह 'ब्रवीमि'— 'वध इत स तस्य' वध एव सोऽन्नलाभस्तस्य, वरमलब्ध तेनान्नमित्यभिप्राय.। किम्पुन कारण मोघमसावन्न विन्दते ? इति। उच्यते,—'न' असौ 'अर्य्यमणम्' आदित्य 'पुष्यति' 'नो' नापि 'सखाय' समानख्यान मनुष्यम, न देवान् पुष्णाति, नापि मनुष्यानित्यभिप्राय। यत एवमत 'केवलाघो भवति' स 'केवलादी' आत्मनैव केवल योऽन्नमत्ति, न देवपितृमनुष्येभ्यो ददाति, स केवलमघमेव प्राप्नोति। तदुक्तमन्यत्रापि,—"भुञ्जते तेऽत्वघ पापा ये पचन्त्यात्मकारणात्"—इति। तस्माद् वध एव स तस्यान्नलाभ इत्युपपद्यते, न ह्यसत्यन्ने प्रत्यवेयाददददत्वमित्यभिप्राय, अन्नसयोग एव ह्यत्र बधोऽभिप्रेतः।—

केचित्त्वेनमनध्यात्मविदमप्रचेतस मन्यन्ते, स ह्यस्मिन् शरीरे विवक्षित। 'न अर्य्यमणम्' आदित्यान्तरपुरुष भोक्तार

पश्यति, 'नो' नापि 'सखायं' प्राणयायुम्, स हि भुज्यमानेऽन्ने करणभावं पुष्णातीति सखा, केवलं, त्वसावविद्वानात्मानमेव भोक्तारमत्र पश्यति, अतः सः 'केवलाघो भवति' यदि स देवताः पश्येदेव ता भवभोक्त्रीः, स हि तत्र भुञ्जेन न केवलाघः स्यादिति ॥

"भोजायाश्वं सं मृजन्त्याशुं भोजायास्ते कन्या३ शुम्भमाना। भोजस्येदं पुष्करिणीव वेश्म परिष्कृतं देवमानेव चित्रम्॥"—इति (ऋ० सं० ८, ६, ४, ५)। दक्षिणा नाम प्रजापतेर्दुहिता, तया सूक्तमात्मनः स्तुतिसम्बद्धं दृष्टम्। तत्रैषा त्रिष्टुप्। दातृप्रशंसा। 'भोजाय' राज्ञे 'अश्वम्' 'आशु' शीघ्रं 'सम्मृजन्ति' सम्मार्जयन्ति स्नापयन्ति भृत्याः। किञ्च, 'भोजाय' उद्वहनार्थमन्यान् वरानपास्य 'शुम्भमाना' स्वलङ्कृता शोभमाना 'कन्या' 'आस्ते' स हि तामर्हतीत्यभिप्रायः। किञ्च, 'भोजस्य' 'इद' 'वेश्म' गृहं 'परिष्कृत' संस्कृत 'पुष्करिणी इव' 'देवमाना इव' पुष्करैर्युतं विमानमिव 'चित्र' चायनीयमित्यर्थः। तदेतत् सर्वमप्यस्य जन्मान्तरप्रतिविशिष्टदक्षिणासहितात् कर्मणोऽन्येभ्यः कर्मभ्यः सकाशात् फलातिरेकमित्येवमेषा दक्षिणाप्रशंसा ॥

यथैवमिह मन्त्रद्वये निन्दा प्रशंसा च, "एवमक्षसूक्ते द्यूतनिन्दा च कृषिप्रशंसा च" भवतीति विषयोपप्रदर्शनार्थमाह।

"अक्षैर्मा दीव्यः कृषिमित् कृषस्व वित्ते रमस्व बहु मन्यमानः। तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः॥"—इति (ऋ० सं० ७, ८, ५, ३)। मूजवाक्षासा अक्षपुत्रस्तस्येयमार्षम्। त्रिष्टुप्। 'अक्षैः मा दिव्य.'—इति अक्षदेवनप्रतिषेधः, तत्र हि बहवोऽनर्थाः सन्ति। 'कृषिमित् कृषस्व"—इति कृषिविधानम्। तस्यां हि बहवो गुणाः

सन्ति। 'वित्ते रमस्व' स्वल्प एवोपार्जिते 'बहु' एतदेवेति 'मन्यमानः' मा वित्तलोभेन दीव्यः, निजमपि वित्तं हारयिष्यसि, कृषिं पुनरेतस्मात् कारणात् कृषस्व। हे 'कितव!' 'तत्र' तस्यां कृषौ 'गावः' सन्ति, 'तत्र' तस्यां च 'जाया'। 'तत्' पुनरेतत् 'मे' मम 'सविता' देवः, 'अर्यः' ईश्वरः, 'वि' श्रुतिस्मृत्यनुशासनद्वारेण विविधमनेकप्रकारम् आ 'चष्टे' उभे अपि ह्येमे श्रुतिस्मृती मन्वादिद्वारेण आदित्यान्तरपुरुषप्रभवे एव, अत इदमुक्तं सवितैवैतन्मम विचष्ट इति॥

"एवम्" अनेन प्रकारेण "उच्चावचैरभिप्रायैः" बहुभिः, अथवा प्रशस्ताप्रशस्तमध्यमैः मन्त्राभिव्यक्तिनिदानभूतैः "ऋषीणां" "मन्त्रदृष्टयः" मन्त्रदर्शनानि "भवन्ति" विद्यमानानामेव हि मन्त्राणामृषयो येन केनचिन्निमित्तेन निदानभूतेन निन्दाहर्षशोकप्रशंसादिना मन्त्राणां द्रष्टारो भवन्ति, न तु कर्त्तार इत्यभिप्रायः। तदप्यार्षानुक्रमण्यां निदानमार्षं च उभयमुपेक्षितव्यम्, परिज्ञातार्षनिदानो हि सुखमनेकविषयं मन्त्रार्थमवबोद्धुं शक्नोतीति। तदेतदिह लक्षणोद्देशतो भाष्यकारेण प्रदर्शितम्॥ ३॥

तद्योऽनादिष्टदेवता मन्त्रास्तेषु देवतोपपरीक्षा यद्देवतः स यज्ञो वा यज्ञाङ्गं वा तद्देवता भवन्त्यथान्यत्र यज्ञात् प्राजापत्या इति याज्ञिका नाराशंसा इति नैरुक्ता अपि वा सा कामदेवता स्यात् प्रायोदेवता वास्ति ह्याचारो बहुलं लोके देवदेवत्यमतिथिदेवत्यं पितृदेवत्यं याज्ञदैवतो

मन्त्र इत्यपि ह्यदेवता देवतावत् स्तूयन्ते यथा-श्वप्रभृतीन्योषधिपर्यन्तानि ॥ ४ ॥

"तद् ये अनादिष्टदेवता मन्त्रा."। इहैतदुक्तम्,—"यत्-काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते, तद्दैवतः स मन्त्रो भवति"—इति। तदेतद् प्रकटदेवतालक्षणेषु मन्त्रेषु मन्त्रदेवतालक्षणमुपपद्यते, ये त्वनादिष्टदेवतालिङ्गा मन्त्रा', तेषु देवताः कथमन्वेष्याः ? इति तदेतद् विचार्यत इत्युपयुक्तस्तच्छब्दः। ये अनादिष्टदेवतालिङ्गा मन्त्रा', "तेषु" "देवतोपपरीक्षा" देवताया अतः परं परीक्षा उपपत्तितो वर्णिष्यत इति वाक्यशेषः।

"तद्दैवतः स यज्ञो वा यज्ञाङ्गं वा, तद्देवता भवन्ति"। यद्दैवतः स यज्ञो यस्मिन् यज्ञे ते अनाविष्कृतदेवतालिङ्गा मन्त्रा विनियुज्यन्ते, तद्देवता एव हि ते भवन्ति। तद्यथा,—"आग्नेयोऽग्निष्टोम."—इति श्रूयते, तत्र योऽनाविष्कृतदेवता-लिङ्गो मन्त्र स्यात्, स आग्नेय एव स्यात्, प्रकरणाद्धि सन्दि-ग्धदेवतेषु देवतानियम इति न्याय। "यज्ञाङ्ग वा"। प्रात-सवने यो विनियुज्यते स आग्नेय', यो माध्यन्दिने स ऐन्द्र, यस्तृतीयसवने स आदित्य।

आह,—"अथ अन्यत्र यज्ञात्" कथ मन्त्रेषु देवतापरि-ज्ञानमिति अथ पुनरन्यत्र यज्ञाद् ये वर्त्तन्ते, येषामुच्चार-प्रयोग, "उच्चवयज्ञो वा एष"—इत्युच्चयतामपि दर्शयत्येव ब्राह्मणम्। तेषूच्चयप्रकरणप्रयोगेषु वाचस्तोमप्रयोगविनियो-गकर्मसु,—"किं ब्राह्मणस्य पितरं पृच्छसि किमु मातरम्। श्रुतं वर्दाण्यन् वेद्यं स पिता स पितामह.॥"—इत्येवमादिषु कथम-न्वेष्या देवता ? इति। शृणु,—"प्राजापत्या." ते मन्त्रा "इति

याज्ञिकाः" मन्यन्ते। किं कारणम्? अनिरुक्तो हि प्रजापतिः, अनिरुक्तदेवतालिङ्गाश्च मन्त्रा इत्येतस्मात्सामान्यात्। "नाराशंसा:" ते "इति नैरुक्ताः" मन्यन्ते। नराशंसोऽग्निर्यज्ञो वा। यच्मति हि,—यज्ञ इति कात्थक्यः अग्निरिति शाकपूणिः"—इति। यज्ञशब्देन च विष्णुरुच्यते "विष्णुर्वै यज्ञः" इति च विज्ञायते। "अग्निर्हि भूयिष्ठभाग् देवतानाम्"—इति, अतोऽनाविष्कृतदेवतालिङ्गो मन्त्र आग्नेयः स्यात्। सर्वदेवताश्रयणाच्च "अग्निर्वै सर्वा देवताः" अत्र ये सर्वा वसति देवतेति, च विज्ञायते। यस्मिन्नपि पक्षे नाराशंसो यज्ञः, तस्मिन्नपि पक्षे यज्ञप्रभवत्वादस्य जगतो यज्ञस्य श्रैष्ठ्यम्, अपरिग्रहश्च श्रेष्ठगामीति न्यायः। केचित्तु 'येन नराः प्रशस्यन्ते, स नाराशंसो मन्त्र.'—इति पश्यन्तो मनुष्यस्तुतयस्ता इत्येवं मन्यन्ते। तदुक्तम्, न हि मनुष्याणामनाविष्कृतलिङ्गैर्मन्त्रैः स्तुतिरुपपद्यते, दुर्बोध्यत्वात् तेषामल्पबुद्धित्वाच्च मनुष्याणामिति।

"अपि वा सा कामदेवता स्यात्"। अपि वैवमन्यथा स्यात् सा ऋक्, स मन्त्रः, योऽनाविष्कृतलिङ्गः, स कामदेवतः स्यात्, कामतो ह्येच्छातस्तस्मिन् देवता कल्पयितव्येत्यभिप्रायः। किं कारणम्? गुणपदमयो हि सः, न हि तत्र देवतासंविज्ञानपदम् अन्यतमदेवताविशेषप्रख्यापकमस्ति, यतो विशेषात् कस्याञ्चिदेकस्यां देवतायामन्वाभ्यो व्याहृत्यावतिष्ठेत, गुणपदानाञ्च सर्वेषां सर्वदेवताश्रयत्वादैश्वर्ययोगात् सर्वासां देवतानामिति।

"प्रायोदेवता वा" तस्मिन् मन्त्रे स्यादिति वाक्यशेषः। 'प्राय इति ह्यधिकार उच्यते। यद्देवताधिकारे ह्यध्ययनपाठानुक्रमे योऽनाविष्कृतदेवतालिङ्गो मन्त्रो भवति, स तद्देवत एवेति बोद्धव्यम्। तद्यथा,—अग्न्यधिकारे वर्त्तमाने आग्नेय

एव मन्त्रो भवति, इन्द्राधिकारे चैन्द्र एवेति। अथवा प्राय इति बाहुल्यमुच्यते। तद्यथा,—अनृतप्रायो देवदत्त इत्युक्ते अनृतबहुल एवेति गम्यते। एवमिहापि प्रायोदैवतेत्युक्ते बहुलदैवतेति स्यात्। किं कारणम्? "अस्ति ह्याचारो बहुलं लोके" अस्ति हीयं लोके बहुलस्य भूयस्त्वेन प्रसिद्धिः। निर्दिष्टेभ्यो द्रव्येभ्यो यदन्यदवशिष्यते, तत् साधारणं भवति। तद्यथा, कश्चित् निर्दिशति,—इदं मे "देवदेवत्यं" द्रव्यम्, इदं मे "अतिथिदेवत्यम्" इदं मे "पितृदेवत्यम्"—इति। तत्रैवं निर्दिष्टे ततो राशेर्यदन्यदवशिष्यते, तद्देवपितृमनुष्याणां साधारणं भवति। तथा चरुनिर्वपणकर्मणि इदं देवतानामिति निरुप्तमभिमृशेदं नः सहेति शेषमभिमृशति सर्वसाधारणत्वप्रख्यापनार्थम्, एवमिहाप्यादिष्टदेवतालिङ्गान्मन्त्रराशेर्योऽन्योऽनादिष्टदेवतालिङ्गो मन्त्रराशिः स्यात्, सर्वसाधारणत्वाद् बहुदैवतो वैश्वदेवः स्यादिति॥

आह,—कः पुनरेतस्मिन् विचारे निश्चयः? उच्यते,—"याज्ञदैवतो मन्त्रः" योऽनाविष्कृतदेवतालिङ्गो मन्त्रः स याज्ञो वा स्याद् दैवतो वा। "विष्णुर्वै यज्ञः"—इति ह विज्ञायते। विष्णुः पुनरादित्य एव नैरुक्तानाम्, द्युस्थाने समाम्नानात्, "यच्च किञ्चित् प्रवल्हितमादित्यकर्मैव तत्"—इति हि वक्ष्यति। तस्मादादित्यदेवतः स मन्त्रः, इति स्यात्। अथवा दैवतः स मन्त्र, देवता अस्मिन् देवतेति दैवतः, अविशिष्टं हि देवतात्वमग्नावेवं सर्वदेवताभिवादात् "अग्निर्वै सर्वा देवताः"—इति ह विज्ञायते, "अग्निर्वै देवतानां भूयिष्ठभाक्"—इति च। 'अपरिग्रहश्च प्रधानगामि'—इति न्यायः, तस्मादाग्नेयः स मन्त्रः स्यादिति॥ तथदुपोद्घात उक्तम् "नाराशंसा इति नैरुक्ताः"—इति, तदेव कात्यक्य-

शाकपूणिमतेनावधृतं यज्ञोऽग्निर्वेति, तौ हि नैरुक्ताविति ॥

"यद्देवत स यज्ञो वा यज्ञाङ्ग वा तद्देवता भवन्ति"—इत्येवमादीनामपरो व्याख्यामार्गः।—'यद्देवत स यज्ञ' यद्देवत प्रधान हविः, तद्यथा,—प्रज्ञतावैन्द्र सान्नाय्य माहेन्द्र वा, तत्संस्कारपरा इषेत्वादय (य० वा० स० १, १), तेनाविष्कृतदेवतालिङ्गा ऐन्द्रा एव भवन्ति, माहेन्द्रा वा। यद्देवते चाधिकारे चोदकेन प्रदिश्यन्ते, तद्देवता एव भवन्ति। तद्यथा,—कुविदङ्गेति प्राजापत्यग्रहणे विनियोगात प्राजापत्य एव भवति। यज्ञाङ्ग वेत्याघाराद्यभिप्रायेण। "ऋपभोऽसि शाक्कर"—इत्यनाविष्कृतदेवतालिङ्ग पूर्णस्रुचासादनमन्त्र, सौचे विनियोगात्, तस्य च प्राजापत्यत्वात् प्राजापत्य ॥

"अथान्यत्र यज्ञात्"। क्वान्यत्र यज्ञात् कर्मणो मन्त्राणां विनियोग ? उपाकरणब्रह्मयज्ञजपप्रायश्चित्तेषु नैष्ठिकब्रह्मचारिणश्च। 'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणु वर्च्छति, गर्त्तं वा पतति, प्रवामीयते, यातयामान्यस्य छन्दांसि भवन्ति'—इति प्रत्यवायश्रवणात् सर्वत्रान्वेष्या देवतेत्यारभ्यन्तया चात्र यज्ञादिति ॥

"प्राजापत्या इति याज्ञिका"। प्रजापतिस्त्वेषूपाकरणादिकर्मसूपास्य इति याज्ञिका मन्यन्ते, स ह्यनिरुक्त इत्यनिरुक्ततासामान्यात्। "नाराशसा इति नैरुक्ता" सौर्य्या वा आग्नेया वेति। "अपि वा सा कामदेवता स्यात्" अनाविष्कृतदेवतालिङ्गे मन्त्रे या विचार्यते देवता, कास्मिन् देवता स्यात् ? इति, सा कामत कल्प्या, इच्छात इत्यर्थ। गुणपद मयत्वात् तस्य। न मन्त्रवाक्यसामर्थ्याद् देवता नियम्यते तत्र, किन्तर्हि ? प्रयोक्तुरिच्छासामर्थ्यात्। अथवा प्रयोक्ता यत्कामस्स प्रयुङ्क्ते, तस्य कामस्य या देवता अधिपति, तामेव

तस्मिन्नभिसन्दधीत। "प्रायो देवता वा" समानमेव पूर्वेण।

"अपि ह्यदेवता देवतावत् स्तूयन्ते"। "यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते"—इति मन्त्रदेवतालक्षणमुक्तम्, तदुपपद्यते देवानामार्थपत्यसम्बन्धात्, अनाविष्कृतदेवतेष्वपि अविज्ञातपदाभावात् कल्पते देवता कामस्य अधिपतिरपि। यत्र तु स्फुटम् अदेवता देवतावत् स्तूयन्ते ननु तत्रैतल्लक्षणं व्याहन्यते? तद्यथा,—"अश्वप्रभृतीन्योषधिपर्यन्तानि"। एतस्मिन् वर्गे कानिचित् तत्त्वानि, कानिचिद् द्रव्याणि, अश्वादीनि सत्त्वानि, अक्षादीनि द्रव्याणि। तानि च पुनरासन्नमर्थं चेतयन्ते, नातीतम्, नानागतम् इति आत्मनोऽपि च हिताहितं न प्रतिपद्यन्ते। तानि कथमभिष्टुतानि, स्तोतुरभिमतस्यार्थस्य पतित्वं करिष्यन्ति? न हि तानि स्तुतिनिन्दे विशेषतो विदुः। अपिचाश्वादिषु चितिरपि काचिदस्ति, न त्वक्षादिष्वसावस्ति॥ ४॥

अथाप्यष्टौ द्वन्द्वानि स न मन्येतागन्तूनिवार्थान् देवतानां प्रत्यक्षदृश्यमेतद्भवति माहाभाग्याद् देवताया एक आत्मा बहुधा स्तूयत एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्त्यपि च सत्त्वानां प्रकृतिभूमभिर्ऋषयः स्तुवन्तीत्याहुः प्रकृतिसार्वनाम्न्याच्चेतरेतरजन्मानो भवन्तीतरेतरप्रकृतयः कर्मजन्मान आत्मजन्मान आत्मै-

वैषां रथो भवत्यात्माश्व आत्मायुधमात्मेषव
आत्मा सर्वं देवस्य देवस्य ॥ ५ (४) ॥
इति सप्तमाध्यायस्य प्रथमः पादः ॥ ७,१ ॥

तस्मात् "स" शिष्य मेधावी "न मन्येत" न जानीयात, —सम्यगविरुद्धमतद्वस्तेण लक्षयमुच्यत इति। अपि च सुतरां न मन्येत,—"आगन्तूनिवार्थान् देवतानाम्" मन्यमान। लोके तावदेते मनुष्याणामनित्यानामश्वादयोऽर्था, आगन्तव अपायिनश्चानित्या। तद्यदि देवतानामप्येवमेव, ततस्तासां तेषां चानित्यत्वात् स्तुतिरनर्थिका। अपि च "प्रत्यक्षदृश्यमेतत भवति" प्रत्यक्ष एवैतत् दृश्यते। यथा—उपकरणमश्वादय उपकर्त्तव्या मनुष्या। देवतानामपि चैन्द्राग्निसूर्य्यप्रभृतीनामुपकरण हरिरोहिद्धरित्प्रभृतयोऽश्वा। तस्मादुभयेषामुपकरणोपकर्त्तव्यतासामान्यात् मनुष्याश्ववदनित्यत्वमिति युक्तम।

यत् स शिष्यो न मन्यते नैतत् सम्यग् विधीयत इति, तस्मात प्रतिसमाधातव्यमित्युपोद्घत्य उत्तरमुच्यते,—"माहाभाग्यात् देवताया एक आत्मा बहुधा स्तूयते" यस्मात, तस्मात् सर्वमेतत सम्पद्यते। भज्यत इति भाग सेव्यत इत्यर्थ। तत् पुनरैश्वर्य्यं महत्। "अणिमा महिमा लघिमा प्राप्ति प्राकाम्यमेव च। ईशित्वञ्च वशित्वञ्च यत्र कामावसायिता॥"—इत्येवमनेन महदैश्वर्य्येण भज्यते। महदेतदैश्वर्य्यं भजत इति वा महाभागा देवता, तद्भावो माहाभाग्यम्, तस्मात् माहाभाग्याद्धेतोरेकोऽपि सन देवतात्मा बहुधा स्तूयते, प्रकृतिभेदेन वा अप्रकृतभेदेन वा वदमान, निगमो-

ऽपि हि भवत्यैश्वर्यप्रख्यापकः,—"रूपं रूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं परि स्वाम्। त्रिर्यद्दिवः परि मुहूर्तमागात् स्वैर्मन्त्रैरनृतुपा ऋतावा॥"—इति (ऋ॰ सं॰ ३, ३, २०, ३)। यथा यथा च लक्ष्यं तथा लक्षणं प्रवर्त्तयितुमर्हति, दृष्टानुविधानाच्छन्दसः, छन्दसि हि लक्ष्ये यावदभिधानं देवतानानात्वविधिव्यवस्था। संवादसूक्तानि च कयाशुभादीनि इन्द्रमरुदादिसंवादव्यपदेशहेतुना गमयन्ति, तदशक्यमपासितुम्। तथा त्रिस्थानानां यान्यसङ्करवर्त्तीनि हविर्वहनरसादानमत्रणान्यग्नीन्द्रसूर्य्याणां कर्माणि लिङ्गान्यर्थदर्शनहेतूपबृंहितानि त्रित्वं गमयन्ति, तदपि चाशक्यमपासितुम्। तथाचैकात्म्यमिन्द्रं मित्रं वरुणमग्निमित्यादयो गमयन्ति निगमाः,—"इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥"—इति (ऋ॰ सं॰ २, ३, २२, ६)। तदप्यशक्यमपासितुम्। त्रिष्वपि चैतेषु पक्षेषु ऐश्वर्यमपरिहीणं देवतायाः। तत्रैवं सत्यैकात्म्य तावदाग्निस्य प्रतिसमाधानम्।—

"एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति"। माहाभाग्यादेकस्य देवतात्मनः प्रकृतिभेदेन चाप्रकृतिभेदेन चेति। चेतनाचेतनविकरणधर्मित्वादात्मानं विकुर्वतोऽस्य अन्ये देवाः प्रत्यङ्गानि भवन्ति। अग्नीन्द्रसूर्य्याणां परस्परापेक्षमन्यत्वम्, अनन्यत्वं त्वेकेन देवतात्मना महता सह। यथा घटादीनां मृदा, न ह्यङ्गिनमङ्गान्यतिरिच्यन्ते, भेदेनाग्रहणात्। न चाङ्गान्यनपेक्ष्य प्रत्यङ्गानि भवन्ति, न ह्यधिष्ठानमनपेक्ष्य प्रत्यधिष्ठानं नाम भवति। तस्मादग्नीन्द्रसूर्य्यात्मकस्य देवतात्मनोऽङ्गानि,—जातवेदोवायुभगप्रभृतीनि, प्रकृत्यश्वप्रभृतयश्च प्रत्य-

ङ्गानि। स एष महानात्मा अग्नीन्द्रसूर्याद्यङ्गप्रत्यङ्गभावेन व्यूहमनुभवन् एकोऽपि सन् बहुधा स्तूयते ॥

"अपि च" एवं कृत्वा "सत्त्वानाम्" अश्वादीनां "प्रकृतिभूमभिः ऋषयः स्तुवन्तीत्याहुः"। प्रक्रियन्ते अस्यां सर्वे विकारा इति प्रकृतिः, स सत्तालक्षणो महानात्मा हिरण्यगर्भ इति। वक्ष्यति हि,—"स एष महानात्मा सत्तालक्षणः, तत् परम्, तत् ब्रह्म०——० स भूतात्मा, सैषा भूतप्रकृतिः" —इति। तस्या भूमा बहुत्वम्, अनेकधा विपरिणामः स्थावरजङ्गमभावेन। प्रकृतेर्भूमानि बहुत्वानि यानि सत्त्वानां तैरनन्यविषयत्वं पश्यन्तः कार्यकारणयोरनन्यत्वात् कारणमहिमभिः तान्यश्वादीन्यभिष्टुवन्तीत्याहुरात्मविदः। तद्यथा, —"द्यौस्ते पृष्ठं पृथिवी शरीरमात्मान्तरिक्षम्"—इत्येवमादीनि। आत्मैव सर्वं स्थावरजङ्गममित्येवेत्य अश्वमेधे 'मूलेभ्यः स्वाहा, शाखाभ्यः स्वाहा'—इत्येवमादिभिस्तेन तेन वैशेषिकेण स्थावरजङ्गमात्मना प्रकृतेरभिन्नं नावस्थानेनावस्थितो महानेवात्मेज्यते, न ह्यदेवता यागमर्हति। यच्चान्यदपि किञ्चिदेवम्प्रकारमदेवताभिमतमिज्यते। गृह्ये च बलिप्रभृतिकर्मादौ सर्वत्र स एवेत्युपेक्ष्यम् ॥

"प्रकृतिसार्वनाम्न्याच्च" एतदुपपन्नम्, नैताः अदेवताः देवतावत् स्तूयन्ते, किन्तु महानेवायमात्मा विश्वरूपः स्तूयत इति। प्रकृतिसार्वनाम्न्यादिति। नतिमात्रं नाम नामनं सञ्ज्ञा सर्वत्वेव नाम सर्वनाम, प्रकृतेः सर्वनाम प्रकृतिसर्वनाम, तद्भावः प्रकृतिसार्वनाम्न्यम्, तस्मात् प्रकृतिसार्वनाम्न्याच्च हेतोः। यस्मात् महाभाग्ययुक्ता देवता प्रकृतिः, यस्माच्च सर्वत्वेन नता, तस्माद्धेतोर्नैताः अदेवताः देवतावत् स्तूयन्ते।

अपि चैतदभिहितम्,—"आगन्तूनिवार्यान् मन्यमानो

हरिरोहिद्धरितादीनिन्द्रादीनां मनुष्याश्ववदनित्यत्वमवेत्य न सम्यगभिधीयत इति स न मन्येत'—इति। अत्र ब्रूमः,— मनुष्यधर्मविपरीतो हि देवताधर्मः, अनैश्वर्यान्मनुष्याणामैश्वर्याच्च देवतानाम्। तत् कथम्? इति। अतो भेदमाश्रित्य प्रतिसमाधीयते,—"इतरेतरजन्मानो भवन्ति"। इतरेतरप्रकृतयो देवाः, ऐश्वर्यात्, न मनुष्याणामिव शक्तिरस्ति, अनैश्वर्यात्। मनुष्याणां हि पिता, पुत्रं जनयतीति पिता प्रकृतिः, न पुनरिह्न्वापि पुत्रः पितरं जनयति। देवानां त्वग्नेः सूर्योऽजायत,—"एष प्रातः प्रसुवति"—इति च विज्ञायते, तस्मात् सूर्यस्याग्निः प्रकृतिः। सूर्याद्वाग्निः सायं जायते, तस्मादग्नेः सूर्यः प्रकृतिः। अदितेर्दक्षो दक्षाच्च अदितिरिति। यथाध्यात्मेऽपि,—कोष्ठादग्नेर्मोद इन्द्रः, बलादिन्द्राभ्यमानः अग्निरित्येवमादि। स एष सर्वथाप्यचिन्त्यो देवताधर्मः। तासामनन्यान्महाभाग्यस्य। तत्रैवं सत्यमवसमध्यवसातुम्,—यथा मनुष्याणामागमवतोऽश्वादन्यत्वमेव देवतानामपीति। तस्मात् दोषानुपपत्तिरनागमत्वात् देशग्रादीनामिति॥

अथ किमर्थमीश्वराः सन्तो देवता जायन्ते? इति,— "कर्मजन्मानः" कर्मफलसिद्धये लोकस्य अग्निवायुसूर्या जायन्ते, न ह्यृतेऽस्य ऋते लोकस्य कर्मफलसिद्धिः स्यात्— विद्यामानमपि चैश्वर्यमैश्वर्यवति न प्रख्यातिमियात्, ईश्वरत्वमर्थमप्रतीत्य। तस्मादैश्वर्यप्रख्यापनाय जायन्ते।

कर्मफलसिद्धेर्लोकमनुजिघृक्षन्तः कुत. पुनर्जायन्ते?— "आत्मजन्मानः" योऽयमेक आत्मा बहुधा स्तूयत इत्युक्तम्, सर्वमूर्त्तिरसावुपरतसर्वमूर्त्तिः, प्रलये भावान्यः स्वभावः, सृष्ट्यादौ योऽयमात्मा विभज्य जगदाब बिभर्त्ति, तस्माज्जायन्ते

इत्यात्मजन्मानः। क एव तस्मान्न जायते ? इति चेत्, सत्यम्। सर्वं तस्मात् जायते न कामकारेण, देवास्तु तमात्मानं पश्यन्तो योगेन ततः कामकारतो जायन्ते। किमेषां जन्म ? यदेषामिच्छतां सङ्कल्पानुविधायिकर्मानुरूपं यथाकालमात्मनः कार्य्यकारणमुत्पद्यते, तदेतेषां जन्म, तदनीश्वराणां नास्ति॥

यतश्चेश्वरास्ते तस्मादात्मनस्तत्सङ्कल्पानुविधायित्वात् "आत्मैवेषां रथः भवति, आत्मा अश्वः, आत्मा आयुधम्, आत्म इषवः, आत्मा सर्वं देवस्य"। तत्र यदुक्तम्,—'अश्वादीनि सत्त्वानि, अचरथप्रभृतीनि च द्रव्याणि अदेवताः'—इति, एतदयुक्तम्। देवता एवेमाः, रथादिरूपेण हि देवतैवात्मानं विकृत्य प्रकृतिभेदेन रथादिसाध्यमर्थं साधयति। सा तद्रूपा सती रथादिस्तुत्या स्तूयते, सा च स्तुतिसमवेतमर्थमाशासितं स्तोतुस्तेनैव रूपेण साधयितुमलमिति॥

तस्मात् "माहाभाग्यादेकैकस्या अपि बहूनि नामधेयानि" तासामेव तिसृणामग्न्यादीनां माहाभाग्यादैश्वर्य्ययोगादात्मानमनेकधा विकुर्वतीनामेकैकस्याः प्रतिविकारं नामधेयप्रतिलम्भात् तेनैव रूपेण धारयन्त्यात्मानमिति "यत्कामऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते"—इत्यस्य लक्षणस्याव्याघातः, तस्मात्तस्यगेवोक्तमिति। अथवा स्तुतिसङ्क्रमन्यायेन चतुर्दशेऽध्याये "यज्ञसंयोगात् राजा स्तुतिं लभेत"—इत्यत्र पुनः प्रतिसमाधास्यामहे॥५॥

इति निरुक्तवृत्तौ (द्वादशाध्यायस्य) सप्तमाध्यायस्य प्रथमः पादः॥७, १॥

———

द्वितीयः पादः॥

तिस्र एव देवता इति नैरुक्ता अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वान्तरिक्षस्थानः सूर्य्यो द्युस्थानस्तासां माहाभाग्यादेकैकस्या अपि बहूनि नामधेयानि भवन्त्यपि वा कर्मपृथक्त्वाद्यथा होताध्वर्य्युर्ब्रह्मोद्गातेत्यप्येकस्य सतोऽपि वा पृथगेव स्युः पृथगपि स्तुतयो भवन्ति तथाभिधानानि यथो एतत्कर्मपृथक्त्वादिति बहवोऽपि विभज्य कर्माणि कुर्युस्तत्र संस्थानैकत्वं सम्भोगैकत्वञ्चोपेक्षितव्यं यथा पृथिव्यां मनुष्याः पशवो देवा इति स्थानैकत्वञ्च सम्भोगैकत्वञ्च दृश्यते यथा पृथिव्याः पर्जन्येन च वाय्वादित्याभ्यां च सम्भोगोऽग्निना चेतरस्य लोकस्य तत्रैतन्नरराष्ट्रमिव ॥ १ (५) ॥

"तिस्र एव देवता इति नैरुक्ताः"—इति उपोद्घातः। "सैषा देवतोपपरीक्षा"—इत्यधिकारे वर्त्तमाने "यत्काम ऋषिर्यस्याम्"—इत्येवमादि मन्त्रलक्षणदेवतानुक्रम्, तत् पुनरदेवतात्वादश्वादीनाम् "मा नो मित्रो वरुणो अर्य्यमा"—इत्येवमादिषु व्याहन्यमानमपेक्ष्य "स न मन्येत"—इत्येवमादिनाक्षिप्ते "माहाभाग्यात् देवताया एक आत्मा बहुधा स्तूयते"—इत्येवमादिना "पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्"—इति (ऋ॰ सं॰ ८, ४, १७, २)। एवमादिभ्यो

मन्त्रवाक्येभ्यः—"अथातो विभूतयोऽस्य पुरुषस्य"—इत्येवमादिभ्यश्च ब्राह्मणेभ्यः—"एष इन्द्र एष प्रजापतिः"—इत्येवमादिभ्यश्चैकात्मेः सामर्थ्यमुन्नीयात्मवित्वेन, आत्मैवेदं सर्वम्—इत्येकात्मतमुक्तम्। आत्मविदां ह्यात्मन्युपजातविशिष्टभावनानामात्मशरीरस्थानामात्ममयमेवेदं सर्वमनुपश्यतामात्मार्थः सर्वो वेदोऽन्या च सर्वा वाक्, न ह्यात्मनोऽन्यद् व्यतिरिक्तमभिधेयमस्ति, स त्वशेषाद् यदभिधानमभिदध्यात्। अथ पुनरुपक्रमः पुरुषार्थस्य,—प्रथममनिश्रेणीफलकस्थानीयेन केवलेनाधियज्ञेन तत्र चावधाने अधिदैवताध्यात्मज्ञानं किञ्चिद् विदुषः पृथगात्मनो देवताः पश्यतः, परिच्छिन्नफलाभिप्रायस्याधियज्ञं प्रयुयुक्षमाणस्य, पूर्वजन्माविद्यावासितान्तःकरणस्याभिधानस्तुतिभेदाभ्यां विधिमन्त्रार्थवादविचारसेन यथायज्ञं पृथगिव देवताः प्रकाशन्ते। तदुक्तम्,—"अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद"—इति। तदाहुः,—"आत्मयाजी श्रेयान् देवयाजी वा? इति, आत्मयाजीति ह ब्रूयात्" तदेवं ब्रह्म देवतात्वस्य मूलम्, ऐकात्म्यमात्मविदः प्रत्यवभासते, यावदभिधानन्तु याज्ञिकाः, प्रतिविधिमन्त्रप्रधानात्, यज्ञावभिपति, तन्नैरुक्तात् प्रत्यवभासते अत इदमुच्यते,—"तिस्र एव देवता इति नैरुक्ताः"। तिस्र इति सङ्ख्या। एवेत्यवधारणमितरौ पक्षौ अपेक्ष्य॥

कतमास्ताः? इति,—"अग्निः पृथिवीस्थानः, वायुः वा इन्द्रः वा अन्तरिक्षस्थानः, सूर्यः द्युस्थानः"। कथोपपत्त्या वित्तं परिजग्रहुः? स्थानभेदात्, प्रत्यक्षलिङ्गादन्यार्थदर्शनाच्च, लिङ्गं त्रिधा हि भवति,—"विश्वकर्मा ह्यजनिष्ट देव आदिद् गन्धर्वो अभवद् द्वितीयः। तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात् पुरुत्रा (ऋ० सं० य० वा० सं०

१७, ३२।"—इत्यत्र, "अजस्य नाभावध्येकमर्पितम्"—इति (ऋ० सं० ८, ३, १७, ६)। अन्यार्थदर्शनाच्च। "प्रजापतिर्वै त्रीन् महिम्नोऽसृजताग्निं वायुं सूर्यम्"—इति "प्रजापतिर्लोकानभ्यतपत् तेभ्योऽभितप्तेभ्यो रसान् प्राबृहदग्निं पृथिव्या वायुमन्तरिक्षात् सूर्यं दिवः"—इति "अग्निः पृथिवीस्थानः, वायुर्वेन्द्रो वान्तरिक्षस्थानः, सूर्यो द्युस्थान."—इति। "तिस्र."—इति प्रकृतेः स्वरूपग्रहणात् स्थानभेदं त्रित्वे हेतुमुपसंसूचयति। कुतो नियमः? अग्न्यादीनां पृथिव्यादिषु निगमेभ्यः,—"पृथिव्यसि जन्मना वशासाग्निं गर्भमधत्थाः, अन्तरिक्षमसि जन्मना वशासा वायुं गर्भमधत्थाः, द्यौरसि जन्मना वशासाऽऽदित्यं गर्भमधत्थाः"—इत्येवमादिभ्यो निगमेभ्यः॥

"वायुर्वेन्द्रो वा"—इति किमेकस्य पर्य्यायवचनावेतौ शब्दौ, उताभिधेयौ भिद्येते? इति। कुतः सन्देहः? उभयथा हि प्रसिद्धिः,—प्रत्यभिधानञ्चार्थभेदो दृष्टः,—गौः अश्वः इति, यथाभिधानभेदेऽपि चैकार्थता दृष्टा,—हस्तः करः पाणिः इति यथा। अतो युक्तः संशय इति। याज्ञिकपक्षे तावददोषः। अर्थभेदेऽपि चैतेषां यावन्त्यभिधानानि तावत्यो देवताः, अस्य पुनराचार्य्यस्य स्वसिद्धान्तावलम्बिनः "तिस्र एव देवता."—इति प्रतिज्ञावतः कुतो वाय्विन्द्रशब्दयोरर्थभेदः? भेदे हि प्रतिज्ञाहानिः स्यात्, अपि च भेदेऽभिप्रेते नैकवचनेन निरदेक्ष्यदन्तरिक्षस्थान इति, अभिधानमात्रे भिन्नेऽप्यभिधेयस्य चाभेदे अन्तरिक्षमस्य स्थानमित्युपपत्तेः।' यश्चैकवचनो विशेष्योऽन्तरिक्षस्थानशब्देन विशेष्यते, इतरथा ह्यन्तरिक्षस्थानौ इत्यवक्ष्यत् द्वयोर्विशेष्ययोः। अपि च "वायवायाहि दर्शत"—इति (ऋ० सं० १, १, ३, १)। वायोः प्राधान्यस्तुतिमुदाहृत्य

तां निरुच्य तस्यां सोमपानसम्बन्धमुपलक्ष्य,—ऐन्द्रत्वं च सोमस्यावेक्ष्य "अंशुरं शुष्टे"—इत्येतस्मिन्, "आ त्वमिन्द्राय प्यायस्व" "तुभ्यमिन्द्रः प्यायताम्"—इति नान्वर्वेन्द्रशब्दात् मुख्याभिसम्बन्धिनो मध्यमात् सोमपानं सम्भवतीति प्रतीत्य वायुशब्दस्येन्द्रशब्दस्य समानार्थतां दृढमवधार्य्य अश्नुथमाणो वायुशब्दस्य मध्यमादर्थान्तरे वृत्तिमपर्य्यायशब्दवादिनमाचिपन्नाह "कमन्यं मध्यमादेवमवक्ष्यत्"—इति। उत्तरमपि च यमुदाजहार निगमं "तस्यैषा परा भवति"—इत्युपोद्ध्ये तदैन्द्रादेव सूक्तात् "अस्येन्द्रस्य वायोर्यथा मैत्री न विद्ध्येत्, तथा अन्नमेवमभिवर्द्धेयु."—इति वायुशब्दस्येन्द्रविशेषणत्वं प्रतीत्य इन्द्रप्रधानत्वात् सूक्तस्य च इन्द्र उपात्तः। तस्मादाचार्य्यस्य मध्यमपर्य्यायवचनावेतौ शब्दाविति॥

सत्यपि तु पर्य्यायवचनत्वे मुख्यतरः सम्बन्धो मध्यमस्येन्द्रशब्देन, तथा वायुवरुणेन्द्रादिभिः। तत् कुत' तथा निगमे दर्शनात्,—"सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः। स प्रथमो बृहस्पतिश्चिकित्वांस्तस्मा इ इन्द्राय सुतमाजुहोत स्वाहा"—इति सा प्रथमा संस्कृतिरित्येतस्मिन्ध्रुक्रामन्थिनोर्हवनमन्त्रे यं मध्यमो वरुणोऽपि मित्रोऽग्नि', तस्मै इन्द्राय सुतमाजुहोत इति वरुणादीन्यनुक्रम्य विशेषतश्चतुर्थ्यन्तेन इन्द्रशब्देन सम्प्रदानेन सम्बध्नाति तस्मै मध्यमायेन्द्रायेति, तस्मात् सम्प्रदानेन सामानाधिकरण्यात् मन्त्रान्ते मध्यमशब्देन्द्रशब्दयोर्मुख्यतरः सम्बन्ध इति गम्यते, यथा मध्यमस्य ज्योतिषं मुख्यः सम्बन्ध इन्द्रशब्देन, तथेतरयोरपि पार्थिवोत्तमयोरग्निसूर्य्यशब्दाभ्याम्, प्रसिद्धतरत्वात् सम्बन्धस्य, न तथेतरैर्जातवेदःप्रभृतिभिः। सति च गौणमुख्यत्वे युक्तं यदन्यभि

धानेन प्रसिद्धतरमग्न्यन्तेन पार्थिवस्य ज्योतिष उपदेशः क्रियते, न जातवेदप्रभृतिभिः, तथोत्तमस्य सूर्यशब्देन उपदेशः क्रियते, न सवितृभगप्रभृतिभिरिति ॥

कस्मात् पुनर्मध्यमस्य शब्दद्वयेनोपदेशः क्रियते, पार्थिवोत्तमयोरेकैकेन ? इति। मध्यमस्य हि द्वौ कर्म्मात्मानौ विद्युद्वाय्वाख्यौ। तयोरनित्यदर्शन एको विद्युदाख्यः, नित्यदर्शनस्तु वाय्वाख्यः त्वगिन्द्रियप्रत्यक्षः। तत् कथं नाम चिन्त्यपि स्थानेष्वभिमानिन्यो देवता: कर्म्माभिरैश्वर्येण प्रत्यक्षत एवोपदिष्टाः स्युः ? इत्यत "वायुर्मध्यमस्थान."—इति वाय्वाख्येन कर्म्मात्मना मध्यमस्थानमुद्दिश्यामुख्यत्वाद् वायुभिधानस्य, मुख्यत्वाच्चैन्द्राभिधानस्य "इन्द्रो वा"—इत्याह। एवमुभयं कृतं भविष्यति,—अनुपरतक्रियाख्यापारता च मध्यमस्य वाय्वाख्येन कर्म्मात्मना इतरज्योतिर्विद्दर्शिता भविष्यति, मुख्येन चेन्द्रशब्देन मुख्यः सम्बन्धोऽपरिहापितो भविष्यतीत्युभयमुक्तम्,—"वायुर्वेन्द्रो वान्तरिक्षस्थान"—इति। न तु पार्थिवोत्तमयोर्द्वौ कर्म्मात्मानौ स्तो यथा मध्यमस्थानस्य, तस्माददोषो मध्यमस्याभिधानद्वयोक्ताविति ॥

आह,—यदिदमभिधानबहुत्वं जातवेदो वैश्वानर इत्येवमादि, विद्वे सर्व्वं तत् किं ज्ञातम् ? इति। उच्यते,—"नाना माहाभाग्यात् एकैकस्या अपि बहूनि नामधेयानि भवन्ति"। तासामेव तिसृणामग्न्यादीनां माहाभाग्यात् ऐश्वर्ययोगात् एकात्मानमनेकधा विकुर्व्वतीनाम् एकैकस्याः प्रति विकारं जातवेद, वैश्वानर, वरुण, रुद्र, अश्विनौ, उषा इत्येवमादीनि बहूनि नामधेयानि भवन्ति, प्रतिस्थानं स्वप्रकृत्यभेदादैकात्म्यदेवैकत्वं न जहाति सा सा देवतेति ॥

"अपि वा कर्म्मपृथक्त्वात्"। अपि चैव विकरणधर्म्मिता-

—"हरिभ्याम्" पृथग्वायोः—"नियुद्भिः" पृथक् सूर्यस्य—हरिद्भिः, पूष्णोऽजाभिः, मरुतामर्णीभिर्गोभिरश्वसाम्। स्तुतिव्यवहारे च प्रायश्चित्तम्, तदनुपपन्नञ्च पर्यायवचनत्वे तेषाम्। ते वयं स्तुतिनियमात् पश्यामः पृथक् पृथगग्निवैश्वानरप्रभृतय इति॥

"तथाभिधानानि"। यथैव हि स्तुतिभेदात् स्तुत्यभेद', एवमेवाभिधानभेदादभिधेयभेदोऽपि भवितुमर्हति। प्रसिद्धतरं चेदं लोके प्रत्यभिधानमर्थभेद इति, न तथैकस्यानेकाभिधानता। तस्मात् पृथक् पृथगग्निजातवेदोवैश्वानरादिशब्दानामभिधेया इति स्थितिः। स्तुतिष्वेव हि अभिधानभेदत्व इति समानार्थता हेत्वोः? इति चेत्, न, विधावप्यभिधाननियमदर्शनात्,—"आग्नेयमष्टाकपालं निर्वपेत्" इति येनैवाभिधानेन चोद्यते, तेनैव निर्वपणादारभ्य समाप्यते, तस्मादसमानार्थतेति॥

"यथो एतत्" यत् पुनरेतदुक्तम् "कर्मपृथक्त्वादिति"। अनैकान्तिक एष दृष्टान्त', दृष्टो हि प्रकृतिभेदात् प्रतिकर्मभेदः, सा च पृथक्त्वादिव्यवस्था माहाभाग्यादित्याचार्य्येणात्र पृथक्त्वे हेतुर्न प्रयुक्त', दृष्ट एव हि याज्ञिकपक्षे प्रत्यभिधानमर्थभेद इति। तत् किमेकत्वं नास्त्येव? तत्रास्ति, गुणतः॥

कथम्? "तत्र संस्थानैकत्वं सम्भोगैकत्व' च उपेक्षितव्यम्"। तत्र तस्मिन् पृथक्त्वे सति संस्थानैकत्व' सम्भोगैकत्व' च उपपत्तित ईक्षितव्यम्। तत्र दृष्टान्तः,—"यथा पृथिव्यां मनुष्याः पशवो देवा इति स्थानैकत्वम्, सम्भोगैकत्व' च दृश्यते"। सह स्थानतया एकत्व' स्थानैकत्वम्, पृथिवीत्युक्ते यावता सह भावेन समानं स्थानम्, ते सर्वे तद्ग्रहणेन गृह्यन्ते, एवमुत्तरयोरपि स्थानयोः। एवम्प्रकारमेकत्वं सम्भोगैकत्वं

चोपचितव्यम्। सम्भोगहेतुकमेकत्व सम्भोगैकत्वम्। सम्भोगो नाम इतरेतरोपकारित्वम्, समानकार्यतेत्यर्थः। तच्च पुन-र्भिन्नस्थानानामपि भवति, किमङ्ग पुन. समानस्थानाना-मिति। "यथा पृथिव्या. पर्जन्येन च, वाय्वादित्याभ्यां च सम्भोग."। कथम्? पृथिव्योषध्युत्पत्तौ स्वकार्यारम्भे पर्ज-न्यवाय्वादित्यकृतमुपकारमपेक्षते। तदुक्तम्,—"वर्षन्तपन्ति पृथिवीमनूपा"—इति (ऋ० सं० ७, ७, १८, ३)। "अग्निना च इतरस्य लोकस्य"। तदप्युक्तम्,—"अग्निर्वा इतो वृष्टिं समीरति, "दिव जिन्वन्त्यग्नयं"—इति च (ऋ० सं० २, २, २३, ५)। तदेवम्प्रकारमेकत्व कार्य्यैकत्वात् स्थानैकत्वाद्वा भाक्तं न प्रतिषिध्यते, लोकेऽपि समानकार्य्यता भवति येषां तेषामैक्यमित्युच्यते॥

क्व पुनरत्राविरोधी भेदाभेदे दृष्टान्तः? इति। उभये हि प्रमाण भेदाभेदवादिनः—आत्मविन्नैरुक्तयाज्ञिका, न हि ते स्वमनीषिकया भेदाभेदौ प्रकल्पयन्ति, किन्तर्हि? मन्त्रार्थ-सुहित्य। तस्माद् वक्तव्य. समञ्जसो दृष्टान्त? उच्यते,—"तत्र एतत् नरराष्ट्रम् इव"। यथा राष्ट्रमित्यभेद, नरा इति भेद, एव पृथिव्यग्निरित्यभेद, जातवेदा वैश्वानर इति भेद। एवमुत्तरयोरपि स्थानयो.। तथा आलेत्यभेद, लोकाश्च लोकिनश्चेति भेदः। सर्वथैव सामान्यविशेषधर्मो द्रष्टव्य.। पुरुषवुद्ध्यपेक्षातश्च गुणप्रधानतोऽपेक्षा पुरुषानुरागविशेषत.॥

तत्रैव सति आत्मविद आत्मनि विलननात्वे गुणीकृत्य तद-ङ्गप्रत्यङ्गभावेन कल्पयित्वैकमात्मान पश्यन्ति। तथा नानात्वै-कत्वे नैरुक्ता इति विल्वे, तथा विलैकत्वे याज्ञिका नानात्वे। एवमेषामविरोधः। अस्ति हि शब्दार्थयो वक्तृप्रतिवक्तृवशेन तद्बुद्ध्यपेक्षया अन्वयव्यतिरेकाभ्यां वर्त्तितुं शक्ति, न तु

स्वाभाविकमभिधानाभिधेयसम्बन्धमकृतकमप्रच्यवमानावभिधानाभिधेयौ जहीताम्, न ह्यग्नेरवभास्य प्रत्ययभासनशक्तिः, अवभासस्य चावभास्यमानता शक्तिर्व्यवधानमन्तरेण विहन्यते, न ह्यकृतका स्वयमप्यधीतको विकम्पते। वैदिकाना पदवाक्यप्रमाणानामात्मभावानु शयदर्शनात्मवित्रै रक्तयाभिका वेदस्याविपर्य्यासिनीमध्यात्माधिदैवाधियज्ञविषयनियतामर्थाभिधानशक्तिं विपर्य्यासिनीमिव मन्यमाना परस्परतो विपर्य्यस्यन्ते। तदेतत् सर्वथापि भेदाभेदवर्त्ति देवतासतत्त्वं यथार्थं वक्तृप्रतिवक्तृवशेन प्रख्यातिमुपनयत्। स्तुतिरूपकेणात्मनोऽर्थसतत्त्व तथाभूत मन्त्रैराविष्क्रियते। तदुक्तम्,—"तवोपमार्थेन युद्धवर्णा भवन्ति"—इति, इषितश्चैतन्मन्त्रेण,—"न त्वं युयुत्से"—इति। निश्चितरूपत्वेन स्वे स्वे विषयेऽध्यात्मादौ परमार्थतया ऐकात्म्ये निष्ठा, तदन्तत्वात् वाच.। तदुक्तम्,—"यतो वाचो निवर्त्तन्ते"—इति॥ १॥

अथाकारचिन्तनं देवतानां पुरुषविधाः स्युरित्येकं चेतनावद्वद्धि स्तुतयो भवन्ति तथाभिधानान्यथापि पौरुषविधिकैरङ्गैः संस्तूयन्ते। ऋष्वा ते इन्द्र स्थविरस्य बाहू यत्संगृभ्णा मघवन् काशिरित्ते। अथापि पौरुषविधिकैर्द्रव्यसंयोगैः। आ द्वाभ्यां हरिभ्यामिन्द्र याहि कल्याणीर्जाया सुरणं गृहे ते। अथापि पौरुषविधिकैः कर्मभिः। अद्धीन्द्र पिब च प्रस्थितस्य। आश्रुत्कर्ण श्रुधी हवम्॥ २ (६)॥

"अथाकारचिन्तनं देवतानाम्" । आह,—माहाभाग्याद् देवताया विकरणधर्मित्वादनियम आकारे, अथ नियमः? ननु खल्वयं व्याघातान्माहाभाग्याद्देवताया इत्येतद्वक्ष्यते, तस्मादथाकारचिन्तनं देवतानामित्येतदनारभ्यम्? उच्यते,—आरभ्यमेव ; प्रकृतिसत्तामनपेक्ष्य विकरणं नाम देवताधर्मो नास्ति, तस्मात् प्रकृतिश्चिन्त्यते देवतायाः । अपि च, यत एवेश्वरा देवास्तत एवोभयभावित्वात् किमाकारवत्त्वं स्वभावो देवतायाः अथवा निराकारवत्त्वम्? इति तत्तत्त्वपरिज्ञानाय चिन्त्यते ॥

अस्तु तावदियं चिन्ता, किमिदमविशेषेण पक्षत्रयमस्याश्चिन्ताया विषय, उत वा कस्मिंश्चिदेवैकस्मिन् पक्षे द्वयोर्वेति-चिन्त्यते? इति ॥

इह तावदात्मविदामेक आत्मा स प्राग्विकारापत्तेः सन्मात्र उदस्तसर्वाकृतिः, सर्गस्थित्योरुपात्तसर्वाकृतिः, तदेवमसावनाकृतिः, सर्वाकृतिर्वा ? इत्यनाख्यदभूतोऽस्याश्चिन्ताया आत्मविषयः ।

अथ पुनर्यदासावुपात्तत्रिस्थानावस्थो नैरुक्तपक्षाभिमतमग्निवायुसूर्यभावं बिभर्त्ति, तदापि प्रत्यक्षत्वादविषयत्वमस्याश्चिन्तायाः । प्रत्यक्षत्वात्तेषामपौरुषेयविध्यश्च तत्पक्षेऽप्याकारचिन्ता विषयाभावादुदस्यत एव ।

अथ पुनर्याज्ञिकानां यावदभिधानं देवतापक्षवादिनाम् अग्निवायुसूर्याभिधानानि प्रत्यक्षार्थाभिधानसम्बन्धीनि, जातवेदोरुद्रेन्द्रपर्जन्याश्विप्रभृतीन्यप्रत्यक्षार्थाभिसम्बन्धीनि, शब्दमात्रं प्रत्यक्षम् । अभिधानानां लोके दृष्टसाकृतिपदार्थवत्त्वम्, अनाकारार्थवत्त्वञ्च, रुद्रेन्द्रादीनां शब्दानां मन्त्रगतानां लौकिकैर्मनुष्यादिशब्दैर्वाय्वाकाशादिभिर्वाभिधानवत्त्वे

तुल्यम्? तत्रैतद् भवति, अप्रत्यक्षत्वाद्रुद्राद्यभिधानानाम् धर्म्य,—किन्तु खल्वमी रुद्रादिशब्दाः मनुष्यादिशब्दवदाकारवदर्थेनार्थवन्तः, उत वाय्वात्माकाशादिशब्दवदनाकारेण? इति॥

एवमयमस्याचिन्तायां याज्ञिकपक्षो विषयः "अपि वा पृथगेव स्युः"—इति। अतएव याज्ञिकपक्षादनन्तरमिदमारब्धम्,—"अथाकारचिन्तनं देवतानाम्"—इति॥

किमाकारस्य चिन्त्यते,—किमस्ति उत नास्ति? इति। यद्यस्ति कीदृशः? इह द्विविधा आकारिणोऽर्थाः,—चेतनाश्चाचेतनाश्च। तत्र चेतना मनुष्यादयः, अचेतनाश्च पाषाणादयः। तत्रैतद् भवति किममी मनुष्यादिवच्चेतना, उत पाषाणादिवदचेतना द्रव्यमात्रम्?—इत्यूयोऽस्य संशयः॥

तदृष्युद्रासाय पक्षः परिगृह्यते,—"पुरुषविधाः स्युः इति एकम्"—इति। मन्त्रप्रत्ययमस्तित्वं देवताया अभ्युपगतम्,—यत्काम ऋष्युपक्रमस्य तद्दैवतः स मन्त्रो भवतीति, सति हि देवतास्तित्वे तद्दैवतत्वं मन्त्रस्य। यदि चैवमाकारोऽपि तत्प्रत्यय एव भवितुमर्हति?, अस्ति चेदं पौरुषविध्यं मन्त्रेषु देवतासम्बन्धीनि। यत उच्यते,—"पुरुषविधाः स्युः इति एकम्"। मन्त्रेषु दर्शनम् इति वाक्यशेषः। 'पुरुषविधाः' पुरुषप्रकाराः, पुरुषविग्रहा इत्यर्थः॥

कोऽत्र हेतुः? "चेतनावद्वद्धि स्तुतयो भवन्ति"। 'हि'-शब्दो हेत्वर्थः, यस्माच्चेतनावतामिव स्तुतयो मन्त्रा अभिधायका भवन्ति। पूर्वो वतिर्मत्वर्थे, उत्तरस्तुल्यार्थे, तस्मात् पुरुषाकारविग्रहा इति॥

ननु चैतन्यमपुरुषाकारविग्रहाणामपि गवादीनामस्ति? न, नास्ति। न तु ते विवेकक्षमा आसन्नचेतनाः, लोकेऽपि

यस्य हिताहितविवेकनत्वणं विशिष्टं सविज्ञानं न भवति, तमधिकृत्य ब्रुवते निश्चेतनोऽयमिति। एवमेते च ग्रावादयः सत्यपि चैतन्ये आसन्नचेतनत्वात्र विदुः स्वस्तनम्, न लोकालोकाविति ज्ञायते, तस्मादचेतना इवोपेक्ष्यन्ते। पुरुषस्तु वेद स्वस्तनम्, वेद लोकालोकौ, मर्त्त्येनामृतत्वमीप्सतीति। तस्माद्धिताहितपरिज्ञानात् पौरुषविध्यस्यैव सिषाधयिषितत्वादनपेच्यसामान्यं विशिष्टचैतन्यः पुरुषो नियम्यते। यथैव चेतयमाना अर्थान् पुरुषाः श्रूयन्ते, तथैव देवता अपि। तस्मात् "पुरुषविधाः स्युः"—इत्युपपन्नम्॥

"तथाभिधानानि" यथैव पौरुषविध्यमुपपद्यते चेतनावत्सदृशस्तुतिभिः तत् प्रति ताः कारणं भवति, तथैव संवादसूक्तेषु परस्परमभिधानानि उक्तप्रत्युक्तानि सम्बद्धार्थानि परस्परतः, कयाशुभीयादिषु कुतस्त्वमिन्द्रेत्येवमादीनि तस्मात् पौरुषविध्यं देवतानाम्॥

अथाप्ययमपरो हेतुः पौरुषविध्ये देवतानाम्,—"पौरुषविधिकैरङ्गैः संस्तूयन्ते"। पौरुषविध्यत्वे यान्यङ्गानि, तैः संस्तूयन्ते। तद्यथा,—ऋष्वा त इन्द्र स्थविरस्य बाहू" "यत् संगृभ्णा मघवन् काशिरित्ते"।—

"उरुं नो लोकमनुनेषि विद्वान् स्वर्वज्ज्योतिरभयं स्वस्ति। ऋष्वा त इन्द्र स्थविरस्य बाहू उपस्थेयाम शरणा बृहन्ता॥"—इति (ऋ० सं० ४, ७, २१, २)। ग्रयोरार्षम्। त्रिष्टुप्। ऐन्द्री। एकादशिन्यामिन्द्रस्य यशोविषया याच्या। 'उरु' विस्तीर्णं 'लोकं' 'नः' त्वम् 'नः' अस्मान् 'अनुनेषि' अनुनयसि, स्वेन सुकृतेन कर्मणा गच्छतां गमनानुग्रहे वर्त्तसे। 'स्वर्ज्योतिः' आदित्यसमानं प्रकाशेन लोकम्, 'अभयम्' 'स्वस्ति' स्वस्त्ययनाय। तस्य 'ते' तव वयम् 'इन्द्र!' 'ऋष्वा'

श्मश्रू एतौ रेषणौ शत्रूणाम्, 'स्थविरस्य' महतः 'बाहू' हस्तौ 'बृहन्ता' बृहन्तौ महान्तौ, 'शरणा' शरणौ आश्रयणीयौ नित्यम् 'उपस्थेयाम' उपतिष्ठेमेत्यं तदाशास्महे ॥

"यत् संङ्गृभ्णा मघवन् काशिरित्ते"—इति (ऋ० सं० ३, २, १, ५)। व्याख्यातः शेषः। एवमस्मिन् मन्त्रद्वये बाहु-मुष्टिसम्बन्धदर्शनात् स्तुत्यस्येन्द्रस्य पौरुषविध्यम्, अन्यथा हि वितथाभिधानत्वं मन्त्रयोः, तथा च सत्यानर्थक्यं मन्त्राणाम्, सर्वेषां शास्त्रस्य च तदर्थलक्षणभूतस्य। तस्मा भूदित्यवश्य-मेवेष्टव्यं पौरुषविध्यं देवतानामिति ॥

"अथापि" अयमप्यपरो हेतुः पौरुषविध्ये देवतानाम्—"पौरुषविधिकैः द्रव्यसंयोगैः"। तद्यथा—"आ द्वाभ्यां हरिभ्यामिन्द्र याहि" "कल्याणीर्जाया सुरणं गृहे ते"।—

"आ द्वाभ्यां हरिभ्यामिन्द्र याह्या चतुर्भिरा षड्भिर्हूय-मानः। आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः ॥"—इति (ऋ० सं० २, ६, २१, ४)। गृत्समद ऋषिः। ऐन्द्री। त्रिष्टुप्। हे भगवन्! 'इन्द्र!' यदि तावत् तव द्वौ हरी सन्निहितौ, ततस्तावेव रथे युक्त्वा, ताभ्याम् 'हरिभ्याम्' 'आयाहि'। अथ चत्वारः? ततस्तैः 'चतुर्भिः' अथ षट्? ततस्तैः 'षड्भिः' अथाष्टौ? ततस्तैः 'अष्टाभिः' अथ दश? ततस्तैः 'दशभिः' 'आ' याहि। इदं 'सोमपेय' सोमपानकर्म प्रति। किम्? इति। एवं ब्रूमहे,—'अयं' 'सुतः' सोमोऽभिषुतः त्वदर्थम्, स त्वं हे 'सुमख' सुधन। 'मा' केन-चित् 'मृधः' संग्रामं 'कः' कार्षीः, अविलम्बितमागच्छेत्य-भिप्रायः ॥

'अपाः सोममस्तमिन्द्र प्रयाहि कल्याणीर्जायाः सुरणं गृहे ते'। यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षि-

यातव् ॥”—इति (ऋ० सं० ३, ३, २०, १)। विश्वामित्रस्यार्षम्। त्रिष्टुप्। शारियोजनस्यानुवाक्या। हे भगवन्! ‘इन्द्र!’ ‘अपाः’ पीतवानसि ‘सोमम्’ एतस्मिन् कर्मणि। स त्वं पुनः ‘अस्तं’ गृहं ‘प्रयाहि’। यस्मात् तव ‘कल्याणीः जाया:’ ‘तव’ ‘बृहतः’ च ‘रथस्य’ ‘निधानं’ रथशाला, ‘विमोचनं’ च ‘वाजिनः’ जित्वा संग्राममागतस्य, ‘दक्षिणावत्’ अन्यदपि, ‘सुरणं’ यद्यद्रमणीयं तत्तत्सर्वं ‘ते’ तव ‘गृहे’ वर्त्तते। तस्मात् पुनरस्तं प्रयाहि ॥

—एवमेतयोर्मन्त्रयोर्हरिगृहजायारथाभिसम्बन्धात् पौरुषविध्यमिन्द्रस्य, न ह्यपौरुषविध्ये सति सम्बन्धो जायादिभिरस्ति ॥

“अथापि” अयमपरो हेतुः पौरुषविध्ये। कतमः? “पौरुषविधिकैः कर्मभिः” संस्तूयन्ते देवता। तद्यथा,— “ऋष्वेन्द्र पिब च प्रस्थितस्य” “आ श्रुत्कर्ण श्रुधी हवम्”।

“इदं हविर्मघवन् तुभ्यं रातं प्रति सम्राडहृणानो गृभाय। तुभ्यं सुतो मघवन् तुभ्यं पक्वोऽऋष्वेन्द्र पिब च प्रस्थितस्य ॥” —इति (ऋ० सं० ८, ६, २१, २)। अग्नियुतो नाम स्थूरपुत्रः, तस्यार्षम्। त्रिष्टुप्। ऐन्द्री। हे ‘मघवन्!’ ‘इन्द्र!’ ‘इदं’ ‘हविः’ आज्यादिकम्, ‘तुभ्यं’ ‘रातम्’ मनसास्माभिः निरुप्तम्, पूर्वं निर्वपणादौ संस्कारकाले। तदिदानीं हे ‘सम्राट्!’ ‘अहृणानः’ अहृणन् ‘प्रतिगृभाय’ प्रतिगृहाण। अपि च ‘तुभ्यं’ त्वदर्थमेवायं ‘सुतः’ अभिषुतः सोमः। अपि च हे ‘मघवन्!’ त्वदर्थमेवैषः पुरोडाशः ‘पक्वः’। स त्वम् अस्य सोमस्य ‘प्रस्थितस्य’ ‘अद्धि पिब च’ समश्नीमिति शेषः।

“आ श्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः। इन्द्र स्तोममिमं मम कृष्वा युजश्चिदन्तरम् ॥”—इति (ऋ० सं० १,

१, २०, ३)। मधुच्छन्दस आर्षम्। अनुष्टुप्। ऐन्द्री। श्रोतारौ यस्य कर्णौ अप्रतिहतश्रवणौ सर्वत्र, स भवति श्रुत्कर्णः, तस्य सम्बोधनम्—हे 'श्रुत्कर्ण!' 'आ' आभिमुख्येन 'श्रुधि' शृणु त्वम् 'हवम्' आह्वानमस्माकम्। श्रुत्वा च 'नू चित्' पुराण इव 'दधिष्व' धारयस्व, एताः अस्मद्'गिरः' स्तुतीः येन। किञ्च, हे भगवन्! 'इन्द्र!' 'मम' 'इमं स्तोमम्' 'युजः' त्वद्युक्तस्य त्वा मत्याहृतस्य पुनःपुनरपि ब्रुवतः 'कृष्व' कुरुष्व श्रोतुम् 'अन्तरम्' समीपमित्यर्थः।

एवमनयोर्मन्त्रयोरध्याशृणुहीति आमन्त्रणपूर्वकादरश्रवणपूर्वकौ विनियोगः, स स सम्भवत्यपौरुषविध्ये, न हि गवादयोऽध्याशृणुहीत्युक्ताः किञ्चित् प्रपद्यन्ते। तस्मात् कार्य्यकारणसन्निवेशो मनुष्यवद्देवतानाम्, कार्य्यकारणापेक्षं च विज्ञानम्। तदेवमेतेभ्यो मन्त्रदर्शनेभ्यः स्थितं पौरुषविध्यं मन्त्रदेवतानामिति ॥ २ (६) ॥

अपुरुषविधाः स्युरित्यपरमपि तु यद्दृश्यतेऽपुरुषविधं तद्यथाग्निर्वायुरादित्यः पृथिवी चन्द्रमा इति यथो एतच्चेतनावद्वद्धि स्तुतयो भवन्तीत्यचेतनान्यप्येवं स्तूयन्ते यथाक्षप्रभृतीन्योषधिपर्य्यन्तानि यथो एतत्पौरुषविधिकैरङ्गैः संस्तूयन्त इत्यचेतनेष्वप्येतद्भवत्यभिक्रन्दन्ति हरितेभिरासभिरिति ग्रावस्तुतिर्यथो एतत्पौरुषविधिकैर्द्रव्यसंयोगैरित्येतदपि तादृशमेव सुखं रथं युयुजे सिन्धुरश्विनमिति नदीस्तुतिर्यथो

एतत्पौरुषविधिकैः कर्मभिरित्येतदपि तादृशमेव होतुश्चित् पूर्वे हविरद्यमाशतेति ग्रावस्तुतिरेवापि वोभयविधाः स्युरपि वा पुरुषविधानामेव सतां कर्मात्मान एते स्युर्यथा यज्ञो यजमानस्यैष चाख्यानसमयः ॥ ३ (७) ॥

इति सप्तमाध्यायस्य द्वितीयः पादः ॥ ७,२ ॥

"अपुरुषविधाः स्युः इत्यपरम्" दर्शनमिति वाक्यशेषः। तदुक्तम् "अपाश्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति"—इति विज्ञायते। तदाहुः "नैतदस्ति यद्देवासुरम्"—इति, "न त्वं युयुत्से"—इत्यपि चैतदुक्तमेव।

"अपि तु यत् दृश्यते" देवानां किञ्चित् "अपुरुषविधम्" अपुरुषप्रकार तदित्यर्थः। "तद्यथा—अग्निः, वायुः, आदित्यः, पृथिवी, चन्द्रमाः—इति"। प्रत्यक्षत एतान्यपुरुषप्रकाराणि दृष्टे तेषामतोऽन्यथाभ्युपगमे दृष्टहानिः स्यात्, न चैतदिष्टम्। तस्मादपुरुषविधा अग्न्यादय, तत्सामान्याददृष्टा इन्द्रादयोऽप्यपुरुषविधाः, न हि मनुष्यत्वे तुल्ये केचिदाकारिणः केचिदनाकारिण इति, तथैव देवतानामपि हि न्यायः। तस्मादपुरुषविधा इति।

"यथो एतत् चेतनावद्वत् हि स्तुतयः भवन्ति इति, अचेतनान्यपि एवं स्तूयन्ते, यथा—अक्षप्रभृतीनि ओषधिपर्यन्तानि"। तस्मात् चेतनावत्स्तुतिमत्त्वमहेतुः पौरुषविध्ये देवतानाम्, अचेतनेष्वप्यक्षादिषु चेतनावत्स्तुतेर्दृष्टत्वादिति।

"यथो एतत् पौरुषविधिकैः अङ्गैः संस्तूयन्ते इति" अय-

प्यनुग्रहः कृतो भविष्यति। "यथा,—यज्ञः यजमानस्य" कर्मोक्ता, इदमेतेनाङ्गं संस्क्रियते, इदमेतेनाङ्गमुपचीयत इति संस्कृतममुष्मिन् लोके परैति इति च विज्ञायते।

"एष च आख्यानसमयः"। भारते चाख्यानसमय एष एव सिद्धान्त इत्यर्थः।—पृथिवी, स्त्रीरूपेण भारावतारणाय ब्रह्माणं ययाचे। अग्निश्च ब्राह्मणरूपेण वासुदेवार्जुनावुभौ खाण्डवं ययाचे। पुरुषरूपेणाग्निरूपेण च खाण्डवं ददाह। —इत्येवमादि॥

तदेतच्चतुर्धा भिद्यते, मन्त्रार्थदर्शनादेव।—(१) पौरुषविध्यम्, (२) अपौरुषविध्यम्, (३) कर्मार्थाभ्युभयविध्यम्, (४) नित्यमौभयविध्यमेवेति। सर्वं चैतदुपपद्यते, माहाभाग्ये मर्त्येऽञ्जर्याम्, कथमिव देवता न स्यात्—अमूर्त्ता, मूर्त्ता, एकधा, द्विधा, बहुधा चेति यथा तु वर्त्तमानामपश्यन् मन्त्रदृशः तथा तथा अस्तुवन्, सर्वथैवादोषः, फलदर्शनात्। नानावस्थादर्शनवदाख्यातॄणा परिदेवनानिन्दादिष्वपि चेन्द्रादीनां कामकारतस्तद्रूपमवस्थितानां सा सा स्तुतिरेव, न निन्दा। उक्तञ्च,—"दीना न निन्दा, स्तुतिरेव साध्या देवान् मर्त्तः सम्यगभिद्रुयात् क.। शक्तिश्चयेऽप्यध्यवस्यन्ति शिष्टाः स्तोतुं न पश्यन्ति गतिं यतोऽन्याम्॥"—इति॥ ३ (७)॥

इति निरुक्तवृत्तौ द्वादशाध्यायस्य (सप्तमाध्यायस्य) द्वितीयः पादः॥ ७, २,॥

तृतीयः पादः॥

तिस्र एव देवता इत्युक्तं पुरस्तात्तासां भक्तिसाहचर्यं व्याख्यास्यामोऽथैतान्यग्निभक्ती-

न्ययं लोकः प्रातःसवनं वसन्तो गायत्री त्रिवृत्
स्तोमो रथन्तरं साम ये च देवगणाः समा-
म्नाताः प्रथमे स्थानेऽग्नायी पृथिवीलेति
स्त्रियोऽथास्य कर्म वहनञ्च हविषामावाहनञ्च
देवतानां यच्च किञ्चिद् दार्ष्टिविषयिकमग्नि-
कर्मैव तदथास्य संस्तविका देवा इन्द्रः सोमो
वरुणः पर्जन्य ऋतव आग्नावैष्णवञ्च हविर्न
त्वृक् संस्तविकी दशतयीषु विद्यतेऽथाप्याग्ना-
पौष्णं हविर्न तु संस्तवस्तत्रैतां विभक्तिस्तुति-
मृचमुदाहरन्ति ॥ १ (८) ॥

अथाकारचिन्तनव्यवधानाद् देवतात्रयाधिकारस्य तद्वि-
शेषविवक्षया तदनुस्मृतये च स एतत् प्रकरोति,"—"तिस्रः
एव देवताः—इति"। यः पुनस्तत्र विशेषो विवक्षितः, स
उच्यते,—"तासां भक्तिसाहचर्य्यं व्याख्यास्यामः"। तासामेव
तिसृणां भक्तिसाहचर्य्यम्। भक्तिश्च साहचर्य्यञ्च भक्तिकृतं वा
साहचर्य्यमिति। लोकादीनामेवाग्न्यादिभिर्भजनं भक्तिः,
सहचरभावः साहचर्य्यम्। तत् किमर्थम्? उच्यते,—"यत्र
विज्ञातपदे मन्त्रे भक्त्या साहचर्य्येण वा यया देवता गम्येत"
त्येवमर्थं भक्तिसाहचर्य्यमुच्यते।

यद्येवमुच्यतां तर्हि कानि किम्भक्तीनि? इति। तदुच्यते,
—"अथ एतानि अग्निभक्तीनि"। अथेति विशेषाधिकारे।
अग्निं भजन्ते, अग्निना वा भज्यन्ते—इत्यग्निभक्तीनि।
कतमानि? "अयं लोकः"—इत्येवमादीनि अग्निभक्तीन्यवग-

न्त्यानि। "ये च देवगणाः समाम्नाताः प्रथमे स्थाने"। तद्यथा,—आग्नी, अश्वाः, ग्रावाणः, अभीशवः इत्येवमादीनि। "अग्नायी, पृथिवी, इला—इति स्त्रियः"। 'इला, पृथिवी, अग्नायी'—इति क्रमेण वक्तव्ये क्रमभेदोऽग्नायी तत्समाना-ख्यानात् सविकृष्टतरा, न तथा पृथिवीति, तस्मात् प्रथम-मुच्यते, ततः पृथिव्याश्रयसम्बन्धादग्नेर्न तथेला, परोक्षाद-भिधेयस्य। 'आप्री'—मध्ये 'तिस्रो देवीः'—इत्यत्र इला, भारत्याः द्युस्थानाया अनन्तरं श्रूयमाणा,—"आ नो यज्ञं भारती तूयमेत्विलामनुष्वत् (ऋ॰ सं॰ ८, ६, ८, २)"—इति कथं पृथिवीस्थाना? इति। उच्यते,—अनुयाजेषु सामर्थ्यात्, "द्यां भारत्यादित्यैरस्पृक्षत् सरस्वतीमं रुद्रैर्यज्ञमावीदिहैवे-लया वसुमत्या"—इत्यतः सामर्थ्यसुखीय वसुसाहचर्यात् इहै-वेलयेति चाग्निभक्तिरित्याह, रुद्रैः साहचर्यात् सरस्वती मध्यस्थाना, आदित्यैः साहचर्यात् भारती द्युस्थानेति॥

"अथास्य कर्म" अथास्याग्नेः कर्म सहभावि, अनन्यदेव-तागामि, यत्संयोगादसत्यप्यग्निशब्दे आग्नेय एव मन्त्रो भवति। "वहनञ्च हविषाम्"—इत्येवमादि। "दार्ष्टिविष-यिकम्" दृश्यनुपश्यो यस्य विषयः, तद्दार्ष्टिविषयिकम्, प्रका-शादि कर्मेत्यर्थः। "अग्निकर्मैव तत्"—इति पुनर्वचनमाद-रार्थम्, आध्यात्मेऽपि यावान् कश्चित् प्रकाश इति॥

"अथास्य संस्तविका देवाः" यैः सह अग्निः स्तूयते। तद्यथा, "इन्द्र, सोमः"—इत्येवमादयः। मन्त्रस्वभावप्रदर्श-नाय संस्तवोदाहरणम्। अग्नेः पूर्वनिपातादाद् देवताद्वन्द्व-मुच्यते।—

"अग्न इन्द्रश्च दाशुषो दुरोणे सुतावतो यज्ञमिहोप-यातम्। अमर्धन्ता सोमपेयाय देवा॥"—इति (ऋ॰ सं॰ ३,

१, २५, ४)। विश्वामित्रस्येयमार्षम्। विराट्। अनुष्टुप्। आग्रयणे विनियोगः। हे भगवन्! 'अग्ने!' त्वम् 'इन्द्रः च' 'देवा' देवौ अस्य 'दाशुषः' दत्तवतः हवींषि, यजमानस्य 'दुरोणे' यज्ञगृहे 'सुतावतः' अभिषुतवतः 'यज्ञम्' सोमम्। 'अमर्धन्ता' अर्धं सग्राम कुर्वाणौ अन्तरा केनचित् सह। 'सोमपेयाय' सोमपानार्थम् 'उपयातम्' इत्येतदाशास्महे॥

"अग्नीषोमाविमं सु मे शृणुतं वृषणा हवम्। प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः॥"—इति (ऋ० सं० १, ६, २८, १)। सोमेन सह संस्तवः। गोतमस्यार्षम्। अनुष्टुप्। पौर्णमासे अग्नीषोमस्यानुवाक्या। हे 'अग्नीषोमौ!' युवामुच्येथे। 'इमं' 'हवम्' आह्वानं 'मे' मम 'सु' सुष्ठु 'शृणुतम्' 'वृषणा' वृषणौ वर्षितारौ। श्रुत्वा चागच्छतम्। आगत्य च 'प्रतिहर्यत' प्रतिप्रेषत, मया पूर्वं प्रेषितौ प्रति कामयेथाम् इमानि सूक्तानि श्रोतुम्। श्रुत्वा चेमानि 'भवतं' 'दाशुषे' युवां हविर्दात्रे 'मयः' सुखावित्यर्थः॥

"त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेळोऽवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्र मुमुग्ध्यस्मत्॥"—इति (ऋ० सं० ३, ४, १२, ४)। वरुणेन संस्तवः। वामदेवस्यार्षम्। त्रिष्टुप्। अवभृथे विनियोगः। हे भगवन्! 'अग्ने!' 'त्वम्' 'नः' अस्मान् यथावत् 'विद्वान्' जानानः भक्ता मम एते इति। 'वरुणस्य देवस्य' यः अस्मान् प्रति 'हेळः' क्रोधः, तम् अनेनावभृथकर्मणा 'अवयासिसीष्ठाः' अपगमय। किञ्च, यः त्वं 'यजिष्ठः' यष्टृतमः, देवानां होतृत्वे वर्त्तमानः 'वह्नितमः' वोढृतमश्च हविषाम्, स त्वं पुनः 'शोशुचानः' देदीप्यमानः तेषु तेषु कर्मसु 'विश्वा' विश्वानि सर्वाणि

देष्यांसि' द्वेष्याणि 'प्र' प्रकर्षेण 'अस्मत्' अस्मत्तः 'मुमुग्धि' मुञ्च अवयोजयेत्यर्थः ॥

"अग्नीपर्जन्याववतं धियं मेऽस्मिन् हवे सुहवा सुष्टुतिं नः। इडामन्यो जनयद् गर्भमन्यः प्रजावतीरिष आ धत्त-मस्मे॥"—इति (ऋ० सं० ४, ८, १६, ६)। पर्जन्येन संस्तवः। भरद्वाजस्यार्षम्। त्रिष्टुप्। हे 'अग्नीपर्जन्यौ!' युवाम् उच्येथे। 'अवतम्' अवच्छतम् मम 'धियं' इदं कर्म प्रति, 'मे' मम 'अस्मिन्' 'हवे' आह्वाने 'सुहवा' सुह्वौ स्वाह्वानौ 'सुष्टुतिं' शोभनामिमां स्तुतिं श्रोतुम्। आगत्य च श्रुत्वा इमाम् 'इडाम्' अन्नम् 'अन्यः' एकः 'जनयत्' जनयतु, 'गर्भम् अन्यः' गर्भमेको जनयतु। तौ युवामेवं प्रतिसंवत्सरं 'प्रजावतीः' प्रजासंयुक्ताः 'इषः' अन्नानि 'आ' आभिमुख्येन स्थित्वा 'धत्तं' दत्तम्, 'अस्मे' अस्मभ्यमित्यर्थः ॥

"अग्ने देवाँ इहा वह सादया योनिषु त्रिषु। परि भूष पिब ऋतुना॥"—इति (ऋ० सं० १, १, २८, ४)। ऋतुभिः सस्तव'। मेधातिथेरार्षम्। गायत्री। ऋतुयाजेषु विनियोग'। 'हे भगवन्! 'अग्ने!' 'देवान्' 'इह' अस्माकं कर्मणि 'आवह'। आहूय देवान् 'सादय' 'योनिषु त्रिषु' सवनेषु त्रिषु। एतान् यथाकाल यज। अमुना प्रकारेण 'परिभूष' सर्वतो देवयागेनालङ्कुरुष्व एतं यज्ञम्, आत्मना 'पिब' चैतं सोमम् 'ऋतुना' सह॥

"अग्नाविष्णू हविः"। हविर्ग्रहणात् हविष एव सम्प्रदानार्थत्वम्। या ऋचः ताः संस्तवेनाग्नाविष्णोः सन्ति।—

"अग्नाविष्णू सजोषसेमा वर्द्धन्तु वां गिरः। द्युम्नैर्वाजेभिरागतम्॥"—इति। वामदेवस्येयमार्षम्। गायत्री। आग्नावैष्णवे हविषि विनियोग। हे 'अग्नाविष्णू' 'सजोषसा'

सजोषसौ नित्य सह जोषणौ नित्य समानप्रीतौ 'वा' युवा सुर्चये। 'इमा' एता युष्मद्'गिर' अस्मत्स्तुतय 'वर्द्धन्तु' वर्द्धयन्तु युवाम्। इन्द्रौ च सत्यामभ्यस्मदर्थे 'द्युम्नै' द्योतन वह्नि 'वाजेभि' सर्वैरभ्युद्यते 'आगतम अस्मान् प्रत्यायातम्॥

"न त्वृक सस्तविकी दशतयीषु विद्यते"। 'न —इति प्रतिषेध। 'तु शब्दोऽवधारणार्थ। 'ऋक' 'सस्तविकी' सस्तवयुक्ता, 'दशतयीषु दशमण्डलावयवप्रविभागेन तायत इति दशतय ऋग्वेद, तस्य शाखा दशतय्य, तासु एकापि हविषविनियुक्ता शस्त्रमध्यपातिनी ऋत्र अनाविण्णा सस्तविकी नास्ति। स्यादप्यन्यत्र सस्तविकी, न तु दशतयीषु। असस्तवेन वा दशतयीष्वपि इत्युत्सर्ग दर्शयति, एवमतन्मया निपुणमन्विष्यत इति।

अथाप्ययमपर उत्सर्ग,—"अथाप्याग्नापौष्ण" "हवि" एव, "न तु सस्तव"। तस्मिंस्तु हविषि किन्तु पृथक् पृथगेव अग्नि स्तूयते पूषा च "तत्र" तस्मिन सस्तवे अग्नि पूष्णौ "एता विभक्तस्तुतिम् ऋचम्" "उदाहरन्ति" नैरुक्ता॥ १ (८)॥

पूषा त्वेतः च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः। स त्वैतेभ्यः परिददत् पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः। पूषा त्वेतः प्रच्यावयतु विद्वाननष्टपशुर्भुवनस्य गोपा इत्येष हि सर्वेषां भूतानां गोपायितादित्यः स त्वैतेभ्यः परिददत् पितृभ्य इति सांशयिकस्तृतीयः पादः

पूषा पुरस्तात्तस्यान्वादेश इत्येकमग्निरुपरिष्टा-त्तस्य प्रकीर्त्तनेत्यपरम्। अग्निर्देवेभ्यः सुवि-दत्रियेभ्यः। सुविदत्रं धनं भवति विन्दतेर्वैको-पसर्गाद्दातेर्वा स्याद् द्व्युपसर्गात्॥ २(६)॥

"पूषा त्वेत."—इति (ऋ॰ सं॰ ७, ६, २३, ३)। देवश्रवसो यामायनस्यार्षम्। त्रिष्टुप्। पुनः शवस्य कर्णे प्रमीतानुमन्त्रणे विनियोगः। सः प्रमीत उच्यते। 'पूषा' भगवान् "आदित्यः" पथामधिपतिः, सः 'त्वा' त्वाम् 'इतः' मनुष्यलोकात् विशिष्टेन पथा 'प्रच्यावयतु' 'विद्वान्' अव्यवहित-ज्ञानः। सर्वत्र ज्ञानाव्यवधानादेव च 'अनष्टपशुः'। 'भुवनस्य गोपाः'। 'भुवनस्य' भूतजातस्य 'गोपाः' रक्षिता। उपर्यवस्थितः 'सः' पूषा, एवंलक्षणः, 'त्वा' त्वां प्रगमय्य 'एतेभ्यः' चन्द्रमण्डलोपान्तवासिभ्यः 'पितृभ्यः' 'परिददत्' परिददातु। तदुक्तम्,—"दक्षिणायनात् पितृलोकम्"—इति। 'अग्निः' अपि चैतेभ्यः उत्तरस्य 'देवेभ्यः सुविदत्रियेभ्यः' ये विद्युतो मध्ये निवसन्ति, तेभ्यः परिददातु। तदप्युक्तम्,—"चन्द्रमसो वैद्युतम्"—इति। स त्वमेवमुभावपि देवलोकपितृलोकावभ्यश्नुहि होत्रायोः प्रमीतस्य। उक्तञ्च,—"ये देवयानाः पितृयानाश्च लोकाः सर्वांस्तानन्तृणाः सचयेम"—इति।

"स त्वैतेभ्यः॰—॰इति सांशयिकः तृतीयः पादः" संशयो-ऽस्मिन्नस्तीति सांशयिकः, तृतीयः पादोऽस्या ऋचः। कथं कृत्वा? यथा,—"पूषा पुरस्तात्" पूषा त्वेतश्च्यावयतु'—इति, "तस्य अन्वादेशः—इति एकम्" सामर्थ्यादर्शनम्। तथा व्याख्यातमेव। त्रयः पौष्णाः पादाः, एक एवाग्नेयः एवमियं विभक्तस्तुतिः। अथवा द्वावुत्तरावाग्नेयौ।

तत्र अर्थयोजना,—पूषणा प्रच्याविल सन्त सोऽग्निर्वक्ष्यमाणश्चामेतेभ्य पितृभ्यो देवेभ्यः सुविदविवेभ्य परिददातु, मा पितृभ्य प्रेतेभ्य इत्यभिप्राय । त प्रेत दिष्टमितोऽमुय एव इरन्तीत्यपेक्ष्य सर्वनाम्नयोत्तरेणाप्यग्निशब्देन सम्बन्धमविरुध्यमान ध्यपेक्ष्य अकल्पयत् । "अग्नि उपरिष्टात्, तस्य प्रकीर्त्तना—इति अपरम्"—इति ॥

"सुविदत्र धन भवति"—"विन्दते वा" "एकोपसर्गात्" सु—इति एतेन एकेन उपसर्गेण उपसृष्टात् । "ददाते वा" "द्व्युपसर्गात्" सु विभ्या द्वाभ्याम उपसर्गाभ्या युक्तात् । तद्येषामस्ति, ते सुविदत्रिया ॥ २ (८) ॥

अथैतानीन्द्रभक्तीन्यन्तरिक्षलोको माध्यन्दिनं सवनं ग्रीष्मस्त्रिष्टुप् पञ्चदशस्तोमो बृहत्साम ये च देवगणाः समाम्नाता मध्यमे स्थाने याश्च स्त्रियोऽथास्य कर्म रसानुप्रदानं वृत्रवधो या च का च बलकृतिरिन्द्रकर्मैव तदथास्य संस्तविका देवा अग्निः सोमो वरुणः पूषा बृहस्पतिर्ब्रह्मणस्पतिः पर्वतः कुत्सो विष्णुर्वायुरथापि मित्रो वरुणेन संस्तूयते पूष्णा रुद्रेण च सोमोऽग्निना च पूषा वातेन च पर्जन्यः ॥ ३ (१०) ॥

"अथ एतानि इन्द्रभक्तीनि"—इति । पूर्ववत् सर्वम् "अन्तरिक्षलोक"—इत्येवमादि । "ये च देवगणा समाम्नाता" मरुदादय । "याश्च स्त्रियः" अदित्याद्याः ।

"अथ अस्य कर्म" ।—"रसानुप्रदानम्" अवस्रावणम्, वर्षादि, "वृत्रवधः" मेघवधः, "या च का च बलकृतिः" अन्यापि। "इन्द्रकर्म एव तत्"—इति आदरार्थं पुनर्वचनम्, अपि कीटपिपीलिकादिषु, यद्बलेन क्रियते सर्वम्, इन्द्रकर्मैव तदिति ॥

"अथ अस्य संस्तविका देवाः"। "अग्निः, सोमः"—इत्येवमादयः। तद्यथा,—

'इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः। तद् वां चेति प्र वीर्यम् ॥"—इति (ऋ० सं० ३, १, १२, ४)। विश्वामित्रस्यार्षम्। गायत्री। ऐन्द्राग्ने हविषि विनियोगः। हे 'इन्द्राग्नी' 'रोचना' रोचनौ दीपनौ हविषा च उदकेन च 'दिवः' 'परिभूषथः वाजेषु' अस्मान् सर्वतः, येनावेव स्वामित्वेन भवेमहि, तथा कुरुतम्। 'तत्' वीर्यम् 'वाम्' भवतः 'प्र' प्रकृष्टम् अहम् 'चेति' जाने, येन परिभावयथो यागेषु स्तोतॄन् पुरः। अत एवमाशास्महे ॥

सोमेन संस्तवः,—"इन्द्रासोमा समघशंसम्"—इत्यत्र व्याख्यातः।

वरुणेन संस्तवः,—"इन्द्रावरुणा युवमध्वराय नः"—इति व्याख्यातः शेषः ॥

"इन्द्रापूषणा वयं सख्याय स्वस्तये। हुवेम वाजसातये ॥"—इति (ऋ० सं० ४, ८, २१, १)। पूष्णा संस्तवः। भरद्वाजस्येयमार्षम्। गायत्री। ऐन्द्रापौष्णे हविषि विनियोगः। हे 'इन्द्रापूषणौ!' 'सख्याय' समानख्यानाय 'स्वस्तये' स्वस्त्ययनाय च, 'वाजसातये च' अन्नसमनाय च 'हुवेम' आह्वयामहे युवां वयं नित्यं यज्ञेषु इदमाशास्महे ॥

"इह वामग्रे छुवि: प्रियमिन्द्राबृहस्पती। उक्थं मदश्च

मस्यते ॥"—इति (ऋ० सं० ३, ७, २५, १)। बृहस्पतिना सस्तवः। वामदेवस्यार्षम्। गायत्री। ऐन्द्राबार्हस्पत्ये हविषि विनियोगः। हे 'इन्द्राबृहस्पती !' 'इदं' 'हविः' यद् वयं दद्म, तत् 'प्रियम्' इष्टम् 'आस्ये' 'वाम्' अस्तु। यत् च इदम् 'उक्थं' 'मस्यते' 'मदः च' प्रतिगरेण सह, तच्च वा प्रियमस्तु। इत्येतदाशास्महे ॥

"विश्वं सत्यं मघवाना युवोरिदापश्चन प्रमिनन्ति व्रतं वाम्। अच्छेन्द्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगातम् ॥"—इति (ऋ० सं० २, ७, २, २)। ब्रह्मणस्पतिना संस्तवः। गृत्समदस्येयमार्षम्। त्रिष्टुप्। 'विश्वं' सर्वं जगत् 'सत्यं' यावदिदमस्ति। किञ्च, हे 'मघवाना' मघवानौ धनवन्तौ 'इन्द्राब्रह्मणस्पती !' युवामुच्येथे। 'युवोः' युवयोः सर्वम् एतत् स्वभूतम्। किञ्च, यतः सर्वस्येशानौ स्थः, अतः 'आपश्च' आपोऽपि 'न प्रमिनन्ति' न हिंसन्ति, 'व्रतम्' कर्म 'वां' युवयोः यथासङ्कल्पं वर्त्तते। यौ युवाम् एवमतिमहानुभावौ, तौ 'नः' अस्माकम् 'अच्छ' आभिमुख्येन इदं 'हविः' 'जिगातम्' आगच्छतं भोक्तुम्। 'युजा' युजौ 'इव' सहचारिणौ 'वाजिना' वाजिनौ रथात् विमुक्तौ बुभुक्षू स्वम् 'अन्नम्'। इत्येतदाशास्महे ॥

"इन्द्रापर्वता बृहता रथेन वामीरिष आवहतं सुवीराः। वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिळया मदन्ता ॥"—इति (ऋ० सं० ३, ३, १८, १)। पर्वतेन संस्तवः। विश्वामित्रस्येयमार्षम्। त्रिष्टुप्। हे 'इन्द्रापर्वता' इन्द्रापर्वतौ ! 'देवा' देवौ युवामुच्येथे। 'बृहता' महता रथेन, महतोदकरहणेन उदकदानेन 'वामीः' वननीयाः 'इषः' अन्नानि 'आवहतम्' आवहतम् ईरयन्तं, व्रीह्यादीनि प्रेरयन्तम्। 'सुवीराः' शोभनवीराः।

तत स्वे काले ईजानानामस्माकं 'वीत' भक्षयतम् 'हव्यानि' पुरोडाशादीनि 'अध्वरेषु'। 'वर्हियाम्' च 'गीर्भि' स्तुतिभि पुन पुन प्रतिकर्म 'इलया' अन्नेन 'मदन्ता' मदन्तौ हृष्यन्तौ। इत्येतदाशास्महे ॥

"इन्द्राकुत्सा वहमाना रथेना वामत्या अपि कर्णे वहन्तु। नि षीमद्भ्यो धमथो नि षधस्थान्मघोनो हृदो वरथस्तमांसि ॥"—इति (ऋ० सं० ४, १, ३०, ४)। कुत्सेन संस्तव। अवस्योरार्षम्। त्रिष्टुप्। 'इन्द्राकुत्सा' हे इन्द्राकुत्सौ। 'वह माना' वहमानौ उह्यमानौ रथेन। युवा युवे। 'आवहन्तु वाम्' 'अत्या' अश्वा 'अपि' 'कर्णे' निकट कर्मणि। ततश्च कर्मणा परितोषित, अस्माभि 'निःषीमद्भ्य' 'निर्धमथ' सर्वत अरीन् 'षधस्थात्' समानस्थानादन्तरिक्षादस्माकं अप। तत श्चोपधायुत्पन्ना काल कुर्वाणौ। 'मघोनः' महान्त्येतानि 'तमांसि' 'हृद' हृदयस्य छादकानि अनाकालभयकृतानि 'वरथ' वारयथ । इत्येतदाशास्महे ॥

"इन्द्राविष्णू दृंहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टम्। शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरान् ॥"—इति (ऋ० सं० ५, ६, २४, ५)। विष्णुना संस्तव.। वसिष्ठस्यार्षम्। त्रिष्टुप्। तैषातव्या विनियोग। हे 'इन्द्राविष्णू !' युवा 'दृंहिता' स्थिरीकृता 'शम्बरस्य नवतिं नव च पुर' मेघस्य असुरस्य वा सम्भृता पुर 'श्नथिष्टम' हतवन्तौ स्थ। ताश्च त्वा मेघान्तर्गता 'शत' 'वर्चिन' दीप्तिमत प्रवयतो वा 'सहस्रं' 'साकम्' अवस्थितान् सह भावेन एकनिश्चयान् 'हथ' हतवन्तौ स्थ। 'अप्रति' अप्रतीकारान् 'वीरान्' 'असुरस्य' शम्बरस्य सम्भृतान्। यौ युवा

मेतदतिदुष्करमकार्यम्, तावस्माकमपि शत्रून् हथः। इत्येतदाशास्महे॥

"इन्द्रवायू इमे सुता उप प्रयोभिरागतम्। इन्दवो वामुशन्ति हि॥"—इति (ऋ० स० १, १, २, ४)। वायुना संस्तवः। मधुच्छन्दस आर्षम्। गायत्री। उपात्तद्विकर्मात्मनोऽपि हि मध्यमस्य एकस्यापि वाय्विन्द्रभावेन विकरणधर्मित्वात् द्वित्वं विमतः नैरुक्तपक्षेऽपि द्विवचनसंस्तुतिरविरुद्धा, यथा एकस्योदकस्य द्विपावस्थस्य द्विवचनोक्तिः। ऐन्द्रवायवस्य ग्रहस्य पुरोऽनुवाक्येयम्। हे 'इन्द्रवायू!' युवामुच्यैथे। 'इमे' 'सुताः' अभिषुताः 'इन्दवः' सोमाः इत्यर्थः। सुसंस्कृताः सोमा यस्मात् 'उशन्ति' कामयन्ते युवामात्मपानाय, तस्मात् उपागच्छतम् पातुमेतान्। कथं पुनरुपागच्छतम्? 'प्रयोभिः' अन्नैः अस्मात्सम्प्रदेयैरभ्युद्यतैः। इत्येतदाशास्महे॥

"अथापि मित्रो वरुणेन संस्तूयते"। 'अथ'शब्दः प्रकृतात् इन्द्रात् विशेषतो मित्रादीन् प्रकरोति। 'अपि'—इति सम्भावने। प्रकृताभ्यस्तिसृभ्यो देवताभ्यः पराण्यपरेणाभिधानेन संस्तवयुक्तानीति। भेदपक्षे अविरोध एव, नैरुक्तपक्षे यद्विरुद्धाभासमिव किञ्चिदव, तदिन्द्रवायुसंस्तवे प्रतिसमाहितम्। 'मित्रो वरुणेन'—इत्येवमादिषु या प्रथमया निर्दिश्यते, सा मुख्या स्तुतिः, या तृतीयया निर्दिष्टा, सा अमुख्या।

"आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजांसि सुक्रतू॥"—इति (ऋ० सं० ३, ४, ११, ६)। विश्वामित्रस्यार्षम्। गायत्री। मैत्रावरुण्याः पयस्यायाः पुरोऽनुवाक्या। 'मित्रावरुणा' हे मित्रावरुणौ! 'सुक्रतू' शोभनकर्माणौ! युवामुच्येथे। 'गव्यूतिम्' गोयूतिम्, यवसोदको-

त्पत्तये 'रजांसि' च गोयूतिर्यान्यन्यानि स्थानानि व्रीह्यादि धान्योत्पत्तिक्षेत्राणि, तानि च व्रीह्याद्युत्पत्तये 'मध्वा' मधुरेण शस्यसम्पत्कारणेन 'घृतै' घृतेन उदकेन 'नः' अस्माकं 'उक्षतम्' सिञ्चतम्। इत्येतदाशास्महे ॥

"पूष्णा रुद्रेण च सोम"। "सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः। जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम् ॥"—इति (ऋ० सं० २, ८, ६, १)। पूष्णा सोमस्य संस्तव। गृत्समदस्यार्षम्। त्रिष्टुप्। सोमापौष्णस्य चरौ पुरोऽनुवाक्या। सोमापूषणौ चन्द्रसूर्यौ, तावुच्येते। 'सोमापूषणा' हे सोमापूषणौ! युवां 'जनना' जननौ जनयितारौ 'रयीणां' धनानाम्, 'जनना' जनयितारौ च 'पृथिव्याः'। 'जातौ' जातमात्रौ एव युवां 'विश्वस्य' सर्वस्य 'भुवनस्य' भूतजातस्य 'गोपौ' गोप्तारौ बभूवथुः। 'देवाः' च रश्मयः युवामेव 'अमृतस्य' उदकस्य 'नाभिं' नहनं बन्धनम्, आधारं सर्वलोकस्य 'अकृण्वन्' सदा कुर्वन्ति। युवामिदं नाम अस्माकं कुरुतमित्याशिषा निराकाङ्क्षम् ॥

"सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम्। अवस्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ॥"—इति (ऋ० सं० ५, १, १८, ३)। रुद्रेण संस्तव। भरद्वाजस्येयमार्षम्। त्रिष्टुप्। सोमारौद्रस्य चरौ पुरोऽनुवाक्या। 'सोमारुद्रा' हे सोमारुद्रौ! युवामुच्येथे। एतानि सर्वाणि 'भेषजानि' अस्मे' अस्माकं 'तनूषु' शरीरेषु 'धत्तम्'। किञ्च, 'अवस्यतम्' नित्यमस्मानपि तु रक्षितुमिच्छतम्। किञ्च, 'यत्' 'नः' अस्माकम् मनोवाक्कायैः 'कृतम्' 'एनः' किञ्चित् अस्ति, 'तनूषु' तत् 'मुञ्चतम्' 'अस्मत्' अस्मत्तः ॥

"अग्निना च पूषा" मध्यमस्थानेन च द्युस्थानेन च कन्दाव

इति, पार्थिवेन प्रतिषेधात्। ऋचं नोदाहरति, ऋग्यमुदाहरणं येन संस्तवः॥

"वातेन च पर्जन्यः"। धर्त्तारो दिव ऋभवः सुहस्ता वातापर्जन्या महिषस्य तन्यतोः। आप ओषधीः प्रतिरन्तु नो गिरो भगो रातिर्वाजिनो यन्तु मे हवम्॥"—इति (ऋ० सं० ८, २, १३, ५)। वसुकर्णस्यार्षम्। त्रिष्टुप्। 'धर्त्तारः दिवः ऋभवः' 'सुहस्ता' शोभनहस्तौ 'वातापर्जन्या' वातापर्जन्यौ च, 'आपः' च, 'ओषधीः' ओषधयश्च, 'भगः' च, 'रातिः' दाता, 'वाजिनः' च, 'धर्त्तारः' धारयितारः, 'दिवः' द्योतनवन्तः ये उक्ताः उदकस्य। 'महिषस्य' महतः 'तन्यतोः' सर्वार्थतनितुः। 'हव' हवनसाह्वानम् 'नः' अस्माकम् 'आयन्तु' आगच्छन्तु। आगत्य च 'प्रतिरन्तु' प्रतीर्णाः कुर्वन्त्वेता अस्मद्'गिरः' वर्द्धयन्त्वित्यर्थः। वातापर्जन्याविति अत्र संस्तवः॥ ३ (१०)॥

अथैतान्यादित्यभक्तीन्यसौ लोकस्तृतीयसवनं वर्षा जगती सप्तदशस्तोमो वैरूपं साम ये च देवगणाः समाम्नाता उत्तमे स्थाने याश्च स्त्रियोऽथास्य कर्म रसादानं रश्मिभिश्च रसधारणं यच्च किञ्चित् प्रवल्हितमादित्यकर्मैव तच्चन्द्रमसा वायुना संवत्सरेणेति संस्तवः॥ ४॥

अथैतान्यादित्यभक्तीनि"—इति। पूर्ववत् "असौ लोक"—इत्येवमादि। "सूर्यो द्युस्थानः"—इति पूर्वमधिकृत्य "अथ एतानि आदित्यभक्तीनि"—इति इहाब्रवीत् सपक्षोद्योतनानुस्मृतये॥

"ये च देवगणाः समाम्नाताः उत्तमे स्थाने" आदित्यादयः। "याश्च स्त्रियः"—उषाः, सूर्या, वृषाकपायी, सरण्यूः, देवपत्न्यः इति॥

"अथास्य कर्म"—"रसादानम्"—इत्येवमादि, "यच्च किञ्चित् प्रवल्हितम् आदित्यकर्म एव तत्"।

"चन्द्रमसा, वायुना, संवत्सरेण इति संस्तवः"। अल्पत्वात् स्वयमेवैव ब्रवीति, नाधिकारवचनं करोति अथास्येति॥

"पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परियातो अध्वरम्। विश्वान्यन्यो भुवनाभिचष्ट ऋतूनन्यो विदधज्जायते पुनः॥"—इति (ऋ॰ स॰ ८, ३, २३, ३)। चन्द्रमसा संस्तवः। सूर्यायामार्षम्। जगती। राजयक्ष्मघ्यां वैश्वदेवस्य चरोः पुरोऽनुवाक्यैषा। 'पूर्वापरं चरतः' सूर्याचन्द्रमसौ पूर्वपक्षे पूर्वः सूर्यः अपरश्चन्द्रमाः, अपरपक्षे पुनरपरः सूर्यः पूर्वश्चन्द्रमाः। एवम् 'एतौ' चरणमनुपरन्तौ चरन्तौ सर्वदा चरतः। तौ पुनः 'मायया' योगैश्वर्यकृतया कयापि प्रज्ञयेति कस्तत्वेद, न ह्ययोगिनौ एवं शक्तौ चरितुमिति। अपि चैतदपि चित्रम्,—यदपरिखिद्यमानौ आभूतसंप्लवात् 'शिशू' इव 'क्रीडन्तौ'। 'अध्वरं' यज्ञमभिनिष्पादयन्तौ सर्वमिदं 'परियातः' परिगच्छतः। तत् कथमिति,—"विश्वान्यन्यो भुवनाभिचष्टे"। 'विश्वानि' 'भुवना' भुवनानि भूतानि 'अभिचष्टे' अभिपश्यति 'अन्यः' आदित्यः, अथैतान्भिद्रष्टव्यानि उपकारकत्वेन तथैव सत्त्वानि पश्यति। 'ऋतून्' 'अन्यः' चन्द्रमाः 'विदधत्' अभिनिष्पादयन् स्वगत्या। 'पुनः' पुनः पुनः प्रतिमासं 'जायते' जायमानः उदेति अस्तमेति च। असंस्तवैनोत्तरोऽर्द्धर्चः। यावितद्देवमत्यद्भुतं किमपि चरण

चरतः, तावेतौ अगदमस्य यजमानं कुरुतमित्याशिषा निराकाङ्क्षः ॥

वायुना संस्तवः "सप्त ऋषयः प्रतिहिताः (य० वा० सं० ३४, ५५)"—इत्यत्र। तत्र 'जाग्रतो अस्वप्नजौ'—इत्येतस्मिन् पादे "वाय्वादित्यौ"—इति वक्ष्यति ॥

संवत्सरेण च संस्तवः "पञ्चपादं पितरम् (ऋ० सं० २, ३, १६, २)"—इति व्याख्यातः ॥ ४ ॥

एतेष्वेव स्थानव्यूहेष्वृतुच्छन्दःस्तोमपृष्ठस्य भक्तिशेषमनुकल्पयीत शरदनुष्टुबेकविंशस्तोमो वैराजं सामेति पृथिव्यायतनानि हेमन्तः पङ्क्तिस्त्रिणवस्तोमः शाक्वरं सामेत्यन्तरिक्षायतनानि शिशिरोऽतिच्छन्दास्त्रयस्त्रिंशस्तोमो रैवतं सामेति द्युभक्तीनि ॥ ५ (११) ॥

"एतेषु एव स्थानव्यूहेषु ऋतुच्छन्दःस्तोमपृष्ठस्य भक्तिशेषमनुकल्पयीत"। ऋतवश्च छन्दांसि च स्तोमाश्च पृष्ठानि च ऋतुच्छन्दःस्तोमपृष्ठम्, तस्य ऋतुच्छन्दःस्तोमपृष्ठस्य। ऋतुभक्तिशेषम्, छन्दोभक्तिशेषम्, स्तोमभक्तिशेषम्, पृष्ठभक्तिशेषञ्च।

तद्यथा,—"शरत्, अनुष्टुप्, एकविंशस्तोमः, वैराजं साम—इति पृथिव्यायतनानि"। अनग्निलिङ्गेऽपि चेन्मन्त्रे एतेषामन्यतमं स्यात्, स आग्नेय इति प्रतिपत्तव्यम्। एवमेवोत्तरयोरपि स्थानव्यूहयोः। व्यूहो नाम विस्तारः। "हेमन्तः, पङ्क्तिः, त्रिणवस्तोमः, शाक्वरं साम—इति" "अन्तरिक्षायतनानि" अन्तरिक्षलोकायतनानि। "शिशिरः, अतिच्छन्दाः,

२ ३।—नि

त्रयस्त्रिंशस्तोमः, रैवतं साम—इति" "द्युभक्तीनि" द्यां भजन्त इति द्युभक्तीनि, अपिवा आदित्यं भजन्त इति द्युभक्तीनि। विभक्तिग्रहणं प्रणाडिकोपदर्शनार्थम्, एतेषां स्तुतिः सा स्तुतिसङ्क्रमणन्यायेन स्थानाधिपतेः सूर्यस्य स्तुतिरिति। सर्वत्रैवम् ॥ ५ (११) ॥

सर्वमेतन्मन्त्राश्रयमित्युक्तम्, त एव तावत् मन्त्राः कस्मात्? इति वक्तव्यमत आह,—

मन्त्रा मननाच्छन्दांसि छादनात् यजुर्यजतेः साम सम्मितमृचास्यतेर्वर्चा सममेने इति नैदाना गायत्री गायतेः स्तुतिकर्मणस्त्रिगमना वा विपरीता गायतो मुखादुदपतदिति च ब्राह्मणम् ॥ ६ ॥

"मन्त्राः मननात्" तेभ्यो ह्याध्यात्माधिदैवाधियज्ञादि मन्तारो मन्यन्ते, तदेषां मन्त्रत्वम् ॥

ते पुनश्छन्दोमयाः, नाच्छन्दसि वागुच्चरतीति अथ "छन्दांसि" कस्मात्? "छादनात्"। "यदेभिरात्मानमाच्छादयन् देवा मृत्योर्बिभ्यत, तच्छन्दसां छन्दस्त्वम्"—इति विज्ञायते ॥

अथ "यजुः" कस्मात्? "यजते" धातोः, तेन हि विशेषत इज्यते, सर्वत्र याज्यान्ते वषट्कारविधानात् ॥

अथ "साम" कस्मात्? तद्धि "सम्मितम् ऋचा" यावती ह्यृक् तावदेव परिमाणतः। "अस्यते. वा" क्षेपणार्थस्य (दि॰ प॰), प्रक्षिप्तमिव हि तत् ऋचि भवति। विज्ञायते च "तस्मादृच्यध्यूढं साम गीयते"। अथवा "स्यतेः वा" इति। "सो

मन्त्रकर्मणि (दि० प०)" अस्य तत् कर्म भवति, सहिता—पदम्—साम इति। "ऋचा समं मेने—इति नैदाना"। 'ऋचा' एतत् 'समम्' इत्येव प्रजापति 'मेने' ज्ञातवान्। अथवा आत्मानमेव 'ऋचा सम' ;'मेने' ज्ञातवत्, तत् साम्न सामत्वम्। इत्येव 'नैदाना' मन्यन्ते। निदानमिति ग्रन्थ, तद्विदो नैदाना ॥

"छन्दांसि छादनात्"—इत्युक्तम्, तानि च पुनरमूनि गायत्रीप्रमुखानि। अतो गायत्रीं निराह,—"गायत्री, गायतेः स्तुतिकर्मण" तया हि गीयन्ते स्तूयन्ते देवता ॥ ६ ॥

उष्णिगुत्स्नाता भवति स्निह्यतेर्वा स्यात् कान्तिकर्मण उष्णीषिणी वेत्यौपमिकमुष्णीषं स्नायतेः ककुप् ककुभिनी भवति ककुप् च कुब्जश्च कुजतेर्वोब्जतेर्वानुष्टुबनुष्टोभनाद्गायत्री-मेव त्रिपदां सतीं चतुर्थेन पादेनानुष्टोभतीति च ब्राह्मणम् ॥ ७ ॥

"ककुप्" "ककुभिनी" इव "भवति"। सैवोष्णिक् आगतेन पादेनोपहितेन मध्यतः ककुबित्युच्यते, स तस्याः ककुबिव मध्यतो भवति, तेन ककुभिनीव ककुप्। अथ "ककुप्" कस्मात्? "कुजते." "वा" कौटिल्यार्थस्य, "उब्जते." "वा" न्यग्भावार्थस्य, नतं हि तद् भवति ॥

"कुलय" कुब्जोऽप्यनयोरेवान्यतरस्मात् ॥

"अनुष्टुप्" "अनुष्टोभनात्"। किमियमनुष्टोभनमिति? "गायत्रीमेव त्रिपदां सतीं चतुर्थेन पादेन अनुष्टोभति,—इति च ब्राह्मणम्"। एतमतं 'च'शब्देन समुच्चिनोति। गायत्री, त्रिभिरष्टाक्षरैः पादैः समाप्यते, तस्याश्च पुनरपरः चतुर्थः पादो भवति, येन तामेव अनुष्टुप् अनुष्टोभति, तस्मादनुष्टुप् ॥ ७ ॥

बृहती परिवर्हणात् पङ्क्तिः पञ्चपदा त्रिष्टुप् स्तोभत्युत्तरपदा का तु त्रिता स्यात्तीर्णतमञ्छन्दस्त्रिवृद्वज्रस्तस्य स्तोभतीति वा यत्त्रिरस्तोभत्तत्त्रिष्टुभस्त्रिष्टुप्त्वमिति विज्ञायते ॥ ८ (१२) ॥

"बृहती" "परिवर्हणात्" परिवृढासौ भवति, अनुष्टुभश्चतुर्भिरक्षरैः, उक्तं हि—"बृहती जागतस्त्रयश्च गायत्राः."—इति ॥

"पङ्क्तिः" "पञ्चपदा" पञ्चभिः पादैः पङ्क्तिरित्युच्यते ॥

अथ "त्रिष्टुप्" कस्मात्? ततो विग्रहोत्तरं पदं निराह,—"स्तोभत्युत्तरपदा" स्तोभतिर्धातुरुत्तरं पदं यस्याः, सेयं स्तोभत्युत्तरपदा। "का तु त्रिता स्यात्?" अथ पुन. पूर्व-

यदे येयं त्रिता त्रित्वं श्रूयते 'त्रि'-इति, एतत् किमर्थमिति ? "तीर्णतम" स्तुततममिद "छन्दः" गायत्र्यादिभ्यो बहुत्वात्, सेयं तीर्णतमा च स्तोभति च त्रिष्टुप्। "त्रिवृद् वज्र, तस्य स्तोभति इति वा" वज्रमायुधम्, तच्च पुनः प्रायः त्रिसन्धि-यरो वेणुः शृङ्ग शल्यमिति विज्ञायते, तस्य स्तोभति स्तुति। अथवा ऐन्द्रमेतच्छन्द, वज्रं चेन्द्रभक्ति, तस्मादुपपद्यते। "यत् त्रि. अस्तोभत्, तत् त्रिष्टुप्त्वम्—इति विज्ञायते"॥ ८ (१२॥

जगती गततमं छन्दो जलचरगतिर्वा जल्गल्यमानोऽसृजदिति च ब्राह्मणं विराड्विराजनाद्वा विराधनाद्वा विप्रापणाद्वा विराजनात्सम्पूर्णाक्षरा विराधनादूनाक्षरा विप्रापणादधिकाक्षरा पिपीलिकमध्येत्यौपमिकं पिपीलिका पेलतेर्गतिकर्मणः ॥ ६ ॥

"जगती" "गततम छन्द" अन्त्यमित्यर्थः। अत परमतिच्छन्दांसि। "जलचरगतिर्वा" जलोर्मिप्रकारो हि तस्याः प्रस्तार.। "जल्गल्यमानोऽसृजत्—इति च ब्राह्मणम्"। 'ग्लै हर्षक्षये (भ्वा॰ प॰)'। क्षीणहर्ष इव क्लान्तः प्रजापतिः ससृजे, इत्यर्थः, न हि छन्दांसि क्रियन्ते नित्यत्वादेव छन्दसाम्।

विराज परस्तात् त्रिष्टुप् निरुक्ता, बाहुल्याददभियज्ञे च प्रयोगभूयस्त्वात्। अथ पुनर्विराज निराह,—"विराट्" "विराजनाद् वा, विराधनाद् वा, विप्रापणाद् वा"। "विराजनात्, सम्पूर्णाक्षरा" साकल्याद् विराजत इव। "विराजनात्, ऊना-

क्षरा" वैकल्याद् विराध्यन्तीव हि सा। "विपापवात्, अधिक्षाचरा" विमुतेव हि सा स्वरूपात्।

"पिपीलिकमध्या इति औपमिकम्" मध्याक्षाचरपादा या, सा पिपीलिकमध्येव भवति, पिपीलिकस्वरूपा। "पिपीलिका" कस्मात्? "पेलतेः" "गतिकर्मणः" गत्यर्थस्य ॥८॥

इतीमा देवता अनुक्रान्ताः सूक्तभाजो हविर्भाज ऋग्भाजश्च भूयिष्ठाः काश्चिन्निपातभाजोऽथोताभिधानैः संयुज्य हविश्चोदयतीन्द्राय वृत्रघ्न इन्द्राय वृत्रतुर इन्द्रायांहोमुच इति तान्यप्येके समामनन्ति भूयांसि तु समाम्नानाद्यत्तु संविज्ञानभूतं स्यात् प्राधान्यस्तुति तत्समामनेऽथोत कर्मभिर्ऋषिर्देवता स्तौति वृत्रहा पुरन्दर इति तान्यप्येके समामनन्ति भूयांसि तु समाम्नानाद् व्यञ्जनमात्रं तु तत्तस्याभिधानस्य भवति यथा ब्राह्मणाय बुभुक्षितायौदनं देहि स्नातायानुलेपनं पिपासते पानीयमिति ॥ १० (१३) ॥

इति सप्तमाध्यायस्य तृतीयः पादः ॥ ७, ३ ॥

"इति इमाः देवताः अनुक्रान्ताः"। इतिकरणः प्रकरणसमाप्त्यर्थः। अथवा इतिकरणेनाभिनयेन दर्शयन्निव ब्रवीति। एवमनेन प्रकारेण यथापरिभाषितेन "यत्काम ऋषिः"—इत्येवमादिना। इमा देवता अनुक्रान्ताः—अग्निः, जात-

वेदा, वैश्वानर — इत्येवमाद्या समासतो निर्णीता इत्यर्थ । ता: पुन "सूक्तभाजो हविर्भाज"। काश्चित् हविर्भजन्ते न सूक्तम्, काश्चित् सूक्त भजन्ते न हवि, काश्चित् उभय भजन्ते । वक्ष्यति हि—"इतीमानि सप्तविंशतिर्देवतानामधेयान्यनुक्रान्तानि सूक्तभाञ्जि हविर्भाञ्जि, तेषामेतान्यहविर्भाञ्जि"—इति। "ऋग्भाजश्च भूयिष्ठा" प्रायेणेत्यर्थ । तद्यथा,—आप्रीसूक्ते एकैकामृच भजन्ते लक्षणभेदादिभि । अर्धर्चभाजोऽपि क्वचिदुपेक्षितव्या । तद्यथा,—"ऋच सूर्याय गोयन्त उदेतीत्यर्धपञ्चमा"। "यत्रा चक्रु"—इत्यस्या पूर्वो ऽर्धर्च: सौर्य्य शौनकस्य उत्तरो मैत्रावरुण: । पादभाजोऽपि क्वचिदुपेक्षितव्या । तद्यथा,—"नवो नवो भवति जायमान (ऋ० स० ८, ३, २३, ४)"—इत्यस्या: आदित्यदैवतो द्वितीय पादो भवति। भूयिष्ठग्रहणाच्च दर्शयति असमाम्नाता अपि सन्ति, ता अप्युपेक्षितव्य इति, ताश्च यथालक्षण विपु कल्प्या । तद्यथा,—परमेष्ठिपद्मनक्षत्रसर्पलाङ्गलक्षुसुभ्रकाम्रष्टतीनि ।

"काश्चित् निपातभाज"—इति। निपातो हि द्विविध । देवतान्तरे सह साधारण्येनोपस्तुतो नैघण्टुकत्वेन च। तत्र साधारण नाम, तद्यथा,—"विधाता धाता व्याख्यात"। तस्यैव निपातो भवति बहुदेवतायामृचि। सोमस्य राज्ञ" इति। अस्या सोमप्रभृतिभि सह विधानात् श्रूयते साधारण्येन। नैघण्टुकत्वेन पुन तद्यथा,—"पृथिवी व्याख्याता"। तस्या एष निपातो भवत्यैन्द्राग्न्यामृचि। "यदिन्द्राग्नी परमस्यां पृथिव्याम्"—इति। ताभ्यामिन्द्राग्निभ्या सह साधारण्येन पृथिवी न स्तूयते, किन्तर्हि ? लक्षणत्वेनैन्द्राग्न्योर्देशोपादीयते। एव तावदयमिहाधिकार आचाक्षपातभाज इति द्विप्रकारो निपात उक्त ।

अथायमपरो निपातप्रकार उपेक्ष्यः, तद्यथा,—अत्यन्तनैघण्टुकम्, देवताभिधानमनत्यन्तनैघण्टुकञ्च । तत्र अत्यन्तनैघण्टुकं नाम अत्यन्तमदृष्टस्वप्रधानस्तुति. । तद्यथा,—आदित्यस्य स पृश्निःप्रभृतिभिः । अथ पुनः दृष्टस्वप्रधानस्तुतिमद्देवतापद वाक्यार्थोपजनितपारतन्त्र्यमाच्छिन्नस्वाभिधेयसामर्थ्यमुपमानशब्देन स्वसमर्थमन्यस्मिन् देवतापदे प्रधाने वाक्यार्थसामर्थ्योपजनितप्राधान्यसामर्थ्यं यत् निगमयति, अनत्यन्तनैघण्टुक तद् भवति । तद्यथा,—"अग्निरिव मन्यो"—इति (ऋ० स ८, ३, १८, २)। अग्निशब्द इवेत्यनेनोपमानशब्देन वाक्यार्थोपजनितसामर्थ्येनाच्छिन्नस्वाभिधेयसामर्थ्यो , विशेषमाकाङ्क्षन् सम्बोधनान्त मन्युशब्दे वाक्यगते. पदैरनीयमानसामर्थ्यमर्थिनिविषयपक्षे स्वमर्थं मन्युशब्दे निगमयन् निपततीति नैघण्टुकं तदिति। एवमनेकप्रकारो निपात उपेक्ष्य. ॥

"अथ उत अभिधाने. संयुज्य हविः चोदयति"। 'अथ'—इति विशेषाधिकारे। 'उत'—इत्यप्यर्थे। अपरमपरमभिधानमपेक्ष्यापेक्ष्य। तद्यथा,—अभिधाने. संयोज्य विशेषणशब्दैः तत्रैतदभिधानमिन्द्रादिसविधानाद् इष्टमिन्द्रादौ देवतार्थे आम्नायविधौ प्रयोगे च हविश्चोदयति ॥

तद्यथा,—"इन्द्राय वृत्रघ्ने एकादशकपालं निर्वपेत्" इति, तथा "इन्द्रायांहोमुचे इति"—"इन्द्रायांहोमुचे एकादशकपालं निर्वपेत्"—इति ॥

तत्र किम्? "तान्यप्येके समामनन्ति"। 'एके' नैरुक्ता. 'तान्यपि' गुणपदानि वृत्रघ्नांहोमुक्प्रभृतीनि, अग्न्यादौ देवतापदसमाम्नाये पृथक् पृथक् 'समामनन्ति' अहं तु न समामने। कस्मात्? "भूयांसि तु समाम्नानात्" यानि तेषु

गुणपदानि वृत्रहाद्रीमुकुप्रभृतीनि समामनन्ति, ततोऽन्यान्यपि 'भूयांसि' बहुतराणि सन्ति एव, माहाभाग्यात् देवतायाः गुणानामियत्ता नास्ति, तेषां तु सर्वेषां समाम्नाने समाम्नायस्यापरिनिष्ठैव स्यात्, तथा च सति तेषां शास्त्रे असमाप्तिः, तन्मामपि मा भूदित्यतः "यत् तु संविज्ञानभूतं स्यात् प्राधान्यस्तुतिः, तत् समामने" इति। यदेतत् संविज्ञानभूतं रूढमगौणं केवलमपि निर्विशेषणं लब्धप्रधानस्तुतिदेवतापदमग्न्यादि, तत् समामने, न गौणं शतक्रतु-व्रतपत्यादि।

अथवा तान्यप्येके समामनन्तीत्यत उत्तरस्य "भूयांसि तु समाम्नानात्"—इत्यस्यायमर्थः। भूयांसि एव तेषां समाम्नानात् गुणानि समाम्नातानि स्युः, न किञ्चिदतिरिक्तं प्रयोजनम्, वचनात् केवलं गुरु शास्त्रं सम्पद्यते, तस्मा भूत् इत्यर्थः॥

"अथ उत कर्मभिः ऋषिः देवता स्तौति—वृत्रहा, पुरन्दरः"—इति। स वृत्रहा, शतक्रतुः, पुरन्दरः, गोत्रभित्, वज्रबाहुः इति। "तानि अपि एके समामनन्ति" तानि अपि एके कर्मनामधेयानि समामनन्ति। को विशेषः पूर्वेभ्यः समाम्नातेभ्यः? विधिदर्शनात् पूर्वेण चविशोदयति इति वचनात् स्तुतिदर्शनादिकर्मभिर्ऋषिर्देवताः स्तौतीति वचनात् "भूयांसि तु समाम्नानात्" इति स एव दोषः॥

"व्यञ्जनमात्रं तु तत्, तस्याभिधानस्य भवति"। वृत्रहा पुरन्दर इति यदेवमादि गुणपदम्, 'तत्' तस्यैवेन्द्रादेः संविज्ञातपदस्य 'व्यञ्जनमात्रं' विशेषणमात्रं भवति, न पृथक् प्रधानम्, केवलस्य सम्बन्धात् स्तुत्या। यथा लोके—"ब्राह्मणाय बुभुक्षिताय ओदनं देहि, स्नाताय अनुलेपनम्, पिपासते

अथायमपरो निपातप्रकार उपेक्ष्यः, तद्यथा,—प्रत्यक्ष-नैघण्टुकम्, देवताभिधानमनन्यत्नैघण्टुकञ्च। तत्र प्रत्यक्ष-नैघण्टुकं नाम प्रयत्नमदृष्टस्वप्रधानस्तुतिः। तद्यथा,—मादि-त्यस्य स्व.पृश्निःप्रभृतिभिः। अथ पुनः दृष्टस्वप्रधानस्तुतिमद्दे-वतापदं वाक्यार्थोपजनितपारतन्त्र्यमाक्षिप्तस्वाभिधेयसामर्थ्य-मुपमानशब्देन स्वमर्थमन्यस्मिन् देवतापदे प्रधाने वाक्यार्थ सामर्थ्योपजनितप्राधान्यसामर्थ्यं यत् निगमयति, अनन्यत्न-नैघण्टुकं तद् भवति। तद्यथा,—"अग्निरिव मन्यो"—इति (ऋ॰ सं ८, ३, १८, २)। अग्निशब्द इवेत्यनेनोपमानशब्देन वाक्यार्थोपजनितसामर्थ्येनाक्षिप्तस्वाभिधेयसामर्थ्यो विशेष माकाङ्क्षन् सम्बोधनान्तं मन्युशब्दं वाक्यगतं पदैकत्वीयमा-मसामर्थ्यमर्थिनिवेशपक्षे स्वमर्थं मन्युशब्दे निगमयन् निप-ततीति नैघण्टुकं तदिति। एवमनेकप्रकारो निपात उपेक्ष्य.॥

"अथ उत अभिधानैः संयुज्य हविः चोदयति"। 'अथ'—इति विशेषाधिकारे। 'उत'—इत्यप्यर्थे। अपरमपरमभिधान-मपेक्ष्यापेक्ष्य। तद्यथा,—अभिधानैः संयोज्य विशेषणशब्दैः सत्वैतदभिधानमिन्द्रादिसंविज्ञानाद् हृदमिन्द्रादौ देवतार्थं भाम्नायविधौ प्रयोगे च हविश्चोदयति॥

तद्यथा,—"इन्द्राय वृत्रघ्ने एकादशकपालं निर्वपेत्" इति, तथा "इन्द्रायांहोमुचे इति"—"इन्द्रायांहोमुचे एकाद-शकपालं निर्वपेत्"—इति॥

ततः किम्? "तान्यप्येके समामनन्ति"। 'एके' नैरुक्ताः 'तान्यपि' गुणपदानि वृत्रघ्नांहोमुक्प्रभृतीनि, अग्न्यादौ देवतापदसमाम्नाये पृथक् पृथक् 'समामनन्ति', अहं तु न समामने। कस्मात्? "भूयांसि तु समाम्नानात्" यानि तेषु

गुणपदानि वृत्रहाङ्गोमुक्प्रभृतीनि समामनन्ति, ततोऽन्यान्यपि 'भूयांसि' बहुतराणि सन्ति एव, माहाभाग्यात् देवतायाः गुणानामियत्ता नास्ति, तेषां तु सर्वेषां समाम्नाने समाम्नायस्यापरिनिष्ठैव स्यात्, तथा च सति तेषां शास्त्रे असमाप्तिः, तदपि मा भूदित्यतः "यत् तु संविज्ञानभूतं स्यात् प्राधान्यस्तुतिः, तत् समामने" इति । यदेतत् संविज्ञानभूतं रूढमगौणं केवलमपि निर्विशेषणं लब्धप्रधानस्तुतिदेवतापदमग्न्यादि, तत् समामने, न गौणं व्रतभृत्-व्रतपत्यादि ।

अथवा तान्यप्येके समामनन्तीत्यत उत्तरस्य "भूयांसि तु समाम्नानात्"—इत्यस्यायमर्थः । भूयांसि एव तेषां समाम्नानात् गुणानि समाम्नातानि स्युः, न किञ्चिदतिरिक्तं प्रयोजनम्, वचनात् केवलं गुरु शास्त्रं सम्पद्यते, तन्मा भूत् इत्यर्थः ॥

"अथ उत कर्मभिः ऋषिः देवताः स्तौति—वृत्रहा, पुरन्दरः"—इति । स वृत्रहा, शतक्रतुः, पुरन्दर, गोत्रभित्, वज्रबाहुः इति । "तानि अपि एके समामनन्ति" तानि अपि एके कर्मनामधेयानि समामनन्ति । को विशेषः पूर्वेभ्यः समाम्नातेभ्यः ? विधिदर्शनात् पूर्वेण हविर्चोदयति इति वचनात् स्तुतिदर्शनादिकर्मभिर्ऋषिर्देवताः स्तौतीति वचनात् "भूयांसि तु समाम्नानात्" इति स एव दोषः ॥

"व्यञ्जनमात्रं तु तत्, तस्याभिधानस्य भवति" । वृत्रहा पुरन्दर इति यदेवमादि गुणपदम्, 'तत्' तस्यैवेन्द्रादेः संविज्ञातपदस्य 'व्यञ्जनमात्र' विशेषणमात्रं भवति, न पृथक् प्रधानम्, केवलस्य सम्बन्धात् स्तुत्या । यथा लोके—"ब्राह्मणाय बुभुक्षिताय ओदनं देहि, स्नाताय अनुलेपनम्, पिपासते

पानीयम्—इति"। यो बुभुक्षित, तस्मै इति यथा तु बुभुक्षितशब्दो विशेषणम्, केवलस्य बुभुक्षितशब्दस्य विशेषतः क्वचिदनवस्थानात्। एवं इवहा पुरन्दर इत्येवमादीनां विशेष्यमप्राप्यानवस्थानाद् व्यञ्जनमात्रता, न स्वप्रधानता। तस्मात्ताभ्यश्च समाम्नते ॥ १० (१३) ॥

इति निरुक्तभाष्यार्थविनिबद्धो द्वादशस्य (सप्तमस्य)
तृतीयः पादः समाप्तः ॥ ७, ३ ॥

चतुर्थः पादः।

अथातोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामोऽग्निः कस्मादग्रणीर्भवत्यग्रं यज्ञेषु प्रणीयतेऽङ्गं नयति सन्नममानोऽक्नोपनो भवतीति स्थौलाष्ठीविर्न क्नोपयति न स्नेहयति त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिरितादक्ताद्दग्धाद्वा नीतात्स खल्वेतेरकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परस्तस्यैषा भवति ॥ १ (१४) ॥

"अथातोऽनुक्रमिष्याम." । सामान्यतः परिस्यातोऽस्यादिदैवपक्षान्तो दैवतापदसमाम्नाय, विशेषत इदानीं प्रतिपदमनु व्याख्यास्यते, तदर्थमधिकारवचनम्,—'अथ' इति।

'अत'—इति स्थानमर्थे। सामान्यात् पारिभाषिकार्थव्याख्यानादनन्तरात् 'अनु' आनुपूर्वेण यथासमाम्नातं 'क्रमिष्याम.' कथयिष्यामो वर्णयिष्यामो व्याख्यायोत वाक्यशेषः। सा

(१) (२) (३) (४)
च पुनर्व्याख्या अभिधानाभिधेयाभिधानव्युत्पत्तिप्राधान्यस्तुत्यु-
(५) (६) (७) (८)
दाहरणतन्निर्वचनविचारोपपत्त्यवधारणक्रमलक्षणा। तद्यथा,
—(१) "अग्नि"—इत्यभिधानम्, (२) अय पार्थिव इत्यभि-
धेयम् (३) "अग्रणीर्भवति"—इत्यभिधानव्युत्पत्ति, (४)
अग्निमीले"—इति प्राधान्यस्तुत्युदाहरणम्, (५) अग्नि-
मीले—"अग्नि याचामि" इति तन्निर्वचनम्, (६) "स न
मन्येतायमेव अग्नि"—इति विचार, (७) "यस्तु सूक्त
भजते यस्मै हविर्निरुप्यते"—इत्युपपत्ति, (८) "अयमेव
सोऽग्नि"—इत्यवधारणम्। एवम्प्रकारया व्याख्यया प्रतिपद-
मनुक्रमिष्यास, ॥

तत्रैतद् भवति कोऽयमग्नि:? इति। आत्मा—इत्यात्मविद',
"एकं सद्विप्रा बहुधा वदन्ति (ऋ० स० २, ३, २२, ६)"
—इति मन्त्रदर्शनात्। अविवक्षितस्थानविशेषो निर्ज्ञातैत-
दभिधानो देवताविशेषो लोकवेदप्रसिद्ध कर्माङ्गमिति
याज्ञिका। विवक्षितस्थानविशिष्टकर्मा मध्यमोत्तमाभ्या
ज्योतिर्भ्यामन्य: पार्थिवोऽयमग्निरिति नैरुक्तसमय। त्रित्वा
भ्युपगमात्तत्सम्पिपादयिषयेदमारभ्यते।

"अग्नि पृथिवीस्थान त प्रथम व्याख्यास्याम"—इति।
पृथिव्येवास्य विशेषत. स्थानम्, न अन्तरिक्षम्, न द्यौ इति
पृथिवीस्थान, तत्र कर्माधिकारात् तस्य। तिष्ठत्यस्मिन् इति
स्थानम्। यस्मात् पृथिवी अस्य स्थानम्, तस्मात् सन्निकर्षात्
कानुक्रमाद्य न ह्यसति कारणे प्रथमातिक्रमो न्याय्य इति त
मेव प्रथम व्याख्यास्याम ॥

"अग्नि. कस्मात्"। देवताभिधाने देवता आसन परो

क्षीकृत्य परोक्षीकृतं तत्त्वमर्पितम्, परोक्षप्रिया इव हि देवाः प्रत्यक्षविषय इति हि विज्ञायते। तन्निर्वचनादागमप्रामाणिकं देवताताद्रूप्यमनुभवतीति मत्वेत्थं तन्निर्विवक्षया "अग्निः कस्मात्" ? इत्युपोद्घात्य "अग्रणीः भवति"—इत्येवमादिना अग्निशब्दं निराह। सर्वत्रैवं देवतापदे उपोद्घातोपन्यासौ द्रष्टव्यौ। आत्मवित्पक्षे तु सर्वमभिधानमात्मार्थमेवेति सर्वावस्थमात्मानं सर्वाभिधानव्युत्पत्तितो निरुच्य याथार्थ्यतः परिज्ञाय सर्वात्मन आत्मनः सर्वावस्थं विभूतिताद्रूप्यमनुभवतीति सर्वपदव्युत्पत्तिप्रयोजनम्। स्मर्यते हि,—"शब्द-ब्रह्मणि निष्णातः परब्रह्माधिगच्छति"—इति॥

"अग्रणीः भवति"—इति। अग्निशब्दं विगृह्य वाक्यीकृत्य कृतवाक्यपदवर्णनिष्कर्षणसमुदायोपजनितस्य अग्निशब्दस्य अग्रशब्दात् गकारमुपलभ्य अग्रशब्दं कर्माभिधायिनं पूर्वपदत्वेन व्यवस्थाप्य नयतिं च परमुत्तरपदस्थं कर्त्तव्यार्थात्मने व्यवस्थाप्य अग्निशब्दं निराह,—अथ कोऽर्थः ? इति। सर्वेष्वर्थेष्वसावात्मानमग्रं नयति, सर्वत्र तथोपकरोति यथा अग्रं सम्पद्यत इत्यर्थः। अग्रशब्दः प्रधानवाची, स एव वा अग्रं नयति। सेना वा अग्रे नयति सैनापत्येऽवस्थित इत्येके, विज्ञायते हि,—"अग्निर्वै देवानां सेनानी." इति॥

अथवा "अग्रं यज्ञेषु प्रणीयते" प्रथमं यज्ञेषु प्रणीयते, न तावत् किञ्चिदप्यन्यत् क्रियते यावदयं न प्रणीयत इति, ततोऽस्मिन् व्रतमुपेत्यान्यानि कर्माणि क्रियन्त इति॥

अथवा "अङ्गं नयति सन्नममानः" यत्रायं सन्नमयति साधनत्वेन वैदिके वा लौकिके वार्थे, तत्र सन्नममान एवात्मानं प्रधानीकृत्य सर्वमन्यदात्मनोऽङ्गतां नयति गुणीकरोतीत्यर्थः। अथवा "अङ्गं नयति सन्नमानः" इन्धे वा काष्ठे वा

यत्र स्वमति आययति, तत् आत्मनोऽङ्गतां नयति, आत्मसात् करोतीत्यर्थः॥

"अक्नोपनो भवति इति स्थौलाष्ठीविः"। स्थूलाष्ठीवतः पुत्रः स्थौलाष्ठीविः आचार्यः स एव मन्यते,—अयमक्नोपनो यस्माद् भवतीति तस्मादग्निरिति। किमिदमक्नोपनः इति ? अत आह,—"न क्नोपयति"। एवमपि न ज्ञायते क्नोपयतेरप्रसिद्धार्थत्वात्। अतः पुनर्ब्रवीति प्रसिद्धेनार्थेन,—"न स्नेहयति विद्रवीकरोतीत्यर्थं, स हि तस्य स्वभावः॥

"त्रिभ्यः आख्यातेभ्यः जायते इति शाकपूणि"। त्रयाणामाख्यातानामभिधेयाः क्रिया अत्र लक्ष्यन्ते, ता उपादाय हेतुत्वेनाग्निशब्द आत्मानं लभते। तद्यथा,—"इतात्" 'इण गतौ (अदा॰ प॰)'—इत्यस्मादित्यर्थः। "अक्तात्, दग्धाद् वा" अनक्तेर्वा दहतेर्वा विकल्प एतयोः। ततः "नीतात्" इति, 'णीञ् प्रापणे (भ्वा॰ प॰)'—इत्येतस्मात्। धातवः केवल निर्दिष्टाः। किं कुत आदत्ते ? इत्यत आह,—"स खलु" शाकपूणिः "एतेः" धातोः "अकारम् आदत्ते"। नन्वेतेरकार एव नास्ति, अतः किमादत्ते ? सत्यं नास्ति, वर्णसामान्येन तद्विकारमादाय इणोऽर्थदर्शनात् अग्नौ शब्दार्थसम्बन्धनित्यत्वात्, अर्थे च गुणभूतत्वाच्छब्दस्य, ततः तं व्यापादगत्यकारत्वेन। अथवा रूपानेकत्वादिणो यथावस्थितस्याकारो भवति, तथा रूपमवसाय ततोऽकारमादत्ते, दर्शितं चैतत्—"एतेः कारितं च यकारादि चान्तकरणम्"—इत्यत्र, भवति चास्य एतन्ते रूपम् 'आययति'—इति, अत्र अकार', तत आदत्ते। "गकारम्, अनक्तेः वा दहतेः वा" क्षतकुलशब्दयोर्विकल्पेन। "नीः परः" एषः क्रमः। एति च अनक्ति च रूपाणि, अथवा एति च दहति च नयति च

हवींषि देवेभ्यः इति अग्निः साधीयस्तरः। एता एतद्धातु-वाच्याः क्रियाः एव करोति इति "अग्निः"।

"तस्य" एतन्निर्वचनलक्ष्यप्रधानस्तुतिसम्बन्धमभिधानमुप-लक्ष्य देवतापदसमाम्नाये समाम्नातमग्निरिति, तस्य "अग्नि-मीळे"—इत्येतत्प्रमुखा अग्निकर्मलिङ्गलिङ्गिताः सर्वा आग्नेय्य ऋचः उदाहरणम्, न पुनरस्ति कारणे मुख्यातिक्रमो न्याय्य इति ऋग्वेदप्रथमामिमामृचमुदाजहार "तस्य एषा भवति" —इति,—॥ १ (१४)॥

अग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म्। होता॑रं रत्न॒धात॑मम्। अग्निमीळे-ऽग्निं याचामीळिरध्येषणाकर्मा पूजाकर्मा वा पुरोहितो व्याख्यातो यज्ञस्य देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देवः सा देवता होतारं ह्वातारं जुहोते-र्होतेत्यौर्णनाभो रत्नधातमं रमणीयानां धना-नान्दातमम्। तस्यैषापरा भवति॥ २ (१५)॥

"अग्निमीळे (ऋ० सं० १, १, १, १)"—इति। मधुच्छन्दस आर्षम्। गायत्री। आग्निने विनियोगः। यः अग्निः देवपुरोहितः याकयज्ञे, यज्ञाकं यज्ञे यस्य ऋत्विक्, होता यज्ञस्य, रत्नधातमश्च दातृतमो रत्नानाम्, तमहं रत्नानि याचे इति समस्तार्थः।

पदैकपदनिरुक्तम्।—"ईड." धातुः "अध्येषणाकर्मा" याद्धाकर्मैव, अन्यत्र "पूजाकर्मा वा" अपि। "पुरोहितः

व्याख्यातः" "पुर एनं दधति"—इति । "यज्ञे च" व्याख्यता',
"प्रख्यातं यजतिकर्मा"—इति । "देवः" "दानाद् वा" ददाति,
ह्यसौ ऐश्वर्य्याणि । "दीपनाद् वा" दीपयति ह्यसौ तेजो-
मयत्वात् । "द्योतनाद् वा" धात्वन्यत्वमर्थैकत्वम् । "द्युस्थानो
भवति—इति वा" पक्षे अर्थवत्त्व निर्वचनस्य । अथवा अग्नी-
न्द्रावपि द्युस्थानौ, सामान्य हि द्यौः स्थानं देवतानाम्,
तयोस्तु कर्माधिकारस्थाने विशिष्टे पृथिव्यन्तरिक्षे । "होतारं =
ह्वातारम्" देवानाम् । "और्णवाभ" तु "जुहोते" 'हु दाना-
दानयोः (जु॰ प॰)'—इत्यस्य मन्यते "होता इति" । "रत्न-
धातमम्=रमणीयानां धनानां दातृतमम्" ॥

तत "तस्य" एव अग्ने "एषा अपरा" ऋक् "भवति" ।
समानसंहितत्वादपरेति वा द्वितीयेत्यर्थः । सा पुनः किम-
र्थम् ? इति । अमुना प्रकारेण सर्वा एतस्यामुदाहरणमेत-
त्कर्मयुक्ता ऋच उपेक्ष्या इत्युपप्रदर्शनार्थम् ॥ २ (१५) ॥

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । स देवान् एह वक्षति । अग्निर्यः पूर्वैर्ऋषिभि-रीडितव्यो वन्दितव्योऽस्माभिश्च नवतरैः स देवानिहावहत्विति स न मन्येतायमेवाग्निरि-त्यप्येते उत्तरे ज्योतिषी अग्नी उच्येते ततो नु मध्यमः ॥ ३ (१६) ॥

"अग्निः पूर्वेभिः (ऋ॰ सं॰ १, १, १, २)"—इति । पूर्व-
येव समानार्थविनियोगच्छन्दस्का । तदुक्तमुत्तरत्रापेक्ष्य यदु-
क्तमध्यासदार भाष्यकारो यत्तदोर्नित्यसम्बन्ध इति दर्शयत् ।

"अग्निः य." 'पूर्वेभि.' "पूर्वैः" चिरन्तनैः 'ऋषिभिः' "ईडितव्यः" ईडनं पूजनमर्हति, "अस्माभिश्च" "नवतरैः" ईडितव्य इति वर्त्तते। स किं करोति ? इत्याकाङ्क्षिते निराकाङ्क्षं क्रियते,—"सः देवान्" "इह" एतस्मिन् कर्मणि अस्माकम् "आवहतु" इति लोटा निराह भाष्यकारः आशिषमाकाङ्क्षितामपेक्ष्य। ऋज्वेकपदनिरुक्तम्॥

सङ्कीर्णत्वादभिधानस्य अतः परं विचारः,—"स न मन्येत"—इत्येवमादिना आक्षिप्य विचारः। ननु नित्ये स्वार्थाभिधेयसम्बन्धे अभिधानानामर्थान्तरवृत्तितैव नास्ति, कुतः सङ्करः ? इति। अथास्त्यर्थान्तरवृत्तिता। जहत्स्वर्थमर्थान्तरमुपसङ्क्रामन्ननित्यतां सम्बन्धस्य द्योतयति। नैव जहत्स्वार्थमभिधानमभिधेयान्तरे वर्त्तते। किन्तर्हि ? द्वे ह्यभिधानस्य शक्ती, गौणी मुख्या च। तयोर्गौणी गुणसाम्यात्, यस्मात् कस्माचित् गुणात् सर्वत्र वर्त्तते, तस्यास्तथाविध एव सम्बन्धः, सर्वार्थो नित्यः समर्थप्रकरणोपपदपरतन्त्रः। मुख्यत्वे विनियोगेन लोकवेदप्रसिद्धा स्व एवार्थे वर्त्तते। तदेवमसङ्करेऽपि शब्दानां मुख्यगौणार्थवर्त्तिनां सङ्कर इवाभिधत्तां प्रतिभाति॥

क्व कस्य शब्दस्य गौणी शक्तिः ? क्व कस्य मुख्या ? इति तत्प्रविवेकार्थमिदमुपोद्घन्ति चोदकरूपेण "स न मन्येत" इति। 'सः' शिष्यः, 'न मन्येत' न जानीयात् सम्यगेतदभिहितम् "अयमेवाग्निः" पृथिवीस्थानः "इति"। कस्मात् पुनर्न मन्येत ? इत,—यस्मात् "अपि एते उत्तरे ज्योतिषी" मध्यमश्च उत्तमश्च "अग्नी उच्येते"। कथम् ? इत्यत आह,—एतत् तावत् पार्थिवं ज्योतिः, आवाहनक्रियायोगात् "अग्निमीडे"—इत्येतस्यां च यथा भवतोक्तं तथैवोच्यते, "ततः नु"

वयमपि यथा "मध्यमः" अग्निशब्देनोच्यते तत्कर्मयोगाच्च स एवाग्निः, तथेमामृचमुदाहरिष्यामः,—॥ ३ (१६) ॥

अ॒भिप्र॑वन्त॒ सम॑नेव॒ योषा॑: कल्या॒ण्य॑: स्मय॑मानासो अ॒ग्निम् । घृ॒तस्य॒ धारा॑: स॒मिधो॑ नसन्त॒ ता जु॑षा॒णो ह॑र्यति जा॒तवे॑दाः ॥ अभिनमन्त समनस इव योषाः समनं समननाद्वा सम्माननाद्वा कल्याण्यः स्मयमानासो अग्निमित्यौपमिकं घृतस्य धारा उदकस्य धाराः समिधो नसन्त नसतिराप्नोतिकर्मा वा नमतिकर्मा वा । ता जुषाणो हर्यति जातवेदाः । हर्यतिः प्रेप्साकर्मा विहर्यतीति । समुद्रादूर्मिर्मधुमाँ उदारदित्यादित्यमुक्तं मन्यन्ते समुद्राद्ध्येषोऽद्भ्य उदेतीति च ब्राह्मणमथापि ब्राह्मणं भवत्यग्निः सर्वा देवता इति तस्योत्तराभूयसे निर्वचनाय ॥ ४ (१७) ॥

"अभिप्रवन्त"—इति (ऋ॰सं॰ ३,८,११,३) । वामदेवस्यार्षम् । सप्तमेऽहनि दशरात्रस्य आज्यशस्त्रे विनियोग । 'अभिप्रवन्त' "अभिनमन्त" आभिमुख्येन नमन्ति प्रह्वीभवन्ति । 'घृतस्य' "उदकस्य" 'धारा.' । कमभिप्रह्वीभवन्ति? मध्यमम् 'अग्निम्' । कथम्? इति,—'समना इव योषा.' "समनस." समानमनसः । एकस्मिन् भर्त्तरि यासां मनांसि वर्त्तन्ते, ता. समनसः । ता यथा 'कल्याण्य.' रूपयौवनादिगुणसम्पन्ना., 'स्मय-

मानास.' खयमानाः ईयद्धसन्त्यः हर्षमुपजनयन्त्यो भर्त्तुर्स्तं प्रति परिष्वजनाय अभिनमेयुः, तथा मध्यमस्थानमग्निं घृतस्योदकस्य धाराः 'समिधः' समिन्धयन्त्यः 'नसन्त' प्राप्नुवन्तीत्यर्थः। ताश्च ताश्च पुनः सः 'जातवेदाः' मध्यमस्थानो वैद्युतोऽग्निः, 'जुषाणः' प्रीयमाणः 'हर्य्यति' पुनः पुनः प्रेप्सति, अभिकामयते ॥

एवमेतस्मिन् मन्त्रे युगपदभिधानात्, पार्थिवे घृताहुतिहवनस्योपमानोपमेयवैधर्म्याच्च युगपत्सम्भवाच्च उदकस्य धारणं वैद्युतः, तत्रोपमानोपमेयसामञ्जस्याच्च सामर्थ्यात् प्रसिद्धिमुपरुम्य घृतधाराशब्द उदकधारावचनः सम्पद्यन्ते, पठितं चैतदेव सामर्थ्यमपेक्ष्योदकनामसु "घृतम्" "मधु"—इति। एवञ्च योऽयमग्निशब्दोऽत्र सामर्थ्यात् मध्यमं ज्योतिराह, तस्मात् "सुष्ठु स न मन्येत, अयमेवाग्निः पृथिवीस्थानः"—इति (७५ पृ० १८ पं०) ॥

"समनं समननाद्वा, सम्माननाद्वा"—इति। पूर्वम् अनितेः (भू० प०) प्राणनार्थस्य, उत्तरं मनोतेः (त० आ०)। स्त्र्यन्यनिर्वचनम् ॥

अथ खलु यथोक्तममपि ज्योतिर्भवत्यग्निस्तयोदाहरिष्यामः। "स॒मु॒द्राद॒र्मिर्मधु॑माँ॒ उदा॑र॒दुपां॒शुना॒ सम॑मृत॒त्वमा॑नट्। घृ॒तस्य॒ नाम॒ गुह्यं॒ यदस्ति॑ जि॒ह्वा दे॒वाना॑म॒मृत॑स्य॒ नाभिः॑ ॥"—इति (ऋ० सं० ३, ८, १०, १)। "आदित्यम् उक्तं मन्यन्ते"। पूर्वैव समानार्थविनियोगा। नानादेवताभिवादस्त्वस्यां देवतानुक्रमण्यां शौनकेनोक्तः, इह पुनः सौरीति कल्वोदाहृता भाष्यकारेण, सूक्तं सकलञ्च। 'समुद्रात्' उदकसङ्घातात् 'ऊर्मिः' ह्लादकः सर्वस्य प्रकाशेन, 'मधुमान्' उदकवान्, 'उदारत्' उदतीतरत्, उत्तरयति वा, उदेति अद्भ्यर्हनि

प्रथमं जन्माभिप्रेत्य। स पुनर्जातः सन् 'अमृतत्वम्' अमृतभावम् 'अमुना' चन्द्रमसा 'उपसम् आनट्' उपसम्याप्नोति। "सोऽस्याव तेन न म्रियते यमच्छितिमच्छितयः पिबन्ति"—इत्युक्तम्। कथममृतत्व तेन उपसमानट्? इति। 'घृतस्य' उदकस्य हविषो वा 'यत्' 'नाम' नमन 'गुह्य' रहस्यमविज्ञान केनचिदपि अव 'अस्ति' विद्यते चन्द्रमसि, तत्र 'देवानां' रश्मीनां 'जिह्वा' तदमृत नित्यमास्वादयन्ति, देवास्तेन न म्रियन्ते। तेषाम् 'अमृतस्य' अमरणत्वस्य 'नाभि.' नहनं स हेतुरित्यर्थः॥

अथ कुतः सूर्योऽयमिति विशेषतोऽवध्रियते, न चैतस्मिन्नपि मन्त्रेऽग्निशब्दोऽस्ति, य. सत्यधादित्यदेवत्वेऽस्य मन्त्रस्यानित्यमादित्यस्य प्रख्यापयेत्, घृतस्तोत्रा एता इति च विज्ञायते, तस्मादसमर्थमिदमुदाहरणम्? न असमर्थम्। कस्मात्? सूक्तेऽग्निलिङ्गमेकेषां शाखिनामस्ति,—"इम स्तनम्"—इत्यत्र "अपां प्रपीनमग्ने"—इति। निविद्यास्मिन् सूक्ते धीयते, सा चाग्निलिङ्गा। आदित्यश्चायमनेन मन्त्रेणोच्यत इति स्फुटमस्यैव मन्त्रस्य "ब्राह्मणम्"—"समुद्रादेरपोऽह्ना उदेति"—"इति च" न च पार्थिवः समुद्रात् उदेति, विरोधात् तस्य उदकेन, तस्मादादित्योऽत्राग्निरभिप्रेत —इति नासमर्थमुदाहरणम्। "अथ अपि ब्राह्मण भवति,—'अग्नि' सर्वा देवता' —इति"। अथ खलु अयमपरः सङ्करोऽग्निशब्दस्य ब्राह्मण भवति,—"अग्निः सर्वा देवताः"—इति॥

"तस्य" च ब्राह्मणस्य "उत्तरा" ऋक् "भूयसे" बहुतराय "निर्वचनाय"—॥ ४ (१७)॥

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सु-

पर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥ इममेवाग्निं महान्तमात्मानमेकमात्मानं बहुधा मेधाविनो वदन्तीन्द्रं मित्रं वरुणमग्निं दिव्यं च गरुत्मन्तं दिव्यो दिविजो गरुत्मान् गरणवान् गुर्वात्मा महात्मेति वा यस्तु सूक्तं भजते यस्मै हविर्निरूप्यतेऽयमेव सोऽग्निर्निपातमेवैते उत्तरे ज्योतिषी एतेन नामधेयेन भजेते॥ ५ (१८)॥

इति सप्तमाध्यायस्य चतुर्थः पादः॥ ७, ४॥

"इन्द्रं मित्रम्"—इति (ऋ०सं०२,३,२२,६)। अस्यवामीयेषा। 'इन्द्रम्, मित्रम्, वरुणम्'—इत्येतैरभिधानैः 'अग्निम् आहुः' तत्त्वविदः। 'अथो' अपि च योऽयं 'दिव्यः' "दिविजः" दिवि जायते, 'सुपर्णः' सुपतनः, 'गरुत्मान्' "गरणवान्" स्तुतिभिः तद्वान्, रसानां वा गरिता आदित्यः, अयमपि 'सः' एवाग्निरित्याहुः। किं बहुना "इममेवाग्निम्" 'एक' "महान्तम्" "आत्मानम्" अनन्यत्वेन पश्यन्तः 'विप्राः' "मेधाविनः" आत्मविदः 'बहुधा वदन्ति'—'अग्निम्, यमम्, मातरिश्वानम्' इति॥

एवमाद्येषाभिधानैरेतस्यैव सा विभूतिः, एष उ ह्येव सर्वे देवाः इति च विज्ञायते। तस्माद् युक्तं यत्र सन्देहो तत्रैवाग्निरिति॥

अत्र प्रतिसमाधानम्।—सत्यमेतत् सर्वं एतेऽग्निशब्देन स्तूयन्ते, न तु प्रधानतः, किन्तर्हि? गुणतः स्तूयन्ते। इतो

ब्रवीति,—"यस्तु सूक्तं भजते, यस्मै हविः निरूप्यते, अयम् एव सः अग्निः"। तुशब्दः पूर्वपक्षव्यावर्त्तकः, परमतव्युदासार्थः। यः सूक्तं भजते, प्रधानतः स्तुत्यत्वेनेत्यर्थः, यस्मै च हविर्निरूप्यते, चोदनासामर्थ्यात्—"आग्नेयमष्टाकपालं निर्वपेत्" इति। 'अयमेव सोऽग्निः' पार्थिवः, अग्निशब्दस्य विशेषतोऽत्र लोके वेदे च प्रसिद्धेः,—'अग्निमानय—अग्निं प्रणय' इति, एतमेव हि लोकः प्रतिपद्यते, न मध्यमं नाप्युत्तमम्। न च प्रसिद्धिबाधो न्याय्यः, शास्त्रचोदिता अपि खदिर-पलाशादयो लोकप्रसिद्धित एव प्रतीयन्ते। तस्मादग्निशब्देन पार्थिवस्य ज्योतिषो मुख्यः सम्बन्धः, गौण इतरयोर्मध्यमोत्तमयोः। यथा अग्निशब्देन मध्यमोत्तमयोः, न तथा मध्यमोत्तमाभ्यां विद्युत्सूर्य्यशब्दाभ्यां लोकप्रसिद्धया मुख्यः सम्बन्धः। एवञ्चेत् सुष्ठूक्तम्,—"यस्तु सूक्तं भजते यस्मै हविर्निरूप्यते, अयमेव सोऽग्नि." इति। एतदेव चात्र विचारे प्रयोजनम्,—आग्नेयेषु सूक्तेषु हविःसम्प्रदानेषु स्तुत्यत्वेन भोक्तृत्वेन चैतमेवोपासीतेति ॥

अथ पुनर्योऽयं मध्यमोत्तमयोर्ज्योतिषोरग्निप्रवादः, स कथम्? इति,—"निपातम् एव एते उत्तरे ज्योतिषी, एतेन नामधेयेन भजेते"। निपातो नाम अप्राधान्यम्, भक्तिरित्यर्थः ॥ ५ (१८) ॥

इति निरुक्तवृत्तौ द्वादशाध्यायस्य (सप्तमाध्यायस्य)
चतुर्थः पादः ॥ ७, ४ ॥

पञ्चम. पाद:।

जातवेदा: कस्माज्जातानि वेद जातानि वैनं विदुर्जाते जाते विद्यत इति वा जातवित्तो वा जातधनो जातविद्यो वा जातप्रज्ञानो यत्तज्जात: पशूनविन्दतेति तज्जातवेदसो जातवेदस्त्वमिति ब्राह्मणं तस्मात् सर्वानृतून् पशवोऽग्निमभिसर्पन्तीति च तस्यैषा भवति ॥ १ (१८) ॥

"जातवेदा:"—इति वक्तव्यम्। स पुनरपि माहाभाग्यात् कर्मपृथक्त्वादग्निरेव? अथवा पृथगभिधानस्तुल्यन्तरसम्बन्धाद् देवतान्तरम्। "जातवेदा. कस्मात्"? स हि "जातानि वेद" न हि तदस्ति जातमस्मिंल्लोके यदसौ न वेद सर्वज्ञ इत्यर्थ.। "जातानि वा एनं विदु." स एव धातु, कारकान्यत्वं केवलम्। "जाते जाते विद्यत इति वा" विदे: सत्तार्थस्याधिकरणे कारके, न तदस्ति जातं यत्रासौ नास्ति। "जातवित्तो वा जातधन." जातशब्द. पूर्वपदम्, वित्तशब्द उत्तरपदम्, जातमस्य वित्तमिति जातवेदा:। "जातविद्यो वा जातप्रज्ञान" जातशब्द एव पूर्वपदम्, विदेर्ज्ञानार्थस्योत्तरपदत्वम्, निसर्गत एवास्य जातं प्रज्ञानमित्यर्थ:। "ब्राह्मणम्" अपि च भवति, जनैर्विदेश, जातवेदा इति,—"यत्तज्जात: पशूनविन्दत—इति"। 'यत्' असौ 'तत्' तदा 'जात:' जातमात्र एव निसर्गत: 'पशून्' 'अविन्दत' अलभत्' "तज्जातवेदसो जातवेदस्त्वम्—इति" विज्ञायते। यतश्चैतदेवम्, "तस्मात्" अद्यत्वेऽपि स्वाम्ययमस्माकमिति मन्यमाना: "पशव." "सर्वान् ऋतून्" प्रति, अपि ग्रीष्मे, "अग्निम् अभिसर्पन्ति"।

"तस्य" जातवेदसः सुलुदाहरणम् "एषा" ऋक् भवति —॥ १ (१८)॥

जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः॥ जातवेदस इति जातवेदसां वैवज्जातवेदसेऽर्चाय सुनवाम सोममिति प्रसवायाभिषवाय सोमं राजानमन्ततनरातीयतो यज्ञार्थमनिष्ठो निदहाति निश्चयेन दहति भस्मीकरोति सोमो ददद्दित्यर्थः। स नः पर्षदति दुर्गाणि विश्वानि दुर्गमानि स्थानानि नावेव सिन्धुं नावा सिन्धुं सिन्धुं नावा नदीं जलदुर्गां महाकुलां तारयति दुरितात्यग्निरिति दुरितानि तारयति तस्यैषा परा भवति॥ २॥

प्र नूनं जातवेदसमश्वं हिनोत वाजिनम्। इदं नो बर्हिरासदे॥ प्रहिणुत जातवेदसं कर्मभिः समन्नु वानमपि वोपमार्थे स्यादश्वमिव जातवेदसमितीदं नो बर्हिरासीदत्विति तदेतदेकमेव जातवेदसं गायत्रं तृचं दशतयीषु विद्यते यत्तु किञ्चिदाग्नेयं तज्जातवेदसानां

स्थाने युज्यते स न मन्येतायमेवाग्निरित्यप्येते उत्तरे ज्योतिषी जातवेदसी उच्येते ततो नु मध्यमः । अभिप्रवन्त समनेव योषा इति, तत् पुरस्ताद्व्याख्यातमथासावादित्य उदु त्यञ्जातवेदसमिति तदुपरिष्टाद्व्याख्यास्यामो यस्तु सूक्तं भजते यस्मै हविर्निरूप्यतेऽयमेव सोऽग्निर्जातवेदा निपातमेवैते उत्तरे ज्योतिषी एतेन नामधेयेन भजेते ॥ ३ (२०) ॥

इति सप्तमाध्यायस्य पञ्चमः पादः ॥ ७, ५ ॥

"प्र नून जातवेदसम्"—इति (ऋ० सं० ८, ८, ४६, १)। श्येनस्याग्निपुत्रस्यार्षम्। गायत्री। हे स्तोतारो यूयमुच्यध्वे। 'प्रहिनोत' "प्रहिणुत" प्रेरयत स्तुतिभिरेतं 'जातवेदसम्' 'अश्वम्' "कर्मभि" सर्वमेतत् जगत् "व्याप्नुवानम्" व्याप्नुवन्तम्, 'वाजिनम्' वेजनवन्त चञ्चलमर्चिभि, अथवा "अश्वमिव" इति लुप्तोपमम्, रूढेर्बलीयस्त्वात्, 'वाजिन' वेजनवन्त ज्वलनस्वभाव शीघ्रम्। किमिति प्रहिणुत ? इति। इत,—"आसत्तुम्" इति तुमर्थे केन् या—"इदं नो बर्हिरासदे"। "इदम्" अस्मत्कर्म, बर्हिषोपलक्षित बर्हि.। कथ नामास्मदभिमतार्थसिद्ध्यर्थमाभिमुख्येन सीदेदित्येवमर्थ प्रहिणुतेति ॥

इदानीमुत्सर्गं दर्शयति प्रयोजनार्थम्,—"तदेतदेकमेव जातवेदस्य गायत्र तृचम्"—इत्यादि। तदिति दशतयीष्वस्यानुस्मृतये परोक्षनिर्देश, एतदिति प्रत्यक्षेण प्र नूनमित्येतया सन्निधीकृत्योपादर्शति, गायत्रमिति छन्दोनिर्देशो विवृ

ज्ञितप्रयोजनार्थः, तृचमिति एतत्सूक्तस्य सङ्ख्यानिर्देशः, दशतयीषु सर्वास्वपीति निर्द्धारणे सप्तमी, 'विद्यते' अस्ति । ततः किं यद्येतदेवैकं जातवेदसं गायत्रं तृचं दशतयीषु विद्यते ? शृणु,—बहुभिरेतैर्गायत्रच्छन्दोयुक्तैर्जातवेदस्यैर्मन्त्रैरधियज्ञे प्रयोजनमस्ति, न चैते बहवः सन्ति सर्वास्वपि दशतयीष्वेतदेवैकं तृचं मुक्त्वा । तत्र किं कर्त्तव्यम् ? इति,—"यत्तु किञ्चिदाग्नेयम्" मन्त्रजातम् गायत्रे एव छन्दसि अजातवेदोलिङ्गमपि, "तत्" "जातवेदसानाम्" मन्त्राणां "स्थाने" विनियुज्यते" शास्त्रेण । तेन किं स्थितं भवति ? अग्निरेव जातवेदा इति, कर्मैक्यत्वात् माहाभाग्याद्वा इति, इतरथा हि प्रयोगवैकल्यं स्यात्, न चान्यदेवमन्यस्य स्थाने प्रयुज्यते । यथा चायमनर्थान्तरमग्निर्जातवेदा एतस्माद् विधिलिङ्गात्, तथा वैश्वानरप्रभृतयोऽपीत्युपेक्ष्यम् ॥

"स न मन्येत"—इति पूर्ववद् विचारः, केवलम् "अभिप्रवन्त"—इत्यत्राग्निपदविचारे अग्निशब्दो विशेष्य आसीत्, जातवेदःशब्दोऽस्य गुणपदमिति, इह तु जातवेदःशब्दविचारे पुनः "अभिप्रवन्त"—इत्यस्मिन्नेवोपात्ते मन्त्रे गुणपदमग्निशब्दो जातवेदःशब्दस्येत्येतावदुपेक्ष्यम् ॥

यथा तु पूर्वस्मिन् "समुद्रादूर्मिः"—इति आदित्यस्याग्नित्वोपपत्तावुदाहरणम्, तथेह—"अथ असौ आदित्य,—'उदु त्यं जातवेदसम् (ऋ० सं० १, ४, ६, १)'—इति" जातवेदस्त्वोपपत्तौ । तदेतत् प्रतिपदमुदाहरणम् "उपरिष्टाद् व्याख्यास्यामः"—"जातवेदसं सूर्यमुद्वहन्तीति तु विशेषणविशेष्यसामानाधिकरण्यैकवाक्यप्रसिद्धा स्वनिगमसिद्धमस्मिन् मन्त्रे जातवेदाः सूर्य्यः"—इति । तस्मात् सूक्तं यत् "स न मन्येत अयम् एव अग्निः" जातवेदाः इति ॥

"यः तु सूक्तं भजते, यस्मै हविः निरूप्यते, अयम् एव सः अग्निः जातवेदाः"—इति । "यस्तु सूक्तं भजते, यस्मै हविर्निरूप्यतेऽयमेव सोऽग्निर्जातवेदाः"—इति पूर्ववत् प्रसिद्धिरेव विशेषहेतुः । यद्यपि मन्त्रदर्शनमविशिष्टं त्रयाणामपि ज्योतिषां जातवेदस्त्वे, तथापि पार्थिवोऽग्निरितरयोः प्रसिद्धा विशेष्यते, जातवेदस्त्वं हि यथा प्रसिद्धमस्मिन्नग्नौ, न तथा वैद्युते, नापि सूर्ये इति । "निपातमेवैते उत्तरे ज्योतिषी" "एतेन" जातवेदा इत्यनेन "नामधेयेन भजेते" इति । व्याख्यातम् ॥ ३ (२०) ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ द्वादशाध्यायस्य (सप्तमाध्यायस्य) पञ्चमः पादः ॥ ७, ५ ॥

षष्ठः पादः ॥

वैश्वानरः कस्माद्विश्वान्नरान्नयति विश्व एनं नरा नयन्तीति वापि वा विश्वानर एव स्यात् प्रत्यृतः सर्वाणि भूतानि तस्य वैश्वानरस्तस्यैया भवति ॥ १ (२१) ॥

"वैश्वानरः"—इति वक्तव्यम्, तदर्थमुपोद्घातः—"वैश्वानरः कस्मात् ?" "विश्वान् नरान्" इतो लोकात् अमुं लोकं "नयति" हेतुकर्तृत्वेन सर्वासु प्रवृत्तिषु अयमेव नरान् नयति । यथा पञ्चाग्निविद्यायामुच्यते—"अपि वा सति तस्मिन् सर्वाः प्रवृत्तयः फलवत्यो नराणां भवन्तीति हेतुकर्तृत्वेन सर्वासु प्रवृत्तिष्वयमेव नरान् नयति प्रवर्त्तयतीति वैश्वानरः" । अथवा "विश्वे एनं नराः नयन्ति इति वा" कर्मकारकम्,

स नीयमानः तासु तासु क्रियास्वङ्गभावं नरैः कर्म सम्पद्यते । "अपि वा "विश्वानरः एव" कश्चित् "स्यात्"। स पुनः कस्मात् ? "प्रत्यृतः सर्वाणि भूतानि" विश्वानि ह्यसौ भूतानि 'प्रति ऋतः' प्रविष्ट इत्यर्थः। "तस्य" विश्वानरस्य अपत्य "वैश्वानरः" ॥

"तस्य" वैश्वानरस्य "एषा" प्राधान्यस्तुतिऋक् "भवति" —॥ १ (२१) ॥

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः । इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण ॥ इतो जातः सर्वमिदमभिविपश्यति वैश्वानरः संयतते सूर्येण राजा यः सर्वेषां भूतानामभिश्रयणीयस्तस्य वयं वैश्वानरस्य कल्याण्यां मतौ स्यामेति तत् को वैश्वानरो मध्यम इत्याचार्य्या वर्षकर्मणा ह्येनं स्तौति ॥ २ (२२) ॥

"वैश्वानरस्य सुमतौ"—इति (ऋ० सं० १, ७, ६, १)। कुत्सस्यार्षम् । पृष्ठ्याभिप्लवयोश्चतुर्थपञ्चमयोरह्नोराग्निमारुतस्य प्रतिपत् । 'इतः' पृथिवीलोकात् ओषधिवनस्पतिभ्य यः 'जातः' 'विश्वम् इदं विचष्टे' "सर्वमिदमभिपश्यति" । यथाभिद्रष्टव्य उपकारकत्वेन, दर्शयति वा प्रकाशकत्वेन । यश्च 'यतते' "संयतते" 'सूर्येण' संगच्छते स्वेन भासा । 'राजा' च "यः" 'भुवनानां "सर्वेषां भूतानाम्" 'अभिश्रीः' "अभिश्रय-

णीयः भाज्यणीयः। "तस्य वयम्" एवङ्गणयुक्तस्य 'वैश्वानरस्य' नित्यं 'सुमतौ' "कल्याण्यां मतौ" उपकारप्रवृत्तायामात्मनो यथाभिमतार्थसाधिकायाम् 'स्याम'।—इत्येतत् आशास्महे। लोकेऽपि हि स्तूयत एव पूर्वम्, पश्चात् प्रार्थ्यत इत्याचार्यः पश्यन् मन्त्रेष्वप्ययमेव न्याय इत्युपदर्शनार्थं पदानां क्रमं बिभेद, कल्याण्यां मतौ स्यामेत्याशिषा च समापयाञ्चक्रे ॥

अनेकतिङि चैतस्मिन् मन्त्रे प्रतितिङ् वाक्यभेदे प्राप्ते यत्तदोरध्याहारेण "राजा यः सर्वेषां भूतानामभिश्रयणीयः, तस्य वयं वैश्वानरस्य कल्याण्यां मतौ स्याम"—इत्येकवाक्यतया सामर्थ्यमुन्नाययाञ्चकार। एकोऽवार्थपतिर्वैश्वानरः, यतः कल्याणी भाशास्यते मतिः, तमेभिः शब्दैरभिष्टौति, सन्तिष्ठते स्तुतिरिति। अयमेकवाक्यतान्यायः प्रायशो मन्त्रेषु, क्वचित् पुनः प्रत्याख्यातमर्थमपेक्ष्य एकस्मिन्नपि मन्त्रे वाक्यभेदो भवत्येव। तद्यथा,—"ऋचां त्वः पोषम् (ऋ० सं० ८, २, २४, ६)" इत्यत्र प्रतिपादं वाक्यसमाप्तिः। अन्येषामपि च मन्त्राणाकामाङ्क्षितार्थिनां परस्परमेकवाक्यता भवति, तदपि चोपमदर्शयिष्यति—"येना पावक चक्षसा (ऋ० सं० १, ४, ८, १)"—इत्यत्र ॥

"तत् को वैश्वानरः"—इति। अतः प्रभृति विचारः। तदिति वाक्योपादाने। कोऽयं वैश्वानरः? इति। कुतः संशयः? आगमविप्रतिपत्तेः, विश्वानरविद्यायां तावत् 'आत्मा' इत्यात्मविदः, इन्द्रादित्यवाय्वाकाशोदकपृथिव्यादयश्च पृथक् पृथगेव वैश्वानरत्वेन विज्ञायन्ते। अपि च "मध्यम." वैश्वानरः इति नैरुक्ताः केचित् "आचार्याः" मन्यन्ते। कस्मात्? "वर्षकर्मणा ह्येनं स्तौति" मन्त्रदृक्।

हिशब्दो हेत्वर्थः, वर्षकर्मत्वेन वैश्वानरं यस्मान्मन्त्रदृक् स्तौति ॥ २ (२२) ॥

प्र नू म॑हि॒त्वं वृ॑ष॒भस्य॑ वोचं॒ यं पू॒रवो॑ वृत्र॒हणं॒ सच॑न्ते। वै॒श्वा॒न॒रो दस्यु॑म॒ग्निर्ज॑घ॒न्वाँ अधू॑नो॒त्काष्ठा॒ अव॒ शम्ब॑रं भेत् ॥ प्रब्रवीमि तन्महित्वं माहाभाग्यं वृषभस्य वर्षितुरपां यं पूरवः पूरयितव्या मनुष्या वृत्रहणं मेघहनं सचन्ते सेवन्ते वर्षकामा दस्युर्दस्यतेः क्षयार्थादुपदस्यन्त्यस्मिन्नसा उपदासयति कर्माणि तमग्निर्वैश्वानरो घ्नन्नवाधूनोदपः काष्ठा अभिनच्छम्बरं मेघमथासावादित्य इति पूर्वं याज्ञिकाः ॥ ३ ॥

कथम्? इति। अत आह,—"प्र नू महित्वम्" इति (ऋ॰ सं॰ १, ४, २५, ६)। नोधस आर्षम्। त्रिष्टुप्। वैश्वानरोऽग्निर्देवता। 'प्रवोचम्' "प्रब्रवीमि" अहम्। 'महित्वम्' "माहाभाग्यम्" स्तुत्वा। कस्य? 'वृषभस्य' "वर्षितुरपाम्"। 'यम्' अन्येऽपि 'पूरवः' "पूरयितव्याः मनुष्याः" कामैः, 'वृत्रहणम्' "मेघहनम्" 'सचन्ते' "सेवन्ते" "वर्षकामाः" स्तुतिभिः। तन्माहाभाग्यं प्रब्रवीमि,—यदसौ वर्षिता 'वैश्वानरः' 'अग्निः' 'दस्युं' दासयितारमुपक्षयितारं रसानाम्, शुष्यन्ति हि तदनुद्गमे शस्यानि, कर्मणां चोपदासयितारमनाहृष्टिद्वारेण, तं दस्युम्, 'शम्बरम्' "मेघम्" उदकवन्तमुदकपूर्णम्, 'जघन्वान्' हतवान्,—'अवभेत्' "अवाभि-

नत्" व्यदारयत्,—विदार्य च 'अधूनोत्' वर्षभावेनाकम्पयत् अधारयत् 'काष्ठाः' अपः। यः, तस्माद्‌ वर्षप्राप्त्यर्थं प्राशोच्चं माहाभाग्यम्, स वर्षत्वमाकमित्यभिप्रायः।

एवमेतस्मिन् मन्त्रे वैश्वानरस्य वर्षकर्मण्यैकवाक्यतासम्बन्धात् नान्यो मध्यमात् वैश्वानर इत्याचार्या मन्यन्ते। स्थितं तावदेवम्॥

"असौ आदित्यः,—इति पूर्वे याज्ञिकाः"। असाविति कर्मात्मनैनमुपदिशन् ब्रवीति, मा भूत् गौणः कश्चित् प्रत्यय इति। विधिमन्त्रार्थवादेभ्यो यज्ञसतत्त्वमुन्नीयैनं यज्ञं प्रयोगतः प्रथमं ये चक्रुः, ते 'पूर्वे याज्ञिकाः' साक्षात्कृतधर्माण इत्यर्थः। त एनमेवमाहुः—'असौ आदित्यः इति'। कया पुनरुपपत्त्या त एवमाहुः? इति। विध्यनुकरणप्रसिद्ध्या॥ ३॥

एषां लोकानां रोहेण सवनानां रोह आम्नातो रोहात् प्रत्यवरोहश्चिकीर्षितस्तामनुकृतिं होताग्निमारुते शस्त्रे वैश्वानरीयेण सूक्तेन प्रतिपद्यते सोऽपि न स्तोत्रियमाद्रियेताग्नेयो हि भवति तत आगच्छति मध्यस्थाना देवता रुद्रश्च मरुतश्च ततोऽग्निमिहस्थानमत्रैव स्तोत्रियं शंसति॥ ४॥

कथम्? इति। यतः तन्मतमाह,—"एषां लोकानां रोहेण सवनानां रोह आम्नातः"। य एव हि लोकानामारोहणानुक्रमः, पृथिवी—अन्तरिक्षम्—द्यौः इति, स एव सवनानामपि क्रमः, प्रातःसवनम्—माध्यन्दिनम्—तृतीयसवनम् इति। ततः किम्? कस्मिंश्चित् कर्मणि रोहप्रातिलोम्येन

"रोहात् प्रत्यवरोहः" "चिकीर्षितः" कर्त्तुमीप्सितः, तदुपव्याचक्ष्महे । स एव होता प्रातःसवनं पृथिवीलोकभक्ति शंसति, संस्तुतत्वात्, ततो माध्यन्दिनमन्तरिक्षलोकभक्ति शंसति संस्तुतत्वात्, ततस्तृतीयसवनं द्युलोकभक्ति शंसति, संस्तुतत्वात्। प्रतिभक्तिसंस्तुतवच्च शंसन्—स पृथिवीलोकात् अन्तरिक्षलोकमारूढो भवति, अन्तरिक्षलोकात् द्युलोकम्, स च द्युलोकमारोहन् द्युलोकभक्ति तृतीयसवनं शंसति, तदपि शंसन् द्युलोकमारूढो भवति। सः अग्निष्टोमसाम्नि यज्ञायज्ञिये यत् शस्त्रम् आग्निमारुतं तत्सवनलोकप्रत्यवरोहानुकृतिं चिकीर्षन्नस्त्वं "वैश्वानरीयेण सूक्तेन" "प्रतिपद्यते" प्रारभते। तद्यथा—"वैश्वानराय पृथुपाजसे (ऋ० सं० ३, १, ३, सू०)" इति प्रतिपत्। "सोऽपि न स्तोत्रियम् आद्रियेत, आग्नेयो हि भवति"। प्रत्यवरोहे कर्त्तव्ये स च पुनराग्नेयोऽयं स्तोत्रियः, अग्निश्च पृथिवीस्थानः, तद्यदि तमाद्रियेत, न प्रत्यवरोहानुकृतिप्रारम्भः कृतः स्यात्। अन्येषु शस्त्रेषु च युक्तं यदूर्द्धमारुरुक्षमाणः स्तोत्रियेण प्रतिपद्यते, इह पुनरवरुरुक्षमाणो द्युस्थानाधिदेवताः शंसमानः क्रमेण वैश्वानरीयेण सूक्तेन प्रतिपद्यत इति, तेन ज्ञायते आदित्यो वैश्वानर इति ॥

अपि च सुतरां प्रत्यवरोहानुकरणमेतदिति गम्यते, येन "तत आगच्छति मध्यमस्थाना देवताः—रुद्रश्च मरुतश्च"। 'ततः' वैश्वानरीयात् सूक्तात् प्रत्यवरोहानुकरणाभिप्रायेण द्युस्थानात् प्रत्यवरुह्य मध्यस्थाना देवता आगच्छति मध्यस्थानेऽभिशंसितुम्। कतमाः ? रुद्रश्च मरुतश्च। तद्यथा—"आ ते पितर्मरुतां सुम्नमेतु (ऋ० सं० २, ४, ११, सू०)" इति। ततोऽपि मध्यस्थानात् पृथिवीस्थानं प्रत्यवरुह्य अत्रैव तं

स्तोचियं शंसति,—"पृष्टो दिवि पृष्टो अग्निः (ऋ॰ सं॰ १, ८ ५, सू॰)" इति। तदेवमेतस्मात् विध्यनुकरणात् पश्यामः आदित्यो वैश्वानर इति। ४।

अथापि वैश्वानरीयो द्वादशकपालो भवत्येतस्य हि द्वादशविधं कर्माथापि ब्राह्मणं भवत्यसौ वा आदित्योऽग्निर्वैश्वानर इत्यथापि निवित् सौर्य्यवैश्वानरी भवत्या यो द्यां भात्या पृथिवीमित्येष हि द्यावापृथिव्या वा भासयत्यथापि छान्दोमिकं सूक्तं सौर्य्यवैश्वानरं भवति दिवि पृष्टो अरोचतेत्येष हि दिवि पृष्टो अरोचतेत्यथापि हविष्पान्तीयं सूक्तं सौर्य्यवैश्वानरं भवति ॥ ५ ॥

"अथापि वैश्वानरीयो द्वादशकपालो भवति"। देवतागुणसामान्येन हि अधियज्ञेषु गुणविधयः कल्प्यन्ते, वैश्वानरीयश्च सर्वत्र द्वादशकपालः। "एतस्य हि" "द्वादशविधं" द्वादशमासप्रविभागलक्षणं "कर्म"। तेनैतस्मादपि देवतागुणकपालविध्यनुकरणात् पश्यामः आदित्यो वैश्वानर इति।

"अथापि निवित् सौर्य्यवैश्वानरी भवति"। निविदित्याकृतिविशिष्टो मन्त्रः, शस्त्रमध्यपाती। स तथा भवति यथा सूर्य्यो वैश्वानर इति न पार्थिवो न मध्यम इति। कथम्? इति। भवति हि तत्रैतत् पदम्,—"आ यो द्यां भात्यापृथिवीम्" इति। न च पुनरादित्यादन्योऽवभास-

यते द्यावापृथिव्यौ, यत उच्यते,—"एष हि द्यावापृथिव्या-वाभासयति"॥

"अथापि छान्दोमिकं सूक्तं सौर्यवैश्वानरं भवति"। कतमत् ? "दिवि पृष्टो अरोचताग्निर्वैश्वानरो बृहन्। क्ष्मया वृधान ओजसा चनो हितो ज्योतिषा बाधते तमः॥"—इति (य० वा० सं० ३३, ९२। ऋ० सं० १, ७, ६, २०—५, २, ७, २)। न च पुनरादित्यादन्यो दिवि पृष्टो रोचते, यत उच्यते,—एष हि "दिवि पृष्टो अरोचत"। 'दिवि पृष्टः' द्युलोके स्पृष्टः अवस्थित इत्यर्थः, 'अरोचत' रोचते दीप्यते। कोऽसौ ? इति। 'अग्निर्वैश्वानरः' 'बृहन्' महान् इत्यर्थः। स रोचमानः किं करोति ? 'ज्योतिषा' स्वेन 'बाधते' 'तमः' नाशयत इत्यर्थः।

"अथापि हविष्पान्तीयं सूक्तं सौर्यवैश्वानरं भवति" कथम् ? इति। भवति हि तत्र मन्त्रः—सूर्यो वैश्वानर इति समर्थः। तद्यथा,—"विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन् (ऋ० सं० ८, ४, १२, २)"—इति। वैश्वानरं केतुं कर्त्तारमह्नामकृण्वन्निति। नैव तावदादित्या-दन्यस्याह्नां कर्त्तृत्वमुपपद्यते पार्थिवे मध्यमे वा, आदित्य एव ह्युदयास्तमयाभ्यामहानि करोति। तेन वयमेतैर्हेतुभिः पश्यामः सूर्यो वैश्वानर इति॥ ५॥

अयमेवाग्निर्वैश्वानर इति शाकपूणिर्विश्वा-नरावेते उत्तरे ज्योतिषी वैश्वानरोऽयं यत्ता-भ्यां जायते कथन्त्वयमेताभ्यां जायत इति यत्र वैद्युतः शरणमभिहन्ति यावदनुपात्तो भवति मध्यमधर्मैव तावद्भवत्युदकेन्धनः शरीरोपशमन

उपादीयमान एवायं सम्पद्यत उदकोपशमनः शरीरदीप्तिः ॥ ६ ॥

"अयम् एव अग्निः वैश्वानरः, इति शाकपूणिः"। न मध्यमो न सूर्य, किं तर्हि? अयमेव पार्थिवः अग्निः। केन हेतुना? तद्धितोत्पत्तिसामर्थ्यात्। कथम्? इति। "विश्वानरावित्ये उत्तरे ज्योतिषी"। तदुक्तम्,—"अपि वा विश्वानर एव कश्चित् स्यात्, तस्यापत्यं वैश्वानरः" इति। तदिदमुपपद्यते, —"वैश्वानरः अयम् यत् ताभ्यां जायते"। तस्मात् तद्धितेन व्यपदेशेन पार्थिवोऽग्निर्वैश्वानर इति॥

"कथन्त्वयमेताभ्यां जायते"। यत उच्यते,—"यत्र वैद्युतः" अग्नि, "शरणम् अभिहन्ति"। आश्रयमात्मनो दारु, उदकाम्, अन्यदा 'अभिहन्ति' निहन्ति, अभिगच्छति प्राप्नोतीत्यर्थः। किं तत्र तत् दीप्यते, स च पुनः "यावदनुपात्तो भवति" मनुष्यैरस्पृष्टो अपरिगृहीतो वा। किं तावत्? "मध्यमधर्मैव तावत् भवति"। कः पुनर्मध्यमस्य धर्मः? यदसौ "उदकेन्धनः शरीरोपशमनः" उदकेनेध्यते दीप्यते रससभावकेन शरीरेण काष्ठेनान्येन वाप्रतिहतमूर्त्तिस्वभावकेन पार्थिवधातुबहुलेनोपशाम्यति, स मध्यमस्य धर्मः। तदेतत् सामानजात्यादिकृतं स्वाभाव्यमहेतुकं ज्योतिषो न भवति प्रथमस्य धर्मः। स च पुनः "उपादीयमानः एव" "अयम्" पार्थिवोऽग्नि, "सम्पद्यते"। कथम्? उपात्तो हि मनुष्यैः स्वजातिधर्मं हित्वा पार्थिवधर्मं प्रतिपद्यते। कथम्? इति। "उदकोपशमनः शरीरदीप्तिः"। विपर्यस्तधर्मा मध्यमेन सम्पद्यते। एवन्तावन्मध्यमादयं विश्वानरात् स जायते, तेनायं तदपत्यमिति भवति हि तद्धितार्थोपपत्त्या वैश्वानरः ॥६॥

अथादित्यादुदीचिप्रथमसमावृत्त आदित्ये कंसं वा मणिं वा परिमृज्य प्रतिस्वरे यत्र शुष्कगोमयमसंस्पर्शयन् धारयति तत् प्रदीप्यते सोऽयमेव सम्पद्यते तथाप्याह। वैश्वानरो यतते सूर्य्येणेति। न च पुनरात्मनात्मा संयततेऽन्येनैवान्यः संयतत इत इममादधात्यमुतोऽमुष्य रश्मयः प्रादुर्भवन्तीतोऽस्यार्चिषस्तयोर्भासोः संसङ्गं दृष्ट्वैवमवक्ष्यत् ॥ ७ ॥

अथ पुनरादित्यात् कथं जायते? आह,—"अथादित्यादुदीचिप्रथमसमावृत्त आदित्ये"—इत्येवमादि। 'अथ'शब्दः आनन्तर्य्ये, प्रकृतादर्थान्तरमधिकरोति। उदीची दिश प्रति प्रथमसमावृत्त आदित्य, तस्मिन् 'उदीचिप्रथमसमावृत्ते' उद्गमनादौ इत्यर्थः। कथम्? इति। "कंसं वा मणिं वा परिमृज्य" यमादित्यमणिमित्याचक्षते। "प्रतिस्वरे" प्रत्यूसाये। "यत्र शुष्कगोमयम् असंस्पर्शयन् धारयति, तत् प्रदीप्यते" "सोऽयमेव सम्पद्यते" य. शुष्कगोमयेऽग्निर्जायते। स एवमादित्यादपि कंसाद्वा मणेर्वा जायते, असावपि च वैश्वानर इत्युच्यते, तदपत्यापेक्षयाप्यस्य वैश्वानरत्वमुपपद्यते। अथाप्याह, तद्वितविग्रहव्यपदेशात् तावदेवमुपपद्यते—अन्य आदित्यात् तावद्वैश्वानर ॥

"अथापि" अयमपरो व्यपदेश एकवाक्ये विभक्त्यन्तरस्थः सूर्य्यवैश्वानरयोर्भेदं गमयति। तद्यथा—"वैश्वानरो यतते सूर्य्येण" इति मन्त्रदृगाह। प्रथमान्तस्य वैश्वानरशब्दस्य तृतीयान्तेन सूर्य्यशब्देन विभक्तिभेदाद् विशेषणविशेष्यभाविन

सामानाधिकरण्यं नास्ति। एतदेवासामानाधिकरण्यमपेक्ष्य अनेकत्वं वैश्वानरसूर्य्यशब्दयोर्ब्रवीति,—"न च पुनरात्मनात्मा संयतते"। किं तर्हि? "अन्य एवान्यः" "संयतते" सङ्गच्छते, यथा देवदत्तो यज्ञदत्तेन। तत् कथमयं संयतते सूर्य्येण? इति। अत आह,—"इत इममादधाति"। इतो लोकादोषधीभ्यः शरादिभ्यो वनस्पतिभ्यो वा मथित्वा प्रत्यक्षत एव इममादधाति अभ्यादधातीत्यर्थः। 'अमुत.' मण्डलात् कर्म्मात्मनः "अमुष्य" च आदित्यमण्डलाधिष्ठातुः स्वभूताः "रश्मयः" "प्रादुर्भवन्ति"। "इतः" तेजःपिण्डात् "अस्य" तदधिष्ठातुः "अर्च्चिषः" प्रादुर्भवन्तीति वर्त्तते। "तयोः भासोः सम्बन्धं दृष्ट्वैवमवचत्" मन्त्रदृक् "वैश्वानरो यतते सूर्य्येण"—इति॥ ७॥

अथ यान्येतान्यौत्तमिकानि सूक्तानि भागानि वा साविचाणि वा सौर्य्याणि वा पौष्णानि वा वैष्णवानि वा वैश्वदेवानि वा तेषु वैश्वानरीयाः प्रवादा अभविष्यन्नादित्यकर्म्मणा चैनमस्तोष्यन्नित्युदेषीत्यस्तमेषीति विपर्य्येषीत्याग्नेयेष्वेव हि सूक्तेषु वैश्वानरीयाः प्रवादा भवन्त्यग्निकर्म्मणा स्तौतीति दहसीति वहसीति पचसीति यथो एतद्वर्षकर्म्मणा ह्येनं स्तौतीत्यस्मिन्नप्येतदुपपद्यते॥ ८॥

"अथ"—इति अधिकारान्तरं। यदि सूर्य्यो वैश्वानरो-

ऽभविष्यत्, ततो ननु "याज्येतानि" "श्रौत्तमिकानि सूक्तानि" उत्तमस्थानदेवताविशेषस्तुत्यर्थानि । तद्यथा—"भागानि वा सावित्राणि वा पौष्णानि वा वैष्णवानि वा"। गुणपदत्वमभ्युपेत्य वैश्वानरशब्दस्य ब्रवीति । "तेषु" सूक्तेषु "वैश्वानरीया प्रवादा" भगादीनां विशेषणत्वेन "अभविष्यन्" हे भग वैश्वानर! हे सवितः वैश्वानर। इत्येवमादयः। "आदित्यकर्मणा च एनमस्तोष्यन्"। एवं वैश्वानरीयेषु सूक्तेषु वैश्वानरमस्तोष्यन् मन्त्रदृशः। कथम्? इति। "उदेपीत्यस्तमेषीति विपर्य्येषीति"। इतिकरणं एवंशब्दार्थे, एवमुदेषि त्वं वैश्वानर। —एवमस्तमेषि—एवं विपर्य्येषि इति। न च पुनरेतदुभयमप्यस्ति,—न हि वैश्वानरीयाः प्रवादा श्रौत्तमिकेषु सूक्तेषु सन्ति, नाप्यादित्यकर्मणा वैश्वानरं स्तुवन्ति मन्त्रदृशः। तस्मान्नैष सूर्यो वैश्वानर इति॥

किञ्चायमपरो विशेषहेतुरग्निर्वैश्वानर इति—"आग्नेयेष्वेव हि सूक्तेषु वैश्वानरीया प्रवादा भवन्ति" अग्निविशेषणत्वेन।—"वैश्वानरं कृत आजातमग्निम् (ऋ० सं० ४, ५, ८, १)"—इत्येवमादयः॥

"अग्निकर्मणा च" "एनं" वैश्वानरं प्रायेण "स्तौतीति" "वहसीति, पचसीति, दहसीति"। एवं वैश्वानर। वहसि हवींषि, पचसि पक्तव्यानि, दहसि दग्धव्यानि॥

तस्मादग्निरेव वैश्वानर इति स्थितम्।

तदेते षट् हेतवः,—तद्वितेन विग्रहव्यपदेशात् (१), एकवाक्ये विभक्त्यन्तरव्यपदेशात् (२), श्रौत्तमिकेषु सूक्तेषु अप्रवादात् (३), आदित्यकर्मणा असंस्तवात् (४), आग्नेयेषु सूक्तेषु प्रवादात् (५), अग्निकर्मणा च संस्तवात् (६) इति।

तत् पुनरेतदग्नेर्वैश्वानरत्वं स्थितमप्यस्थितमिव परपक्ष-

हेतुष्वनिराकृतेषु, अत: तन्निराकरणाय प्रस्तौति। "यथो एतत्"—इति। यत् पुनरेतदुक्तं वर्षकर्मणा यस्मात् स्तौति, तस्मान्माध्यम इति। "अग्निरपि" पार्थिवेऽग्नौ "एतदुपपद्यते" • र्धर्म ॥ ८ ॥

स॒मा॒नमे॒तदु॑द॒कमु॒च्चैत्यव॒ चाह॑भिः। भूमिं॑ प॒र्जन्या॒ जिन्व॑न्ति॒ दिवं॑ जिन्वन्त्य॒ग्नयः॑॥ इति सा निगदव्याख्याता ॥ ९ (२३) ॥

इति सप्तमाध्यायस्य षष्ठः पादः ॥ ७, ६ ॥

कथम्? इत्यत आह—"स॒मा॒नमे॒तत्"—इति (ऋ॰ सं॰ २, ३, २३, ५)। 'समानम्' एकमेवेदम् 'उदकम्' उदकत्वेनाविशिष्टम्, "उच्चै॑त्यव॒ चाह॑भिः"। 'उत् एति च, अर्द्ध चेति, अहोभिर्निमित्तभूतैः पुनराहोभिरेव अवाङ्‌ऐति, दक्षिणोत्तरायणयोर्व्याहृत्तिभिः प्रतिसंवत्सरमहान्यभिप्रेतानि। तदेतदेकमेवोदकं पर्य्यायेणोत्तरायणदक्षिणायनयोः जगद्धाबाधिद्धये तदुदेति चावैति च वर्षकर्मभाविन। कथम्? इत्यत आह —अवाङ् तावदेति, 'भूमिं' 'पर्जन्याः' प्रार्जयितारो रसानां माध्यमिका देवगणा वर्षासमृतौ सुवन्तः 'भूमिं' 'जिन्वन्ति' तर्पयन्ति ओषध्युत्पत्तये। एव तावदवाङ्‌एति। अथ पुनरूर्द्धं कथमिति? इत्यत आह,—"दिवं॑ जिन्वन्त्य॒ग्नयः॑" यथैवासुतौ वर्षणेमा पर्जन्या जिन्वन्ति, तथैवाहुतिप्रभवेण वर्षेण दिव जिन्वन्त्यग्नय', आहुतयो ह्यग्नौ प्रक्षिप्ताः तेन दग्धास्ता स्वार्चिभिः कृत्वोदकभावमापाद्य परम सूक्ष्म देवोपभोगयोग्यं द्या प्रति वर्षभावेनोयन्ते तल्लोकनिवासिना त्पतये, ततस्त इह पुनर्वर्ष प्रकाशयन्ति। तदुक्तम्—"अमुष्य लोकस्य का गतिरिति, अयं लोक इति होवाच"—इति।

एवञ्च सुतरामयमपि च वर्षवान्, आहुतिमूलत्वात् सर्वस्य वर्षस्य। स्मर्य्यते च—"अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते" इति। तत्र यदभूद् वर्षकर्मभावान्मध्यम इति, तदेतद्वैशेषिकं मध्यमस्य वैश्वानरत्वेन लक्षणम्॥

अपि चायमपरो मन्त्रः, यस्मिन्नग्निरादित्यो वर्षकर्मणा स्तूयते। तस्मात् सुतरामनैकान्तो वर्षकर्माभिष्टवो मध्यमस्य त्वत आह—"कृष्णं नियानम्" इति॥ ८(२३)॥

इति निरुक्तवृत्तौ द्वादशाध्यायस्य (सप्तमाध्यायस्य)
षष्ठः पादः॥ ७, ६॥

— सप्तमः पादः॥

कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति। त आववृत्रन् सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते॥ कृष्णं निरयणं रात्रिरादित्यस्य हरयः सुपर्णा हरणा आदित्यरश्मयस्ते यदामुतोऽर्वाञ्चः पर्यावर्त्तन्ते सहस्थानादुदकस्यादित्यादथ घृतेनोदकेन पृथिवी व्युद्यते घृतमित्युदकनाम जिघर्त्तेः सिञ्चतिकर्मणोऽथापि ब्राह्मणं भवत्यग्निर्वा इतो वृष्टिं समीरयति धामच्छद्दिवि भूत्वा वर्षति मरुतः सृष्टां वृष्टिं नयन्ति यदासावादित्योऽग्निं रश्मिभिः पर्य्यावर्त्ततेऽथ वर्षतीति यथो एत-

द्रोणात् प्रत्यवरोहश्चिकीर्षित इत्याम्नायवचना-देतद्भवति यथो एतत्—॥ १ ॥

"कृष्णं नियानम्"—इति (ऋ० सं० २, ३, २३, १)। दीर्घतमस आर्षम्। त्रिष्टुप्। वृष्टिकामस्य कारीर्यामग्नये धामच्छदे अष्टाकपालम्, तस्य पुरोऽनुवाक्या, तस्या मेवाय गीयते अग्निरयमादित्यीकृत्य स्तूयते इति प्रकरणादध्यवसीयते। 'कृष्णम्'। किं पुनस्तत् कृष्णम्? 'नियानं' "निरयणं" निर्गतिः, निर्गच्छन्त्येतदिति 'नियानं' वर्त्म, पन्थाः। तच्च पुनरेतत् "रात्रिः आदित्यस्य" द्वे ह्यस्यायने शुक्लं चोत्तरम्, कृष्णं च दक्षिणम्, सा हि दैवी रात्रिरभिप्रेता। ततो ब्रवीति रात्रिरादित्यस्य ज्योतिषः। स एष भगवानादित्यो यदा जगदनुग्रहाय गर्भमुदकमात्मन्याधित्सुरुत्तरायणं प्रतिपद्यते, तदैते 'हरयः' रस"हरणाः" 'सुपर्णाः' तस्य "रश्मयः" सर्वस्माद् आलोकात् 'अपो वसानाः' आत्मन्याच्छादयन्त आददानाः 'दिवं' द्योतनवन्तम् एतमादित्यं प्रति 'उत्पतन्ति' तदुदकं निधित्समानाः तस्मिन् गर्भत्वेन स एष आदित्य उत्तरायणमासैः षड्भिः आहितोदकगर्भः सम्पद्यते। स एष परिपिक्तोदकगर्भो दक्षिणं वर्त्म प्रतिपद्यमानो नभस्यात् मासात् प्रभृति प्रसूयते। तदिदमुच्यते,—"त आ ववृत्रन् सदनादृतस्य" इति। ते रश्मयः "यदा" "अमुतः" अमुष्मात् आदित्यात् 'ऋतस्य' उदकस्य 'सदनात्' सद्मस्थानात् 'आ ववृत्रन्' *यदा "पर्यावर्तन्ते" 'आत्' "अथ" तदा इत्तिस्मनन्तरमेव* 'घृतेन' "उदकेन" 'पृथिवी' 'व्युद्यते' विविधमुद्यते। "घृतम् इति उदकनाम" 'पृथिवी व्युद्यते' इति सामर्थ्यात्। तत् पुनः 'जिघर्तेः सिञ्चतिकर्मणः"।

-एवमेतस्मिन् मन्त्रे मन्त्ररूपादादित्यः, प्रकरणादग्निः, उभयथाप्यन्यो मध्यमात् वर्षकर्मणः कर्त्ता ॥

"अथापि ब्राह्मणम्" एतस्मिन् प्रकरणे यस्मिन्नयं मन्त्रो विनियुज्यते, "अग्निर्वा इतो वृष्टिं समीरयति"—इत्येवमादि । अग्निः इतो लोकात् वृष्टिं समन्तत ईरयति । धूमभूता आप ओषधिवनस्पतिभ्यो विनिवर्त्त्यमानाः आहुतिभूतायामुं लोकमाविशन्ति । अग्नेर्वै धूमो जायते, धूमादभ्रम्, अभ्रात् वृष्टिरिति ह विज्ञायते । ताः पुनरग्निस्थानाभिसम्पत्तिप्रनाडिकया धामच्छदादित्यो भूत्वा धाम्ना छादयिता रश्मिभिर्मेघरूपैर्मध्यमस्थानमापादयति । एवं तेन सृष्टां वृष्टिं मध्यस्थानागमतो वायवो मेघोदराणि विदार्य्य तेभ्यो विक्षिपन्तो वृष्टिमिमं लोकं नयन्ति प्रापयन्तीत्यर्थः ॥

अथापरमपि ब्राह्मणं भवति—"यदामावादित्योऽग्निं रश्मिभिः" इत्येवमादि । तदेवमेतत् वर्षकर्म समानं सर्वेषाम् इत्यहेतुर्मध्यमस्य वैश्वानरत्वे भवति ॥

"यथो एतत्" यत् पुनरेतदुक्तं याज्ञिकपक्षे—"रोहात् प्रत्यवरोहचिकीर्षितः इति"। अकारणमेतत् सूर्य्यस्य वैश्वानरत्वे । कस्मात् ? "आम्नायवचनात् एतत्" एवं "भवति" रोहात् प्रत्यवरोह इत्यर्थवादमात्रमेव ॥

"यथो एतत्" यदपि चोक्तम्— ॥ १ ॥

वैश्वानरीयो द्वादशकपालो भवतीत्यनिर्वचनं कपालानि भवन्त्यस्ति हि सौर्य्य एककपालः पञ्चकपालश्च यथो एतद्‌ ब्राह्मणं भवतीति बहुभक्तिवादीनि हि ब्राह्मणानि

पृथिवी वैश्वानरः संवत्सरो वैश्वानरो ब्राह्मणो वैश्वानर इति यथो एतन्निविसौर्य्यवैश्वानरी भवतीत्यस्यैव सा भवति यो विड्भ्यो मानुषीभ्यो दीदेदित्येष हि विड्भ्यो मानुषीभ्यो दीप्यते यथो एतच्छान्दोमिकं सूक्तं सौर्य्यवैश्वानरं भवतीत्यस्यैव तद्भवति जमदग्निभिराहुत इति जमदग्नयः प्रजमिताग्नयो वा प्रज्वलिताग्नयो वा तैरभिहुतो भवति यथो एतद्धविष्पान्तीयं सूक्तं सौर्य्यवैश्वानरं भवतीत्यस्यैव तद् भवति ॥ २ (२४) ॥

"वैश्वानरीयो द्वादशकपालो भवति"—इति। एतदप्यकारणं सूर्य्यस्य वैश्वानरत्वे। कस्मात्? व्यभिचारात्, व्यभिचार्य्येतदित्यत आह,—"अस्ति हि सौर्य्य एककपाल. पञ्चकपालश्च"। यदि हि देवतागुणाभिप्रायमभविष्यत् द्वादशविधमस्य कर्म, तस्मात् द्वादशकपाल इति। नन्वेवं सति सौर्य्योऽपि द्वादशकपाल एवाभविष्यत्, अभिधानमात्रं भिद्यते न कर्म्मेति; न च भवति सौर्य्यो द्वादशकपाल इति। तस्मादहेतुः कपालानि ॥

"यथो एतत्" यदप्युक्तम्—"ब्राह्मणं सौर्य्यवैश्वानरप्रवादः भवतीति"। एतदप्यकारणम्। कस्मात्? "बहुभक्तिवादीनि हि ब्राह्मणानि भवन्ति"। यस्मात् बहुभक्तिवादीनि ब्राह्मणानि भवन्ति। भक्तिर्नाम गुणकल्पना, येन केनचिद् गुणेन ब्राह्मणं सर्वं सर्वथा ब्रवीति, तत्र तत्त्वमन्वेष्यमेव

भवति । तद्यथा । "पृथिवी, वैश्वानरः"—इत्येवमादि किमपि ब्राह्मणेन बहु वैश्वानरशब्देनोच्यते भक्त्या ॥

"अथो एतत्"—"निवित् सौर्य्यवैश्वानरी भवतीति"। "अस्यैव" अग्नेः "सा भवति"। कथम् ? इति। तस्याह्ये पद भवति "यो विड्भ्यो मानुषीभ्यो दीदेदिति"। ततः किम् ? "एष हि विड्भ्यो मानुषीभ्यो दीप्यते"। "अग्निर्वैश्वानरः सोमस्य मत्सत्। विश्वेषां देवानां समित्। अजस्रं दैव्यं ज्योतिः। यो विड्भ्यो मानुषीभ्यो दीदेत्। उषु पूर्वासु दिद्युतानः। अजर उपसामनीके। आ यो द्यां भात्या पृथिवीम्। आर्वन्तरिक्षम्। ज्योतिषा यज्ञाय शर्म्म सयत्। अग्निर्वैश्वानर इह अवदिह सोमस्य मत्सत्। प्रेमा देवो देवहूतिमवतु देव्या धिया। प्रेद ब्रह्म प्रेदं क्षत्रम्। प्रेमं सुन्वन्त यजमानमवतु। चित्रचित्राभिरूतिभिः। अवतु ब्रह्मणस्पतिः-सागमत्"—इतीय निवित् आग्निमारुते शस्यते। "निवित् पुरोरुचः प्रैषा विश्वामित्रस्य सर्वशः।"—इति सर्वा विश्वामित्रस्यार्षम्। "अग्निर्वैश्वानरः सोमस्य मत्सत्" इत्यत्। तत्रस्य "प्रेमां देवो देवहूतिमवतु"। 'प्र' प्रकर्षेण 'इमाम्' अग्निः 'वैश्वानरः 'देवः' 'देवहूतिं' देवानामस्माकमाह्वानम् 'अवतु' रक्षतु। यः 'विश्वेषां देवानां' 'समित्' समिन्धनः, स इदं करोतु। यच 'अजस्रं' नित्यं 'ज्योतिः'। यच 'विड्भ्यः', मानुषीभ्यः 'दीदेत्' देदीप्यते। यच 'उषु पूर्वासु' पूर्वेष्वहःसु 'दिद्युतानः' दीप्यमान एवासीत्। यश्चासौ 'अजर' जरा-वियुक्तः 'उपसामनीके' अग्निहोत्रादिषु द्योतते। 'यः' च 'आ' 'भाति' भासयति 'द्यां' सूर्य्यात्मना, 'आ' भासयति च 'पृथिवीम्' अन्यात्मना, 'आ' भासयति 'उरु' च 'अन्तरिक्षं' मध्यमात्मना। एवं त्रिभिर्ज्योतिर्भि, यच 'ज्योतिषा' 'यज्ञाय'

शर्म' सुखं 'संयत्' यच्छति, ददाति। सः 'अग्निः' वैश्वानरः 'इह' 'श्रवत्' शृणोतु अस्माकं स्तुतीः। 'इह' च कर्मणि 'सोमस्य' 'मत्सत्' तृप्यतु। किञ्च, 'प्रावत्विमां देवी देवहूतिं' 'देव्या धिया' देवानां या दात्री धीः प्रज्ञा, तया 'अवतु' रक्षतु। 'प्रेदं ब्रह्म, प्रेदं क्षत्रम्' ब्रह्म प्रावत्विदम्। 'प्रेमं सुन्वन्तम्' अभिषुण्वन्तं 'यजमानं प्रावतु'। 'चित्रः' चायनीयः पूज्यो वैश्वानरः, 'चित्राभिः ऊतिभिः' शोभनाभिः गतिभिः प्रीतिभिर्वा। 'श्रवत्' शृणोतु इमानि 'ब्रह्माणि' अस्माकं नित्यं च अस्मान् प्रति 'आगमत्' प्रत्यागच्छतु 'अवसा' पालनाभिप्रायेण मनसा कर्मसु। इत्येतदाशास्महे॥

"अथो एतत्" यत् पुनरेतदुक्तम्—"छान्दोमिकम्" छन्दोमयज्ञेषु दाशरात्रिकेषु यत् "सूक्तं" तत् "सौर्यवैश्वानरम्"—इति, तदपि "अस्यैव" अग्नेः "भवति"। कथम्? इति। तत्र हि "एतत्" विशिष्टं पार्थिवाग्नेर्बोधकं लिङ्गं "भवति"—"जमदग्निभिराहुतः—इति" जमदग्नयो ह्येनम् आहुतिभिर्जुह्वति, नादित्यम्, अभिधानात् असम्भवाच्च। तस्मादत्रापि यद्वैश्वानरलिङ्गं तदप्येतस्य पार्थिवस्याग्नेर्व्यञ्जकं भवति। "कृपा पावक दीदिहि"। 'कृपा' अर्पिता, हे वैश्वानर! 'पावक!' 'द्युमत्' दीप्तिमत्, यस्त्वं जमदग्निभिराहुतः, "अभिहुतः" स त्वमस्माकं कर्मसु नित्यं 'दीदिहि' दीप्यस्व। इत्येतदाशास्महे। "जमदग्नयः" नित्यं "प्रजमिताग्नयः" प्रभूताग्नयः। "प्रज्वलिताग्नयो वा"॥

"अथो एतत्" यदप्युक्तम्—"हविष्पान्तीयं सूक्तं सौर्यवैश्वानरं भवति इति" "तत्" अपि "अस्यैव" "भवति"। कथम्? इति। यतस्तस्य सूक्तस्य या प्रथमा ऋक्, सा यथा

आग्नेयी भवति, न सौरी, तथा निराह—इदमाग्नेय सूक्तम्, न सौर्यमित्युपप्रदर्शनार्थम् ॥ २ (२४) ॥

ह॒विष्पान्त॑म॒जरं॑ स्व॒र्विदि॑ दिवि॒स्पृश्याहु॑तं॒ जुष्ट॑म॒ग्नौ। तस्य॒ भर्म॑णे॒ भुव॑नाय दे॒वा धर्म॑णे॒ कं॑ स्व॒धया॑पप्रथन्त ॥ हविर्यत्पानीयमजरं सूर्यविदि दिविस्पृश्यभिहुतं जुष्टमग्नौ तस्य भरणाय च भावनाय च धारणाय चैतेभ्यः सर्वेभ्यः कर्मभ्य इममग्निमन्नेनापप्रथन्तेत्यधाप्याह ॥ ३ (२५) ॥

"हविष्पान्तम्"—इति (ऋ० स० ८, ४, १२, १,—१०, ७ ४, १)। सूक्तमेतत् मूर्द्धन्वत आङ्गिरसस्यार्षम्, वामदेवस्य वा। व्यूढस्य दशरात्रस्य पञ्चमऽह्न्याग्निमारुतस्य प्रतिपत्। 'हविः' कतमत् ? "यत्" एतत् "पान्तम्" पानार्हं पानयोग्य च देवना च पुरोडाशादिनिर्दग्धस्थूलभावमग्निना क्रियते। 'अजरम्' जरा विपरिणाम, यत पर विपरिणामो नास्ति कश्चित्, तत्राविवेकमापादितमग्निना। यदेतत् 'स्वर्विदि' स्व आदित्य', त वेत्ति यथासौ वेदितव्य इति, तदर्थं वा वेत्ति हवि, स स्वर्विदयमग्नि न सूर्य । भाष्यकारोऽपि व्यपदेशेन निराह—"सूर्यविदि" इति। 'दिविस्पृशि' द्यामसौ स्पृशत्यहन्यहनि हविरुपनयन्नादित्यम्। 'आहुतम् "अभिहुत" विसृष्टम्। 'जुष्टम्' प्रिय देवानाम्। 'तस्य' हविष 'भर्मणे' "भरणाय" सम्भरणाय बहुलीकरणाय, अपि नाम अयमग्निरित्येतद्‌ बहु कुर्यादित्येवमर्थम्। "भावनाय च" विभूवियुक्त्यु पजायेतेत्येवमर्थमपि एतत् कथ नाम देवताद

मिश्रमर्थं कुर्यादिति 'धर्मणे' "धारणाय" "अविच्छेदनाय"। कथं नामैतत् देवताभ्यो नित्यं प्रापयेदिति। "एतेभ्य." "कर्मभ्य:" "अर्थाय" "इमम्" एव "अग्निं" पृथिवीस्थानं साधयते। 'स्वधया' "अन्नेन" हविषा, आज्येन पुरोडाशेन च। यदुक्तं निगमे—घृत चापां पुरुषं चौषधीनामिति। तदेतत् 'अपप्रथन्त' देवा: अवर्द्धयन्त इत्यर्थ:॥

एवमेतस्मिन् सूक्ते प्रथमे मन्त्रे यदेतदग्निलिङ्गमस्पष्टं वैश्वानरशब्देन, तदयमयमग्निवाचि। तत्पुनरेतत्सूक्तं 'हविष्पान्तीयम्' प्रागेवाग्नेय करोति, प्राथम्यात्, प्रथम लोके यो हि स्तूयते, स स्वेनाभिधानेनाव्यभिचारिणोपक्रम्यते स्तोतुम्, ततोऽन्यैर्भाक्तै: स्तूयते, त्वं राजा त्वमिन्द्र इत्येवमादिभि:। तथैव कृत्वा अस्मिन् सूक्ते यो वैश्वानरशब्द: उत्तरत्र स तस्यैवाग्ने: पृथिवीस्थानस्य व्यञ्जनमात्रं भवति। तथा चायमेव पृथिवीस्थानोऽग्निर्वैश्वानर:, न मध्यम:॥

तथेममपरं मन्त्रं स्वपक्षोद्विभावयिषया अन्यस्मात् स्थानात् . भिन्नज्योतिर्लक्षणमानीय मध्यमोत्तमयोर्ज्योतिषोरन्यत्वव्यपदेशवतो वैश्वानरस्य निर्णिनीषन् प्रकरोति "अथाप्याह"—इति॥ २ (२५)॥

अपामुपस्थे महिषा अगृभ्णत विशो राजानमुपतस्थुर्ऋग्मियम्। आ दूतो अग्निमभरद्विवस्वतो वैश्वानरं मातरिश्वा परावतः॥ अपामुपस्थ उपस्थाने महत्यन्तरिक्षलोक आसीना महान्त इति वागृह्णत माध्यमिका देवगणा विश इव राजानमुपतस्थुर्ऋग्मिय-

स्तम्भन्तमिति वार्चनीयमिति वा पूजनीयमिति वाहरद्य दूतो देवानां विवस्वत आदित्या-द्विवस्वान्विवासनवान् प्रेरितवतः परागता-द्वास्याग्नेर्वैश्वानरस्य मातरिश्वानमाहर्त्तार-माह मातरिश्वा वायुर्मातर्य्यन्तरिक्षे श्वसिति मातर्य्याश्वनितीति वाथैनमेताभ्यां सर्वाणि स्थानान्यभ्यापादं स्तौति ॥ ४(२६) ॥

"अपामुपस्थे"—इति (ऋ० सं० ४, ५, १०, ४)। भरद्वाजस्यार्षम् । प्रातरनुवाकाश्विनयो शस्यते। 'अपाम्' 'उपस्थे' "उपस्थाने" यत्रोपगम्य तिष्ठन्त्यापः सोऽपामुपस्थ, अन्तरिक्षलोक, तस्मिन्नपामुपस्थे। "महति" विस्तीर्णे। सत्ता 'महिषा' "माध्यमिका देवगणा"। अथवा 'महिषा' त एव "महान्त"। किमकुर्वन ? 'अग्रभ्णन्' "अगृह्णन्"। गृहीत्वा च 'विश' "विश इव" मनुष्या इव 'राजानम्' परिवार्य्य 'उपतस्थु'। 'स्तोमयम' ऋग्भि स्तुतिभि तद्वन्तम्, "अर्चनीयम" अर्चनार्हं वा। कतमम् ? इति। "यम्" 'आ अभरत्' "आहरत्"। 'दूत' देवाना 'मातरिश्वा' "वायु" 'अग्नि' वैश्वानरम्, कुत ? 'परावत' "प्रेरितवत" प्रकर्षेण ईरितवत, प्रेरिततरात "परागताद्वा" दूरतरात् 'विवस्वत,' आदित्यात, विवासनक्रियया तमसा तद्वतस्त पर्य्यगृह्णन् अन्तरिक्षे लोके गृहीत्वा चोपतस्थु विश इव राजान मातरिश्वा वायु । स हि "मातरि अन्तरिक्षे" अप्रतिबध्यमानप्राण श्वसिति" गच्छति। अथवा "मातरि" "आश्वानिति" गच्छति।

एवमेतस्मिन् मन्त्रे यत आह्रियते, येन चाह्रियते, यश्चा-ह्रियते, सर्वं ते पृथग् व्यपदिष्टाः। अत्र विवस्वत आह्रियते मातरिश्वना वैश्वानर इति। तस्मादेतयोर्विवस्वन्मातरिश्वनोः सन्निधानव्यपदेशे सति साक्षाद् वैश्वानरशब्देन पार्थिव उक्त इति व्यवतिष्ठते पार्थिवो वैश्वानर इति॥

अथ पुनर्यदङ्गीकृत्य सूर्यादिसम्बन्धि विशेषलिङ्गं हवि-ष्पान्तीयस्य सौर्यवैश्वानरत्वमुक्तम्—"विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्"—इति, नान्यः सूर्यादह्नां कर्त्ता, तस्मात् सूर्योऽत्र वैश्वानर इति। अत्र ब्रूमः—पार्थिव एवाग्निः सूक्ते प्रथमायामृचि प्रकृत्योत्तरासृचु एतस्मिन् सूक्ते प्रकृतिभूम्ना स्तूयते, महत आत्मनो माहाभाग्यात्। अपि तर्हि सत्त्वान्यश्वप्रभृतीनि प्रकृतिभूमभिः स्तूयन्ते,—किमङ्ग पुनर्देवताः, तासामपि च विशेषतोऽग्निः, यस्य सर्वदेवतात्मा-भिवादः साक्षात् "अग्निः सर्वा देवताः (ऐ० ब्रा० २, १, २)" "इन्द्रं मित्रं वरुणमग्निम् (ऋ० सं० २, ३, २२, ६)"—इति। तदेतदेतस्मिन्नेव सूक्ते स्फुटतरमुपदिश्यते। यथा पार्थिव एवायमग्निः तेन तेन देवता विशेषेण देवतात्मना तत्स्थान-मापन्नः स्तूयत इति तदर्थमिदमाह॥

"अथैनमेताभ्यां सर्वाणि स्थानान्यभ्यापादं स्तौति" एताभ्या ये एते वक्ष्यमाणे, सर्वाणि स्थानानि पृथिव्यन्तरिक्ष-द्युलक्षणानि अभ्यापाद्य अभ्यापाद्य इत्यभ्यापादं स्तौति मन्त्रदृक्—॥ ४ (२६)॥

मूर्द्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन्। माया मू तु यज्ञियानामे-तामपो यत्तूर्णिश्चरति प्रजानन्॥ मूर्द्धा मूर्त्त-

सन्निन्धीयते मूर्द्धा यः सर्वेषां भूतानां भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन् स एव मन्त्रां त्वेतां मन्यन्ते यज्ञियानान्देवानां यज्ञसम्पादिनामपो यत्कर्म चरति प्रजानन् सर्वाणि स्थानान्यनुसञ्चरते त्वरमाणस्तस्योत्तरा भूयसे निर्वचनाय ॥ ५ (२७) ॥

"मूर्द्धा भुवो भवति"—इति (ऋ० स० ८, ४, ११, १) "मूर्द्धा" मूर्त्तमस्मिन" सर्वं सत्त्वजातमुपनिबद्ध "धीयते" यथ हि शिरसो वियोगे तद्वतोऽवश्य भावि मरणम, एवमग्निवियोगेऽप्यवश्य म्रियन्ते भूतानि इत्यत प्रधानम्'अग्नि' 'मूर्द्धा 'भुव' भूलोकस्य भवति। विशेषतस्तु 'नक्तम्' रात्रौ तत्कृतत्वादालोकस्य, भूताना चान्नपक्तेस्तत्कृतत्वात्। तत् किमय मन्योऽग्निरन्य सूर्य इति ? न इत्युच्यते,—"ततः सूर्यो जायते प्रातरुद्यन्" रात्रावग्नित्वेन लोकस्योपकार कृत्व 'तत' अनन्तरमेव प्रभाताया रात्र्यामाह्निकैरुपकारैरुपकरिष्यन् लोकस्य 'सूर्य' भूत्वा 'जायते' 'प्रातरुद्यन्' "स एव" अयमग्नि। तस्य इय 'माया'। क एना जानाति ? माय "त्वेता" यज्ञियाना' "देवानाम, यज्ञसम्पादिनाम्" स तत्त्व विदो मन्यन्ते। तत् किम ? इति। 'अप' 'यत्' "कर्म" स्वाधिकारप्रयुक्तम्, आत्माधिकारप्रयुक्तम्, आदित्यात्मना अग्न्यात्मना च कर्त्तव्यम 'प्रजानन्' प्रकर्षेण जानन् "सर्वाणि स्थानानि अनुसञ्चरते" 'तूर्णि' "त्वरमाण" कर्मकालमपरिहापयन्नित्यभिप्रायः ॥

"तस्योत्तरा भूयसे निर्वचनाय"। यथा चैतदेव तथैव-

अपरा ऋक् भूयस्तरमेतमेवार्थं वक्ति। किं पूर्वया नोक्तं यदनया भूयस्तरं निरुच्यते? इति। स्थानद्वयमभिसम्पन्न: पूर्वया स्तुत,—मूर्धा भुवो भवत्यग्निर्नक्तं तत: सूर्य्यात्मना प्रातरसावुदेति, अथ पुनरुत्तरया स्थानत्रयमभिसम्पन्न: स्फुटतरं स्तूयते,—इत्येतद् भूयस्त्वम् ॥ ५ (२७) ॥

स्तोमे॑न॒ हि दि॒वि दे॒वासो॑ अ॒ग्निमजी॑जन॒ञ्छक्ति॑भी॒ रोदसि॒प्राम्। तमू॑ अकृण्वन् त्रे॒धा भु॒वे कं स ओष॑धीः पचति वि॒श्वरू॑पाः ॥

स्तोमेन हि यं दिवि देवा अग्निमजनयञ्छक्तिभि: कर्मभिर्द्यावापृथिव्योः पूरणं तमकुर्वंस्त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिर्यदस्य दिवि तृतीयं तदसावादित्य इति हि ब्राह्मणं तदग्नीकृत्य स्तौत्यथैनमेतयादित्यीकृत्य स्तौति ॥ ६ (२८) ॥

“स्तोमे॑न हि”—इति (ऋ० सं० ८,४ ११,५)। ‘स्तोमेन’ स्तुतिभि:, ‘शक्तिभि:’ “कर्मभि:” अग्निहोत्रादिभि:। ‘दिवि’ द्युलोके। एतम् ‘अग्निम्’ आदित्यात्मना। ‘रोदसी’ “द्यावापृथिव्यौ” ‘प्रा’ “पूरणं” ‘देवास:’ “देवा:” ‘अजीजनन्’ अजनयन् यजमाना:, ते हि हविषां दातार: प्रातर् अनया। “यद् नोदियाद् यद्येतामग्नावाहुतिं न जुहुयादिति आहुतिभिरेवैनं जनयन्ति”—इति। ‘तम् अकृण्वन्’ तमेवाग्निं कृतवन्त:। ‘त्रेधा भुवे कम्’। कमित्यनर्थको निपात:। “त्रेधाभावाय” “पृथिव्यामन्तरिक्षे, दिवि” च। ‘स:’ एवमवस्थितो जगदाधा-

सिद्धये सर्वावस्थः 'ओषधी. पचति' 'विश्वरूपा' सर्वरूपा इति ॥

महत्तस्यैव शाकपूर्णेः पुनर्मेहण स्वपचानुस्मृतये। सद्वरो ह्यस्मिन् सूक्ते आत्मविवेकयाज्ञिकानामिति ।

ब्राह्मणमपि चेतमेवार्थं ब्रवीत्ययमेवाग्निरादित्यो भवतीति;—"यदस्य दिवि तृतीय तदसावादित्य इति ब्राह्मणम्"। 'अस्य'—इति व्यवदेशात् पार्थिवस्याग्ने. प्राधान्यं दर्शयति। उभाभ्यां पक्षाभ्यां व्याहत्य स्वपचसाधनमुक्ता देवतासतत्वमालम्ब्य निरुच्यते। एकमेवेद ज्योति, ज्योतिष्ट्वाविशेषात्। तत्पुनरेतज्जगद्यात्रासिद्धये त्रिधा विभक्त पृथिव्यामन्तरिक्षे दिवि च विभक्ताभिधान सम्पद्यते, अग्निर्विद्युदादित्य इति ।

तत्रैव सति ज्योतिषो दिवि तृतीयमादित्याख्यमस्मिन् सूक्ते पूर्वासृच्चु "हविष्पान्तम्"—इत्येवमाद्यासु अग्नीकृत्य मन्त्रदृक् स्तौति, "अथैनमेतया पुनरादित्यीकृत्य स्तौति"— ॥ ६ (२८) ॥

यदेदे॑नुमद॑धुर्य॒ज्ञिया॑सो दि॒वि दे॒वाः सूर्य॑मादि॒ते॒यम् । य॒दा च॑रि॒ष्णू मि॑थु॒ना॒वभू॑ता॒मादित् प्राप॑श्यन् भुव॑नानि॒ विश्वा॑ ॥

यदैनमदधुर्यज्ञियाः सर्वे दिवि देवाः सूर्यमादितेयमदितेः पुत्रं यदा चरिष्णू मिथुनौ प्रादुरभूतां सर्वदा सहचारिणावुषाश्चादित्यस्य मिथुनौ कस्मान्मिनोतिः श्रयतिकर्मा थु इति

नामकरणस्थकारो वा नयतिः परो वनिर्वा समाश्रितावन्योन्यं नयतो वनुतो वा मनुष्यमिथुनावप्येतस्मादेव मेथन्तावन्योन्यं वनुत इति वाथैनमेतयाग्नीकत्व स्तौति ॥ ७ (२८) ॥

"यदेदेनमदधुर्यज्ञियास:"—इति (ऋ० सं० ८, ४, १२, १)। "यदेनम्" 'सूर्यम्' 'आदितेयम्' "अदितेः पुत्रम्" 'दिवि अदधु.' द्युलोके स्थापितवन्त, 'देवा:' 'यज्ञियास:' यज्ञसम्पादिन:, यजमाना: याज्ञेन कर्मणा सर्वस्यास्यापूर्वकृतत्वाज्जगद्विरचनाप्रपञ्चस्य। रश्मयो वा देवा: सौर्या तदैनमुचीतवन्त:। 'यदा' चैतो 'चरिष्णू' "सर्वदा सद्दचरणशीलो" "मिथुनौ" "प्रादु." 'अभूताम्' "उषायादित्यश्च"। 'आत्' अथ तदा 'प्रापश्यत्' प्रकर्षेणापश्यत् 'भुवनानि' भूतानि, 'विश्वा' विश्वानि सर्वाणि ॥

"मिथुनौ कस्मात् ?" "मिनोति." तावदव "श्रयतिकर्मा" मिथुनशब्दे पूर्वपदं 'मि'—इति। 'थु'—इति नामकरणः" प्रत्यय, "थकारो वा" नामकरणो विकल्पेन। "नयतिः परः" उत्तरपदे, "वनिर्वा" विकल्पेन। तदा तावत् 'थु'—इति नामकरणो नयतिश्च परः, तदा धातोः पूर्वत्वात् प्रत्ययस्य च परत्वात् 'मि न थु:'—इति प्राप्ते रूढेर्बलीयस्त्वात् मध्यान्तविपर्ययेण मिथुनावित्युक्तम्। अथ पुनर्यदा थकारो नामकरण, तदा वनिरुत्तरः, तदा वकारस्य सम्प्रसारणम्, सम्प्रसारणपरपूर्वत्वं मध्यान्तविपर्ययः। थकारे च यः स्वर, तस्य लोपः, कथारच उकारमुपसङ्क्रमेत। एवं मिथुनाविति सिध्यति। अथ कोऽर्थः ? "समाश्रितौ" "अन्योऽन्यं" प्रति

आत्मानं "नयतः" कालं वा समाश्रितौ भवतः परस्परं सम्भक्तौ। "मनुष्यमिथुनौ अपि एतस्मात् एव"। अथवा मेथतेर्मनुष्यमिथुनौ स्याताम्, तौ हि कामार्थं "मेथन्तौ" इव परस्परेण कालं नयतः ॥

"अथ" पुनः "एतम्" आदित्यम् "एतया" उत्तरयर्चा एतस्मिन्नेव सूक्ते होतृत्वेन "स्तौति" होतृत्वं ह्यग्नेः कर्म न सूर्यस्य। तस्मादिदमग्निवैश्वानरीय सूक्तम् ॥ ७ (२८) ॥

यत्रा वदे॑ते॒ अव॑रः पर॑श्च यज्ञ॒न्यो॑ः कत॒रो नौ॒ वि वे॑द। आ शे॑कुरित्स॒धमा॑दं॒ सखा॑यो॒ नक्ष॑न्त य॒ज्ञं क इ॒दं वि वो॑चत् ॥ यत्र विवदेते दैव्यौ होतारावयञ्चाग्निरसौ च मध्यमः कतरो नौ यज्ञे भूयो वेदेत्याशक्नुवन्ति तत्सहमदनं समानख्याना ऋत्विजस्तेषां यज्ञं समश्नुवानानां को न इदं विवक्ष्यतीति तस्योत्तरा भूयसे निर्वचनाय ॥ ८ (३०) ॥

"यत्रा वदे॑ते॒"—इति (ऋ० सं० ८, ४, १२, २)। 'यत्र' यस्मिन् कर्मणि 'वि वदेते' वेरुपसर्गस्यापकृष्य यत्र क्रियापदेन सामर्थ्यं तत्रानयनम्। को पुनस्तौ विवदेते ? 'अवरः परश्च' "दैव्यौ होतारौ"—"अयं च अग्निः" पार्थिवः "असौ च मध्यमः" वायुः। कथं विवदेते ? 'यज्ञन्योः' यज्ञनेत्रोः। उभावप्यावां यज्ञस्य नेतारौ, तत् कतरः 'नौ' आवयोः "यज्ञे" "भूयः" बहु 'वेद' इति। तत्र य एते 'सखायः' "समानख्याना ऋत्विजः" यज्ञे विनियुक्ताः 'नक्षन्त' समश्नुवते 'यज्ञम्'

त एवं 'सधमादम्' सहमादम् "सहमदनम्" सहपेम् उपक्लप्य अनयोः 'धायेकुः' "धायकृ वन्ति"। अथायक्ष वन्त्व किं ब्रूयुः ? 'क इदं विवोचत्' "को न इदं विवक्ष्यतीति" कतर एतयोर्यज्ञे वेद ? इति, उभावप्येतौ यज्ञे भूयोविदावित्यभिप्रायः।

यथाग्निप्रधानमेतत् सूक्तं होतृकर्मणोऽग्निसम्बद्धत्वात् विशेषलिङ्गेन न सूर्यप्रधानम्, तथा इयमपरा ऋक् "भूयसे निर्वचनाय" बहुतराय निरुच्य वचनाय। पूर्वस्याः को विशेषः ? अस्यां हि विभज्य वायोः केवलोऽग्निरेव स्तूयते, पूर्वस्यामुभावपि भूयोविदावित्युक्तम् ॥ ८ (३०) ॥

यावन्मात्रमुषसो न प्रतीकं सुपर्ण्यो वसते मातरिश्वः। तावद्दधात्युप यज्ञमायन् ब्राह्मणो होतुरवरो निषीदन्॥ यावन्मात्रमुषसः प्रत्यक्तं भवति प्रतिदर्शनमिति वास्त्युपमानस्य सम्प्रत्यर्थे प्रयोग इहेव निधेहीति यथा सुपर्ण्यः सुपतना एता रात्रयो वसते मातरिश्वञ्ज्योतिर्वर्णस्य तावदुपदधाति यज्ञमागच्छन् ब्राह्मणो होतास्याग्नेर्होतुरवरो निषीदन् होतृजपस्त्वमग्निर्वैश्वानरीयो भवति देव सवितरेतन्त्वाद्यणतेऽग्निं होत्राय सह पित्रा वैश्वानरेणेतीममेवाग्निं सवितारमाह सर्वस्य प्रसवितारं मध्यमं वोत्तमं वा पितरं यस्तु सूक्तं भजते यस्मै हविर्निरूप्यतेऽयमेव सोऽग्निर्वैश्वा-

नरो निपातमेवैते उत्तरे ज्योतिषी एतेन नामधेयेन भजेते भजेते ॥ ६ (३१) ॥

इति सप्तमाध्यायस्य सप्तमः पादः ॥ ७, ७ ॥

"यावन्मात्रमुषसो न प्रतीकम्"—इति (ऋ० स० ८, ४, १२, ३)। अत्र 'न'कार सम्प्रत्यर्थ एव, उपमानासम्भवात्। लोकेऽपि च "अस्ति उपमानस्य सम्प्रत्यर्थे प्रयोग"—"इहेव निधेहीति यथा" इह सम्प्रति निधेहीत्यर्थे। मातरिश्वना कश्चित् पृष्ट दैव्यस्य होतु अग्ने यद् विज्ञान तत् किमय ब्राह्मणो मनुष्यहोता यज्ञमुपायन् बिभर्त्ति? इति। स त प्रत्याह—हे 'मातरिश्वन्।' 'यावन्मात्रम्' 'उपस' 'प्रतीक' "प्रत्यक्तम्" प्रत्यञ्चित प्रतिगत प्रकाशस्य, "एता" 'सुपर्ण्य.' "सुपतना" "रात्रय" आत्मनि अनुप्रविष्ट 'वसते' छादयन्ति, अभिभूय तमो वर्त्तन्ते स्वयमेव। अथवा वसतिर्दर्शनार्थे। यावन्मात्रमुषसो रात्रिषु दृश्यन्ते, 'तावत्' इत्येवमपि स्वल्प मेव। एतावन्मात्रमय स्वल्पविज्ञान उपायन 'यज्ञ' 'ब्राह्मण' होतृत्वे वृतो होतृषदने 'निषीदन्' 'दधाति' धारयति। दैव्यस्याग्नेः परस्य भूयोविद, अपर अग्न्योऽल्पविदिति अनुक्त वीत्यल्पमिति, मानुषो हि अग्न्यनुग्रहादेव अयमल्पविज्ञानोऽपि होता हौत्र करोति इति पार्थिवोऽग्निर्विशेषतोऽभिष्टूयते॥

तदेतदेव कृत्वा सूक्तमग्निप्रधानकर्मत्वात् वैश्वानरीयम्। येऽत्र वैश्वानरशब्दा, ते पार्थिवाग्नि भजन्ते विशेषणत्वेन॥

"होतृजपस्त्वनग्निर्वैश्वानरीयो भवति"। एवमपि तु सति अयम अनग्नि वैश्वानर होतृजप। "देव सवितरेत त्वा वृणतेऽग्नि होत्राय सह पित्रा वैश्वानरेण—इति"। एव-

मेत जपं वर्णयन्ति। "इमम् एव अग्निं सवितारम् आह" पार्थिवम्, "सवस्य प्रसवितारम्" यज्ञद्वारेण "मध्यम वा उत्तम वा" "पितरम्" अस्य वैश्वानरमाह। स इह तेन वैश्वानरेण पिता। एव द्वौ पितापुत्राविति व्यपदेशात् पार्थिवादन्यो वैश्वानर। स च पुनर्मध्यमो वोत्तमो वेत्येवमेवमयमनग्नि वैश्वानरत्वेऽपि सति द्योतज्य ॥

अत्रापि "यस्तु सूक्तं भजते, यस्मै हविर्निरूप्यतेऽयमेव सोऽग्निर्वैश्वानर"। किं कारणम्? अनग्निवैश्वानरत्वेऽपि सति द्योतजपस्यायमेव पार्थिवोऽग्निर्वैश्वानर इत्यवध्रियते याज्ञिकपक्षे। आचार्य्यपक्षे च अयमेवैको मन्त्रो व्यपदेश हेतुरनवैश्वानरत्वं ब्रवीति। सम्प्रति मन्त्रेणाग्नेर्व्यपदेशवता अग्नेर्वैश्वानरत्ववाचिना "आ दूतो अग्निमभरद् विवस्वतो वैश्वानरं मातरिश्वा परावतः"—इत्यनेन शाकपूणिपक्षेण स्वेना-व्यभिचारिणा समीभवति। तद्वितव्यपदेशादयस्तु पार्थिवस्य वैश्वानरत्वसाधका विशेषहेतव एवाव्यभिचारिणोऽतिरिच्यन्ते ॥

एतस्मात् विशेषहेतुबाहुल्यात् अयमेव पार्थिवोऽग्निर्वैश्वा-नर सूक्तभाक् हविर्भाक् च ॥

"निपातमेवैते उत्तरे ज्योतिषी" वैश्वानर इति "एतेन नामधेयेन भजेते भजेते" इति। द्विरभ्यासोऽध्यायपरिसमा प्त्यर्थः ॥

तदेवमेतस्मिन् 'वैश्वानर'पदविचारप्रसङ्गे हविष्यान्तीय सूक्तमुपक्षिप्य सूर्यो वैश्वानरः, अग्निर्वैश्वानर इति एकमेवेद ज्योति त्रिधा वर्त्तत इति मन्त्रस्य भावोपमदर्शनार्थमुपवर्णि तम् ॥

ईदृशेषु शब्दार्थन्यायसङ्कटेषु मन्त्रार्थघटनेषु दुरवबोधेषु

मतिमतां मतयो न प्रतिहन्यन्ते, वयन्त्वेतावदत्रावबुध्यामह इति ॥ ८ (२१) ॥

इति निरुक्तवृत्तौ द्वादशाध्यायस्य (सप्तमाध्यायस्य)

सप्तमः पादः ॥ ७, ७ ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ

जम्बूमार्गाश्रमवासिनः आचार्य्यभगवद्दुर्गस्य कृतौ


द्वादशः (सप्तमः) अध्यायः समाप्तः ॥ ७ ॥

(अथात इन्द्रोदिवःपरोक्षकृतास्तद्येनतिस्र-
एवदेवताआकारचिन्तनमपुरुषविधास्तिस्रएवपू-
षात्वेतोऽथैतान्यथैतानिमन्त्राजगत्ययातोऽग्निमी-
डेऽग्निःपूर्वेभिरभिप्रवन्तेन्द्रंमित्रंजातवेदःप्रनूनं-
वैश्वानरोवैश्वानरस्यप्रनूमहित्वंकृष्णं नियानंह-
विष्कान्तमपासुपस्थेमूर्द्धाभुवस्तोमेनयदेदेनंयचा-
वदेतेयावन्माचमेकविंशत् ॥)

इति निरुक्ते (उत्तरषट्के) सप्तमोऽध्यायः ॥७॥

अथ अष्टमाध्यायस्य

प्रथमः पादः ।



द्रविणोदाः कस्माद्धनं द्रविणमुच्यते यदेन-मभिद्रवन्ति बलं वा द्रविणं यदेनेनाभिद्रवन्ति तस्य दाता द्रविणोदास्तस्यैषा भवति ॥ १ ॥

'द्रविणोदा.'—इति। एतद्दैवतापदं निर्वाच्यम्, तदर्थ-मुपोद्घातः—"द्रविणोदाः कस्मात्?" इति। तत्र पूर्वपदमेव तावत् प्रथमं विगृह्य निराह—"धनं द्रविणमुच्यते" इति। तत् कस्मात्? "यदेनमभिद्रवन्ति"। कर्मकारकम्। यस्मा-देतत् आभिमुख्येन तदर्थिनोऽवश्यं द्रवन्ति। "बलं वा द्रविणम्"। करणकारके। "यदेनेनाभिद्रवन्ति" यस्मादनेन संयुक्ताः सन्तः परानभिद्रवन्ति। "तस्य" धनस्य बलस्य वा ""दाता" यो भवति, स: "द्रविणोदा."।

"तस्य" प्राधान्यस्तुतियुक्ता "एषा" ऋक् "भवति" (याँ दृष्ट्वा दैवतापदसमाम्नाये एष समाम्नात.)—॥ १ ॥

द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे। यज्ञेषु देवमीळते ॥ द्रविणोदा यस्त्वं द्रविणस इति द्रविणसादिन इति वा द्रविणसानिन इति वा द्रविणसस्तस्मात् पिबत्विति वा। यज्ञेषु

देवमीलते । याचन्ति स्तुवन्ति वर्द्धयन्ति पूजयन्तीति वा तत् को द्रविणोदा इन्द्र इति क्रौष्टुकिः स बलधनयोर्दातृतमस्तस्य च सर्वा बलकृतिरोजसो जातमुतमन्य एनमिति चाहाथाप्यग्निं द्राविणोदसमाहैष पुनरेतस्माज्जायते । यो अश्मनोरन्तरग्निञ्जजानेत्यपि निगमो भवत्यथाप्यृतुयाजेषु द्राविणोदसाः प्रवादा भवन्ति तेषां पुनः पात्रस्येन्द्रपानमिति भवत्यथाप्येनं सोमपानेन स्तौत्यथाप्याह द्रविणोदाः पिबतु द्राविणोदस इति ॥ २ ॥

"द्रविणोदा द्रविणस"—इति (ऋ० सं० १, ७, ४, ३)। मेधातिथेरार्षम् । 'द्रविणोदा'—इत्येतस्य प्रथमैकवचनान्तस्य कर्तृत्वेन श्रुतस्य क्रियापदेन बहुवचनान्तेन 'ईलते'—इत्यनेन वचनभेदादसामर्थ्यमपेक्ष्य स्तोतृत्वे चासम्भवं द्रविणोदसो देवतात्वात् स्तुत्यत्वेन सामर्थ्यमुन्नीय द्रविणोदसो यद्वृत्तमध्याहृत्य द्रविणोदसि अर्थपतावभिसम्बन्धात् स्तुतेरेकवाक्यतायां सामर्थ्यमुन्निनीषन् स्तुत्ये द्रविणोदसि द्रविणोदःशब्दं कर्मत्वेन नमयाञ्चकार—"द्रविणोदा य." देवः, "त द्रविणोदसम्" इति ।

इदानीं 'द्रविणस.'—इत्यस्य 'ग्रावहस्तासः'—इत्यनेन ऋत्विग्विषयेणासन्दिग्धेन प्रथमाबहुवचनेन स्तुतिकर्तृत्वेन विशेषणविशेष्यभावेन सामानाधिकरण्ये सामर्थ्यमुन्नीय तथार्थोपपत्तिसामर्थ्यादेकवाक्यतयाभिसम्बध्नाति ।

यं द्रविणोदसं 'देवम्' 'अध्वरे' यज्ञे, अग्निष्टोमादौ 'यज्ञेषु' यजतिषु हविःसम्प्रदानेषु सवनेषु वा यागस्थानेषु 'द्रविणसः ऋत्विजः', ते हि द्रविणं लप्स्यामह इति सीदन्ति कर्मणि, अथ वा "द्रविणोसानिनः" धनस्य गवादेर्हविषो वा देवतार्थस्य सम्भक्तारः, 'ग्रावहस्तासः'—इत्यभिषवनाभिप्रायम्। यमेते द्रविणसो ग्रावहस्तास ऋत्विजः अध्वरेषु यज्ञेषु द्रविणोदसं देवम् 'ईडते' "याचन्ति स्तुवन्ति वर्द्धयन्ति पूजयन्तीति वा" स द्रविणोदा देवोऽस्मभ्यं द्रविणानि ददात्विति। एतदाधाख्ये। आशिषमध्याहृत्य समाप्यते, यमीडते स इति, यत्तदोः परस्परापेक्षित्वात्। अथवैवमन्यथा निराकाङ्क्षतया परिसमाप्यते—"द्रविणसः तस्मात् पिबन्त्विति"। द्रविणोदा इत्यतः प्रथमैकवचनादविपरिणतादेव द्रविणस इत्यस्य पञ्चम्येकवचनत्वेन सोमाभिधानत्वे सामर्थ्यमुन्नीय पिबन्त्विाख्यातमध्याहृत्यैव समापयाञ्चकार भाष्यकारः। एवमप्यस्ति सामर्थ्यमित्युपप्रदर्शनार्थम्। तत् कथम्? इति। यं देवं द्रविणोदसमध्वरेषु यज्ञेषु ग्रावहस्ता ऋत्विज ईडते, स देवः द्रविणोदाः, द्रविणसोऽस्मात् सोमात् द्रविणसं भक्षुरादाय स्वमर्थं पिबन्त्वित्येतदाचाख्ये ॥

"तत्को द्रविणोदाः?"—इत्येवमादिविचारः। तत्र तावत् "इन्द्रो इति क्रौष्टुकिः" एवमाचार्यो मन्यते। केन हेतुना? "सः बलधनयोर्दातृतम." अतिशयेन दाता इति। "तस्य च सर्वा बलकृतिः" अभिधानविग्रहे हि बलं द्रविणमित्युक्तम्, बलकृतियेन्द्रस्य सर्वा, तस्मादिन्द्रः। "ओजसो जातमुत मन्य एनम्—इति चाह" मन्त्रदृक्। अधिपतित्वहात एवास्य बलेनाभिसम्बन्धः। तस्मादुक्तं यत्तस्य दाता स्यात्। कथम्? इति। यतो मस्त एव निर्वर्त्तते।—

"अश्नादियायेति यद्वदन्त्योजसो जातमुत मन्य एनम्। मन्योरियाय हर्म्येषु तस्थौ यतः प्रजज्ञ इन्द्रो अस्य वेद॥"—इति (ऋ० सं० ८, ३, ४, ५)। 'यद् वदन्ति' यदा वदन्ति 'अश्नात्' अशनवतो मेघात् अयम् 'इन्द्रः' 'इयाय' आगच्छति 'इति'। तत्र सन्निधानमस्य प्रतीत्य तत्तावदहं न यथा 'मन्ये'। कथन्तर्हि? 'ओजसः जातम्' बलराशेः कुतश्चिदतिमहतो जातम्। अहम् 'एनम्' 'मन्ये' यथायमतिबलवान् लक्ष्यते। अपि वा 'मन्योः' क्रोधात् दीप्तेर्वा अयम् 'इयाय' ततो 'हर्म्येषु' उदकाहरणाधिकारयुक्तेषु मेघवधकर्मसु 'तस्थौ', तिष्ठति। अथवा किं जानीमः, कुतोऽप्ययमैश्वर्या-ज्जात.? इत्यतो ब्रूमः—'यत.' अयम् 'इन्द्रः' 'प्रजज्ञे', इति। 'इन्द्रः' एव 'अस्य' स्वस्य जन्मनः तत्त्व 'वेद' न कोऽप्यन्यो ज्ञास्यतीत्यभिप्रायः॥

अथाप्ययमपरो हेतुरिन्द्रस्य द्रविणोदस्त्वे—"अग्निं द्राविणोदसमाह" मन्त्रदृक्। स मन्त्रो ह्ययः। केचित्तु "द्रविणोदाः पिबतु द्राविणोदस."— (ऋ० स० २, ८, १, ४)। इत्येव मन्यन्ते। यस्यापत्यं द्राविणोदसोऽग्नि, स एव द्रविणोदा इति॥

कस्य च पुनरयमग्निरपत्यम्? इत्यत आह—"एष पुन.", अग्नि, "एतस्मात् जायते" इन्द्रात्। कुत एतत्? ऐन्द्रे हि निगमे श्रूयते—"यो अश्मनोरन्तरग्निं जजान" इति।

"यो हत्वाहिमरिणात् सप्त सिन्धून् यो गा उदाजदपधा बलस्य। यो अश्मनोरन्तरग्निं जजान संवृक् समत्सु स जनास इन्द्रः॥"—इति (ऋ० स० २, ६, ७, ३)। इत्येवेऽहनि दशरात्रस्य निष्केवल्ये विनियोगः। गृत्समदो ब्रवीति। ऐन्द्र रूपमास्थितोऽसुरैर्हन्यमानः किं मा इथ, नाहमिन्द्र

इति। कस्तर्हि इन्द्रः? ‘यः’ ‘हत्वा’ ‘अहिम्’ मेघम् ‘अरिणात्’ ‘सप्त सिन्धून्’ स्यन्दना आकाशनदीः “एला च इला च”—इत्येवमाद्याः, ‘यः’ च ‘गाः’ अपः ‘उदाजत्’ उदगमयत् ‘अपधा’ अपधानेन उद्घाटनेन ‘वलस्य’ मेघस्य शिराणां छिद्राणाम्, ‘यः’ च ‘अश्मनोः’ अशनवत्योः द्यावापृथिव्योः ‘अन्तः’ मध्ये ‘अग्निं’ ‘जजान’ जनयति, ‘यः’ च ‘समत्सु’ संग्रामेषु शत्रूणां ‘संवृक्’ सञ्जेता। ‘जनासः’ हे असुरजनाः! ‘सः’ ‘इन्द्रः’ नाहमिन्द्र इति॥

“अथापि” अयमपरो हेतुरिन्द्रस्य द्रविणोदस्त्वे। कतमः? इति “ऋतुयाजेषु द्राविणोदसाः प्रवादाः भवन्ति”। ऋतवो यैर्मन्त्रैरिज्यन्ते, ते भवन्त्यृतुयाजाः, तेषु ऋतुयाजेषु ‘द्राविणोदसाः’ द्रविणोदःशब्दयुक्ताः प्रवादा भवन्ति। ततः किम्? तेषामृतुयाजानां यत् पात्रं येन ते इज्यन्ते तस्येन्द्रपानमिति मन्त्रे समाख्या भवन्ति। तद्यथा:—“अपाद्धोत्रादुत पोत्रादमत्तोत नेष्ट्रादजुषत प्रयो हितम्। तुरीयं पात्रममृक्तममर्त्यं द्रविणोदाः पिबतु द्राविणोदसः॥”—इति (ऋ० सं० २, ८, १, ४)। तथा—“होता यक्षद्देवं द्रविणोदसमपाद्धोत्रादपात्पोत्रादपान्नेष्ट्रात्तुरीयं पात्रममृक्तममर्त्यमिन्द्रपानं देवो द्रविणोदा द्रविणसः स्वयमायुयात् स्वयमभिगूर्यात् स्वयमभिगूर्तया होतृयजुर्भिः सोमस्य पिबत्वग्नाषाक् यज”—इति। होता यक्षद् देवं द्रविणोदामित्यस्यायमस्य तस्यैवो मैत्रावरुणो ब्रवीति अध्वर्युणा ऋतुभिः प्रेष्येति प्रेषित ‘होता’ ‘यक्षत्’ यजतु यम्? इति। ‘देवं’ ‘द्रविणोदसम्’। स च पुनर्द्रविणोदा देवः पूर्वम् ‘अपात्’ पीतवान् सोमं ‘होत्रात्’ अग्- [illegible]। ‘अपात्’ च ‘पोत्रात्’ अग्न्यादानात्। ‘अपा

च 'नेष्ट्रात्' सम्प्रदानात्। अथ पुनरिदं 'तुरीय' चतुर्थं सम्प्रदानम्, 'अमृक्तम्' अशुद्धम्, अपूर्णमित्यर्थः। 'अमर्त्यं' यत् पीत्वा न म्रियते, अथवा असनुष्ययोग्यम्, अमृक्तञ्च अनुपहृदितमन्यया देवतया अपरिभुक्तम, 'इन्द्रपानम्' इन्द्रस्य पातुं योग्यम। तदेतत् 'द्रविणोदा' 'देव' इन्द्र अस्माभि, प्रत्तमादरेण 'स्वयमायूयात्' स्वयमाभिश्रीयात्, 'स्वयमभिगूर्य्यात्' स्वयमभ्युद्यच्छेत्। तत 'स्वय 'पिबतु' 'ऋतुभि' ऋतुना कालेन सह 'सोमस्य' 'अभिगूर्त्तया' अभिमतया 'होवया' स्तुत्या प्रदीयमान स्वमग्रम्। हे 'अच्छावाक।' त्वमप्यतदेव ज्ञात्वा 'यज'॥

एवमेतस्मिन् इन्द्रस्य द्रविणोद प्रवादवति प्रैषे पात्रस्य 'इन्द्रपानम्'—इति समाख्या, तस्मादिन्द्रस्तेन पिबतीति गम्यते। एवञ्चेत प्राप्तमिन्द्रो द्रविणोदा इति॥

"अथाप्ययम्" अपरो हेतुरिन्द्रस्य द्रविणोदस्त्वे, यस्मादेन "सोमपानेन स्तौति"। ऋतुयाजेष्वेव। "होत्रात् सोमं द्रविणाद् ०—०पिब ऋतुभिः"—इति (ऋ स० २, ७, २६ १)। न ह्यन्य इन्द्रात् सोमपानेन स्तूयते, तदर्थत्वात् सोमसंस्कारस्य, भवति हि सोमाप्यायने च तत्संस्कारप्रधानो मन्त्र। तद्यथा—"अंशुरंशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविदे"—इति (य वा० स० ५, ७)। तस्माद यत्र यत्र सोमपानस्तुति, तत्र तत्रेन्द्र इति स्पष्टो न्याय। प्रसिद्धतरश्चैतत्। यदर्थमेव हि संस्क्रियते तस्मा एव प्रदीयते॥

"अथाप्याह—'द्रविणोदा पिबतु द्राविणोदस'—इति" यस्य 'द्रविणोदस' अग्नि अपत्यम्, स द्रविणोदा' इन्द्र 'पिबतु' (१२१ पृ०) इति। "अपाभ्रावात"—इति। तस्यैवाच्छावाकप्रैषस्यैषा याज्या। 'अमत्त' हृष्टवान्। 'उत' अपि।

'अजुषत' अप्रीयत। 'प्रय.' अन्नम्, प्राणने हितं प्रय्यम्। शेषस्तेनैव व्याख्यातः॥

समाप्ताः पूर्वपञ्चकेतवः क्रौष्टुकिभिमताः॥२॥

अयमेवाग्निर्द्रविणोदा इति शाकपूणिरा-ग्नेयेष्वेव हि सूक्तेषु द्राविणोदसाः प्रवादा भवन्ति। देवा अग्निं धारयन् द्रविणोदा-मित्यपि निगमो भवति यथो एतत् बलधन-योर्दातृतम इति सर्वासु देवतास्वैश्वर्य्यं विद्यते यथो एतदोजसो जातमुतमन्य एनमिति चाहे-त्ययमप्यग्निरोजसा बलेन मथ्यमानो जायते तस्मादेनमाह सहसस्पुत्रं सहसः सूनुं सहसो यहुं यथो एतदग्निं द्राविणोदसमाहेत्यृत्विजो-ऽत्र द्रविणोदस उच्यन्ते हविषो दातारस्ते चैनं जनयन्ति। ऋषीणां पुत्रो अधिराज एष इत्यपि निगमो भवति यथो एतत् तेषां पुनः पात्रस्येन्द्रपानमिति भवतीति भक्तिमात्रं तद्भवति यथा वायव्यानीति सर्वेषां सोमपात्रा-णां यथो एतत् सोमपानेनैनं स्तौतीत्यस्मिन्नप्ये-तदुपपद्यते। सोमं पिब मन्दसानो गणश्रि-भिरित्यपि निगमो भवति यथो एतद् द्रविणो-

द्रा: पिबतु द्राविणोदस इत्यस्यैव तद्भवति ॥ ३ (२) ॥

किमस्तु एतैर्हेतुभिरिन्द्रो द्रविणोदा इति? नेत्युच्यते—"अयमेवाग्निर्द्रविणोदा." इति। "शाकपूणि." मन्यते। 'अयमेव' यस्य पृथिवीस्थानि समाम्नानम्। अपि च यदि मध्यमोऽभविष्यत्, ततो यान्येतानि माध्यमिकानि ऐन्द्राणि वा पार्जन्यानि वा बार्हस्पत्यानि वा, तेषु द्राविणोदसा: प्रवादा अभविष्यन्, मध्यमस्य कर्मणा चैनं रसानुप्रदानादिना अस्तोष्यन्, न चैतदुभयमस्ति। किं तर्हि? आग्नेयेष्वेव हि सूक्तेषु द्राविणोदसा: प्रवादा: भवन्ति"। 'हि'शब्दो हेत्वर्थे, यस्मादाग्नेयेष्वेव सूक्तेषु द्राविणोदसा: प्रवादा: विशेषणत्वेनाग्नेरेव भवन्ति, अग्निकर्मणा चैनं सूक्तेषु स्तौति नेन्द्रकर्मणा तस्मादयमेवाग्निर्द्रविणोदा. ॥

कथमित्यत उपप्रदर्शयति—"देवा अग्निं धारयन् द्रविणोदाम्"—"इत्यपि निगमो भवति"। अध्ययमप्यन्धे बहव इत्यपिशब्दः। "स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा। आपश्च मित्रं धिषणा च साधन् देवा अग्निं धारयन् द्रविणोदाम् ॥"—इति (ऋ० स० १, ७, ३, १)। कुत्सस्येयमार्षम्। पितृयज्ञे स्विष्टकृत्पुरोऽनुवाक्या। य: अग्नि अपा 'मित्र' तदुत्पत्तियोगात्। 'धिषणा' धिषणा, यास वाच. 'साधन्' साधयिता तदधिदेवतायोगात्। यश्च 'देवा.' 'अग्निं' 'धारयन्' धृतवन्त पूर्वं, 'द्रविणोदां' द्रविणाना हविषा देवेभ्यो दातार वोढारम्। 'स' अग्नि: 'प्रत्नथा'। 'था:'-इत्युपमाने। पुराण इव। 'सहसा' बलेन जायमान., 'सद्य.' जातमात्र: सन् 'काव्यानि' पितृदे-

बतानि हवींषि 'अडधत्त'। 'बट्'—इति सत्यनाम। यथा अवितथेन न्यायेन धारयितव्यानि, दापयितव्यानि वा विद्भ्यः। तथैव सद्यो जातोऽपि धारयति वा ददाति वा 'विश्वा' विश्वानि सर्वाणि। एवमेतस्मिन्नधिकारे यं स्तवमृचो देवा', सोऽस्माकमिदं नाम करोत्विति आग्नेयैकवाक्यता। एवमयमेवाग्नि द्राविणोदा इति स्थित पक्षः॥

स पुनरयं परपक्षहेतुष्वनिराकृतेषु अनवस्थित एव, अतस्तन्निराकरणाय "यथो एतत्"—इत्येवमाद्युच्यते। यत् पुनरेतदुक्तम्—"स बलधनयोर्दातृतम." इति। अकारणमेतत् इन्द्रस्य द्रविणोदस्त्वे। कस्मात्? यस्मात् "सर्वासु देवतास्वैश्वर्य्यं विद्यते" अत ऐश्वर्य्यात् सर्वा एव बलधनयोर्दात्रो भवन्ति। तस्मादवैशेषिकमेतदिन्द्रस्य कारणं द्रविणोदस्त्वे।

"यथो एतत्" यदप्युक्तम्, बलकृतिमधिकृत्य,—"ओजसो जातमुतमन्य एनम्"—इति। तदप्यवैशेषिकमिन्द्रस्य। कस्मात्? यस्मात् "अयमप्यग्निरोजसा बलेन मथ्यमानो जायते, तस्मादेनम् (अग्निम्) आह" मन्त्रदृक्। किमाह? "सहसस्पुत्रम्" "सहस सूनुम्" "सहसो यहुम्"। ऊर्ज सुर्पिं रासुतिरित्येवमादय. शेषा॥

"ऊर्जः सुर्पिरासुतिः प्रत्नो होता वरेण्यः। सहसस्पुत्रो अद्भुत॥"—इति (ऋ॰ सं॰ २, ५, २८, ६)। गृत्समदस्यार्षम्। गायत्री। आग्नेयी। अग्नौ विनियोग समिदाधाने। ऊ भवः 'ऊर्जः' ऊर्ज्ञाकः, 'सर्पिरासुतिः' च सर्पिरासवो यस्य, सर्पिर्वादकमासूते य आहुतिद्वारेण। 'प्रत्नः' च पुराण, 'होता' 'वरेण्य' वरणीयः 'सहसः' बलस्य यः 'पुत्र' यं 'अद्भुत' महान् विचित्रो वा। स इदं नाम अस्माकं करोत्वित्याशीर्गतमाख्यातमध्याहृत्य समाप्यते॥

"त्वं ह्र यद् यविष्ठ्य सहसः सूनवाहुत। ऋतावा यज्ञियो भुवः॥"—इति (ऋ० सं० ६, ५, २४, ३)। विरूपस्यार्षम्। आग्नेयी। गायत्री। सामिधेनीष्वाग्नेयेऽन्नाद्यकामकर्मणि याज्या। हे 'यविष्ठ्य' युवतम! 'सहसः' बलस्य 'सूनो' पुत्र! 'यत्' यस्मात् 'आहुत' अभिहुत, 'ऋतावा' सत्यवान्, उदकवान् वा, 'यज्ञियः' यज्ञसम्पादी 'भुवः' भवसि। तस्मात् त्वा वयमपि जुहुमः, स त्वमस्माकमप्येवं भवेत्येतदाशास्महे॥

"अग्ने वाजस्य गोमत ईशानः सहसो यहो। अस्मे धेहि जातवेदो महि श्रवः॥"—इति (ऋ० सं० १, ५, २०, ४)। उष्णिक्। गोतमस्यार्षम्। आग्नेयी। इष्टकोपधाने अग्नौ विनियोगः। हे भगवन्। 'अग्ने!' 'सहसो यहो' बलस्य पुत्र। 'जातवेदः!' यदेतद् वाजः अन्नम्, गोमत् गोभिः सहत्, त्वं तस्य 'ईशानः' ईश्वरः। अतो ब्रूमः—'अस्मे' अस्मासु 'धेहि' स्थापय। अनयापि कुर्वेतत् 'महिश्रवः' महदेतत् यशो गवादि। इत्येतदाशास्महे॥

"यथो एतत्" यत् पुनरेतदुक्तम्,—"अग्निं द्राविणोदसमाह" इति। नेदमनेनाभिप्रायेण इन्द्रादयं द्रविणोदसो जायते, किन्तर्हि? "ऋत्विजः" "अत्र" एतस्मिन् "द्रविणोदसः" अग्नेः "उच्यन्ते"। ते पुनः कस्मात्? "हविषः दातारः" देवानां हि हविर्द्रविणम्, तदेते ददत इति द्रविणोदस एते। ततः किम्? "ते च एनं जनयन्ति"। "निगमोऽपि" हि "भवति" ऋत्विजामयमग्निः पुत्र इति। तद्यथा—"ऋषीणां पुत्रो अधिराज एषः"—इति। "पुनाशुन्निर्ऋरति मधिष्ठ ऋषीणां पुत्रो अधिराज एषः। तस्मै विधेम हविषा इतेन मा देवानां युयुयाम भागधेयम्॥"—इति (य० वा० सं० ५, ४)। अनेन निर्मथ्योऽग्निरभिधीयते। यः 'एषः' 'अधिराजः'

त्वने:; 'क्रतुना' प्रज्ञया कर्मणा वा 'सजू.' संयुक्तः, 'मन्दसानः' मोदमानः 'सोमं' 'पिब'। इत्येतदाशास्महे। अर्चिषोऽत्र मरुतः, ऋत्विजो वा मरुतः, अन्यथा ह्यनुदाहरणमेवैष मन्त्रोऽग्नेः सोमपाने स्यात्, इतरैर्मरुद्भिः सम्बन्धात् ॥

"अथो एतत्—'द्रविणोदाः पिबतु द्राविणोदसः'—इति, अस्यैव तत् भवति"। यत् पुनरेतदुक्तम्, ऋतुयाजेषु 'द्रविणोदाः पिबतु द्राविणोदसः'—इति, 'अस्य एव' अग्नेः 'तत् भवति' अग्नेरपि सोमभागित्वात् ऋतुयाजेषु। भवति हि तेषु "वनस्पते०—०द्रविणोद पिब ऋतुभिः"—इति (ऋ० सं २, ८, १, ३)। वनस्पतिशब्दस्यामानाधिकरण्यात् सोमपानार्थे सम्बोधने द्रविणोदसो विशेषणविशेष्यभावसामर्थ्यात् नान्यो वनस्पतेर्द्रविणोदाः। वनस्पतिश्च पुनरसंशयमग्निः, "वह देवत्रा दिधिषो हवींषि"—इति हविर्वहनकर्मसंयोगात्, खिष्टकृद्‌विकारस्तुतेश्च वनस्पतिः। तस्मादग्निर्द्रविणोदा नेन्द्रः ॥

यत् पुनरेतदुक्तम्—इन्द्रार्थे सोमः संस्क्रियते, तस्मादिन्द्र एवास्य केवलं पाता, नान्य इति। नैतदेवम्, सोमो ह्यन्यस्यै देवतायै नीयते, अन्यस्यै संस्क्रियते, अन्याभ्यश्च गृह्यते, हूयते च। तद्यथा। "शुभि त्वं देवस्"—इति सावित्रा नीयते, "अंशुरंशुष्टे"—इति इन्द्राय संस्क्रियते, पुनरपि च नीयते "इन्द्रायाभिमातिघ्ने"—इत्येवमादिभिः। नानादेवताभ्यो गृह्यते च मित्रावरुणाद्याभ्यः। तथा च हूयते। तदेवं विधिवशात् विचित्रा सोमतन्त्रगतिः। तत्रैवं सत्यशक्यं वक्तुं यत्र यत्र सोमः, तत्र तत्रेन्द्रः पाता इति। सम्भुक्तो चाग्निरिन्द्रेण सह प्रत्यक्षमैन्द्राग्ने ग्रहे "इन्द्राग्नी आगतम्"—इत्यत्र। भवति चान्यर्थमपि पृथक् ग्रहण यजुषा सोमस्य

"अग्नये त्वा रायस्पोषाय त्वा"—इति। तस्मादग्निरपि सोमस्य पाता स्यात्। ३ (२)।

मेद्यन्तु ते वह्नयो येभिरीयसेऽरिषण्यन्वीलयस्वा वनस्पते। आयूया धृष्णो अभिगूर्या त्वं नेष्ट्रात् सोमं द्रविणोदः पिब ऋतुभिः॥

मेद्यन्तु ते वह्नयो वोढारो यैर्यास्यरिष्यन् दृढीभवायूय धृष्णो अभिगूर्य त्वं नेष्ट्रीयाद्धिष्ण्याद्धिष्ण्यो धिषण्यो धिषणाभवो धिषणा वाग्धिषेर्दधात्यर्थे धीसादिनीति वा धीसानिनीति वा वनस्पत इत्येनमाहैष हि वनानां पाता वा पालयिता वा वनं वनोतेः पिबर्तुभिः कालैः ॥४ (३)॥

नेष्ट्रा वषट्कृतं 'पिब' 'ऋतुभिः' कालैः सहेत्येतद् ब्रूमहे॥

"धिष्ण्यः धिषण्यः" "धिषणा वाक्" तदर्थमसौ साद्यते, तस्य पश्चादुपविष्टो होता शंसति। धिषणा कस्मात्? "धिषे." धातो. "दधात्यर्थे" वर्त्तमानस्य, सा हि वाक्, अर्थं धारयति, शब्दार्थयो सम्बन्धनित्यत्वात्। अथवा "धीसादिनीति वा, धीसानिनीति वा"। धीः प्रज्ञा, कर्म वा। सा एतस्या सीदति, सनोति वा, सम्भजते इयं वा, तयो सीदति सनोति वा, सन्निमित्तत्वात्। एवं धीशब्दात् पूर्वपदम्, सदेः सनोतेर्वा उत्तरपदम्, धिषणाशब्दस्य विकल्पेन॥

"वनस्पते इति एनम् आह" द्रविणोदसम्, तस्मादग्निरित्यभिप्रायः॥

अथ कथमग्निर्वनस्पतिः? "एष हि वनानां पाता वा पालयिता वा"। 'हि'शब्दो हेत्वर्थः। यस्मात् 'एषः' 'वनानां' वृक्षादीनाम् अन्तर्गतोऽपि, समर्थोऽपि दग्धुम्, न तानि दहति, तस्मात् अय तेषां 'पाता' रक्षिता, 'पालयिता' वेति। केवलं वाक्यान्यत्वम्, स एवार्थः॥

अथ "वन" कस्मात्? "वनोतेः" सम्भजनार्थस्य, तद्धि दार्वादिप्रयोजनार्थं सेव्यते। 'पिब ऋतुभिः' "कालैः" सह इति वाक्यशेषः॥

एवमयमग्निर्द्रविणोदाः सूक्तभाग्घविर्भाक् च। निपातमेवैतत्,—मध्यमं ज्योतिः, उत्तमं च ज्योतिः, एतेन नामधेयेन भजेते इति॥

एष देवतापदविचारन्यायः सर्वत्र देवतापदविचारार्थो यथासम्भवमुपादेयः प्रज्ञाविवृद्धये शिष्यस्येति॥ ४ (३)॥

इति ऋज्वर्थायां निरुक्तवृत्तौ त्रयोदशाध्यायस्य

(अष्टमाध्यायस्य) प्रथमः पादः॥ ८, १॥

द्वितीयः पादः॥

अथात आप्रिय आप्रियः कस्मादाप्नोतेः प्रीणातेर्वाप्रीभिराप्रीणातीति च ब्राह्मणं तासा-मिध्मः प्रथमागामी भवतीध्मः समिन्धनात् तस्यैषा भवति॥ १ (४)॥

"अथात आप्रियः"। 'आप्रियः' इत्यादीनि। आप्रीषु निर्वक्तव्यानि तानि पुनरस्मिन् प्रैषिके आप्रीसूक्ते। पाठ-क्रमनियमाद् विवक्षितक्रमाणीति दैवतपदसमाम्नायेऽपि गस्यमाणत्वात् पाठक्रमप्रयोजनस्य विवक्षितक्रमाण्येव तत्रै-तद् भवति। इमान्यग्निजातवेदोवैश्वानरप्रभृतीनि किं विव-क्षितक्रमाणि उत युगपदभिधानासम्भवात् अर्थत एषां क्रमः? इति॥

तत्र विवक्षितक्रमाणीति केचित्। कथम्? इति। इह तावत् स्थानानि भूर्भुवःस्वरिति पाठानुपूर्व्येण नियतानीति तत्स्थानिनामप्यग्न्यादीनां स एव क्रमो गस्यते, स गस्य-मानो न न्याय्य उत्स्रष्टुमिति। अपि च सति क्रमप्रयोजने अग्निः पृथिवीस्थानो यस्मात्, अतस्तं प्रथमं व्याख्यास्याम इति हेतुवचनमुपपद्यते, उत्तरत्र च, "तासाम् इध्म. प्रथमा-गामी भवति"—इति, "तेषामश्व. प्रथमागामी भवति"—इति, "तेषां रथः प्रथमागामी भवति"—इति। तत्र तत्र प्रथमागामी भवतीति वचनं यथाप्रधानमभिधानं पूर्वं समाम्नातमित्यस्य न्यायस्योपप्रदर्शनार्थमिति लक्ष्यते, इत-रथा ह्यविवक्षितक्रमेषु प्रथमागामिवचनमकृत्यैव यत्किञ्चित् पदमुपादद्यात्। तदेवात् पृथिवीस्थाने सर्वत्र क्रमप्रयोजनं;

मुच्यते।—पार्थिवस्य ज्योतिषो यथा 'अग्नि'-शब्देन प्रसिद्ध-तमः सम्बन्धः, न तथा 'जातवेदः'शब्देन, यथा 'जातवेदः'-शब्देन, न तथा 'वैश्वानर'-शब्देन, यथा च 'वैश्वानर'शब्देन, न तथा 'द्रविणोदः'शब्देन। तान्येतानि गुणविप्रकर्षात्, प्रसिद्धिविप्रकर्षाच्च अग्निशब्दात् विप्रकृष्यन्ते, इध्मादीनां तु व्यवधानेनाभ्यभिधानत्वमित्यतितरां विप्रकर्षः, अश्वप्रभृतयस्तु स्थानमात्रसन्निर्भजन्त इति इध्मप्रभृतिभ्योऽपि विप्रकृष्यन्ते। तेषामपि च उदितप्रमाणसूक्तयोऽश्वशकुनिमण्डूका इति प्रथमम्, अनुदितप्रमाणसूक्तयस्तु अक्षादयः ते पश्चादाद्रन्द्वेभ्यः। इत्येवं सर्वत्र क्रमप्रयोजनमुपेक्ष्यम्।

शाकपूणिस्तु पृथिवीनामभ्य एवोपक्रम्य स्वयमेव सर्वत्र क्रमप्रयोजनमाह। तदुक्तं वार्त्तिककारेण—"क्रमप्रयोजनं नाम्ना शाकपूण्युपलक्षितम्। प्रकल्पयेदन्यदपि न प्रज्ञामवसादयेत्।"—इति॥

प्रकृतमिदानीमुपवर्ण्यते।—इध्मादीनां गुणाभिधानसामान्यं किञ्चिदस्ति, यतस्तेनाधिकारवचनम् "अथात आप्रियः"—इति। 'अथ'—इति विशेषाधिकारे। 'अतः'—इत्यानन्तर्य्ये। 'आप्रियः' वक्ष्यन्त इति वाक्यशेषः॥

इह कारणादभिधेये अभिधाननियमो नैरुक्तानाम्; तदर्थमुपोद्घात्य "आप्रियः" कस्मात्? "आप्नोतेः प्रीणातेर्वा", —इति निराह। आप्रिय ऋचः, तत्सम्बन्धात् देवता अपि। तथाहि दर्शयति—"आप्रीभिराप्रीणाति" "इत्येता आप्रीदेवता।"—इति च। ऋचस्तावत् आप्नुवन्ति प्रीणन्ति वा देवता इत्याप्रियः, अथ पुनर्देवता आप्यन्ते आप्रीयन्ते वा इत्याप्रियः॥

"तासाम् इध्मः प्रथमागामी भवति" प्रथममागन्तुमस्य

चाग्नेयिवताश्चदसमाम्नाये मोलमिति प्रथमागामी । कस्मात्? एतास्य वक्तत्वादिच्छाया, अनित्यत्वाच्च तनूनपान्नराशंसयोर-न्तरस्य ॥

"तस्य" इध्मस्य, समिध्दकालस्य, "एषा" प्राधान्यस्तुतिः "भवति"—॥ १ (४) ॥

समिंद्धो अद्य मनुषो दुरोणे देवो देवा-न्यंजसि जातवेदः । आ च वहं मित्रमहश्चि-कित्वान् त्वं दूतः कविरंसि प्रचेताः ॥ समिद्धो अद्य मनुष्यस्य मनुष्यस्य गृहे देवो देवान्यजसि जातवेद आ च वह मित्रमहश्चिकित्वांश्चेतना-वांस्त्वं दूतः कविरसि प्रचेताः प्रवृद्धचेता यज्ञ इध्म इति कात्थक्योऽग्निरिति शाकपूणिस्त-नूनपादाज्यं भवति नपादित्यननन्तरायाः प्रजा-या नामधेयं निर्णततमा भवति गौरत्र तनूरुच्यते तता अस्यां भोगास्तस्याः पयो जायते पयस आज्यं जायते अग्निरिति शाकपूणिरापोऽत्र तन्व उच्यन्ते तता अन्तरिक्षे ताभ्य ओषधि-वनस्पतयो जायन्त ओषधिवनस्पतिभ्य एष जायते तस्यैषा भवति ॥ २ (५) ॥

'मनुषः' "मनुष्यस्य मनुष्यस्य" समानेऽहनि प्रवृत्तयागानां त्रैवर्णिकानाम् 'दुरोणे' यज्ञगृहे 'देवः' दाता हविषां हेतुकर्तृत्वेन, 'देवः' दीप्तो वा, द्योतनो वा, 'देवान्' दानादिगुणयुक्तान् एतान् हेतुकर्तृत्वेन यागेऽङ्गभावमुपगच्छन् 'यजसि' हे 'जातवेदः !' जातवेदस आधार इति तदभिधानेन सम्बोध्यते, दृष्टा हि मन्त्रेषु क्रोशत्, तदभिधान प्राप्तिः, अथवा जातवेदा अपि त्वद्वतेऽगभिव्यक्तस्वशक्तिस्त्वदाधारत्वादशक्त एवाय यष्टुम्, तस्मात् जातवेदास्त्वदाधारो यजति यत्, तत् त्वमेव यजमीत्युच्यते। अस्माकमप्येतस्मिन्नहनि हे 'मित्रमहः', मित्राणां पूजयित.। नित्यमभ्युपेचमाण उपकारवृत्तो यजमानानां 'चिकित्वान्' जानान 'आ च वह' आहूय च, देवान् आहूय चैतान् यज, तथास्मिन् कर्मणि ज्वलनाङ्गभावमुपेहि, यथैतस्मिन् कर्मणि हविः प्रतिजिघृक्षन्तोऽङ्गभावमीयुर्देवा, अपि च नैतदतिचित्रम्, यदेवमस्मास्मिन् कर्मणि वर्त्तथाः। किं कारणम् ? यतो ब्रूमः—"त्वं दूतः कविरसि प्रचेता."। अन्यावेशादग्निर्यदपेक्ष्योचसे,— 'त्वम्' एव 'दूतः' सर्वयजमानानां त्वत्पूर्वकत्वात् देवतायागस्य, 'कवि' क्रान्तदर्शनः—क्रान्तप्रकाशः सर्वत्र, 'प्रचेता' प्रकृष्टप्रज्ञानः। यस्मात् त्वम् ऋत्विग्यजमानानां सायुज्ये वृतु, तस्य तव युक्तमस्माकमाहूय देवान् यष्टुमित्यतो ब्रूमहे— आहूय चास्माक देवान् यज च ॥

"यज्ञेध्म इति कात्यक्य"। कत्यकस्य पुत्र कात्यक्य आचार्य, स मन्यते,—योऽयमिध्म आधीयते प्रतिप्रणव यज्ञे स एवायमिति। मन्वेतस्मिन् मन्त्रे न तस्य लिङ्गमस्ति ? सत्यम्, नास्ति साक्षात्, प्रैषे तु "समिद्भ्यः प्रेष्य"—इति श्रूयते, युक्तं च यदर्थमेव प्रेष्यते स एवेज्यते। तस्मात् समिधा

मिवेध्मभावमुपगतानामग्निना सन्दीप्तानां समुदायापेक्षमिदम्, व्यवहितमभिधानमाप्रीगतं समिद्धो अद्येति समिध एव चेमा इज्यन्त इति स्फुटमैष्टिके होत्रे समिधो यजेति प्रेषितो होता "समिधः समिधो अग्न आज्यस्य व्यन्तु"—इति वषट्करोति। तस्माद् युक्तं यत् कात्थक्यो मन्यते यज्ञेध्म इति।

अथ पुनरन्यः कथं मन्यतेऽत आह,—"अग्निरिति शाकपूणिः"। स पुनः कया उपपत्त्या अग्निं मन्यते? आरादुपकारित्वात्, प्रैषस्य सन्निपत्योपकारित्वाच्च। यजतावाप्रियां यदाप्रीरूपं तद् बलवत्। किञ्च पुनराप्रियो रूपम्? अग्न्यर्थता कथम्? इति शृणु।—"समिद्धो०——०र्देवान् यजसि जातवेदः। आ च वह मित्रमहश्चिकित्वान् त्वं दूतः कविरसि प्रचेताः॥"—इति सर्वाण्येतानि अभिधानानि कर्माणि च अगौणान्यग्निपक्षे, गौणानीध्मपक्षे, "गौणमुख्ययोश्च मुख्ये कार्य्यसम्प्रत्ययः"—इति न्यायः, तस्मादप्रच्युतस्वरूपाया आप्रियो यजतावुपकारबाहुल्यादाग्नेयत्वाच्च प्रयाजानामग्निरेवायमनया आप्रिया इज्यत इति शाकपूणिर्मन्यते॥

यास्कस्यापि चैतदेवाभिमतम्, "आग्नेया इति तु स्थितिः"—इति अधिकारणान्ते हि वक्ष्यति। एवं तर्हि अग्निरित्येतदेव समाम्नातव्यमासीत, न इध्मः? इति। नैवम्। कस्मात्? समिद्धो अद्येत्येतदस्यामाप्रियामन्त्रे लिङ्गमस्ति, न त्वग्निशब्दः, अतोऽस्यासमाम्नानम्, पौनरुक्त्यदोषाच्च। तदिध्मशब्देऽपि समानम्? इति चेत्, तदपि आप्रियां नास्तीति न, प्रैषिके समाम्नानात्, क्रियाविशेषत्वाच्च। आह्वय चाग्नाकं देवान् यज चेति स एषोऽग्निः समित्कलापमिध्मसमाम्नवेनाभिसम्पन्नस्तदाख्यतामुपगतः तेनैवाभिधानेनेज्यत इति

इध्मशब्दः समाम्नातो नाग्निशब्द इति । सर्वत्र शाकपूणिरेव-माग्नीश्वग्न्यर्थान्यभिधानानि ॥

शाकपूणिपक्षे मन्त्रयोजना—हे भगवन् ! अग्ने ! 'समिद्धः' यः त्वं सन्दीप्तः, 'अद्य' अस्मिन्नहनि, 'मनुषः' मनुष्यस्य 'दुरोणे' यज्ञगृहे 'देवः' दाता, दीपनः, द्योतनो वा, 'देवान्' दातॄन्, दीप्तान् वा 'यजसि' 'जातवेदः !' हविषा यजमानानां जात-प्रज्ञान ! स त्वमस्माकमपि हे 'मित्रमहः' मित्राणामुपकार-प्रवृत्त ! 'चिकित्वान्' जानानः स्वमधिकारम्, आह्वय देवान् यज चेति । किम् ? ब्रूमहे—यस्मात् त्वमेव 'दूतः' सर्वयज-मानानां भवसि । 'कविः' क्रान्तदर्शनः, 'प्रचेताः' प्रवृद्ध-प्रज्ञान इति ॥

"तनूनपात्"—इति । निर्वक्तव्यम् । तत्र पुनरेतत् "आज्यम्" इति कात्थक्यः, "अग्निरिति शाकपूणिः" । यथा तावदाज्यं तथा निरुच्यते—"नपात्—इति अननन्तरायाः प्रजाया नामधेयम्" या पितुरनन्तरा, पुत्राख्या सा भवति, अनन-न्तरा, पौत्राख्येत्यर्थः । किं कारणम् ? सा हि "निर्णततमा भवति" कथम् ? पुत्रस्तावत् पितुर्नीचैर्नतो भवति, ततोऽपि नीचैर्नततमः पौत्रः । तत्रैतस्मिन् पक्षे यः 'तनू'शब्दः पूर्वपद तनूनपाच्छब्दस्य, तेन "गौः" "उच्यते" । सा कस्मात् ? "तता अस्यां भोगाः" क्षीरदध्यादयः । ततः किम् ? "तस्याः पयो जायते" तस्याः पुत्रः पयः, "पयस आज्यं जायते" तस्मात् तस्याः पौत्रः । एव गोः तन्वाख्यायाः नपात् आज्यम् । तस्मात् तनूनपात् ॥

अग्निपक्षे "आपः" "अत्र" अस्मिन् पक्षे तनूनपात्त्वेन "तन्व उच्यन्ते" । ताः कस्मात् ? "तता अन्तरिक्षे" । ततः किम् ? "ताभ्य ओषधिवनस्पतयो जायन्ते" "ओषधिवन-

स्तिभ्यः" "एषः" अग्निः "जायते"। तस्मादयमपां पौत्रः॥

"तस्य" तनूनपातः—आज्यस्य अग्नेर्वा प्राधान्यस्तुतिः "एषा" "भवति"—॥ २ (५)॥

तनूनपात् पथ ऋतस्य यानान्मध्वा समञ्जन् स्वदया सुजिह्व। मन्मानि धीभिरुत यज्ञमृन्धन् देवत्रा च कृणुह्यध्वरं नः॥ तनूनपात् पथ ऋतस्य यानान् यज्ञस्य यानान्मधुना समञ्जन् स्वदय कल्याणजिह्व मननानि च नो धीभिर्यज्ञं च समर्द्धय देवान् नो यज्ञं गमय नराशंसो यज्ञ इति कात्थक्यो नरा अस्मिन्नासीनाः शंसन्त्यग्निरिति शाकपूणिर्नरैः प्रशस्यो भवति तस्यैषा भवति॥ ३ (६)॥

"तनूनपात् पथ ऋतस्य"—इति। हे 'तनूनपात्' आज्य! त्वमुच्यसे। एतान् 'पथः' मार्गान् सर्वान् 'ऋतस्य' यज्ञस्य 'यानान्' हवींषि, यज्ञे यान्युत्सर्पन्ति, तानि 'मध्वा' मधुरेण स्वादेन 'समञ्जन्' सम्भक्षयन् 'स्वदय' स्वादुतामापादय। हे सुजिह्व! जिह्वया हि त्वं एतदेवं कुर्वन् 'मन्मानि' "मननानि" यानि च वयं मन्यामहेऽर्थवस्तूनि भुवाण्येतानि नः स्युरिति. तानि स्वाभिः 'धीभिः' स्वैः कर्मभिः, अभिघारणालङ्करणोपस्तरणादिभिः 'ऋन्धन्' ससाधयन् स्वगुणैरुपकुर्वन् 'समर्द्धय' सम्पादय। अपि चैवं कुर्वन्नेतं यज्ञं 'समर्द्धय' सम्पादय। या काचिदापदुत्पद्यते यज्ञस्य त प्रायश्चित्तेनाङ्गभावमुपगच्छन् "गमय"

'देवत्रा' "देवान्" प्रति, स्विष्टमध्वरमस्माकं च कुरुष्वेत्यर्थः।
—एतदाशास्महे त्वत्तः॥

"अग्निरिति शाकपूणिः"। हे भगवन्! 'अग्ने!' 'तनूनपात्' त्वम् एतान् 'पथः' 'ऋतस्य' यज्ञस्य 'यानान्' हवींषि, 'मध्वा' मधुरेण पाककृतेन रसेन 'समञ्जन्' समभिव्यञ्जयन् 'स्वदय' मृष्टीकुरु। हे 'सुजिह्व' सुरुचे। अथवा हे सुवाक्! एतान्येवं कुर्वन्नस्मदभिमतान्यर्थवस्तूनि न. संसाधयन् 'यज्ञम्' 'ऋध्यन्' समर्द्धयन् स्वसामर्थ्याच्च 'देवत्रा' देवप्रविष्टं कुरु।—इत्येतदाशास्महे वयं त्वत्त इति॥

"नराशंस., यज्ञ. इति कात्थक्य"। कस्मात् "नराः अस्मिन् आसीनाः शंसन्ति"। नरशब्दः पूर्वपदम्, आसेर्निष्ठान्तस्य मध्यम्, शंसतेरुत्तरपदम्। अथ कोऽर्थ.? 'नराः' मनुष्याः 'अस्मिन्' 'आसीनाः' उपविष्टाः 'शंसन्ति' इति नराशंस। "अग्निरिति शाकपूणि."। स कस्मात्? "नरैः" "प्रशस्यः" स्तुत्यः "भवति"॥

"तस्य" नराशंसस्य "एषा भवति" प्राधान्यस्तुतिः—॥ २ (६)॥

नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः। ये सुक्रतवः शुचयो धियन्धाः स्वदन्ति देवा उभयानि हव्या॥ नराशंसस्य महिमानमेषामुपस्तुमो यज्ञियस्य यज्ञैर्ये सुकर्माणः शुचयो धियं धारयितारः स्वदयन्तु देवा उभयानि हवींषि सोमं चेतराणि चेति वा

तान्याथि स्वावापिकानि चेति वेल हैट्टः स्तुति-कर्मण इन्धतेर्वा तस्यैषा भवति ॥ ४ (७) ॥

"नराशंसस्य महिमानमेषाम्"—इति (ऋ० सं ५, २, १, २)। वर्त्तमान एव कर्मणि ब्रवीति। योऽयमेषामभिमतफलदाता नराणां नराशंसो यज्ञः, द्रव्यदेवतात्यागात्मकः प्रयोगः, तस्य अधिष्ठाता, तत्राग्नौ देवताविशेषे जगदुत्पत्त्यनुग्रहबीजम्। 'नराशंसस्य' वयम् 'उपस्तोषामः' "उपस्तुमः" उपगम्य चेतसा 'महिमानं' माहात्म्यं विभूतिं 'स्तुमः' अभिकीर्त्तयामः। 'यजतस्य' "यज्ञियस्य" यजनसम्पादयितुः, प्रयोक्तुरभिमतफलसम्पादयितुः 'यज्ञैः' कर्मभिः युक्ताः उपस्तुमः। यदेवमेतस्मिन्नुपस्थितमहिम्नि नराशंसे यज्ञे किमप्यस्तु।—इत्याशास्महे। 'ये' 'सुक्रतवः' "सुकर्माणः" जगदनुग्रहप्रवृत्ताः 'शुचयः' निर्णिक्तपापाः 'धियं धाः' स्वाधिकारयुक्तानां कर्मणाम् अनुविधारयितारः" प्रज्ञानां वा। एवमादिगुणयुक्ताः 'देवा' ते 'स्वदन्ति' "स्वदयन्तु" एतानि 'हव्या' "हवींषि" 'उभयानि'। यदि सौमिकः पशुः, ततः "सोमं च" "इतराणि" पशुपुरोडाशधानाप्रभृतीनि, अथ पृथक् सोमात्, ततः "तान्याणि" प्रयाजाज्यभागस्विष्टकृत्प्रभृतीनि, "आवापिकानि च" प्रधानहवींषि।—इत्येतदाशास्महे॥

"अग्निरिति शाकपूणिः"। योऽयमेषामभिमतोपकारकारी, नराणां प्रशस्यः, नराशंसोऽग्निः, तस्य वयम् 'उपस्तोषामः' "उपस्तुमः" 'महिमानं' 'यजतस्य' यज्ञसम्पादयितुः 'यज्ञैः' कर्मभिः दानैर्वा संयुक्ताः, तस्मिन्नुपस्तुतमहिम्नि नराशंसेऽग्नौ इतानि 'ये' 'सुक्रतवः', देवाः, शुचयः, धियं धाः'

ते एतानि 'उभयानि' हवींषि आस्वादयन्तु ।—इत्येतदाशास्महे ॥

"ईल" अग्नि । स पुनरयम् "ईट्टे: स्तुतिकर्मण" स्तूयते ह्यसौ। "इन्धतेर्वा" दीपनार्थस्य, तत्क्रियायुक्तो ह्यसौ। "तस्य" "एषा" प्राधान्यस्तुति "भवति"—॥ ४ (७) ॥

आजुह्वा॑न ई॒ड्यो॒ वन्द्य॒श्चा या॑ह्यग्ने॒ वसु॑भिः स॒जोषा॑: । त्वं दे॒वाना॑मसि यह्व होता॒ स ए॑नान्यक्षीषि॒तो यजी॑यान् ॥ आह्वयमान ईलितव्यो वन्दितव्यश्चायाह्यग्ने वसुभिः सहजोषणस्त्वं देवानामसि यह्व होता यह्व इति महतो नामधेयं यातश्च हूतश्च भवति । स एनान् यक्षीषितो यजीयान् । इषितः प्रेषित इति वाधीष्ट इति वा यजीयान्यष्टृतरो बर्हिः परिवहणात् तस्यैषा भवति ॥ ५ (८) ॥

"आजुह्वान ईड्यो वन्द्यश्च"—इति (ऋ० सं० ८, ६, ८, ३)। हे भगवन् । य त्वम् 'ईड्य' 'वन्द्य च' सर्वलोकस्य। 'ईड्य' दीपनार्हं हविर्भिराज्यादिभिः। 'वन्द्य' स्तुत्य। स त्वम् 'आजुह्वान' "आह्वयमान" एतस्मिन् कर्मणि अस्माभि:, 'वसुभि' 'सजोषा' "सहजोषण." समान प्रीतिर्भूत्वा 'आयाहि'। कस्मात् पुनरेव ब्रूमहे ? इत,- यस्मात् हे 'यह्व' "महत् !" 'त्वम्' "असि" 'होता' "देवानाम्" आह्वाता। "स" त्वमस्माभि 'इषित' "प्रेषित" "अधीष्टो वा" अध्येषितो होतृत्वे स्थित्वा अस्माकम्, "एनान्"

देवान् 'यचि' यज इत्येवं ब्रूमहे। किमित्येव ब्रूमहे? यस्मात् 'यजीयान्' असि "यष्टतर." मनुष्यहोतुरिति॥

इह 'ईड्य'—इति एकवचनमग्नेरव्यवधानेन तथैतस्मिन् मन्त्रे एकस्य श्रुतत्वात्, ऐष्टिके पुनर्होत्रे 'इलो अग्न आज्यस्य व्यन्तु'—इति बहुवचनयुक्तादाख्यातादव्यक्तित्वे तस्मात् 'इल.' —इत्येतस्यापि बहुवचनत्वमेव 'ईडो व्यन्तु'—इति। तच्च पुनरत्राभिधानम्, अत्र च पुनरोषधय एव, ताश्च पृथिवी-स्थाना: इत्यग्नि भजन्ते, तदात्मनायमग्निरिष्यत इति। तत्र बहुवचनं प्रतिसमाधानमोषध्यात्मनाग्नेर्व्यवधारणात्। उक्तञ्च—"योऽयमस्तोये पृथिव्यामग्निरन्तरौषधिवनस्पतिष्वप्सु तसुविन्यथु. सवगण सर्वनामानम्"—इति। तस्मादुपपद्यत इति॥

"बर्हिः"—इति निर्वक्तव्यम्। तत् पुनरेतत् प्रसिद्धमेव कुशमय यज्ञाङ्गम्। तत् कस्मात् बर्हिः? इति। उच्यते,— "परिबर्हणात्" परिच्छेदनात्, लून हि तद् भवति, परिहृत वा। "यस्य एषा" बर्हिषः प्राधान्यस्तुति: "भवति"—।५।(८)॥

प्राचीनं॑ बर्हिः प्रदिशा॑ पृथिव्या वस्तो॑-रुस्या वृज्यते॒ अग्रे॒ अह्नाम्। व्यु॑प्रथते वितरं॑ वरी॑यो देवेभ्यो॒ अदि॑तये स्योनम्॥ प्राचीनं बर्हिः प्रदिशा पृथिव्या वसनायास्या: प्रवृज्यते अग्रे अह्नां बर्हिः पूर्वाह्णे तद्विप्रथते वितरं विकीर्णतरमिति वा विस्तीर्णतरमिति वा वरीयो वरतरमुरुतरं वा देवेभ्यश्चादितये च स्योनं

स्योनमिति सुखनाम स्यतेरवस्यन्त्येतत् सेवितव्यं भवतीति वा द्वारो जवतेर्वा द्रवतेर्वा वारयतेर्वा तासामेषा भवति ॥ ६ (६) ॥

"प्राचीनं बर्हि"—इति (ऋ० स० ८, ६, ४)। प्राच्या दिशि यदवस्थित गत जात प्रागग्र वा यत् स्तीर्य्यते, तद भवति 'प्राचीनम्'। किम्पुनस्तत् ? 'बर्हि' "प्रवृज्यते" प्रच्छिद्यते लूयते, अथवा "प्रवृज्यते" प्रस्तीर्यते। किं पुनरेवमेव स्वमनीषिकया ? नेत्युच्यते,—"प्रदिशा" विधिवाक्येन प्रागग्रत्वा बर्हिश्छिनत्तीति सामर्थ्यात्, अथवा "प्रदिशा" स्तरणमन्त्रेण "देवस्य त्वा"—इत्यनेन। स्तरणपक्षेऽपि प्राचीनं बर्हि स्तृणाति"—इति विधिवाक्यम्, "ऊर्णम्रदा पिप्रथस्व"—इति मन्त्र.। (ऋ० स० ३, ८, २१,)। किमर्थ पुनस्तत् प्रवृज्यते ? 'पृथिव्या वस्तो. अस्या.'। पृथिवी वेदी, तस्या 'वस्तो:' "वसनाय" आच्छादनाय। कदा च पुनस्तत् प्रवृज्यते ? 'अग्रे अह्नाम्' "पूर्वाह्णे" तदा हि प्रवृज्यते दर्भस्तरण लवन वा। तत्प्रवृत्त वा यथाकाल विविध प्रथते'। विस्तीर्य्यते वेद्या छाद्यमानायाम्। प्रवृज्यमाणं वा स्तीर्य्यमाण वा विप्रथते। 'वितरम्' विस्तीर्णादपि "विस्तीर्णतरम्" 'वरीय.' "वरतरम्" अन्येभ्यो यज्ञाङ्गेभ्य: श्रेष्ठतरम्, हविराधारत्वाद्धविषाम्, "उरुतर वा" बहुतरं वा। किमर्थ पुनस्तत् प्रवृज्यते, विप्रथते वा ? 'देवेभ्य ' "च" 'अदितये' "च" कथम 'स्योन' "सुख" स्यादिति, बर्हिषा हि सगुणीकृतकर्मणो देवाना हविर्दातृणा यजमानानाम् अभीप्सितेन फलेन योगो भवति, तत् सुखम्। 'अदितये' पृथिव्यै, बर्हिषा हि सगुणी-

कृतात् कर्मणयाहुतिद्वारेण वृष्टिर्भवति, तत ओषधिप्ररोहः। तत् सुखम्॥

नात्र ब्रवीत्यग्निरिति। तेन यज्ञाङ्गमेवाभिमतमेतदिदमध्यक्षाचार्यस्य च तद्द्वारेणैव व्यवधानेनाग्नि स्तूयते, पृथिव्यायतनत्वात् तस्य। अपरे पुनरग्निवदपि योजयन्ति मन्त्रार्थदृशः। तत्पक्षे बर्हिरित्यग्न्यभिधानम्। प्रागुच्यते प्रणीयत इति 'प्राचीन वर्हिः' प्रकृष्टमाहवनीयाख्यं ज्योति.। "प्रवृज्यते" प्रणीयते तत् पुन: 'प्रदिशा' वचनेन प्राक्सुदरन्तीति। 'पृथिव्याः' 'वस्तो.' "वसनाय" अग्निनैव हि वेदिरनग्निका भवति। 'अग्रे अह्नाम्' "पूर्वाह्ने" तत् विविधं 'प्रथते' सामिधेनीप्रक्षेपात्। आज्यभागाघारादिषु च विस्तीर्णतर विक्षिप्ततर प्रथते। 'वरीय.' "वरतरम्" अन्येभ्यो ज्योतिर्भ्यः, "उत्तर" महत्तरं "वा" 'देवेभ्य.' यजमानेभ्यः इतरेभ्यो वा, 'अदितये' "च" पृथिव्यै कथं नाम 'स्योन' स्यादिति॥

"स्योनम्—इति सुखनाम"। "स्यतेः" धातोः अवपूर्वात्, तदेव हि "अवस्यन्ति" व्यवस्यन्ति, निषसन्ति प्राणिनः। "सेवितव्यं भवतीति या" तद्धि सर्वस्य सेवनार्हं भवति॥

"द्वार."—इति। निर्वक्तव्यम्। "यज्ञे गृहद्वार इति कात्यक्य."। ता: पुनरेता: "जवतेर्वा" जवन्ति हि ताभि। "द्रवतेर्वा"। धात्वन्यत्वमर्थैकत्वम्। "वारयतेर्वा" वारणीया हि द्वारादेव निवार्यन्ते। "तासाम्" "एषा" प्राधान्यस्तुतिः "भवति"—॥ ६ (८)॥

व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः। देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः॥ व्यञ्चनवत्य

उरुत्वेन विश्रयन्तां पतिभ्य इव जाया ऊरू मैथुने धर्मे शुशोभिषमाणाः वरतममङ्गमूरू देव्यो द्वारो बृहत्यो महत्यो विश्वमिन्वा विश्वमाभिरेति यज्ञे गृहद्वार इति कात्थक्योऽग्निरिति शाकपूणिरथासानक्तोषासा नक्ता चोषा व्याख्याता नक्तेति रात्रिनामानक्ति भूतान्यवश्याथेनापि वा नक्ताव्यक्तवर्णा तयोरेषा भवति ॥ ७ (१०) ॥

"व्यचस्वतीः"—इति (ऋ० सं० ८, ६, ८, ५)। 'याः' एता विविधेनाञ्चनेन गमनेन युज्यन्ते 'व्यचस्वती' ताः। किं कुर्वन्तु? 'उर्विया' उरुत्वेन महत्त्वेन 'विश्रयन्ताम्' विश्रियन्ताम्। कथम्? 'पतिभ्यः न जनयः' "पतिभ्य इव जायाः" यथा पतिभ्यो जाया "ऊरू मैथुने धर्मे" विश्लथन्ति "शुशोभिषमाणा" शोभयितुमिच्छमानाः प्रहर्षात्, एवं विश्रयन्ताम्। इदानीमुत्तरोऽर्द्धर्चं प्रत्यक्षकृतः।—याः यूयं व्यञ्चनवत्यः एवं विश्रयध्वे, ताः ब्रवीति,—हे "देव्य" दानक्रियाहेतुभूताः। 'द्वारः' "बृहत्यः" "महत्यः" 'विश्वम् इन्वाः' "विश्वम्" सर्वम् "आभिः" "एति" यज्ञोपकरणमिति विश्वमिन्वाः, यूयमुच्यध्वे। 'देवेभ्यः' एतेभ्यो हविर्दातृभ्यः ऋत्विग्भ्यः यजमानेभ्य इतरेभ्यो वा। 'सुप्रायणाः' सुप्रगमनाः 'भवत'।—इत्येतदाशास्महे ॥

"अग्निः इति शाकपूणि"। तत्पक्षे योजना।—यस्त्वर्चिषो द्वारं। जवनात् द्रवणाद्वा। हविर्वा, ताभिर्जवति द्रवति वा,

धारयति वा रसःप्रभृतीनीति द्वारः । 'व्यचस्वतीः' याः एताः विविधेनाञ्चनेन तद्वत्यः, अन्वर्चिषः । ताः उरुत्वेन 'विश्रयन्ताम्' । कथम् ? "पतिभ्य इव जायाः" ऊरू मैथुने धर्मे शोभयितुमिच्छमानाः । या यूयं विविधेनाञ्चनेन तद्वत्यः, याथैवं विश्रयध्वे, ततो ब्रवीमि । हे "देव्यः" "बृहत्यः" 'विश्वमिन्वाः' सर्वं हविर्याभिर्जवति, ता यूयमस्य हविषः 'सुप्रायणाः' सुगमनाः 'भवत' इति ॥

"उषासानक्ता"—इति एकपदम् । अस्य विग्रहः—"उषाश्च नक्ता च" । अत्र "उषा व्याख्याता"—"उच्छतीति सत्या" इति । "नक्तेति रात्रिनाम" । तत् कस्मात् ? "अनक्ति" क्लेदयति "भूतानि" "अवश्यायेन"—इति । अवश्यमेतदायन्तीत्यवश्यायः पृष्वा । अनक्तेरकारलोपे नक्ता । "अपि वा नक्ता अव्यक्तवर्णा" । नकारः प्रतिषेधे, न अक्ता, न व्यक्ता, इन नक्ता । यथा अह्नः सर्वमभिव्यक्तरूपं भवति, न तथा रात्रिः । "तयोः" "एषा" प्राधान्यस्तुतिः "भवति"—१७ (१०) ॥

आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ । दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशन्दधाने ॥ सेष्वीयमाणे इति वा सुष्वापयन्त्याविति वा सीदतामिति वा न्यासीदतामिति वा यज्ञिये उपक्रान्ते दिव्ये योषणे बृहत्यौ महत्यौ सुरुक्मे सुरोचने अधिदधाने शुक्रपेशसं श्रियं शुक्रं शोचतेर्ज्वलतिकर्मणः पेश इति रूपनाम पिंश-

तेर्विपिशितं भवति। दैव्या होतारा दैव्यौ होतारावयं चाग्निरसौ च मध्यमस्तयोरेषा भवति ॥ ८ (११) ॥

"आसुष्वयन्ती"—इति (ऋ० स० ८, ६, ८, ६)। 'आसुष्वयन्ती' "सेषीयमाणे" परस्परं स्मयमाने, अथवा "सुष्वापयन्त्यौ" सुष्ठु जनान् स्वापयन्त्यौ। 'यजते' हेतुकर्तृत्वेन यजते "यज्ञिये" यज्ञसम्पादयित्र्यौ। 'उपाके' "उपक्रान्ते" उपगम्य इतरेतर क्रान्ते। 'दिव्ये' दिविजे द्योतने। 'योषणे' सम्मिश्रे परस्परतः। 'बृहती' "बृहत्यौ, महत्यौ"। 'सुरुक्मे' "सुरोचने" सुदीप्ते। ये एते एवमादिगुणयुक्ते उपासानक्ते 'अधिश्रियम्' श्रियम् "अधिदधाने" उपरि स्थापयन्त्यौ, 'शुक्रपिशम्' "शुक्रपेशसम्" शुक्ररूपां श्रियम्, 'आसदताम्' "आसीदताम्" एतस्मिन् स्वे "योनौ"। आकार उत्कृष्यते उपसर्गस्य हि क्रियापदेन सामर्थ्यम्,—"न्यासीदताम् इति" नियमेनासीदतामिति, निरुत्तरपदस्योऽप्यपक्षय तेनैव क्रियापदेन। निशब्दयोत्तरपदो वा पादपूरणः॥

न ब्रवीत्यग्निरिति, येन हित्वानुपपत्तिरिति केचित्। अपरे पुनर्वर्णयन्ति—उषा अग्नेर्दीप्तिः, नक्ता आहुतिदीप्तिः, विवासयति तमः, आहुतिरनक्त्याञ्जेन। ते एते दीप्त्याहुतौ सुष्ठु स्मयमाने इव 'यजते'। 'यज्ञिये' यज्ञसम्पादयित्र्यौ। 'उपाके' "उपक्रान्ते" परस्परतः। 'दिव्ये' द्योतने परम्परायणात्। 'योषणे' मिश्रीभूते। 'बृहती' "बृहत्यौ, महत्यौ"। 'सुरुक्मे' "सुरोचने"। 'अधिदधाने' 'शुक्रपिशम्' "शुक्रपेशसम्"। एतस्मिन् यजमाने 'श्रियम्' 'आसदताम्'

"आसीदताम्"। एतस्मिन्नग्नौ "न्यसीदताम्" नियमेनाधिकं वा।—इत्येतदाशास्महे॥

"पेश इति रूपनाम" "पिंशतेः" धातोः, तद्धि "विपिंशितं भवति" विकसितं भवति, यावद्‌द्रव्यभावित्वात्। विनिश्चितमिति केचिदन्याश्रितत्वात्॥

"दैव्या होतारा"—इति वक्तव्यम्। "दैव्यौ होतारौ"—इति शब्दसमाधिः। "अयञ्चाग्निरसौ च मध्यमः"—इत्यभिधेयवचनम्। "तयोः" "एषा" प्राधान्यस्तुतिः "भवति"—॥ ८ (११)॥

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै। प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता॥ दैव्यौ होतारौ प्रथमौ सुवाचौ निर्मिमानौ यज्ञं मनुष्यस्य मनुष्यस्य यजनाय प्रचोदयमानौ यज्ञेषु कर्त्तारौ पूर्वस्मान्दिशि यष्टव्यमिति प्रदिशन्तौ तिस्रो देवीस्तिस्रो देव्यस्तासामेषा भवति॥ ९ (१२)॥

"दैव्या होतारा"—इति (ऋ० सं० ८,६, ८, १)। याविमौ "दैव्यौ होतारौ"। देवेषु भवौ दैव्यौ, देवावेव वा दैव्यौ, स्वार्थे एव तद्धितः। मनुष्यहोतारौ होतृमैत्रावरुणौ अपेक्ष्य। दैव्यौ होतारौ इति विशेषणम्। कौ पुनस्तौ? 'होतारा' "होतारौ" आह्वातारौ देवानाम्, वाय्वग्निकलक्षणौ। 'प्रथमा' "प्रथमौ" मुख्यौ, मनुष्यहोतारावपेक्ष्य। 'सुवाचा' "सुवाचौ"

प्रशस्तवाचो, सुस्तुतौ। 'मिमाना यज्ञम्' यज्ञनिर्मातारौ, नित्यं 'मनुषः' "मनुष्यस्य" 'यजध्यै' "यजनाय"। "प्रचोदयन्ता' प्रचोदयमानौ 'विदथेषु' "यज्ञेषु" 'कारू' "कर्त्तारौ" ऋत्विजौ, नानग्निको यज्ञोऽस्तीत्यग्निर्निर्मिमीते, न चासावनुपध्मातो वायुना ज्वलतीति वायुर्निर्मिमीते। विज्ञायते हि— "तस्मादेष नानुपध्मातो ज्वलति"—इति। स एष मैत्रावरुणौ वायुरग्नेर्होतृवदधियज्ञे वर्त्तमानस्य नित्यं चोदयिता, तन्मूलत्वाच्च यज्ञकर्मणः। तावेव देवानामाह्वातारौ उच्येते। यावेताविव 'प्रचोदयन्तौ' 'विदथेषु' यज्ञेषु, 'कारू' कर्त्तारौ मनुष्यहोतुः अनुग्रहस्य, नित्यं स्वाधिकारकर्मानुग्रहसन्निधानात्। यदेतत् 'प्राचीनं' प्राच्यां दिशि 'ज्योतिः' आहवनीयाख्यं प्रणीयते। प्रदिशा मन्त्रेण प्राचीमनु प्रदिशं प्रेहीति अनेन विधिवाक्यप्रदेशेन, अनेन वा "प्राञ्चमुद्धरन्ति"—इति। एतत् प्रणीय नित्यं यष्टव्यमित्येवमर्थं 'प्रदिशन्तौ' आज्ञापयन्ताविव यौ नित्यमवियोगेन स्वभावतो यज्ञोपकारे वर्त्तमानौ समाप्त्येव वर्त्तातामिति। एवमाख्यातमध्याहृत्य समाप्यते, निराख्यातत्वान्मन्त्रस्य॥

"तिस्रो देवी:"—इति पदम्। ता पुनरेता "तिस्रो देव्य" प्रथमया ता निराह, तिस्र इति देवीशब्दस्य विशेषणम्। "तासाम् एषा भवति" प्राधान्यस्तुति —॥ ८ (१२)॥

आ नो॑ य॒ज्ञं भार॑ती॒ तूय॑मे॒त्विळा॑ मनु॒ष्वदि॒ह चे॒तय॑न्ती। ति॒स्रो दे॒वीर्ब॒र्हिरे॒दं स्यो॒नं सर॑स्वती॒ स्वप॑सः सदन्तु॥ ऐतु नो यज्ञं भारती क्षिप्रं भरत आदित्यस्तस्य भा

इला च मनुष्यवदिह चेतयमाना। तिस्रो देव्यो बर्हिरिदं सुखं सरस्वती च सुकर्माण आसी-दन्तु त्वष्टा तूर्णमश्नुत इति नैरुक्तास्त्विषेर्वा स्याद्दीप्तिकर्मणस्त्वक्षतेर्वा स्यात् करोतिकर्मण-स्तस्यैषा भवति ॥ १० (१३) ॥

"आ नो यज्ञं भारती"—इति (ऋ० सं० ८, ६, ८, २)। आभिमुख्येन अस्माकं यज्ञमागच्छतु। का पुनरसौ? इति। 'भारती' "भरत आदित्यः" सर्वभूतान्युदकेन बिभर्त्ति, "तस्य" स्वभूता "भाः" दीप्तिः। कथमेतु? 'तूयम्' "क्षिप्रम्"। 'इला "च" पृथिवीस्थाना। "इहेवेलया वसुमत्या"—इत्यनुयाजेषु दृष्टीतसामर्थ्यात् पार्थिवत्वात्। 'मनुष्वत्' "मनुष्यवत्" 'इह' कर्मणि 'चेतयन्ती' "चेतयमाना" यथा मनुष्येण मनुष्य आहूतो भोक्तुमविलम्बमान आगच्छेत्, क्षिप्रमेवमागच्छतु, मा ममेह कर्मणि हविर्भक्तिव्यमित्येवमर्थं जानाना। 'सरस्वती' "च" मध्यस्थानैवमेव 'चेतयन्ती' आगच्छतु। ता एताः 'तिस्रः' अपि "देव्यः" 'स्वपस' "सुकर्माणः" अस्मिन् कर्मणि 'इदं बर्हिः' 'स्योनं' "सुखं" प्राप्य एतस्मिन् 'आसदन्तु' "आसीदन्तु"।—इत्येतदाशास्महे॥

"त्वष्टा"—इति वक्तव्यम्। अत्र तूर्णशब्दात् क्षिप्रवाचिनः पूर्वपदम्, अश्नोतेरुत्तरपदम्। क्षिप्रं व्याप्नोति, यदनेन व्याप्तव्यं भवति। "त्विषेर्वा" धातोः दृद्दार्थस्य, दृद्द एव नित्यमसौ देवतात्वात्। "त्वक्षतेर्वा स्यात्" क्रियासामान्यमात्रवाचिनः, एतदृष्टतनूकरणस्यार्थस्य। "तस्य" "एषा" प्राधान्यस्तुतिः "भवति'—॥ १० (१३) ॥

य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा । तमद्य होतरिषितो यजीयान् देवं त्वष्टारमिह यक्षि विद्वान् ॥ य इमे द्यावापृथिव्यौ जनयित्र्यौ रूपैरकरोद्भूतानि च सर्वाणि तमद्य होतरिषितो यजीयान् देवन्त्वष्टारमिह यज विद्वान् माध्यमिकस्त्वष्टेत्याहुर्मध्यमे च स्थाने समाम्नातोऽग्निरिति शाकपूणिस्तस्यैषापरा भवति ॥ ११ (१४) ॥

"य इमे द्यावापृथिवी"—इति (ऋ० सं० ८, ६, ८, ३)। 'यः' "त्वष्टा" 'इमे' "द्यावापृथिव्यौ" सर्वेषां भूतानां "जनयित्र्यौ" 'रूपैः' नानाविधैः अनेकप्रकारैः "अकरोत्" "भूतानि च सर्वाणि"। अथवा रूपैरिति कर्त्तृवानया तृतीयया लक्ष्यते,—तत्तद्रूपमास्थाय 'यः' त्वष्टा द्यावापृथिव्यावकरोत् भूतानि च सर्वाणि। किं तस्य त्वष्टुः ? तं देवम् 'त्वष्टारम्' 'इह' अद्यैतस्मिन्नहनि कर्मणि वा हे होतः ! 'यक्षि' यज 'विद्वान्' जानानः ममेदमवश्य' कर्त्तव्यमिति ॥

माध्यमिकस्त्वष्टेति विचारः। तत्र तावत् "माध्यमिकः त्वष्टा—इति" "आहुः" आचार्याः, केचिन्नैरुक्ता एवं मन्यन्ते। 'माध्यमिकः'—इति सञ्ज्ञाप्रसिद्धिः। को हेतुः ? "मध्यमे च स्थाने समाम्नातः"—इति। किञ्च एतस्मिन्नेव मन्त्रे व्यपदेशात्। कथम् ? य इमे द्यावापृथिव्यौ भूतानि च सर्वाण्यकरोत् तं देवं त्वष्टारं यजेति। त्वष्टुरन्यो यष्टा। स एव पुनः सम्बोध्यते हे होतरिति मनुष्यहोता, न चान्यः पार्थिवादग्ने-

र्वोतास्मि, तस्माद् यो यष्टा स पार्थिव, य इज्यते स मध्यमस्त्वष्टेति। सर्वशिल्पिमतामाचार्यो देववर्द्धकिर्दाक्षायणीपुत्रो द्वादशानामादित्यानामन्यतम इत्यैतिहासिकाः। कोऽत्र निश्चयः? अयमेव "अग्निरिति याकपूणिः"॥

कथं यत्तावन्मध्यमे च स्थाने समाम्नात इति? अकारणमेतत्—अयमप्यग्निर्मध्यमे स्थाने समाम्नात इति। यत् पुनरेतद् व्यपदेशात् इति? तदपि समानमिन्द्रेणापि त्वष्टृव्यपदेश इति—त्वष्टा दधदिन्द्राय शुष्ममिति, अपि च व्यपदेशादन्यत्वमित्ययुक्तमध्यवसातुम्, अनन्यत्वेऽपि हि व्यपदेशो भवति। तद्यथा—"अग्निमग्न आवह"—इति। हे अग्ने! भगवन्! अग्निम् आवह इति व्यपदेशे सत्यनन्यत्वम्, न हि पार्थिवादन्यः सूक्ष्मभाग् हविर्भाग् वा अग्निरस्ति, योऽनेन प्रसिद्धहोतृत्वाभिधानेनाहूयेत, इज्येत च—"स्व महिमानमावह"—इति। श्लिष्टकृति विशेषलिङ्गात् स्वयमेवात्मनात्मान विधिवशात् आह्वानेन सङ्कल्प्य द्वैध त्रैधमनेकधा वा यजति, अन्यद्वाभिनिवर्त्तयति। तद्वदिहापि कर्मात्मन-परो योऽस्य तच्चक्रियालक्षणगुणम्, योऽग्न्यात्मा यदधिष्ठितः, कर्मात्मा सर्वरूपाणि पाकेन विकरोति। केन विकरोति? तमधिकृत्योच्यते—"त्वष्टा रूपाणि विकरोति" इति। तदत्र मुच्यते—मनुष्यहोत्रा यज त्वमिति। एव तावद् व्यपदेश शक्यप्रतिसमाधानः। यत् पुनरुक्तं देवशिल्पीति? तत्तद्गुणसामान्यादेवासावपि कौशलातिशयमपेक्ष्योच्यत इत्यदोषः॥

यथा चाग्निरेव नान्यः, तथा विशिष्टतरलिङ्गा "अपरा" ऋक् "भवति"—॥ ११ (१४)॥

आविष्ट्यो वर्धते चारुरासु जिह्मानां-

मूर्द्धः स्वयशा उपस्थे। उभे त्वष्टुर्बिभ्यतुर्जायमानात् प्रतीची सिंहं प्रति जोषयेते॥ आविरावेदनात्तस्यो वर्द्धते चारुरासु चारु चरतेर्जिह्मं जिह्मीतेरूर्द्ध्व उच्छ्रितो भवति स्वयशा आत्मयशा उपस्थ उपस्थाने। उभे त्वष्टुर्बिभ्यतुर्जायमानात् प्रतीची सिंहं प्रति जोषयेते। द्यावापृथिव्याविति वाहोरात्रे इति वारणी इति वा प्रत्यक्ते सिंहं सहनं प्रत्यासेवेते॥ १२ (१५)॥

इति अष्टमाध्यायस्य द्वितीयः पादः॥ ८, २॥

"आविष्ट्यो वर्द्धते"—इति (ऋ० सं० १, ७, १, ५)। 'आवि' प्रकाशः। स कस्मात्? "आवेदनात्" सर्वस्य प्रकाशनात्। तस्मात् "तस्य." तस्य तनिता 'आविष्ट्य.'। किंलक्षणः? 'चारु.' चरणशील', अनवस्थितः। किं करोति? 'वर्द्धते'। क? 'आसु' क्रियासु, प्रजासु वा प्रसवाय। कस्य? 'जिह्मानाम्' कुटिलचेतसामपि मनुष्याणाम् धवैपम्येण ऊर्द्ध्वमेव ज्वलति, कुटिलानामपीन्धनानामकुटिल ऊर्द्ध्वमेवेति केचित्। एवमेव 'वर्द्धते'। 'स्वयशा.' "आत्मयशा." परमनाश्रित्य यशस्वी। 'उपस्थे' "उपस्थाने" यत्रासावुपनतस्तिष्ठति 'आविष्ट्य'। योऽयमेवमादिगुणयुक्त. त्वष्टा, तस्य 'त्वष्टु' अग्नेः 'जायमानात्' एव 'उभे' द्वे अपि 'बिभ्यतुः'। के पुनस्ते? "द्यावापृथिव्यौ इति"। यथायमतिमहान् वर्द्धते, अयमस्मय-

नावं धक्ष्यतीति। "अहोरात्रे इति वा"। सकृदुपन्यस्तमिति महत्यन्नावनुपधास्यति। अहोरात्रयोरर्थस्याभावः। तस्मात् ते अपि बिभृतः। अपि नामायमेश्मतिप्रवृद्धः आवामन्यतर-मनुच्छिद्यादिति। "अरणी इति वा"। अवश्यमयमावां ख्यातो यतो यदा तदा धक्ष्यतीति अतः अरणी अपि बिभृतः। एवं बिभ्रतौ किं कुरुतः? नान्या गतिरस्तीति 'प्रतीचो' नाम ते प्रत्यञ्चिते अभिमुखे 'सिंहं' "मन्दनम्" अभिभवनम् 'प्रतिजोपयेते' "प्रत्यासेवेते" उपकारकत्वेन, कथं नाम यमावां न भस्मसात् कुर्यादिति ॥

एवमयमेवाग्निरिह त्वष्टेति ॥ १२ (१५) ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ त्रयोदशस्य (षष्ठस्य) अध्यायस्य
द्वितीयः पादः ॥ ८, २ ॥

तृतीयः पादः ॥

वनस्पतिर्व्याख्यातस्तस्यैषा भवति ॥ १(१६) ॥

"वनस्पतिः" व्याख्यातः। स पुनरयमभिधेयतोऽभि-धानतश्च "व्याख्यातः" "एष हि वनानां पाता वा पालयिता वा"—इति। "तस्य" "एषा" प्राधान्यस्तुतिः "भवति"— ॥ १ (१६) ॥

उपावसृज त्मन्या समञ्जन् देवानां पाथ ऋतुथा हवींषि। वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन ॥ उपाव-सृजात्मनात्मानं समञ्जन् देवानामन्नमृतावृतौ

हवींषि काले काले वनस्पतिः शमिता देवो 'अग्निरित्येते त्रयः स्वदयन्तु हव्यं मधुना च घृतेन च तत् को वनस्पतिर्यूप इति कात्थक्यो-ऽग्निरिति शाकपूणिस्तस्यै षापरा भवति ॥ (१७) ॥



"उ पावस्रज"—इति (ऋ० स० ८, ६, ८, 'उप' आश्रित्य 'अवस्रज' एतत् पदद्वयं 'पाथ.'। अना-ख्यितविशेष.,—किमयमग्निर्वा, यूपो वा इत्युच्यते ? उत वा अन्य एव कश्चित् ? इति। उत्तरोद्देशे वनस्पतिशब्द प्रथमा-सम्बन्धात् परोक्षः, इह पुनरुपावस्रजेति मध्यमपुरुषयोगात् प्रत्यक्षः कोऽप्यभिधीयत इति सुतरामनाख्यितविशेष. इति विचारास्पदमिति। अत' पर विचारयिष्यति—"तत् को वनस्पतिः ?" इति। 'त्मन्या समञ्जन्' "आत्मना आत्मानम्" अस्य पर्यो 'समञ्जन्' समभिव्यञ्जयन् विशिष्टेन संस्कारेण स्वाधिकारसम्बन्धिना। 'देवानाम्' एतत् 'पाथ.' "अन्नम्" एतदनुनैव प्रकारेण 'ऋतुथा' च "ऋताहृतौ" "काले काले" पक्षमासादौ 'हवींषि' चैतान्यन्यान्यपि आज्यप्रभृतीनि 'उपा-वस्रज' देवेभ्यो देहीति। किञ्च, 'वनस्पति.' 'शमिता देव.' 'अग्निः'—"इत्येते त्रय"। त्रिग्रहणात् देवशब्दोऽग्निविशे-षणमिति दर्शयति। वनस्पतिश शमिता चाप्रत्यक्षदैवते एव, असन्दिग्धश्च देवोऽग्निरित्येते त्रय' 'स्वदन्तु' "स्वदयन्तु" स्वादुतामापादयन्तु। 'मधुना' चोदकेन प्रोक्षणाद्यभिप्रायं 'घृतेन' चैतदस्माभि. संस्कृत पाथः।—इत्येतदाशास्महे॥

"तत् को वनस्पति ?"—इत्यादिविचारः। तत्र तावत्

"यूपः इति कात्थक्यः"। कस्मात् यद्यप्येतस्यामाप्रियामनाविष्कृतोऽग्ने विशेषः, तथापीयम् "अपरा" यूपाञ्जनीया ऋक्, या सविषयत्व यूपाञ्जने यूपमभिधानेन संस्करोति। तद्यथा—॥ २ (१७) ॥

अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन। यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे। अञ्जन्ति त्वामध्वरे देवान् कामयमाना वनस्पते मधुना दैव्येन घृतेन च यदूर्ध्वः स्थास्यसि द्रविणानि च नो दास्यसि यद्वा ते कृतः क्षयो मातुरस्या उपस्थे उपस्थाने अग्निरिति शाकपूणिस्तस्यैषापरा भवति ॥ ३ (१८) ॥

"अञ्जन्ति त्वाम्"—इति (ऋ० सं० ३, १, ३, १) विश्वामित्रस्यार्षम्। पुरोरुक्। "देवेभ्यो वनस्पते"—इति च। हे यूप! 'अञ्जन्ति त्वाम्' स्नक्षयन्ति त्वाम् ऋत्विग्यजमाना। क्व? एतस्मिन् 'अध्वरे' यज्ञे। किमिच्छन्तः? 'देवयन्तः' देवान् यष्टुं कामयमानाः। केन अञ्जन्ति? हे 'वनस्पते!' यूप! 'मधुना दैव्येन' सह्लातेन "घृतेन" इत्यर्थ, देवानां यन्मधु, विज्ञायते हि—"देवाना मधु यद् घृतम्" इति। किमित्यञ्जन्ति? 'यत् ऊर्द्ध्वः तिष्ठाः' यस्मात् अक्तः त्वम् "ऊर्द्ध्वः स्थास्यसि" अञ्जनादनन्तरमुच्छ्रयिष्यन्ति त्वाम्। यस्माच्च ते 'क्षय' 'मातुः अस्याः' पृथिव्याः 'उपस्थे' उपरि। क्षयो निवासः, स्थैर्यार्थमवटः। तस्मादवश्यमूर्द्ध्वः स्थास्यसि। तथा स्थित्वा पशुधारणसमर्थः, प्रधानक्रिया-

पूर्वाङ्ग भावयित्वा तद्द्वारेण तत्फलानि "द्रविणानि च" अव-श्यम् अस्मभ्य "दास्यसि"—इत्यत समच्चन्ति ॥

एवमस्मिन् समञ्जने यूपे वनस्पतिशब्द प्रयुक्त । तस्मात् यूपो वनस्पतिरिति ॥

"अग्नि इति शाकपूणि"। कस्मादिहाप्युपावसृजेति। अस्यानाविष्कृतवनस्पतिशब्दार्थत्वाद् भवतु परोक्षो यूपः, पर-म्परा अस्य हविर्वहनलिङ्गलिङ्गिता पुरोरुक् यजतौ सन्निपत्या-ग्नेर्वनस्पतिशब्देन अभिधायिका ऋग् भवति। तद्यथा—॥ ३ (१८) ॥

दे॒वेभ्यो॑ वनस्पते ह॒वींषि॒ हिर॑ण्यपर्ण प्र॒दिव॑स्ते अर्थ॑म् । प्र॒दक्षिणिद्र॑श॒नया॑ नि॒यूय॑ ऋ॒तस्य॑ वक्षि प॒थिभी॒रजि॑ष्ठैः ॥ देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण ऋतपर्णापि वोपमार्थे स्याद्धिरण्यवर्णपर्णेति प्रदिवस्ते अर्थं पुराणस्ते सोऽर्थो यं ते प्रब्रूमो यज्ञस्य वह पथिभीरजि-ष्ठैर्ऋजुतमै रजस्वलतमैः प्रपिष्टतमैरिति वा तस्यैषापरा भवति ॥ ४(१९) ॥

"देवेभ्यो॑ वनस्पते"—इति। वसिष्ठस्यार्षम्। हे 'वनस्पते।'॥ 'अग्ने।' 'हिरण्यपर्ण'। हिरण्योपपर्ण। ज्वलित। 'देवेभ्यः' 'हवींषि' 'वक्षि' "वह"। कथम्? इति। 'प्रदक्षिणित्' प्रदक्षिणं देवाना यो हविर्वहनधर्म, तेन, पितृधर्मविपरीतेन। कथ वहनम्? 'रशनया' 'नियूय' निबध्य, सुनिपुणं यथा न किञ्च-दपि तत्र हविरनवेक्षित धूम्रभूतेन मधस्येत्, तथा। अपि च

'ऋतस्य' "यज्ञस्य" 'पथिभिः रजिष्ठैः' य एव प्रसिद्धाः पन्थानो यज्ञस्य हविर्वहनाय देवान् प्रति ऋजुभ्योऽपि 'ऋजुतमैः' यैः कालो नातिदीर्घेत, "रजस्वलतमैर्वा" अव्यर्थमुदकवद्भिः', ते हि पथिकानां सुखा', "प्रपिष्टतमैः" इति सुरूपतमैः प्रकृततमस्कैर्यैः असम्मोहः स्यात्, गच्छतस्तैः, न च पुनरविदिते कर्मणि त्वां विनियुञ्ज्महे। यतो ब्रूमः—'प्रदिवः तैं अध्वरम्' चिरन्तनमेव 'तैं' 'अर्थं' हविर्वहनाधिकारलक्षणं विद्मः। "अयं यो होता"—इत्येवमादिमन्त्रेभ्यः "देवा दधिरे हव्यवाहम्॥"—इति (ऋ० सं० ८, १, १२, ३)। अतो ब्रूमहे वहेति॥

एवमेतस्मिन् मन्त्रे हविर्वहनसंयोगाद् वनस्पतिशब्दस्याग्निरभिधेयः॥

अथ "एषा" वनस्पतेः अग्नेः "अपरा" ऋक् "भवति" (सा पुनः किमर्थम्? इति। प्रायोऽनुपदर्शनार्थं बहुषु मन्त्रेष्वग्निर्वनस्पतिरिति)—॥ ४ (१८)॥

वनस्पते रशनया नियूय पिष्टतमया वयुनानि विद्वान्। वहा देवत्रा दिधिषो हवींषि प्र च दातारममृतेषु वोचः॥ वनस्पते रशनया नियूय सुरूपतमया वयुनानि विद्वान् प्रज्ञानानि प्रजानन्वह देवान् यज्ञे दातुर्हवींषि प्रब्रूहि च दातारममृतेषु देवेषु स्वाहाकृतयः स्वाहेत्येतत्सु आहेति वा स्वा वागाहेति वा

स्वं प्राहेति वा स्वाहुतं हविर्जुहोतीति वा तासामेषा भवति ॥ ५ (२०) ॥

"वनस्पते रशनया"—इति । वनस्पतेरेव याज्या । हे 'वनस्पते ।' 'रशनया नियूय पिष्टतमया' "सुरूपतमया" अत्यर्थं दृढया एवमादिगुणयुक्तया रशनया नियूय अप्रध्वसनाय निबध्य 'वयुनानि' स्वाधिकारयुक्तानि "प्रज्ञानानि" अस्मदुपकाराय 'विद्वान्' "जानान" 'वह' एतानि अस्मत्प्रत्तानि 'हवींषि'। अस्य 'दिधिषो.' "दातु" यजमानस्य अभिमतफलप्राप्तये 'देवत्रा' देवान् प्रति प्रदातारम् 'अमृतेषु वोच' कथयस्व एन "दातारम्" 'अमृतेषु' "देवेषु" अमुना यजमाने एतानि हवींषि प्रत्तानि ॥

एवमग्निर्वनस्पतिः ॥

यत् पुनरेतदुक्तं यूपाञ्जनीयायाम्—"यूपे वनस्पतिशब्द" इति । अत्र ब्रूम —अग्निरवासौ यूपान्तर्गतो यूपात्मना वर्त्तमानो यूपाञ्जनीयाया वनस्पतिशब्देनोच्यते । तदुक्तम्—"एष हि वनाना पाता पालयिता वा"—इति । यस्मादन्तर्गतो वनाना वनानि न दहति, तस्मादेष वनस्पति. । उक्तञ्च—"योऽयमृत्वीषे पृथिव्यामग्निरन्तरोषधिवनस्पतिषु अप्सु, तसुग्निन्यषु. सर्वगण सर्वनामानम्"—इति । योऽयमग्निरवानेन वनस्पतिशब्देन यूपाभिधानेन वनस्पतिरभिधेय इत्यदोषः ॥

अपरे पुन "अञ्जन्ति त्वा"—इति, अधियज्ञात् पृथक्केनाधिदैवतमुत्पाद्य शाकपूणिमतेनाग्निमेव वर्णयन्ति । यद्यप्यधियज्ञे अस्य यज्ञाङ्गाभिवाद, तदापि नाधिदैवतमग्निमभिधातुमस्या परिहीयते सामर्थ्यं मन्त्रार्थे इति । तत् कथम् ? "अञ्जन्ति त्वामध्वरे देवयन्त "। हे भगवन् अग्ने ! 'अञ्जन्ति

त्वाम्' आधाराद्याभिराहुतिभिः 'अध्वरे' यज्ञे 'देवयन्तः' देवान् कामयमानाः । यस्मात् त्वम् 'ऊर्ध्वः' स्थास्यसि ज्वलिष्यसि, यच्च ते 'क्षयः' 'मातुः' वेद्याः 'उपस्थे' "उपस्थाने" उपरि उत्तरवेद्याः 'क्षयः' निवासः कृतः, तत्रोपज्वलितः "द्रविणानि" धनानि यज्ञसिद्धौ यज्ञफलान्यस्माकमवश्यं "दास्यसि" —इति, अतस्त्वामाहुतिभिरञ्जन्ति ॥

कात्थक्यपक्षेऽपि "देवेभ्यो वनस्पते"—"वनस्पतेरशनया नियूय"—इत्यनयोरर्थयोजना ।—हे 'वनस्पते' वानस्पत्य ! यूप ! त्वमुच्यसे । 'हिरण्यपर्ण' कृतपर्ण ! वह एतानि 'हवींषि' अतुष्ठिते त्वयि न एतानि उह्यन्त इति त्वमेवैषां वोढा इति प्रतीमहे । कथञ्च पुनर्वह ? 'प्रदक्षिणित्' यथैतानि वोढव्यानि अविपर्य्यस्तञ्च तेन विधिना 'रशनया' एतया विवृता 'नियूय' परिवीय त्वमात्मानम् 'ऋतस्य' यज्ञस्य ये पन्थानः रञ्जिष्ठाः प्रदिवः चिरम्, तत एवायमर्थस्त्वया हवींषि वोढव्यानीति । विज्ञायते च "यूपेन वा आहुतयः स्वर्गं लोकं यन्ति"—इति । "वनस्पते रशनया नियूय" । हे 'वनस्पते' वानस्पत्य ! यूप ! 'रशनया' विस्तृतया सुरूपतमया विवृता 'नियूय' परिवीय त्वमात्मानं वह एतानि 'हवींषि' स्वाधिकारप्रयुक्तानि प्रधानानि प्रजानन् प्रतिदिधिषोः हविर्दातुः अर्थसिद्धये । "प्रब्रूहि च" एनं दातारम् 'अस्मेय' देवेषु इति ॥

इत्यनुद्रुत्य अग्नेः स्तुतिमन्त्रे "स्वाहाकृतं हविरदन्तु देवाः"—इति सम्प्रदानम्। तत्र देवतार्थं सम्प्रदानमिति स्वाहाकृतयः समाम्नाताः; नाग्निरिति ॥

अथ स्वाहाकृतयः कस्मात्? स्वाहास्वाहेत्यनुकीर्त्तनेनासामुत्तमस्य प्रयाजस्य प्रोपसंस्कारः क्रियत इति स्वाहाकृतयः ॥

अथ "स्वाहा—इति एतत्" कस्मात्? "सु" सुष्ठु "आह"—"इति वा"। यदेव सम्प्रदानदेवतायै किञ्चिदाज्यस्येत्यनेन मन्त्रेणाह तुभ्यमिदमिति, तदेव "सु-आह" शोभनमाह। एवमस्य 'सुः' पूर्वपदम्, 'आह'—इत्युत्तरपदम्। अथवा इदमन्यत् ब्राह्मणानुगतं निर्वचनम्,—"स्वा वागाहेति वा" इति। विज्ञायते हि "तं स्वा वागभ्यवदज्जुहुधीति तत् स्वाहाकारस्य जन्म"—इति। अत्र च स्वशब्दः पूर्वपदम्, उत्तरपदं तथैव। अथ "स्वं प्राह इति वा"। को विशेषः पूर्वस्मात्? पूर्वपदेऽस्य कारकान्यत्वम्,—स्वा वागाहेति कर्त्तरि, स्वं प्राहेति कर्मणि, प्रपूर्वं चोत्तरपदं प्रकर्षद्योतनाय। "स्वाहुतं हविः जुहोति इति वा" यदनेनैव हविर्जुहोतीति, तदेव सुहुतापाद्य यथाभिधानमग्नौ जुहोतीति हविःप्रधानोऽत्र निर्देशः ॥

"तासाम्" स्वाहाकृतीनाम् "एषा" "भवति"—॥५(२०)॥

सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत् पुरोगाः। अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः॥ सद्यो जायमानो निरमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाम्यश्च होतुः प्रदिश्यृतस्य वाच्यास्ये

स्वाहाकृतं हविरदन्तु देवा इतीमा आप्रीदेवता अनुक्रान्ता अथ किं देवताः प्रयाजानुयाजा आग्नेया इत्येके ॥ ६ (२१) ॥

"सद्यो जातः"—इति (ऋ० सं० ८, ६, ८, ५)। योऽयमग्निः 'सद्यः' 'जातः' "जायमानः" अनन्तरमेव 'व्यमिमीत यज्ञम्' निर्वर्त्तयति यज्ञम्। यश्च जातमात्र एव 'अग्निः देवानाम् अभवत्' 'पुरोगाः' "पुरोगामी" अग्रतो गामी प्राधान्येन। तस्य 'अस्य' 'होतुः' देवानामाह्वातुः 'प्रदिशि' प्राच्यां दिशि 'ऋतस्य' गतस्य प्रणीतस्य उत्तरवेद्यादिकत्वेन, 'वाचि' "आस्ये" वाचीत्यास्यमेवापेक्ष्य। 'स्वाहाकृतं' स्वाहाकारबलात् मन्त्रेण प्रक्षिप्तं 'हविः' एतदाज्यम् 'अदन्तु' पिबन्तु 'देवाः' स्वाहाकृतयः॥

"इति" इतिकरणोऽधिकारसमाप्त्यर्थः, प्रदर्शनार्थो वा। "इमाः" एता एव एकादश "आप्रीदेवताः" "अनुक्रान्ताः" इत्याद्याः। ननु द्वादशानामनुकीर्त्तनम्? सत्यम्, अनुक्रान्तानां तु एकादश वनस्पत्यन्ताः, यासामिह विचारः, न तु स्वाहाकृतिषु विचारोऽस्ति। तद्देवतासत्कारपरत्वात् उत्तमस्य प्रयाजस्य यजतौ एकादशग्रहणात् एकादशप्रयाजविषय एवोत्तरो विचार इत्याचार्य्याभिप्रायो गम्यते। ततः किम्? यद्यनुक्रान्तास्तान् प्रति विचारो वर्त्तिष्यते। ननु विचारितमेव "यज्ञ इध्म इति कात्थक्यः, अग्निरिति शाकपूणिः"—इत्येवमादि? सत्यम्, विचारितमेतत्। स तु प्रत्येकमाप्रीदेवतापरेषु विचारः, अयन्तु सामान्यः प्रकरणगतश्चासामेव विचारोऽनिश्चितानां निश्चयावधारणार्थः, निश्चितेन हि व्यवस्थिते न

विधिना भवितव्यम्, अधियज्ञे यजतौ देवताध्यानाङ्गभाव-श्रवणात् तदेतद्विषयमनिश्चितम् ॥

"अथ"—इति विचाराधिकारवाचिना अथशब्देन विचारमधिकृतोपोद्घन्ति—"अथ किं देवताः प्रयाजाः"—इति । का प्रयाजेषु देवताः ? इति । प्रयाज इति आश्रुतादि-र्यजमानोपस्थानान्तक्रियाकलाप उच्यते । प्रयाजेषु ह्यमाने-ष्विति प्रसिद्धत्वात् । कुतः संशयः ? नानादेवता एव प्रयाज-प्रवादाः । आप्रीणां वषट्कारेण सम्बन्धात् सर्वस्य चान्यस्य समञ्जसो विशेषभावः । एवं सति विप्रतिपत्तिराचार्ययोः कात्थक्यशाकपूण्योः । तस्माद् व्यवस्थाप्यत इति ॥

कथं नानादेवताः प्रयाजप्रवादाः ? इति । तत्र तावत् "आग्नेयाः इति एके" । कुतः ? "आग्नेया वै प्रयाजा आग्नेया अनुयाजाः"—इति च ब्राह्मणम् । तत्र ये एतस्मि-न्नर्थे सौचीकेनाग्निना विश्वैश्च देवैः परस्परसंवादे दृष्टे ऋचौ । स हि किल सौचीकोऽग्निर्विश्वैर्देवैः सह सवदते । तमूचुः—'एहि नो हवींषि वह' इति । स तानुवाच—'यज्ञे भागोऽस्तु' इति । ते तं प्रत्यूचुः—'वृणीष्व' इति । सोऽनयाची वव्रे—॥ ६ (२१) ॥

प्रयाजान्मे अनुयाजांश्च केवलानूर्जस्वन्तं हविषो दत्तभागम् । घृतञ्चापां पुरुषञ्चौष-धीनामग्नेश्च दीर्घमायुरस्तु देवाः ॥ तव प्रयाजा अनुयाजाश्च केवल ऊर्जस्वन्तो हविषः सन्तु भागाः । तवाग्ने यज्ञोऽयमस्तु सर्वस्तुभ्यं नमन्तां प्रदिशश्चतस्रः ॥

आग्नेया वै प्रयाजा आग्नेया अनुयाजा इति च ब्राह्मणं छन्दोदेवता इत्यपरं छन्दांसि वै प्रयाजाश्छन्दांस्यनुयाजा इति च ब्राह्मणमृतुदेवता इत्यपरमृतवो वै प्रयाजाः पशवोऽनुयाजा इति च ब्राह्मणं प्राणदेवता इत्यपरं प्राणा वै प्रयाजा अपाना अनुयाजा इति च ब्राह्मणमात्मदेवता इत्यपरमात्मा वै प्रयाजाः प्रजा अनुयाजा इति च ब्राह्मणमाग्नेया इति तु स्थितिर्भक्तिमात्रमितरत् किमर्थं पुनरिदमुच्यते यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट् करिष्यन्निति ह विज्ञायते तान्येतान्येकादशाप्रीसूक्तानि तेषां वासिष्ठमात्रेयं वाध्र्यश्वं गार्त्समदमिति नाराशंसवन्ति मैधातिथं दैर्घतमसं प्रैषिकमित्युभयवन्त्यतोऽन्यानि तनूनपात्वन्तितनूनपात्वन्ति ॥७ (२२)॥

इत्यष्टमाध्यायस्य तृतीयः पादः ॥ ८, ३ ॥

"प्रयाजान् मे अनुयाजांश्च"—इति (ऋ० सं० ८, १, ११, ३-४)। हे विश्वेदेवाः! 'प्रयाजान्' 'मे' मम 'केवलान्' अनन्यदेवतासम्पृक्तान्, अथवा निरवशेषान्। 'ऊर्जस्वन्त' रसवन्त सर्वस्य 'हविषः' अवधाय्य 'दत्तभाग' 'यज्ञे' 'घृतश्च' 'अपां' सारभूतम्, ताभ्य उत्पन्नम् पिशेयमह प्रथममाज्य

भागे। 'पुरुषं च ओषधीनाम्' ओषधिमयानाञ्च हविषो मम पुरुषपुरोडाशम् एवं नित्यं मम भागः स्यात्। मम 'अग्ने:' हे 'देवा:!' 'दीर्घमायुः अस्तु' यथा मत्पूर्वे भ्रातरः हविर्वहन्तः वषट्कारप्रहकृणाः, नाहं तथा मृपीष्टेत्यभिप्रायः। वयः पूर्वेऽग्नयः प्राग्धव्यं वहन्ते देवेभ्यः, तान् वषट्कारः प्राहवतीति—॥ एवमुक्तास्ते अनयोत्तरर्चानुजज्ञिरे तस्य तं भागम्।—तव 'प्रयाजा अनुयाजाश्च केवल ऊर्जस्वन्तो हविषः सन्तु भागाः।' यथा त्वयोक्तम्। अपि च किं बहुना, 'तवाग्ने। यज्ञोऽयमस्तु सर्वः' त्वदधीन एवायं यज्ञः सर्वोऽस्तु, किञ्च 'तुभ्यं नमन्तां प्रदिशश्चतस्रः' प्रदिशोऽन्तर्भूता दिक्ष्वेव दिङ्-निवासीनि भूतानि भोग्यत्वेन कल्पन्तामित्यर्थः॥ एवं तावदाग्नेयाः॥

अथ नानादेवताः प्रवादा इति यदुक्तम्, तदनुप्रदर्श्यते—"छन्दोदेवता इति" एवमादि। तत् कोऽत्र निश्चयः? "आग्नेयाः इति तु स्थितिः" तुशब्दोऽन्यप्रवादनिवृत्त्यर्थः। केन विशेषहेतुना आग्नेयत्वमवध्रियते? ब्राह्मणं मन्त्रश्चोभयमाग्नेयत्वे, ब्राह्मणान्येव केवलान्यन्यदेवतात्वे, एतस्मात् विशेषहेतोरवधारयामः—आग्नेया इति॥

अथ किमन्यदन्यतमम्? इति "भक्तिमात्रमितरत्" छन्दोदेवता—इत्येवमादि। तदुक्तम्—"बहुभक्तिवादीनि हि ब्राह्मणानि भवन्ति"—इति। "किमर्थं पुनरिदमुच्यते" किं विचारणे प्रयोजनम्? इति। "यस्यै देवतायै हविर्गृहीतं स्यात्, तां मनसा ध्यायेत् वषट् करिष्यन्"—"इति ह विज्ञायते"। मनसेति नामभिः सहित हविर्देवतायै देवतामुपेयादेवमर्थश्च सर्वत्र विचारः। तथाहि दर्शितम्—"यस्तु सूक्तं भजते यस्मै हविर्निरूप्यते"—इति। मनसेति किमर्थम्?

केन वाक्येन ध्यायेत्? इति। शृणु—सर्वेन्द्रियविषयप्रत्याहृतेन मनसा यथाश्रुतगृहीतभावितानां देवानां नानात्वैकत्वविशेष्यात्मनो हृदये विज्ञानमयीमालिख्य प्रतिकृतिं लक्ष्यीकृत्यानन्यमनास्तत्कालमधीत्य याज्यां वषट् करिष्यंस्तदनुचिन्तनसंस्कारसन्तानैकरसेन मनसा हविष्यभिसन्धाय देवतां ध्यायेत् इत्यस्य विशेषस्य द्योतनायार्थप्राप्तस्यापि मनसो ग्रहणं मनसा ध्यायेदिति। ब्राह्मणं चैतदर्थमेवोक्तमाचार्य्येण, अत्र हि विशेषतः पुरुषार्थो वक्तव्य इति, अतोऽन्यथा हि देवताचिन्तनशून्यं कर्म एतस्मिन् प्रधानकाले विकलमित्यफलमेव स्यात्। एष एव च ध्यानकालो यजमानस्य, आहुतिप्रक्षेपकाले न तथाऽन्येषामध्वर्युप्रभृतीनामाहुतिप्रक्षेपव्यापृतानाम्, तत्तस्य हि होतेति॥

"तान्येतानि एकादश आप्रीसूक्तानि" अनुक्रान्तानि। दशधा दशतयीषु, तेषामेकादशं प्रैषिकमिति। इतीमानीत्युपप्रदर्शनार्थमितिकरणः, एष एव तेष्वपि निर्वचनविचारावधारणकल्पः।

यस्तु तद्गतः कश्चित् विशेषः, स उच्यते—"तेषां वासिष्ठम् आत्रेयम्"—इत्येवमादि। वसिष्ठेन दृष्टं "वासिष्ठम्" अत्रिणा दृष्टम् "आत्रेयम्" वध्र्यश्वेन दृष्टं "वाध्र्यश्वम्" गृत्समदेन दृष्टं "गार्त्समदम्"। कः पुनरसौ विशेषः? "इति" एतानि "नाराशंसवन्ति"। अथ पुनः "मैधातिथं, दैर्घतमसम्, प्रैषिकम्" —इति। मेधातिथिना दृष्टं "मैधातिथम्" दीर्घतमसा दृष्टं "दैर्घतमसम्" प्रैष इति प्रत्ययः, तेषु यत् तत् "प्रैषिकम्"— "इति" तद्दिष्टोपवर्णितम्। एतानि "उभयवन्ति"—। "अतः अन्यानि यानि चत्वारि अवशिष्यन्ते, तानि "तनूनपात्वन्ति"॥

अत्र नाराशंसयाजिनो वसिष्ठादयः, तेभ्योऽन्ये तनूनपाद्याजिनः। तान्येतानि अमुना विभागेनावस्थितानि एकादश एकनिर्वचनावधारणानि॥

अतोऽन्यानि दाशतयादाप्रीसूक्तवर्गात् सौत्रामण्यां त्रीणि, अश्वमेधयोरेकैकम्। तत्र यानि सौत्रामण्यां तानि अनाम्नेयानीति न परिसङ्ख्यातानि, प्रैषिकेषु तु क्रमणात् तेषाम्। आश्विकाश्वमेधिके तु कर्मान्तरेऽपि विनियुज्येते, न केवलमाप्रीषु, इष्टकोपधाने—आग्निकमुत्तमायां चितौ "समास्त्वाग्न ऋतवो वर्धयन्तु (य० वा० सं०२०, १)"—इति, द्वादशाप्रीरध्येष्विति। इस्त्यग्रहणमाश्वमेधिकं यजमानस्य—"समिद्धो अञ्जन् कृदरं मतीनाम् (य० वा० सं० २९, १)"—इत्याप्रीभिर्हस्तं गृह्णातीति। अत आप्रीकार्य्ये प्रयोगव्यभिचारादाप्रीसूक्तवर्गमध्यपठिते अपि न परिसङ्ख्याते आचार्य्येण। सौत्रामण्यां तु प्रथमस्य पशोर्या द्वितीया आप्री, तस्यामेकस्यामिव च नराशंसतनूनपातौ—"नराशंसः प्रति शूरो मिमानस्तनूनपात् प्रति यज्ञस्य धाम (य० वा० सं० २१, ३०)"—इति। तत्र नराशंसयाजिनां वसिष्ठप्रभृतीनां यागे निपातवत् तनूनपात्पदमनर्थकम्, पादपूरणमात्रेणोपकारं मन्त्रे करोति, तथा तनूनपाद्याजिनां नराशंसपदम्। एवं एव अन्यत्राप्येवंविधे देवतापदे प्रयोगादन्यथाभाविनि देवतापदानां निपातकल्पः। तद्यथा—अश्वहविषि अश्वप्रतिग्रहप्रायश्चित्ते "यदद्य सूर"—इति सौर्य्यमित्रावरुणानां याज्यानुवाक्ये, तयोः मित्रार्य्यमणां यानि लिङ्गानि तानि निपातङ्गवन्ति। तथा 'प्र चित्रमर्कं गृणते तुराय'—इति, अत्र सम्बोधनान्तमप्यग्निपदं नैपातिकम्, केवलं मारुते हविषि चातुर्मास्येषु वैश्वदेवप्रयोगे पुनः तदेवार्थवत् "आग्निमारुतौ

पृश्निमालभेत वृष्टिकामः"—इत्यत्र च प्रयोगे। एष एव देवतापदविचारः॥

यस्मिन् पक्षे सर्वे आग्नेयाः प्रयाजाः—"प्रयाजान् मे अनुयाजांश्च केवलान् (ऋ० स० ८, १, ११, ३-४)"—इति मन्त्रदर्शनात्, तस्मिन् पक्षे 'तिस्रो देवीः'—इत्यत्र 'भारती द्युस्थाना' 'मध्यस्थाना सरस्वती' 'पृथिवीस्थाना इला'—इति च तद्देवतात्वं दुःप्रतिसमाधानम्। स्थानान्तरापत्तिस्तुल्या चाग्निरेव एता देवता इति प्रतिसमाधानम्। सौत्रामण्यां तृतीये पशौ "समिद्धो अग्निः समिधा सुसमिद्धो वरेण्यः"—इत्येता आप्रियः (य०वा० स० २१, १२—२२)। तासु तनूनपादेवैकः—"तनूनपाच्छुचिव्रतः"—इति (१३), नास्त्येव नराशंसः। तत्र नराशंसयाजिनां सौत्रामणीप्रयोगे कथं प्रयोगः?—किं तनूनपाच्छुचिव्रत इत्येतदेव प्रयुज्यताम्,—उतान्यतः कुतश्चिदाप्रीसूक्तादाक्रियतां नराशंस इति? न्यायविदो मेधाविन समनुगंसन्ते विशेषमिति॥ ७ (२२)॥

इति ऋज्वर्थायां निरुक्तवृत्तौ त्रयोदशस्य (अष्टमस्य) अध्यायस्य तृतीय. पादः॥ ८, ३॥

इति ऋज्वर्थाया निरुक्तवृत्तौ जम्बूमार्गाश्रमवासिनः आचार्यभगवद्दुर्गस्य कृतौ त्रयोदशः (अष्टम.) अध्यायः समाप्तः॥ ८॥

(द्रविणोदाः कस्माद्द्रविणोदाद्रविणोदसोऽमे, दान्तुतेऽथात आप्रियः समिद्धो अद्यतनूनपान्नरा-

शंसस्याजुह्वानः प्राचीनंबर्हिर्व्यंचस्वतीरासुव्य[8][9][10][11]-
न्तौदैव्याहोतारानोयज्ञं यद्गमेयाविष्ठोवनस्पति[12][13][14][15][16]-
रूपावस्त्रजाञ्जन्तिल्वादेवेभ्योवनस्पतेरशनयास[17][18][19][20][21]-
द्योजातःप्रयाजान्मे द्वाविंशतिः ॥)[22]
इति निरुक्ते (उत्तरषट्के) अष्टमोऽध्यायः ॥८॥

अथ नवमाध्यायस्य

प्रथमः पादः।

ॐ। अथ यानि पृथिव्यायतनानि सत्त्वानि स्तुतिं लभन्ते तान्यतोऽनुक्रमिष्यामस्तेषामश्वः प्रथमागामी भवत्यश्वो व्याख्यातस्तस्यैषा भवति ॥ १ ॥

"अथ"—इति विशेषाधिकारे। प्रकृतार्थादनन्तरमधिकरोति। "पृथिव्यायतनानि" पृथिव्याश्रयाणि "सत्त्वानि" द्रव्याणि च, तेषामप्यत्र विवक्षितत्वात्। "स्तुतिं लभन्ते"—इति समाम्नातानि। "तानि" "अत" परम् "अनुक्रमिष्यामः" व्याख्यया इति शेषः। पूर्वस्मादाप्रीगणाद् विलक्षणोऽयमश्वादिगण इति पृथगधिकारवचनम्। पृथिव्यायत

न्त्वाविशेषात् सर्पलाङ्गलकुसुम्भकप्रभृतीनामप्यत्रैवान्तर्भावः, तान्यपि हि स्तुतिं लभन्ते, उपलक्षणं चेदमिति। तेषां युगपदभिधानासम्भवात् क्रमोऽर्थादङ्गीकृतो भवति, सति च क्रमे न मुख्यातिक्रमो नाय्य इत्यतो ब्रवीति।—

"तेषामश्वः प्रथमागामी भवति"—इति। स पुनः किमर्थं प्रथमागामी? पुरुषानन्तरं जन्म इति हि विज्ञायते,—तस्या आहुत्याः पुरुषोऽजायत, द्वितीया यत् जुहोत् ततोऽश्वोऽजायत, विशिष्टे चाश्वमेधलक्षणे कर्मणि विशिष्टोऽस्याङ्गभावः इति। सः "अश्वः" च पुनरयं "व्याख्यातः" एव प्राक्—"अश्नुते अध्वानं महाशनो भवतीति वा" इत्यत्र।

"तस्य" "एषा" प्राधान्यस्तुतिः अश्वस्तोमीय एव—॥१॥

अश्वो वोळ्हा सुखं रथं हसनामुपमन्त्रिणः। शेपो रोमण्वन्तौ भेदौ वारिन्मण्डूक इच्छतीन्द्रायेन्द्रो परिस्रव॥ अश्वो वोळ्हा सुखं वोळ्हा रथं वोढा सुखमिति कल्याणनाम कल्याणं पुण्यं सुहितं भवति सुहितं गम्यतीति वा हसैता वा माता वा पालयिता वा शेपमिच्छतीति वारि वारयति मा नो व्याख्यातस्तस्यैषा भवति॥ २॥

मा नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतः परिख्यन्। यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि॥

यद्वाजिनो देवजातस्य सप्तेः सरणस्य प्रवच्यामो यज्ञे विदथे वीर्य्याणि मा नस्त्वं मित्रश्च वरुण-श्चार्य्यमा चायुश्च वायुरयन इन्द्रश्चोरुत्तयण ऋभूणां राजेति वा मरुतश्च परिख्यन्शकुनिः शक्नोत्युन्नेतुमात्मानं शक्नोति नदितुमिति वा शक्नोति तकितुमिति वा सर्वतः शङ्करोऽस्त्विति वा शक्नोतेर्वा तस्यै षा भवति ॥ ३ ॥

"मा नो मित्र."—इति (ऋ० स०२,३, ७, १)। दीर्घतमस आर्षम्। अश्व एवाहूयते अनेन सूक्तेन। "यद् वाजिन"—इति। 'यत्' यानि 'वाजिन.' अस्याश्वस्य 'देवजातस्य' "देवैर्जनितस्य" वसुभिरादित्यात्,"सूरादश्वं वसवो निरतष्ट"—इति (ऋ० स० २, ३, ११, २)। अग्नेर्वा, "प्रजापतिना द्वितीयामजुहोत्, ततोऽश्वोऽजायत"—इति। 'सप्ते.' "सरणस्य"। 'प्रवच्यामः' प्रकर्षेण वक्ष्याम। 'विदथ' एतस्मिन् "यज्ञे" 'वीर्य्याणि' गुणान्। किं तेषाम्? 'मा नः' मास्माक तान्युच्यमानानि 'मित्र' 'वरुण.' 'अर्य्यमा' वायु', 'इन्द्र' 'मरुत' 'परिख्यन्' आचचीरन्। किन्तर्हि? अनुमन्यन्ताम्। 'आयुः' अत्र "वायु.=अयन." वकारलोपेन। म कस्मात्? अयनात्, एति ह्यसौ विश्वम्। 'इन्द्र.' 'ऋभुचा' स हि "उरुत्तयण." उरावन्तरिक्षे क्षियति निवसति। अथवा क्षियतिरैश्वर्य्यार्थ.। कस्य ईष्टे? "ऋभूणा" देवानां "राजा" "इति" "वा" च, तेषामीष्टे। एवम् ऋभुशब्दात् पूर्वपदम्, क्षियतेरैश्वर्य्यकर्मण. उत्तरपदम्॥

"शकुनि."। कस्मात्? स हि "शक्नोत्युन्नेतुमात्मानम्"। ऊर्ध्वं नेतुम्, लघुत्वात्। शकेः पूर्वपदम्, नयतेरुत्पूर्वस्योत्तरपदम्। "नदितुमिति वा" अथवा नदतेस्तकतेर्वा शब्दार्थगत्यर्थयोः पूर्वोत्तरपदं विकल्पेन। अथ "वा" "सर्वतः शङ्कर." अयमस्माकम् "अस्त्विति" सर्वेण नित्यमाशासितव्यो भवति। एवं सति 'शम्'—इति सुखनाम पूर्वपदम्, करोतेरुत्तरपदम् "शक्नोतेः" एव वैकल्पयात्। किमसौ शक्नोतिपदस्य योग्य अङ्कितुम्॥

"तस्य" "एषा" प्राधान्यस्तुतिः "भवति"—॥ २॥

कनिक्रदज्जनुषं प्रब्रुवाण इयर्त्ति वाचमरितेव नावम्। सुमङ्गलश्च शकुने भवासि मा त्वा काचिदभिभा विश्व्या विदत्॥ न्यक्रन्दीज्जन्म प्रब्रुवाणो यथास्य शब्दस्तथा नामेरयति वाचमीरयितेव नावं सुमङ्गलश्च शकुने भव कल्याणमङ्गलो मङ्गलङ्गिरतेर्गृणात्यर्थे गिरत्यनर्थानिति वाङ्गलमङ्गवन्मज्जयति पापकमिति नैरुक्ता माङ्गच्छत्विति वा मा च त्वा काचिदभिभूतिः सर्वतो विदद् गृत्समदमर्थमभ्युत्थितं कपिञ्जलोऽभिववाशे तदभिवादिन्येषर्ग् भवति॥ ४॥

। "कनिक्रदज्जनुषम्"—इति (ऋ० सं० २, ८, ११, १)। गृत्समदस्यार्षम्। शकुनिरुतश्रवणे जपे विनियोगः। 'कनि-

'क्रदत्' "न्यक्रन्दीत्" पुन पुनः अयं वा क्रन्दसीति मध्यमपुरुषेण नुतिरुत्तरमर्द्धर्चमपेक्ष्य। 'जनुष' 'प्रब्रुवाण.' आत्मनोऽभिजाति कथयन्निव, 'इयर्त्ति वाचम्' इयर्त्ति वाचम्। कथम् ? 'अरिता इव' "ईरयिता इव" नाविक इव, पुन पुन. "नाव" पारगमनाय। यस्त्वमेवमीरयसि, स त्वं 'सुमङ्गल. च' हे, 'शकुने' प्रशस्तमङ्गलश्च, अस्माक 'भव'। वयमपि च तुभ्यमित्याशास्महे—'मा त्वा काचित्' 'अभिभा' "अभिभूति" परोपद्रव। 'विश्वा' सर्वप्रकारा सर्वतो 'विदत्' विदत्विति। "यथास्य शब्दः, तथा नामेरयति" 'तदिद शकुनिषु बहुलमित्यवोचाम्॥

"मङ्गल" कस्मात् ? "गिरते" धातो. "शब्दार्थे" वर्त्तमानस्य, स्तुत्य हि तद भवति। "गिरति अनर्थान् इति वा" अर्थेव वा गिलनार्थस्य। किमिद गिलति ? उत्पद्यमानमेवेदमनर्थात्। गिलति भक्षयति वा। अथवा "अङ्गलम्" एतन्मकारापजनेन मङ्गलम्। कोऽर्थ. ? "अङ्गवत्" अङ्गैरवयवै. दधिमध्वक्षतादिभि तद्वत्। रो मत्वर्थे, व्यत्ययश्च रलो। अथवा मज्जयते मङ्गलम्। किम् ? "मज्जयति पापकम्—इति नैरुक्ता" उत्पद्यमानमेवैतत् मङ्गलिन. पुरुषस्य 'मज्जयति' नाशयति यदस्य किञ्चित् पातक भवति। एव मज्जयतेर्मङ्गलम् इति नैरुक्ता विदु। "मा गच्छतु इति. वा" गमेर्वा। स एतत् मन्यते मामेतद् गच्छत्विति॥

"शब्दमदमर्थमभ्युत्थितम्" इति। स्तुतिलाभकारण स किल किञ्चिदर्थं सिसाधयिषुरभ्युत्तस्थौ, तमभ्युत्थित "कपिञ्जल" शकुनः "अभिववाशे" तत्सिद्धिमावेदयन्। यथा चैतदेवम्, "तदभिवादिनी एषा ऋग् भवति"॥ ४॥

भद्रं वद दक्षिणतो भद्रमुत्तरतो वद।
भद्रं पुरस्तान्नो वद भद्रं पश्चात्कपिञ्जल: ॥
इति सा निगदव्याख्याता गृत्समदो गृत्समदनो गृत्स इति मेधाविनाम गृणातेः स्तुतिकर्मणो मण्डूका मज्जूका मज्जनान्मदतेर्वा मोदतिकर्मणो मन्दतेर्वा तृप्तिकर्मणो मण्डयतेरिति वैयाकरणा मण्ड एषामोक इति वा मण्डो मदेर्वा मुदेर्वा तेषामेषा भवति ॥ ५ ॥

"भद्रं वद दक्षिणतः"—इति। इह शकुनिः किल कस्याश्चिद् दिशि साधुर्भवति, कस्याश्चिदसाधुः। स एष ब्रवीति।— 'दक्षिणतः' 'उत्तरतः' 'पश्चात्' 'पुरस्तात्' च सर्वत एव त्वमस्माकम् 'कपिञ्जल.' 'भद्रं' 'वद' इति ॥

"गृत्समदः=गृत्समदनः" गृत्सश्चासौ मदनश्च गृत्समदनः। गृत्सः=मेधावी, मदनः=हर्षालुः ॥

"मण्डूकाः"—इति। एतत् पदम् वक्तव्यम्। य एते "मण्डूकाः" एते "मज्जूकाः"। कस्मात्? "मज्जनात्" नित्यमग्ना ह्येत उदके। "मदतेः वा" स्यात् "मोदतिकर्मणः" नित्यप्रमुदिता हि ते। "मन्दतेः वा" स्यात् "तृप्तिकर्मणः" नित्यतृप्ता हि ते, प्रचुरोदकत्वात्। "मण्डयतेः"—"इति वैयाकरणाः" ते हि भक्तिभिर्नानाचित्राभिः विधात्रा मण्डिता भवन्ति। "मण्ड एषाम् ओकः"—"इति" "वा" 'मण्डे' उदके 'एषाम्' 'ओक.' निवासः—'इति वा' मण्डूकाः ॥

"तेषाम् एषा भवति"—॥ ५ ॥

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः। वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः॥ संवत्सरं शिश्याना ब्राह्मणा व्रतचारिणोऽब्रुवाणा अपि वोपमार्थे स्याद् ब्राह्मणा इव व्रतचारिण इति वाचं पर्जन्यप्रीतां प्रावादिषुर्मण्डूका वसिष्ठो वर्षकामः पर्जन्यं तुष्टाव तं मण्डूका अन्वमोदन्त स मण्डूकाननुमोदमानान् दृष्ट्वा तुष्टाव तदभिवान्येषर्ग् भवति ॥ ६ ॥

"संवत्सरं शशयानाः"—इति (ऋ० सं० ५, ७, ३, १)। वसिष्ठस्यार्षम्। 'संवत्सरं' 'शयानाः' "शिश्यानाः" निर्वाचः संवत्सरं सुप्ता इव स्थित्वा 'ब्राह्मणाः' "अब्रुवाणाः" सर्वथा सन्तो वक्तुम्, 'व्रतचारिणः' कृतवाक्संयमाः, ततः प्राविट्काले प्राप्य अभिहृष्टाः 'पर्जन्यजिन्विताम्' पर्जन्येन तर्पिताम् 'वाचम्' 'प्र मण्डूकाः अवादिषुः' प्रावादिषुर्मण्डूकाः। अथवा न युक्तो रूढिपरित्यागो ब्राह्मणशब्दस्येति लुप्तोपमः प्रकल्प्यते— "ब्राह्मणा इव व्रतचारिणः" इति। यथा ब्राह्मणा उपाकृत्य प्रावृषि पवित्रपाणयो मेखलिनो नियतकाला ता वैदिकीं वाचं वदन्ति, एवं प्रावादिषुरिति॥

"वसिष्ठो वर्षकामः" इति। स्तुतिलाभनिमित्तं स किल वर्षन्तं "पर्जन्यम्" "तुष्टाव"। "तं मण्डूकाः" "अन्वमोदन्त" स्तुहि स्तुहि इति। "सः" तान् "मण्डूकान्" "अनुमोदमानान्" वाश्यमानान् "दृष्ट्वा" लब्धं वर्षनिमित्तमिति

परितुष्ट, तानेव "तुष्टाव"। यथा चैतदेवम्, "तदभिवादिनी एषा ऋग् भवति" ॥ ६ ॥

उप प्रवद मण्डूकि वर्षं मा वद तादुरि।
मध्ये ह्रदस्य प्लवस्व विगृह्य चतुरः पदः ॥
इति सा निगदव्याख्याताक्षा अश्नुवत एनानिति वाभ्यश्नुवत एभिरिति वा तेषामेषा भवति ॥ ७ ॥

"उप प्रवद"—इति। हे मण्डूकि। मण्डूकानां मातः ! अथवा मण्डूकपत्नि। मण्डूकि ! 'मा' माम् 'उप' गम्य 'प्र' प्रकर्षेण वद'। कथं च प्रवद। 'वर्षम्' 'मा' आभिमुख्येन 'वद' 'तादुरि' तरणशीले। अथवा तावत उदरि। यावच्छरीरं तावदेवोदरं तस्याः। ततो हृष्टे देवे आप्लुते उदकैर्नैतस्मिन्नेकजलीभूते 'मध्ये' 'ह्रदस्य' उदकस्य बहुनः 'प्लवस्व' उपरि विगृह्य' प्रसार्य 'चतुरः' 'पदः' पदानित्यर्थः। पादशब्दस्य पदादेशः क्रियते ॥

"अक्षा"—इत्येवमादीनि लब्धस्तुतित्वात् पृथिव्यायतनत्वसामान्यादिह वर्गे समाम्नातानि। तेषां च यथासमाम्नानमेव "अक्षा" प्रथमं निर्वक्तव्याः। कस्मात्? "अश्नुवत एनान् इति वा" दीव्यन्तः कितवा एतान् अक्षान् पाणिभिः। "अश्नुवत" व्याप्नुवन्ति त एते, अश्नोतेः कर्मणि कारके। अथवा "अभ्यश्नुवते" अभिपूर्वस्य तस्यैवाश्नोतेः करणे कारके, तैर्हि कितवाः प्रतिकितवं धनम् अभ्यश्नुवते।

"तेषाम्" "एषा भवति" स्तुतिः—॥ ७ ॥

प्रावेपा मा बृहतो मादयन्ति प्रवातेजा

इरिणे वर्त्तानाः। सोमस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान् ॥ प्रवेपिणो मा महतो विभीदकस्य फलानि मादयन्ति प्रवातेजाः प्रवणेजा इरिणे वर्त्तमाना इरिणं निर्ऋणमृणातेरपार्णं भवत्यपरता अस्मादोषधय इति वा सोमस्येव मौजवतस्य भक्षः मौजवतो मूजवति जातो मूजवान् पर्वतो मुञ्जवान् मुञ्जो विमुच्यत इषीकयेषीकेषतेर्गतिकर्मण इयमपीतरैषीकैतस्मादेव विभीदको विभेदनाज्जागृविर्जागरणान्मह्यमचच्छदत् प्रशंसत्येनान् प्रथमया निन्दत्युत्तराभिऋषेरक्षपरिद्यूनस्यैतदार्षं वेदयन्ते ग्रावाणो हन्तेर्वा गृणातेर्वा गृह्णातेर्वा तेषामेषा भवति ॥ ८ ॥

"प्रावेपा मा"—इति। अक्षपुत्रस्य मौजवत आर्षम्। 'प्रावेपा' "प्रवेपिण" प्रकर्षण वेपनशीलस्य वृक्षस्य जाता 'बृहत' "महत" 'मा' माम् 'मादयन्ति'। 'प्रवातेजा' प्रचुरवाते स्थाने काले वा जाता, प्रावृट्काले, पक्वानां वा प्रचुरवाते काले पतनाभिप्राय जन्म। "विभीदक" एक एव वा विशिष्यते य, प्रवणे उदकबहुले देशे जात, "तस्य फलानि" यथा। 'इरिणे वर्त्तताना,' निर्गतर्णे भास्तुरकस्थाने वर्त्त-

मामाः, न हि तत्र पुत्रपौत्रानुगमनं भवति। "अपार्णं" वा, उपसर्गस्यान्यत्वमेव केवलम्, अथवा "अपार्णम्" अपगतोदकम्। "अपरता अस्मात् ओषधयः इति वा" (ऋ० सं० २, ५, १, ४)। कथं मादयन्ति ? "सोमस्य इव" यथा सोमस्य इव" यथा सोमस्य "मौजवतस्य" "भक्षः" यजमानं मादयति, हर्षयति, तर्पयति तथा। 'विभीदकः' विभेत्ता कोशस्य, 'जागृविः' जागरणकर्त्ता, यो जयति, स हर्षेण जागर्त्ति, योऽपि जीयते स दुःखेन जागर्त्ति। स एषः 'विभीदकः' एवम्प्रकारः 'मह्यम्' 'अच्छान्' "अचच्छदत्" स्वेन फलशब्देन सर्वार्थेषु पुनःपुनः भृशं वा मनः छादयित्वा देवने एवैकस्मिन् मम मनः उत्साहयति ॥

"मौजवतः" सोमः। स कस्मात् ? "मूजवति जातः"। अथ "मूजवान्" कः ? "पर्वतः"। स कस्मात् मूजवान् ? "मुञ्जवान्" मुञ्जैस्तद्वान्।

अथ "मुञ्जः" कस्मात् ? स हि "विमुच्यते इषीकया"।

अथ "इषीका" कस्मात् ? "इषतेः गतिकर्मणः" सा हि निर्गता भवति मुञ्जात्। "इयमपीतरा इषीका एतस्मादेव" या इषीका, अन्या वा, सापि हि निर्गता भवति ॥

"ग्रावाणः" कस्मात् ? "हन्तेः वा" तदर्थोपपत्तेः, व्यापत्त्युपजनाभ्याम्। "गृणातेः वा" स्तुत्यर्थस्य, स्तूयन्ते हि ते। "गृह्णातेः वा" गृह्यन्ते हि ते ॥

"तेषाम्" "एषा" स्तुतिः "भवति"—॥ ८ ॥

प्रैते वंदन्तु प्र व॒यं व॑दाम॒ ग्राव॑भ्यो वाचं॑ वदता॒ वद॑द्भ्यः। यदद्र॑यः पर्वताः॒ साकमा॒शवः॒

श्लोकं घोषं भरथेन्द्राय सोमिनः ॥ प्रवद्-न्वे ते प्रवदाम वयं ग्रावभ्यो वाचं वदत वदद्भ्यो यदद्रयः पर्वता अदरणीयाः सह सोममाशवः क्षिप्रकारिणः श्लोकः शृणोतेर्घोषो घुष्यतेः सोमिनो यूयं स्थेति वा सोमिनो गृहेष्विति वा येन नराः प्रशस्यन्ते स नाराशंसो मन्त्र-स्तस्यैषा भवति ॥ ६ ॥

"प्रैते वदन्तु"—इति । (ऋ० सं० ८, ४, २६, १) । अर्बुद-स्येयमार्षम् । अस्मात् ते 'अद्रयः' "अदरणीयाः" अदरणार्हाः, 'पर्वताः' पर्ववन्तः, 'साकमाशवः' सहभूताः सोममश्नीय, अभि-पुणुय । ते तथाभिपुण्वन्तः 'इन्द्राय' 'श्लोकं' श्रवणीयम्, हृद्यम्, 'घोषं' शब्दं 'भरथ' धारयथ, निर्वर्त्तयथ । ये ते यूयममुना प्रकारेण यस्मात् 'सोमिनः' भवथ । अथवा 'सोमिनः' तद्वतो यजमानस्य "गृहेषु" एवं कुरुध्वे, तस्मात् युष्मानधिकृत्य ब्रवीमि—"प्रैते वदन्तु' युष्मदर्थं स्तुतीः उद्गातारः । 'प्रव-दाम' च 'वयम्' होतारः । अध्वर्य्यूनपि च ब्रूमहे,—एभ्यः 'ग्रावभ्यः' 'वाचं वदद्भ्यः' 'वदत' वाच यावत्कमितान् प्रतीति ॥

"नराशंसः" इति समाम्नातः । कः पुनरेष नराशंसः ? "येन नराः प्रशस्यन्ते, स नाराशंसो मन्त्रः" । किमत्र मन्त्रः स्तूयते ? न इत्युच्यते लक्षणम्, मन्त्रैः नराः स्तूयन्ते । एव-न्तर्हि नराणामिव समाम्नानं प्राप्तमासीत् ? न, तेषां सामान्य-स्तुत्यभावात्, राज्ञाञ्च स्तुत्युपपत्तेः । तेषामपि च सामान्या स्तुतिर्नास्ति, अस्ति त्वेकैकशो न केषाञ्चित्, अतो भावयत्यं

अथ पुनर्युद्धोपकरणानि किमिति स्तुतिं लभन्ते ? इति, —"राजसंयोगात् युद्धोपकरणानि"। युद्धाय उपक्रियन्ते इति युद्धोपकरणानि, युद्धे वा उपकुर्वन्तीति युद्धोपकरणानि। स एष हि व्यापी स्तुतिसङ्क्रमन्याय आचार्य्येणोपदर्शितः। तद्यथा —युद्धोपकरणानि राजसंयोगात् स्तुतिं लभन्ते, तस्य तानि अङ्गानीति तत्सम्बन्धात् स्तूयन्ते,—राजापि यज्ञसंयोगात्,— यज्ञोऽपि देवसंयोगात्,—देवता अध्यात्मसम्बन्धात्, सोऽयमेवात्मे वाङ्गप्रत्यङ्गभावेनावस्थितः सर्वावस्थातः स्तूयत इत्यात्मस्तुतिः सर्वस्थानाधिपतिभागिनी आत्मप्रतिष्ठा बोद्धव्या, तद्योपकरणस्तुतिरिति। एष स्तुतिसंक्रमन्यायः सर्वत्रोपलभ्येयः॥

"तेषां रथः प्रथमागामी भवति"। स कस्मात् ? तदाधारत्वादितरेषां युद्धोपकरणानाम्। "रथः" कस्मात् ? "रंहतेः गतिकर्मणः" तस्य हि तदर्थैवोत्पत्तिः। "स्थिरतेः वा स्याद् विपरीतस्य" स्थिरः सन् रथ इत्युक्तः, तत्र हि स्थिरः सुप्रतिष्ठितो योद्धा भवति, न तथा अश्वादिषु॥

"तस्य" "एषा" "भवति" स्तुतिः—॥ १ (११)॥

वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः। गोभिः सन्नद्धो असि वीळयस्वास्थाता ते जयतु जेत्वानि॥ वनस्पते दृढाङ्गो हि भवास्मत्सखा प्रतरणः सुवीरः कल्याणवीरो गोभिः सन्नद्धो असि वीळयस्वेति संस्तम्भस्वास्थाता ते जयतु जेतव्यानि दुन्दुभिरिति शब्दानुकरणं द्रुमो भिन्न इति वा दुन्दुभ्यतेर्वा स्यात् शब्दकर्मणस्तस्यैषा भवति॥ २ (१२))

"वनस्पते वीड्वङ्गः"—इति (ऋ० सं० ४, ७, ३५, १)। अगस्त्यार्षम्। हे 'वनस्पते' वानस्पत्य ! रथ ! त्वमुच्यसे,— 'वीड्वङ्गः' "दृढाङ्गः" 'भूयाः' "भव"। ततश्च "अस्मत्सखा" अस्मन्मित्रः। 'प्रतरणः' प्रतारणः, संग्रामाणां पारं नेता। 'सुवीरः' "कल्याणवीरः" अविक्लवानयखण्डिताधिष्ठाता भव। किञ्च, कृतप्रतीकारस्त्वमस्माभिः 'गोभिः सन्नद्धः असि' समन्ततो नद्धो बद्धः गव्येन चर्मणा स्नेयाया च। स त्वं कृतप्रतीकारमात्मानं मत्वा तेन हेतुना सुतरामात्मानं 'वीलयस्व' संस्तम्भ हि। संस्तब्धे च त्वय्यवस्थित 'आस्थाता ते' अधिष्ठाता तव योद्धा, यानि तेन 'जेत्वानि' "जेतव्यानि" आत्मनोऽभीप्सितानि, तानि सर्वाणि 'जयतु'॥

"दुन्दुभिः"—इति। अस्य योऽभिधेयः, तस्य "शब्दानुकरणम्" आत्मनो नामधेयप्रतिलम्भनिमित्तम्, यथैवासावभिहन्यमानः शब्दङ्करोति दुन्दुभिरिति तदेव तस्य नाम। "द्रुमो भिन्न इति वा"। द्रुमशब्दात् पूर्वपदम्, भिन्तेरुत्तरपदम्, तत्संभवो ह्यसौ द्रुमैकदेशनिष्कुषितशर्मणा पिनद्ध॥

"तस्य एषा भवति"—॥ २ (१२)॥

उप॑ श्वासय पृथि॒वीमु॒त द्यां पु॑रु॒त्रा ते॑ मनुतां॒ विष्ठि॑तं॒ जग॑त्। स दु॑न्दुभे स॒जूरिन्द्रे॑ण दे॒वैर्दू॒राद्दवी॑यो॒ अप॑ सेध॒ शत्रू॑न्॥

उपश्वासय पृथिवीञ्च दिवञ्च बहुधा ते घोषं मन्यतां विष्ठितं स्थावरं जङ्गमञ्च यत् स दुन्दुभे सहजोषण इन्द्रेण च देवैश्च दूराद् दूरतर-

मपसेध शत्रूनिषुधिरिषूणां निधानं तस्यैषा भवति ॥ ३ (१३) ॥

"उपश्वासय पृथिवीम्"—इति (ऋ॰ सं॰ ४, ७, ३५, ३)। अत आरभ्य सर्वा एता युद्धोपकरणा ऋचः, भारद्वाजस्यार्षम्। हे 'दुन्दुभे!' 'उपश्वासय' उपशब्दय, आपूरय शब्देन एता 'पृथिवीम्' कृत्स्नाम्। 'उत' 'द्याम्'। अपि चैकस्यापि सतस्तव 'पुरुत्रा' बहुत्वे वर्त्तमानस्य 'मनुताम्' "मन्यताम्" "घोषम्"। यच्चेदं 'विष्ठितं' "स्थावरम्" यच्चेदं "जगत्" "जङ्गमञ्च"। यस्यैवं तव सामर्थ्यं द्यावापृथिव्यावापूरयितुम्, 'सः' त्वम् 'दुन्दुभे!' 'सजूः' "सहजोषणः" सहप्रीतिः 'इन्द्रेण' "च" अन्यैः "च" 'देवैः'। 'दूरात्' 'दवीयः' "दूरतरम्" 'अपसेध' अपकालय अपुनरागमनाय 'शत्रून्' अस्मच्छत्रून्।—इत्येतदाशास्महे त्वत्त. ॥,

"इषुधि."="इषूणा निधानम्" तूण', तस्मिन्निषवो निधीयन्ते ॥ "तस्य एषा भवति"—॥ ३ (१३) ॥

बह्वीनां पिता बहुरस्य पुत्रश्चिश्चाकृणोति समनावगत्य। इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥ बह्वीनां पिता बहुरस्य पुत्र इतीषूनभिप्रेत्य प्रस्मयत इवापाव्रियमाणः शब्दानुकरणं वा सङ्काः सचतेः सम्पूर्वाद्वा किरतेः पृष्ठे निनद्धो जयति प्रसूत इति व्याख्यातं हस्तघ्नो हस्ते हन्यते तस्यैषा भवति ॥ ४ (१४) ॥

"बह्वीनां पिता"—इति (ऋ० सं० ५, १, १८, ५)। योऽयमिषुधिः 'बह्वीनां' "बह्वनाम्" इषूणां 'पिता' पाता रक्षिता, तदर्थत्वात्। यस्य चेषुधेः 'बहुः' इषुकलापः 'पुत्रः' पुरुषो बहुनः त्राता, तदर्थं ह्यसौ रचत इत्येवं व्युत्पाद्यम्। यश्चायं 'चिश्चाकृणोति' "प्रस्मयत इव अपव्रियमाणः" प्रकर्षेण स्मयत इव उद्घाट्यमानः, चित्रपुङ्खत्वात्। अथवा हसतीव शोभया पुङ्खदीप्त्या। अस्मिन् पक्षे चिश्चातिरपठितोऽपि धातुः कल्प्यत इति, विकारपक्षेषु तदर्थान्यधातूपादानम्—इत्याचार्य्यपरिभाषा। अथ "चा" "शब्दानुकरणम्" चिश्चिदित्येवं शब्दं करोति। कदा? 'समना' संग्राममवगत्य प्राप्य। स एष इषुधिः 'सङ्काः' सङ्कटान् सम्पृक्तान् वा संग्रामान् 'पृतनाः च सर्वाः' याः स्पर्द्धमानैः इषव एव केवलमभिलक्ष्य क्षिप्यन्ते पताकार्थम्, तानेवंविधान् संग्रामान् 'पृष्ठे' रथस्य, मनुष्यस्य वा 'निनद्धः' 'जयति प्रसूतः' क्षिप्तो धनुष्मता।—इत्येतदाशास्महे॥

"हस्तघ्नः"=कलापीपट्टकः, गोधेति च यमाहुः। स कस्मात्? "हस्ते" ह्यवस्थितोऽसौ ज्यया "हन्यते"॥

"तस्य एषा भवति"—॥ ४ (१४)॥

अहिरिव भोगैः पर्य्येति बाहुं ज्याया हेतिं परिबाधमानः। हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमांसं परिपातु विश्वतः॥ अहिरिव भोगैः परिवेष्टयति बाहुं ज्याया वधात् परित्रायमाणो हस्तघ्नः सर्वाणि प्रज्ञानानि प्रजानन् पुमान् पुरुमना भवति पुंस-

तेऽभीशवो[१] व्याख्यातास्तेषामेषा भवति ॥ ५ (१५) ॥

"अहिरिव भोगैः"—इति (ऋ० सं० ५, १, २१, ४)। योऽयम् 'अहिरिव भोगैः' सर्प इव कुटिलभावैः, सर्पशरीरस्य बाहुं सर्पेणेव 'पर्य्येति' "परिवेष्टयति" 'बाहुम्' धनुष्मतः पुरुषस्य । "ज्याया हेतिं परिबाधमानः" । "ज्याया बधात्" ज्याघाताद् ,बाहुं सर्वतस्त्रायमाणः तदर्थत्वात् तस्य । सोऽयमेवन्धर्मा 'हस्तघ्नः' 'पुमान्' इव पुरुमना इव, कश्चिदासः प्रज्ञानबहुलः 'पुमांसम्' एतं धनुष्मन्तम् 'परिपातु विश्वतः' सर्वप्रकारं सर्वतः पातु ।—इत्येतदाशास्महे ॥

स्त्रियमपेक्ष्याल्पमनस्कां पुरुषे बहुतरं मनः "पुंसतेः वा" पुरुषार्थस्य, पौंस्यमिति बलनाम भवति ।

"अभीशवः"—इति वक्तव्यम् । ते पुनरमी "व्याख्याताः" अभिधानतोऽभिधेयतश्च—"अभीशवोऽभ्यश्नुवते"—इति ॥

"तेषाम् एषा भवति"—॥ ५ (१५) ॥

रथे तिष्ठन्नयति वाजिनः पुरो यत्र यत्र कामयते सुषारथिः । अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः ॥ रथे तिष्ठन्नयति वाजिनः पुरस्तात् सतो यत्र यत्र कामयते सुषारथिः कल्याणसारथिरभीशूनां महिमानं पूजयामि मनः पश्चात् सन्तोऽनुयच्छन्ति रश्मयो धनुर्धन्वतेर्गतिकर्मणो वधकर्मणो वा धन्वन्त्यस्मादिषवस्तस्यैषा भवति ॥ ६ (१६) ॥

"रथे विष्ठन्नयति वाजिनः"—इति (ऋ० सं० ५, १, २०, १)। यदेतत् 'रथे' 'तिष्ठन्' वर्त्तमानः 'सुसारथिः' "कल्याण-सारथि" सुशिक्षितोऽपि सारथिः, नेता रथस्य 'वाजिनः' 'पुरः' "पुरस्तात्" अग्रतः "सतः" रथयुक्तान्, रथस्य नीडे 'पश्चात्' सन् उपतिष्ठमानस्तिष्ठन्। क्व? 'यत्र यत्र कामयते' यत्र यत्र-च्छति योद्धा, तत्र तत्र 'नयति'। तदेतत् किं सारथेर्माहाभाग्यम्? न-इत्युच्यते, अनभीशूको हि सारथिः किं कुर्यात् सुशिक्षितोऽपि? एवम् 'अभीशूनाम्' एत 'महिमानं' माहाभाग्य 'पनायत' पूजयामि। यत् 'मनः' अश्वानामतिप्रवृद्ध-जवानामपि, येषु अश्वेषु उपनिबद्धाः 'रश्मयः' प्रगृहीताः सारथिना 'पश्चात्' "सन्तः" 'अनुयच्छन्ति' उपरमयन्तीत्यर्थः। सम्बोध्याभावात् पनायतेत्यस्य पूजयामीति पुरुषवचन-व्यत्ययः॥

"धनुः" "धन्वतेः" गत्यर्थस्य, तद्बलेन हीषवो गच्छन्ति। "वधकर्मणो वा" शत्रुवधाय हि तदुत्पद्यते॥

"तस्य एषा भवति"—॥ ६ (१६)॥

धन्व॑ना॒ गा धन्व॑ना॒जिं ज॑येम॒ धन्व॑ना॒ ती॒व्राः स॒मदो॑ जयेम। धनुः शत्रो॑रपका॒मं कृ॑णोति॒ धन्व॑ना॒ सर्वाः॑ प्र॒दिशो॑ जयेम॥ इति सा निगदव्याख्याता समदः समदो वात्तेः सम्मदो वा मदतेर्वा जयतेर्वा जिनातेर्वा प्रजावयती-ष्ठ्विति वा तस्या एषा भवति॥ ७ (१७)॥

"धन्वना गा."—इति (ऋ० सं० ५, १, १८, १)। ता 'गा.' 'धन्वना' धनुषा वयम् अरिभ्य. 'जयेम'। अपि च

'धासिम्'। इतरेतरस्पर्द्धया यत्र लक्ष्यवेधश्चैव कौशलमित्यवः क्षिप्यन्ते वेतव्येन प्रतापार्थं वा तम् 'धासिम्' धाजवनं धनुषैव जयेम। अपि च याः 'तीव्राः' दारुणाः 'समदः' संग्रामाः, अनेकशस्त्रसम्पातसङ्कटाः, अनेकवीरपुरुषाकीर्णाः, ताः अपि वय 'जयेम' 'धन्वना' 'धनुषैव'। अपि च किं बहुना समासत एव ब्रूमः—'धनुः शत्रोः अपकामं करोति' यत्र यत्र शत्रुरस्मान् जेतुकामः स्यात्, ततस्ततोऽपगतकाममस्मत्तो धनुः करोतु। अपगतकामे च तस्मिन् शत्रौ वय 'धन्वना' धनुषैवैताः 'सर्वाः' दिशः, "प्रदिशः" च 'जयेम'।—इत्येतदाशास्महे॥

"समदः समदो वा, सम्मदो वा"। सम्पूर्वस्य "अत्ते." भक्षणार्थस्य, भक्षित इव हि तत्र परस्परत.। "मदतेर्वा" हर्षणार्थस्य द्वितीयम्—सम्मदो वेति, सह्रष्टास्तत्र हि परस्परतो युध्यन्ते॥

"ज्या"—इति व्याख्यम्। सा पुनरियं "जयतेर्वा जिनातेर्वा"। धात्वन्वत्वसर्थकत्वम्। तद्वलेन हि जीयते। स पुनरेष धनुर्गुणः॥

"तस्या एषा भवति"—॥ ७ (१७)॥

वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना। योषेव शिङ्क्ते वितताधि धन्वञ् ज्या इयं समने पारयन्ती। वक्ष्यन्तीवागच्छति कर्णं प्रियमिव सखायमिषु परिष्वजमाना योषेव शिङ्क्ते शब्दं करोति विततााधि धनुषि ज्येयं समने संग्रामे पारयन्ती पारं

नयन्ती इषुरीषतेर्गतिकर्मणो वधकर्मणो वा तस्यैषा भवति ॥ ८ (१८) ॥

"वक्ष्यन्तीव"—इति (ऋ० स० ५, १, १८, ३)। येयं योषिदिव काचित् कस्मैचिदिष्टाय पुरुषाय किञ्चिद् रहस्य 'वक्ष्यन्ती इव' कथयिष्यन्तीव ज्या, धनुष्मता पुरुषेण इषु' चिक्षिपता सव्येन दक्षिणेन वा पाणिना क्रष्यमाणा सव्यं दक्षिणं वा 'कर्णं' प्रत्याक्रष्यते। धनुष्मता तथा मध्यम् आत्मनो निनीय इषु 'गनीगन्ति' "आगच्छति"। कथम्? इति। "प्रियं सखाय परिषस्वजाना" 'प्रियम्' इष्टं काचित् 'सखायं' समानख्यानम् उपजातप्रीतिम्, स्त्रीपुरुषमिव इषुम् "परिष्वजमाना" समीपत्वर्थ एव, सस्वजानेत्यभ्यासोऽनर्थकः, अर्थविशेषाभावात्। यथा हि सा कर्णं प्रत्याक्रष्यते धनुष्मता, तथा मध्यमात्मनो निनीयेषु' परिष्वजत इव। किमेतावदेव? न इत्युच्यते,—या च इय 'योषा इव शिङ्क्ते' योषिदिव, विदग्धा काचित् कामिना पुरुषेण आलान प्रत्याक्रष्यमाणोपजायमानपरितोषा कामिन. पुरुषस्य हर्षमुत्पादयन्ती 'शिङ्क्ते' सुकुमारमव्यक्तशब्द करोति। 'वितताधिधन्वन्' धनुषि अध्यारोपिता, सेयम् अस्माकमेवमादिगुणयुक्ता 'ज्या' 'समने' "संग्रामे" 'पारयन्ती' अस्तु, "पारम्" अन्तं "नयन्ती" अस्तु शत्रूणाम् ।—इत्येतदाशास्महे ॥

"इषुः"—इति। एतत् "ईषतेः गतिकर्मणः" तदर्थमेवावगत्यते, वधार्थस्य वा, तदर्थमेव ह्यसौ गच्छति ॥

"तस्य एषा भवति"—॥ ८ (१८) ॥

सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा

पतति प्रसूता । यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन् ॥ सुपर्णं वस्त इति वाजानभिप्रेत्य मृगमयोऽस्या दन्तो मृगयतेर्वा गोभिः सन्नद्धा पतति प्रसूतेति व्याख्यातं यत्र नराः सन्द्रवन्ति च विद्रवन्ति च तत्रास्मभ्यमिषवः शर्म यच्छन्तु शरणं संग्रामेष्वश्वाजनी कशेत्याहुः कशा प्रकाशयति भयमश्वाय कृष्यतेर्वाणुभावाद्वाक् पुनः प्रकाशयत्यर्थान् खशया क्रोशतेर्वाश्वकशायां एषा भवति ॥ ९ (१९) ॥

"सुपर्ण वस्ते"—इति (ऋ० सं० ५, १, २१, १)। य एते 'सुपर्णं' 'वस्ते' वमतेऽङ्गार्हे "वाजान्" 'इषवः' । येषां च एतेषां 'मृगः' "मृगमय." 'दन्तः' यदि मार्गाणि फलानि, अमार्गेषु वा व्यधनस्वभावात् मार्गयन्तीव,—किं नु तद् वेद्धव्य स्यात् यदहं विद्धेयमिति। ये चेमे 'गोभिः सन्नद्धाः' गव्येन स्नाव्ना श्लेष्मणा च समन्ततो बद्धाः, 'पतति' गच्छन्ति, धनुषता 'प्रसूताः' क्षिप्ताः। त एवमादिगुणयुक्ताः 'इषवः' 'यत्र' यस्मिन् संग्रामे 'नरः' नराः मनुष्याः 'संद्रवन्ति' सङ्गच्छन्ति 'च' 'विद्रवन्ति च' पुनर्विगच्छन्ति, 'तत्र' अस्मभ्यं 'शर्म' "शरणं" सुखं जयनिमित्तं 'यंसन्' "यच्छन्तु" ददतु।—इत्येतदाशास्महे ॥

"अश्वाजनी"—इति, एतत् पदम्; तां पुनरेतां "कशा—इत्याहुः"। अश्वाजनीत्येतत् न निर्वक्तव्यम्, प्रत्यक्षमित्यादरा। अथ "कशा" कस्मात्? सा हि "प्रकाशयति" प्रख्यापयति "भयम् अश्वाय"। "कृष्यतेः वा अणुभावात्" अप-

क्लृप्ता हि सा भवति चर्मणोऽग्नौ। "वाक्" अपि कथा वल्गु-च्यते, सा "पुनः प्रकाशयत्यर्थान्" इति। अथवा "ख्यया" वाक्, खे सुखाकाशे शेते इति। "क्रोशति, वा" शब्दार्थस्य॥

या त्वङ्गकथा, तस्या "एषा भवति"—॥ ९ (१९)॥

आञ्जन्ति सान्वेषां जघना उपजिघ्नते।
अश्वाजनि प्रचेतसोऽश्वान् समत्सु चोदय॥

आघ्नन्ति सानून्येषां सरणानि सक्थीनि सक्थिः सचतेरासक्तोऽस्मिन् कायो जघनानि चोपघ्नति जघनं जङ्घन्यतेरश्वाजनि प्रचेतसः प्रवृद्धचेतसोऽश्वान् समत्सु समरणेषु संग्रामेषु चोदयोलूखलमुलूकरं वोर्ध्वखं वोर्करं वोरु मे कुर्वि-त्यब्रवीत्तदुलूखलमभवदुरुकरं वैतत्तदुलूखल-मित्याचक्षते परोक्षेणेति च ब्राह्मणं तस्यैषा भवति॥ १० (२०)॥

"आजंघ्नन्ति सान्वेषाम्"—इति (ऋ० सं० ५, ६, २१, ३)। 'आजङ्घन्ति'—इति शतरि सम्बोधनम्। हे 'अश्वा-जनि।' 'आजङ्घन्ति।' 'सानु' "सानूनि" 'एषाम्' "सर-णानि" समुच्छ्रितानि "सक्थीनि" कटिप्रदेशान् 'जघना उपजिघ्नते।' "जघनानि" स्फिग्देशा, तान् हे अश्वाजनि! उपजिघ्नति। इदमपि शतर्य्येव। रथ्याना हि कटिप्रदेश-मश्वाजन्याभिहंसि, पत्त्याना स्फिग्देशान्। हे 'अश्वाजनि।' (या त्वमेवमभिहंसि' सा त्वमेतान् 'अश्वान्' 'प्रचेतसः' "प्रकृष्टचेतसः" गमनं प्रति समुत्सुकान् 'समत्सु' "समरणेषु"

संग्रामेषु तथा 'चोदय' यथा जयेयम् ।—इत्येतदाशास्महे ॥

"सानूनि=सक्थीनि" तानि पुनः "सरणानि" तद्बलेन हि सरन्ति सर्त्तारः । "सक्थिः" कस्मात् ? "सचतेः" । किमस्मिन् सक्तम् ? "आसक्तोऽस्मिन्" "कायः" इत्यर्थः शरीरम् । "जघनम्" कस्मात् ? तद्धि "जङ्घन्यते" भृशं हन्यते कशया ॥

"उलूखलम्"—इति, एतत् पदम् । तत् कस्मात् ? तद्धि उरुकरत्वात् "उरुकरम्" बहुलम् करोति, उरुशब्दात् पूर्वपदम्, करोतेरुत्तरपदम् । "ऊर्कर वा" ऊर्क् शब्दात् पूर्वपदम्, करोतेरेवोत्तरपदम्, ऊर्ज एव हि कारणार्थं तदुत्पद्यते । "ऊर्ध्वखं वा" ऊर्ध्वशब्दात् पूर्वपदम्, खशब्दादुत्तरपदम् ऊर्ध्वमेव हि तस्य खात भवति । अथवा "ऊरु मे कुरु—इत्यब्रवीत् तदुलूखलमभवत्" । यत् किल क्रियमाणं ऊरु मे त्व कुर्वित्यब्रवीदिव, तथागुणयुक्तत्वात् तस्य । ब्राह्मणमपि च भवति—"उरुकरं वै तत्तदुलूखलमित्याचक्षतेऽपरोक्षेण" उरु करोतीत्युरुकार-मेतत् प्रत्यक्षमव्यवहितगुणविधानम् । तत् पुनरेतत् परोक्ष्य-त्वे न व्यवहितगुणमुच्यते उलूखलमिति ॥

"तस्य" "एषा" स्तुतिः "भवति"—॥ १० (२०) ॥

यच्चि॒द्धि त्वं गृ॒हेगृ॑ह॒ उलू॑खलक यु॒ज्यसे॑ । इ॒ह द्यु॒मत्त॑मं वद॒ जय॑तामिव दुन्दु॒भिः । इति सा निगद्व्याख्याता ॥ ११ (२१) ॥

इति नवमाध्यायस्य द्वितीयः पादः ॥ ९, २ ॥

"यच्चिद्धि त्व गृहे गृहे"—इति (ऋ० सं० १,२,२५,५)। इन्द्रोपस्थानम् । "घ्राणौ सोमपातमा"—इति च । सोमाः

भिषवे विनियोग । अभिमन्त्र चोपधीयते अग्निचयने । हे 'उलूखलक ।' 'युज्यसे' । यद्यपि त्वम् अन्नसंस्कारार्थं 'गृहे गृहे' युज्यसे, तथापि त्वम् 'इह' एव अस्मद्गृहे 'द्युमत्तमं' दीप्तिमत्तमम् गम्भीरम् (अन्नैर्बहुभिः सक्रियमाणैः) शब्दं 'वद' । कथम् ? "जयतामिव दुन्दुभि" ये हि जयन्ति, तेषामितदेव जयस्य पूर्वरूप भवति गम्भीरस्वरो दुन्दुभि, ये पुनर्जीयन्ते, तेषां रूक्षस्वर इति ॥ ११ (२१) ॥

इति ऋज्वर्थाया निरुक्तवृत्तौ चतुर्दशाध्यायस्य
(नवमाध्यायस्य) द्वितीय पाद ॥ ९, २ ॥

तृतीय पाद ॥

वृषभः प्रजां वर्षतीति वातिबृहति रेत इति वा तद् वृषकर्मा वर्षणाद् वृषभस्तस्यैषा भवति ॥ १ (२२) ॥

"वृषभ" कस्मात् ? स हि "प्रजा वर्षति" प्रजोत्पत्तिकारण रेत सिञ्चति योनौ । "अतिबृहति रेत इति वा" रेत सेक्तुमतिशयेनासावात्मानमुद्यच्छति । "तद् वृषकर्मा, वर्षणात् वृषभ" । तेनास्य वृषकर्मणा रेतोवर्षलक्षणेन गौरप्यतिशयेन यो युक्तोऽसावपि 'वृषणात्' रेतोवर्षणाद्धेतो भकारमुपजनीकृत्वा वृषभ इत्युच्यते ॥

"तस्य" गोवृषभस्य "एषा" स्तुति "भवति"—॥ १ (२२) ॥

न्यक्रन्दयन्नुपयन्त एनममेहयन् वृषभं मध्य आजेः । तेन सूभर्वं शतवत् सहस्रं गवां मुद्गलः प्रधने जिगाय ॥ न्यक्रन्दयन्नुपयन्त एन-

मिति व्याख्यातममेहयन् वृषभं मध्य आजेरा-जयनस्याजवनस्येति वा तेन तं सूभर्वं राजानं भर्वतिरत्तिकर्मा तद्वा सूभर्वं सहस्रं गवां मुद्गलः प्रधने जिगाय प्रधन इति संग्रामनाम प्रकीर्णा-न्यस्मिन् धनानि भवन्ति द्रुघणो द्रुममयो घन-स्तत्रेतिहासमाचक्षते मुद्गलो भार्म्यश्व ऋषिर्वृ-षभञ्च द्रुघणञ्च युक्त्वा संग्रामे व्यवहृत्याजिं जिगाय तदभिवादिन्येषर्ग् भवति ॥ २(२३) ॥

"न्यक्रन्दयन्नुपयन्त एनम्"—इति (ऋ० स० ८, ५, २०, ५)। एव तावत् "व्याख्यातम्" प्रतिपदम्, एकवाक्यतया तु मन्त्रस्य व्याख्येयमिति। मन्त्रदृग् ब्रवीति,—यत वृषभकेणाजेर्पोऽस्त्वमेन राजानमिति। तत्र मे शृणुत।—यम् 'एनम्' 'आजे' शरपथस्य संग्रामस्य 'मध्ये' वर्त्तमानं 'वृषभम्' 'न्यक्रन्दयन्' 'उपयन्त' उपयन्ति, न्यक्रन्दयत एन कृ जना। फुत्कारवन्त कारयतीति, उपयन्ति उपगच्छन्ति परिवृत्णन्ति। 'अमेहयन्' मेहयन्तश्च त सुमूत्रे स्थीयताम, यावदय सक्कम्न करोति ततो न स्वस्थ भविष्यतीति, स हि गोमिना माजिघता स्वभाव। 'तेन' अमुना वृषभेण 'सूभर्वं' सुभग शोभनभोग "राजानम्" "तद्वा" 'सुभग' सुखयस्तदेश सम्बम्, ग्रतयत' शतैस्तादृशाङ्गाकाम, 'सहस्रं 'गवां' दश-शतानि, यद्वा, असङ्ख्य बहु। किम्? इति। 'मुद्गल' ऋषस् 'प्रधने' संग्रामे धन प्रतिस्पर्द्धया विजिगीषोराचयो प्रवृत्तायाविहिकाया 'जिगाय' जितवानिति ॥

"द्रुघण" इति, एतत पदम। स पुनरेष "द्रुममयो घन"। द्रुप्रकृति, तत्प्रकृतिवचने मयट्, द्रुशब्दात् पूर्वपदम, घनशब्दादुत्तरपदम, मुद्गरोऽभिधेय ॥

"तत्रेतिहासमाचक्षते"—इति। स्तुतिलाभनिमित्तमुभयोरप्येकमेव वृषभद्रुघणयो—"भार्म्यश्व ऋषिरित्येवमादि। स किल द्वितीयगोरभावात राज्ञा सह प्रतिस्पर्द्धमान ऐश्वर्यादन्वादिश्य "द्रुघण" वृषभेण सह "युक्त्वा" राज्ञा सहाजि ससर्प, स च त "जिगाय" जितवान्।

यथा चैतदेवम, तस्यार्थस्य अभिवादिनी "एषा ऋग् भवति"—॥ २ (२३)॥

इमन्तं पश्य वृषभस्य युञ्जं काष्ठाया मध्ये द्रुघणं शयानम्। येन जिगाय शतवत् सहस्रं गवां मुद्गलः पृतनाज्येषु ॥ इमन्तं पश्य वृषभस्य सहयुजं काष्ठाया मध्ये द्रुघणं शयानं येन जिगाय शतवत् सहस्रं गवां मुद्गलः पृतनाज्येषु पृतनाज्यमिति संग्रामनाम पृतनानामजनाद्वा जयनाद्वा मुद्गलो मुद्गवान् मुद्गगिलो वा मदनङ्गिलतीति वा मदङ्गिलो वा मुदङ्गिलो वा भार्म्यश्वो भृम्यश्वस्य पुत्रो भृम्यश्वो भृमयोऽस्याश्वा अश्वभरणाद्वा पितुरित्यन्ननाम पातेर्वा पिबतेर्वा प्यायतेर्वा तस्यैषा भवति ॥ ३ (२४)॥

मिति व्याख्यातममेहयन् वृषभं मध्य आजेरा-
जयनस्याजवनस्येति वा तेन तं सुभर्वं राजानं
भर्वतिरत्तिकर्मा तद्वा सुभर्वं सहस्रं गवां मुद्गलः
प्रधने जिगाय प्रधन इति संग्रामनाम प्रकीर्णा-
न्यस्मिन् धनानि भवन्ति द्रुघणो द्रुममयो घन-
स्तत्रेतिहासमाचक्षते मुद्गलो भार्म्यश्व ऋषिर्वृ-
षभञ्च द्रुघणञ्च युक्त्वा संग्रामे व्यवहृत्याजिं
जिगाय तदभिवादिन्येषर्ग् भवति ॥ २(२३) ॥

, "न्यक्रन्दयन्नुपयन्त एनम्"—इति (ऋ० सं० ८, ५, २०, ५)। एव तावत् "व्याख्यातम्" प्रतिपदम्, एकवाक्यतया तु मन्त्रस्य व्याख्येयमिति। मन्त्रदृग् ब्रवीति,—यत् वृषभकेणाजैषीत्स्वमेनं राजानमिति। तत्र मे शृणुत।—येम् 'एनम्' 'आजे' शरपथस्य संग्रामस्य 'मध्ये' वर्त्तमानं 'वृषभम्' 'न्यक्रन्दयन्' 'उपयन्त' उपयन्ति, न्यक्रन्दयत एनं हे जना ! फुत्कारवन्तं कारयतेति, उपयन्ति उपगच्छन्ति परिवृण्वन्ति। 'अमेहयन्' मेहयन्तश्च न मुहूर्तं स्थीयताम्, यावदयं सक्रम्मूत्र करोति ततो न स्वासुख भविष्यतीति, स हि गोमिना माजिस्तता स्वभाव। 'तेन' अमुना वृषभेण 'सुभर्वं' सुभग शोभनभोग "राजानम्" "तद्वा" 'सुभर्गं' सुयवसदेश सवत्सम्, 'शतवत्' शतसहस्रसङ्ख्यापन्नम्, 'सहस्रं' 'गवां' दशशतानि, यद्वा, असङ्ख्य बहु। किम्? इति। 'मुद्गल' ऋषिम, 'प्रधने' संग्रामे धनं प्रतिस्पर्द्धया विजिगीषोरावयोः प्रवृत्तयोर्वाधिकाया 'जिगाय' जितवानिति ॥

"द्रुघणः" इति, एतत् पदम् । स पुनरेषः "द्रुममयो घनः"। द्रुमप्रकृतिः, तत्प्रकृतिवचने मयट्, द्रुमशब्दात् पूर्वपदम्, घनशब्दादुत्तरपदम्, मुद्गरोऽभिधेयः ॥

"तत्रेतिहासमाचक्षते"—इति । स्तुतिलाभनिमित्तमुभयोरप्येकमेव वृषभद्रुघणयोः—"भार्म्यश्वऋषिरित्येवमादि । स किल द्वितीयगोरभावात् राज्ञा सह प्रतिस्पर्द्धमानः ऐश्वर्य्यादन्यादिश्य "द्रुघण" वृषभेण सह "युक्त्वा" राज्ञा सहाजिं ससर्प, स च तं "जिगाय" जितवान् ।

यथा चैतदेवम्, तस्यार्थस्य अभिवादिनी "एषा ऋग् भवति"—॥ २ (२३) ॥

इमन्तं पश्य वृषभस्य युञ्जं काष्ठाया मध्ये द्रुघणं शयानम् । येन जिगाय शतवत् सहस्रं गवां मुद्गलः पृतनाज्ये॑षु ॥ इमन्तं पश्य वृषभस्य सहयुजं काष्ठाया मध्ये द्रुघणं शयानं येन जिगाय शतवत् सहस्रं गवां मुद्गलः पृतनाज्येषु पृतनाज्यमिति संग्रामनाम पृतनानामजनाद्वा जयनाद्वा मुद्गलो मुद्गवान् मुद्गगिलो वा मदनं गिलतीति वा मदङ्गिलो वा मुदङ्गिलो वा भार्म्यश्वो भृम्यश्वस्य पुत्रो भृम्यश्वो भृमयोऽस्याश्वा अश्वभरणाद्वा पितुरित्यन्ननाम पातेर्वा पिबतेर्वा प्यायतेर्वा तस्यैषा भवति ॥ ३ (२४) ॥

"इमं तं पश्य वृषभस्य"—इति (ऋ० सं० ८, ५, २१, ४)। जितायामाजौ अवसिताजिमरणमाज्यन्त एवापविद्धं मुद्गरो मुद्गलः केनचित् पृष्टः,—केन सह युक्तः वृषभेणेमं राजानमजैषी-रिति? स तमुपदिशन्नेव द्रुघणमाज्यन्ते तस्मिन्नपविद्ध-मसावन्नमिव कुत्सयन् राजानमनयर्चा तस्मै प्रत्याचष्टे,— इमन्तं पश्य येनाजैषमिति। 'वृषभस्य' 'युञ्जम्' "सहयुजम्"। क्व वर्त्तमानम्? 'काष्ठायाः' आज्यन्तस्य 'मध्ये' 'द्रुघणं' 'शयानम्' अपविद्धम्। "येन जिगाय शतवत्सहस्रम्"—इति व्याख्यातम् (१८४ पृ० २० पं०)॥

"पृतनाज्यम्—इति संग्रामनाम"। तत् कस्मात्? "पृत-नानाम् अजनाद्वा" पृतनाः मनुष्याः, ते यस्मिन्नजन्ति गच्छन्ति, पृतनाशब्दात् पूर्वपदम्, अजतेरुत्तरपदम्। "जय-नाद्वा" तत्रोत्तरपदे विकल्पयन्ति, ते हि तत्र जयन्ति। "मुद्गलः="मुद्गवान्"। लो मत्वर्थे। अथ "वा" "मुद्गगिलः"। मुद्गभोजनप्रायः, मुद्गशब्दात् पूर्वपदम्, गिलशब्दात् उत्तरपदम्। "मदनं गिलति इति वा" मदनः कामः, तमसौ गिलति वशीकरोति, जितेन्द्रिय इत्यर्थः; मदनशब्दात् पूर्वपदम्, गिलतिशब्दात् उत्तरपदम्। "मदङ्गिलः वा" मद उद्रेकः, तमसौ गिलति, उपशमं इत्यर्थः। "मुदं गिलः वा" हर्षं मसौ गिलति, निहन्त इत्यर्थः। "भार्म्यश्वः—भृम्यश्वस्य पुत्रः"। "भृम्यश्वः" पुनः "अश्वयोऽस्याद्भृताः" अनवस्थायिनः। "अश्वभरणात् वा" बिभर्त्ति वासावश्वान्॥

"पितुः—इति" एतत् पञ्चम्यम्। तत् पुनरेतत् "अन्न-नाम"। तत् कस्मात्? "पातेः वा" रक्षणार्थस्य, "पिबतेः वा" पानार्थस्य॥

"तस्य एषा भवति"—॥ १ (२४)।

पि॒तुं नु स्तो॑षं म॒हो ध॒र्माणं॒ तवि॑षीम्।
यस्य॑ त्रि॒तो व्योज॑सा वृ॒त्रं विप॑र्वम॒र्दय॑त्॥ तं पितुं स्तौमि महतो धारयितारं बलस्य तविषीति बलनाम तवतेर्वा वृद्धिकर्मणो यस्य त्रित ओजसा बलेन त्रितस्त्रिस्थान इन्द्रो वृत्रं विपर्वाणं व्यर्दयति नद्यो व्याख्यातास्तासामेषा भवति॥ ४ (२५)॥

"पि॒तुं नु स्तो॑षम्"—इति (ऋ० सं० २, ५, ६, १)। अगस्त्यस्यार्षम्। 'यस्य' पितोः 'ओजसा' बलेन बलाधिपतिरपीन्द्र, 'त्रित' "त्रिस्थान" त्रिषु स्थानेष्वप्रतिहतप्रभाव। 'वृत्र' मेघम्, 'विपर्वं' विगतपर्वाणम् विगतसन्धिबन्धन इत्वा 'वि अर्दयत्' विविधमर्दयति अपुनरावृत्तये। "त" 'पितुम्' अन्नमहं 'तविषी' तविषीसम्नकस्य 'महः' "महत" बलस्य 'धर्माण' "धारयितार" 'स्तोषम्' "स्तौमि"। को हि नाम न तत् स्तुयात् यस्मादृते त्रिलोकाधिपतिरपीन्द्रः किञ्चिदप्यशक्तः कर्तुमित्यभिप्राय। "तविषीति बलनाम" "तु वृद्धौ"—इत्यस्य, तद्धि सर्ववस्तुभ्यो ज्यायः॥

"नद्य" अवसरप्राप्ता, ता पुनरेताः "व्याख्याता."—"नदना भवन्ति शब्दवत्य"—इति।

"तासाम् एषा भवति"—॥ ४ (२५)॥

इ॒मं मे॑ गङ्गे यमुने सरस्वति॒ शुतु॑द्रि॒ स्तोमं॑ सचता॒ परु॒ष्ण्या। असि॒क्न्या म॑रुद्वृधे

वितस्तयार्जीकीये शृणुह्या सुषोमया ॥ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि परुष्णि स्तोममासेवध्वमसिक्न्या च सह मरुद्वृधे वितस्तया चार्जीकीय आशृणुहि सुषोमया चेति समस्तार्थोऽथैकपदनिरुक्तं गङ्गा गमनाद्यमुना प्रयुवती गच्छतीति वा प्रवियुतं गच्छतीति वा सरस्वती सर इत्युदकनाम सर्त्तेस्तद्वती शुतुद्री शुद्राविणी क्षिप्रद्राविण्याशु तुन्नेव द्रवतीति वेरावतीं परुष्णीत्याहुः पर्ववती भास्वती कुटिलगामिन्यसिक्न्यशुक्लासिता सितमिति वर्णनाम तत्प्रतिषेधोऽसितं मरुद्वृधाः सर्वा नद्यो मरुत एना वर्द्धयन्ति वितस्ताविदग्धा विवृद्धा महाकूलार्जीकीयां विपाडित्याहुरृजीकप्रभवा वर्जुगामिनी वा विपाड्विपाटनाद्वा विपाशनाद्वा विप्रापणाद्वा पाशा अस्यां व्यपाश्यन्त वसिष्ठस्य मुमूर्षतस्तस्माद्विपाडुच्यते पूर्वमासीदुरुञ्जिरा सुषोमा सिन्धुर्यदेनामभिप्रसुवन्ति नद्यः सिन्धुः स्यन्दनादार्प आप्नोतु स्वार्षामेषा भवति ॥ ५ (२६) ॥

"इमं मे गङ्गे यमुने"—इति (ऋ० स० ८, ३, ६, ५)।

हे 'मरुद्वृधे !'—'गङ्गे !' (१), 'यमुने !' (२), 'सरस्वति !' (३), शतुद्रि !' (४) यूयम् 'इमम्' 'मे' मम 'स्तोमम्' 'सचत' "आसेवध्वम्"। 'परुष्णा' (५) सह 'मरुद्वृधे' 'आर्जीकीये !' (६) त्वमपि 'असिक्न्या' (७) 'वितस्तया' (८) 'सुषोमया' (९) च सह 'आशृणुहि' आभिमुख्येन स्थित्वा शृणुहि —"इति समस्तार्थः"। एवं सर्वत्र पूर्वं समस्तार्थो वक्तव्य इत्युपप्रदर्शनार्थम् ॥

"अथैकपदनिरुक्तम्"।—"गङ्गा, गमनात्" सा हि विशिष्टं स्थानं गच्छति, गमयति वा प्राणिनो विशिष्टं स्थानमिति गङ्गा (१)। "यमुना, प्रयुवती गच्छति" प्रकर्षेण मिश्रयन्त्याभिः नदीभिः स्वान्युदकानि गच्छति। "प्रवियुतं गच्छतीति वा" स्तिमितमिव तरङ्गैर्गच्छति (२)। "सरस्वती" "सर इत्युदकनाम" तत् कस्मात् ? "सर्त्तेः" "सृ गतौ—इत्यस्य, तेन सरसा विशिष्टेन "तद्वती" विज्ञायते हि राजसूये सारस्वतीनामपामभिषेकार्थवादः—"वरुणस्य वा अभिषिच्यमानस्येन्द्रियं वीर्यमपाक्रामत्, तत् त्रेधाभवत्, भृगुस्तृतीयमभवच्छ्रायन्तीयं सरस्वती तृतीयं प्राविशदिति (३)। "शतुद्री—शुद्राविणी—क्षिप्रद्राविणी"। शु—इति क्षिप्रनाम। अथवा आशु क्षिप्रमसौ "तुन्नेव" विद्धेव केनचित् "द्रवति" आकारलोपः पूर्वपदे (४)। "इरावतीं परुष्णीत्याहुः" येयमिरावतीति लोके प्रसिद्धा, तामिमामेतस्मिन् मन्त्रे मन्त्रार्थविदः परुष्णीत्याहुः। सा कस्मात् ? "पर्ववती"। किमुक्तं भवति ? "कुटिलगामिनी" इति, तदस्याः पर्वत्वम्, यानि कुटिलानि तानि पर्वाणीव तस्याः, तैस्तद्वतीति (५)। "असिक्नी" कस्मात् ? सा हि "अशुक्ला—असिता"। कथम् ? "सितमिति वर्णनाम" स च पुनः शुक्ल इति प्रसिद्धो लोके,—"सितासितौ वर्णौ"

इति बलदेववासुदेवाबधिष्ठत्योक्तम्, "तत्रातिवेध." तस्य ग्रहस्य प्रतिषेध: "अशितम्" अत्यमित्यर्थः। तस्मात् अत्योदका धमिनी (६)। "मरुद्वृधा." "सर्वाः नद्यः मरुतः एनाः वर्द्धयन्ति" वर्षेण, तस्मात् प्रत्येकं नद्यभिधानमनुपद्यते विशेषणत्वेन,—हे मरुद्वृधे!, गङ्गे! यमुने! इत्यादि। "वितस्ता =अविदग्धा" वैदेहको नामाग्निः स किल नदीः अन्याः निर्ददाह, न तामिति सामिधेनीब्राह्मणे विज्ञायते। अथवा "विदृद्धा, महाकुला" विस्तीर्णा (७)। "आर्जीकीयां लोके विपाडित्याहुः"। सा कस्मात्? "ऋजीकप्रभवा" ऋजीको नाम पर्वतः, तस्मात् प्रभवतीति तद्धितेन। अथवा "ऋजुगामिनी" सती आर्जीकीया। "विपाट्" "विपाटनाद् वा" विपाटयन्त्यसौ भूमिमतिवेगवत्त्वात् गच्छतीति। "विपाशनाद् वा"। किमस्यां व्यपाशन्त? "पाशा अस्यां व्यपाशन्त वसिष्ठस्य मुमूर्षत."। वसिष्ठः किल समस्तास्यां मुमूर्षुः, पुत्रमरणशोकार्त्तः पाशैरात्मानं बद्धा, तस्य किल ते पाशा अस्मा 'व्यपाशन्त' अमुच्यन्त उदकेन। तत. प्रभृति विपाट् अभवत्। "पूर्वम् आसीत् उरुञ्जिरा" नाम सा, उरुजलेत्यर्थः। "विपाशनाद् वा" उदकानां विपाट् (८)। "सुषोमा =सिन्धुः"। सा कस्मात्? "यत् एनाम्" "अभिप्रसुवन्ति" अभिगच्छन्ति अन्याः प्रसुताः "नद्यः"। "सिन्धु." कस्मात्? "स्यन्दनात्" सा ह्यविच्छेदेन विशेषतः स्यन्दत इति। (८)॥

"आप."—इति, एतत् पदम्। ताः पुनरेताः "आप्नोतेः" सर्वमाभिराप्यमिति।

"तासाम् एषा भवति"—॥ ५ (२६)॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधा-

तन । मह्रे रणाय चक्षसे ॥ आपो हि ष्ठः सुख-
भुवस्ता नोऽन्नाय धत्त महते च नो रणाय
रमणीयाय च दर्शनायौषधय ओषद्धयन्तीति
वौषत्येना धयन्तीति वा दोषं धयन्तीति वा
तासामेषा भवति ॥ ६ (२७) ॥

"आपो हि ष्ठा"—इति (ऋ० सं० ७, ६, ५, १)। सिन्धु
द्वीपस्यार्षम्। हे 'आप.' आपयितारः। 'स्थ.' 'मयोभुवः'
मयोभावयितारश्च, "सुखभुव." सुखभावयितारः. याः, ताः यूय
'न.' अस्माकम् 'ऊर्जे' "अन्नाय" यथा वयमन्नं लभामहे, भोज-
नाय च न' 'दधातन' धारयत अनुग्रहोऽध्वम्।, किञ्च, 'महे
रणाय' "महती च नो रणाय रमणीयाय" 'चक्षसे' दर्शनाय,
श्रुतिस्मृत्युदितसम्यग्दर्शना भूत्वा अन्नप्रयोगे यथा वर्त्तेमहि,
तथा कुरुध्व यूयम्।—इत्येतदाशास्महे ॥

"ओषधयः"—इति, एतत् पदम्। ता: पुन: एता:
"ओषद् धयन्ति" यत् किञ्चिदोषत् शरीरे दहद् रोगजातं
भवति, तयादि, तदेता अत्ताः सत्यो धयन्ति, पिबन्ति, नाश-
यन्ति। तदेवम् ओषति. पूर्वपदम्, धयतेरुत्तरपदम्, कर्त्तरि
कारके। "ओषति एना धयन्ति—इति वा" ओषति कश्चिदि-
दुदरादावह्नि एना धयन्ति पिबन्ति प्राणिनो दाहोपशमनाय,
तावेव धातू कर्मणि कारके। "दोष धयन्तीति वा" यः
कश्चिदुपजायते दोषो वातादिकृतः शरीरे, तमेता धय-
न्तीति। दोषशब्दात् पूर्वपदम्, धयतेरेवोत्तरपदम्, कर्त्तर्येव
कारके ॥

25194

"तासाम्" ओषधीनाम् "एषा" ऋक् "भवति"—॥ ६ (२७) ॥

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणामहं शतं धामानि सप्त च॥ या ओषधयः पूर्वा जाता देवेभ्यस्त्रीणि युगानि पुरा मन्ये नु तद्बभ्रूणामहं बभ्रुवर्णानां हरणानां भरणानामिति वा। शतं धामानि सप्त च। धामानि त्रयाणि भवन्ति स्थानानि नामानि जन्मानीति जन्मान्यत्राभिप्रेतानि सप्तशतं पुरुषस्य मर्मणां तेष्वेना दधतीति वा रात्रिर्व्याख्याता तस्या एषा भवति॥ ७ (२८) ॥

"या ओषधीः पूर्वा जाताः"—इति (ऋ० सं० ८, ५, ८, १)। ओषधिसूक्ते प्रथमैव। अग्निचयने चैवमनेन मन्त्रेण ग्राम्यारण्याभिरूप्यते। 'याः' एताः "ओषधयः" 'पूर्वाः' प्रथमाः 'जाताः'। कुतः? 'देवेभ्यः' न तावद् देवा उत्पद्यन्ते, अथैता एव पूर्वमुत्पद्यन्ते। कियति काले? 'त्रियुगं पुरा' कलिद्वापरत्रेताभ्यः पूर्वम्, आदिकल्पे, आद्ये कृतयुगे, देवानामपि ह्यवमनपेक्ष्य जीवनहेतुस्थितिर्नास्तीति पूर्वमन्नमुत्पद्यते पश्चाद् देवा इति। किं तासाम्? इति,—"मनै नु बभ्रूणामहं शतं धामानि सप्त च"। तासाम् 'अहं' 'बभ्रूणां' "बभ्रुवर्णानाम्" ओषधयः स्वभावतः सर्वा एव पच्यमाना बभ्रुवर्णाः कपिलाः सम्पद्यन्ते। 'मनै' जाने 'शतं धामानि, सप्त च' सप्ताधिकं शतमहं तासां यथावज्जाने। अथवा बभ्रूणाम्

मिति वर्णव्याप्त्या "हरणानाम्"—इति, ता हि क्षुदादि हरन्ति। "भरणानाम—इति वा" भवन्ति स्ता सर्वस्य भूतग्रामस्य वा। ओषधय प्रथमा जाता "देवेभ्यस्त्रीणि युगानि पुरा मन्ये" तद् बभ्रूणामह बभ्रुवर्णाना हरणानामिति वा। 'शत धामानि सप्त च' व्याख्यातमेतत्। "धामानि त्रयाणि भवन्ति,—स्थानानि, नामानि, जन्मानि" इति, इह तु "जन्मानि अभिप्रेतानि"। सप्तशतम् ओषधिजातय एतस्मिन् मन्त्रे अभिप्रेता, अथवा "सप्तशत पुरुषस्य मर्मणाम्, तेषु एना दधति —इति वा" अस्मिन् पक्षे धामानि स्थानानि॥

"रात्रि"—इति, एतत् पदम्। तत पुनरभिधानतोऽभिधेयतश्च व्याख्यातम, —"रातेर्दानकर्मण"—इति॥

"तस्या" "एषा" स्तुतिः "भवति"—॥ ७ (२८)॥

आ रात्रि पार्थिवं रजः पितुरप्रायि धामभिः। दिवः सदांसि बृहती वितिष्ठस आ त्वेषं वर्तते तमः॥ आपूपुरस्त्वं रात्रि पार्थिवं रजः स्थानैर्मध्यमस्य दिवः सदांसि बृहती महती वितिष्ठस आवर्त्तते त्वेषं तमो रजोऽरण्यान्यरण्यस्य पत्नारण्यमपार्णं ग्रामादरमणं भवतीति वा तस्या एषा भवति॥ ८ (२९)॥

"आ रात्रि पार्थिव रज"—इति। कुशिकस्यार्षम, गायत्री वा। हे 'रात्रि।' या त्वम "आपूपुर" 'पार्थिव रज' पृथिवीलक्ष्मीम आपूरयसि। कि केवलमतदेव? न, इत्युच्यते,—'पितु धामभि' "मध्यमस्य स्थानै" सह, सहान्तरि-

चेण, तदपि द्यापूर्यसि तमसा। किमेतावदेव? न, इत्यु-च्यते,—किन्तर्हि? 'दिवः' द्युलोकस्यापि यानि 'सदांसि' सदनानि, येषु हि द्युलोकवासिनः सदनेषु स्थानेषु, सीदन्ति तान्यपि। 'वृहती' महती यस्मात् त्वम्, तस्मात् दूरेऽपि वर्त्तमाना 'वितिष्ठसे' विष्टभ्य तिष्ठसि। न केवल विष्टभ्यैव तिष्ठसि, किन्तर्हि? आपूर्य्य द्युलोकमपि ततपूरणातिशिष्टं 'तमः' 'त्वेष' महत् पुनरिममेव लोकं प्रति आवर्त्तते यस्याः तव, सा त्वमस्माकं सर्वदा शिवा भव।—इत्येतदाशास्महे॥

"अरण्यानी"—इति, एतत् पदम्। सा पुनः "अरण्यस्य पत्नी" पालयित्री देवता। अथ अरण्यं कस्मात्? "अर-ण्यम् = अपार्णं ग्रामात्" तद्धि ग्रामादपार्णमपगतं भवति, "अरणं गतौ"—इत्यस्य। "अरमणं भवति—इति वा" रमेः प्रतिषेधपूर्वस्य, न ह्यरण्ये रतिर्भवति।

"तस्याः एषा भवति" स्तुतिः—१ ८ (२८)॥

अरण्यान्यरण्यान्यसौ या प्रेव नश्यसि। कथा ग्रामं न पृच्छसि न त्वा भीरिव विन्दती. ३॥ अरण्यानीत्येनामामन्त्रयते यासावर-ण्यानि वनानि पराचीव नश्यसि कथं ग्रामं न पृच्छसि न त्वा भीर्विन्दतीवेतीवः परिभयार्थे वा यद्वा अश्रद्धानात्तस्या एषा भवति ॥९(३०)॥

"अरण्यान्यरण्यानि"—इति (ऋ० सं० ८, ८, ४, १)। ऐरम्मदस्य देवमुनेरार्षम्। सम्बुद्ध्येकवचनं पूर्वम्, द्वितीया-बहुवचनमुत्तरम्। उत्पन्नदिक्मोहो मम्मदक् अरण्ये भीतो-ऽरण्याधिदेवतामरण्यानी ब्रवीति,—अङ्ग तावदेतस्मिन्नरण्ये

निरमणे भीतः, कथ त्वं न बिभेषि? इति। भीयमाण इव।—हे 'अरण्यानि' कथं त्वम् 'अरण्यानि' "वनानि" प्रति केवल 'प्रेव' "पराचीव" पराङ्मुखीव अनावर्त्तमाना 'नश्यसि'? 'असौ' असाविति दृश्यमाना इव। यतो ब्रवीमि—"कथा ग्रामं न पृच्छसि न त्वा भीरिव विन्दतीँ३"। अथ "भा इवः परिभयार्थे" न त्वमी-यदपि बिभेषीति परिरोपदर्थः। तद्यथा—परिमधुरं पर्यात-मिति॥

"श्रद्धा"—इति, एतत् पदम्। अत्र "श्रत्"—इति सत्य नाम पूर्वपदम्, तत् सत्यमस्यां धीयत इति श्रद्धा, धर्मार्थकाम-मोक्षेषु अविपर्यये णैवमेतदिति या बुद्धिरुत्पद्यते, तदधिदेव-ताभावाख्या श्रद्धेत्युच्यते। सा पुन. आग्नेय सर्वं प्रकाशमिति अग्निरेव॥

"तस्या एषा भवति" स्तुतिः—॥ ८ (३०)॥

श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः। श्रद्धां भगस्य मूर्द्धनि वचसा वेदयामसि॥ श्रद्ध-याग्निः साधु समिध्यते श्रद्धया हविः साधु हूयते श्रद्धां भगस्य भागधेयस्य मूर्द्धनि प्रधा-नाङ्गे वचनेनावेदयामः पृथिवी व्याख्याता तस्या एषा भवति॥ १० (३१)॥

"श्रद्धयाग्नि. समिध्यते"—इति (ऋ० सं० ८, ८, ,८ १)। श्रद्धायाः कामायन्या आर्षम्। य एव 'अग्नि:' 'श्रद्धया' उपेत', श्रद्धयैवास्तिक्यबुद्धिमास्थाय 'समिध्यते' कर्मणि, स एव "साधु" शोभन समिध्यते, इतरो हि समिद्धोऽप्यसमिद्ध

एव, अश्रद्धासमिद्धाग्निकर्मणः फलाभावात्। एवमेव "श्रद्धया हूयते हविः" यदेव श्रद्धया हूयते हविः, तदेव "साधु हूयते", अन्यस्याफलत्वात्, उक्तञ्च—'नाश्रद्दधानाय हविर्जुषन्ति देवाः"—इति। एवं चेत्—"श्रद्धा भगस्य मूर्द्धनि वचसा वेदयामसि"। 'भगस्य' "भागधेयस्य" धर्मस्य 'मूर्द्धनि' "प्रधानाङ्गे" मूर्द्धा शिरः, प्रधानमिदमङ्गं धर्मस्य या श्रद्धा, तदभावे धर्माभावात्। अपि च 'वचसा' एव "वचनेन" एव मन्त्रगतेन—"श्रद्धामनृते दधाच्छ्रद्धां सत्ये प्रजापतिः"—इत्यनेनैव तद्वाक्य शिर प्रकाशम् 'वेदयामसि' "आवेदयामः" आघोषयामो नाश्रद्दधानस्य धर्म इति।

"पृथिवी" "व्याख्याता" "अथ वै दर्शनेन पृथुः"—इत्यत्र। "तस्या एषा भवति"—॥ १० (३१)॥

स्योना पृथिवि भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथः॥ सुखा नः पृथिवि भवानृक्षरा निवेशन्यृक्षरः कण्टक ऋच्छतेः कण्टकः कन्तपो वा कृन्ततेर्वा कण्टतेर्वा स्याद्गतिकर्मण उद्गततमो भवति यच्छ नः शर्म यच्छन्तु शरणं सर्वतः पृथुः व्याख्याता तस्या एषा भवति ॥११(३२)

"स्योना पृथिवि भव"—इति (ऋ० सं० १, २, ६, ५, य० वा० सं० ३५,२१)। मेधातिथेरार्षम्। हिरण्यनाभया यष्टिस्तेष्वा भौमस्यैककपालस्य पुरोऽनुवाक्या। हे 'पृथिवि!' 'स्योना' "सुखा" त्वमस्माकं 'भव'। कथम्? "अनृक्षरा निवेशनी"। 'अनृक्षरा' निष्कण्टका, 'निवेशनी' निवासयोग्या। निविष्टाः,

'नास्माकं 'यच्छ' देहि 'शर्म' सुखम् 'सप्रथः' "सर्वतः पृथु" विस्तीर्णमिति ॥

"कचरः = कण्टकः" "कृन्ततेः" ।—"कण्टकः"—"कं तपः वा" "कृन्ततेः वा" "कण्टतेः वा स्यात् गतिकर्मणः, उद्गततमो भवति"। कमहं तापयामीति एवमर्थमुद्गतः, कण्टकः। कण्टतेर्वा, स ह्युद्गततमो भवति वृक्षात् ॥

"अप्वा" "व्याख्याता"। "यदेनया विद्धोऽपवीयते', व्याधिर्वा भयं वा"—इत्यत्र व्याख्या ॥

"तस्या एषा भवति"—॥ ११ (३२) ॥

अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि। अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥ अमीषां चित्तानि प्रज्ञानानि प्रतिलोभयमाना गृहाणाङ्गान्यप्वे परेह्यभिप्रेहि निर्दहैषां हृदयानि शोकैरन्धेनामित्रास्तमसा संसेव्यन्तामग्नाय्यग्नेः पत्नी तस्या एषा भवति ॥ १२ (३३) ॥

"अमीषां चित्तम्"—इति (ऋ० सं० ८, ५, २२, ६ । य० वा० स० १७, ४४ । सा० स० उ० आ० ८, ३, ५, १ । अथ० स० ३, २, ५) । अप्रतिरथस्यार्षम् । हे 'अप्वे !' 'अमीषाम्' अस्मच्छत्रूणां 'चित्तम्' "चित्तानि" मनांसि 'प्रतिलोभयन्ती' "प्रतिलोभयमाना" प्रत्येकं लोभयन्ती 'गृहाण अङ्गानि' सर्वगात्राणि आविश, त्वयैते आविष्टसर्वगात्राः साध्वसिनः उत्पन्नवेपथवः सम्मूढाः अप्रतिपत्ताः सन्तु । 'परेहि' परागच्छ

एतान्। अपि च यावच्च प्रव्यवस्थितास्तावदेकैकं चिप्रम् 'अभिप्रेहि'। अभिप्रगत्य च 'निर्दह' "एषाम्" 'हृत्' "हृदयानि" 'शुचोकैः'। त्वया एते निर्दग्धहृदयाः 'अमित्राः' अस्मदमित्राः "अन्धेन तमसा" 'सचन्ताम्' "ससेव्यन्ताम्" ।—इत्येतदाशास्महे ॥

"अग्नायी" "अग्नेः पत्नी:" ॥

"तस्या एषा भवति"—॥ १२ (३३) ॥

इहेन्द्राणीमुपह्वये वरुणानीं स्वस्तये। अग्नायीं सोमपीतये। इति सा निगदव्याख्याता ॥ १३ (३४) ॥

इति नवमाध्यायस्य तृतीयः पादः ॥ ९, ३ ॥

"इहेन्द्राणीमुपह्वये"—इति (ऋ॰ सं॰ १, २, ६, २)। "इति सा निगदव्याख्याता"। 'इह' कर्मणि 'अग्नायीम्' 'उपह्वये' 'सोमपीतये' सोमपानाय, आत्मनश्च 'स्वस्तये' 'इन्द्राणीम्' अपि च 'वरुणानीम्' ॥

असाधारण्येनेन्द्राणीञ्च वरुणानीञ्च अग्नायीञ्च इह कर्मणि उपह्वये सोमपानाय स्वस्तये च,—इत्येवं सति "तस्या एषा भवति"—इति भाष्यकारवचनं (२०७ पृ॰) नोपपद्यते,—सोमपानसम्बन्धात् मध्यमा? इति चेत्, नैतत्, अग्निरपि हि सोमपानसम्बन्धे उक्तः,—"सोमं पिब मन्दसानो गणश्रिभिः (ऋ॰ सं॰ ४, ३, २५, ८)"—इति, तस्मादुपपद्यत इति ॥ १३ (३४) ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ चतुर्दशाध्यायस्य (नवमाध्यायस्य) तृतीयः पादः ॥ ९, ३ ॥

चतुर्थ पाद ।

अथातोऽष्टौ द्वन्द्वान्युलूखलमुसले उलूखलं व्याख्यातं मुसलं मुहुः सरन्तयोरेषा भवति ॥ १ (३५) ॥

"अथातोऽष्टौ द्वन्द्वानि"—इति, अस्मादेः पूर्वस्माद् वर्गात् विलक्षणोऽयमपरो द्वन्द्ववर्ग इति पृथगधिकारवचनम्। अथात शब्दावुक्तार्थौ। अष्टावित्यनिर्देशतोऽपि सिद्धेऽष्टत्वनियमार्थं मष्टग्रहणम्। "उषासानक्ता' "दैव्या होतारा'—इति द्वन्द्व दर्शनात् अयुक्तमिति चेत् ? न, तयोराप्रीत्वसामान्येन तत्र प्रथम समाम्नातत्वात्, इह च पुन समाम्नाने द्विरुक्ततादोष प्रसङ्ग । मित्रावरुणादीनामपि द्वन्द्वसामान्यादिह प्रसङ्ग इति चेत् ? न, तेषा पृथगपि स्तुत्युपपत्तेः । एव सति उलूखलमुसलयो द्यावापृथिव्याश्चेह समाम्नानस्याप्रसङ्ग, कथ लयो स्तुत्युपपत्तेः ? मुसलस्य ादवय पृथक्स्तुत्यभावात, मित्रावरुणादीनान्तु सर्वेषा पृथक स्तुतय सन्ति, तस्मादसमाम्नानम्। अश्विनारिह द्वन्द्वसामान्यात प्राप्तमिति चेत ? न, उष प्रभृतीनामुपस कालमध्य तपाञ्च समाम्नानेनेहाति सङ्करप्रसङ्गात। शुनासीरयो स्थानान्यत्वात् इहासमाम्नानम इति चत् ? न, द्वन्द्वसामान्यात्, पृथिव्यर्थत्वाच्च, तस्योगाभि प्रायेण च ततस्तुत—"तेनेमामुपसिञ्चतम इति। द्यावा पृथिव्यो प्रथम समाम्नान देवताभावादिह प्राप्तमिति चेत् ? न, दिव पृथिव्यायतनत्वाभावात्—द्वन्द्वप्रसङ्गेन चेह दिव समाम्नानात्। "द्यावापृथिव्यो ११" "शुनासीरो २८'—इति देवतामध्ये द्वन्द्वमध्ये प्रथमागामित्वस्यावचने उलूखल मुसलयोर्द्रव्यत्वात् प्रथम समाम्नानम्, तयो पृथिव्यायतन

त्वस्य निरुपचारप्रसिद्धेः, प्रचुरत्वाच्च द्वन्द्वयोः। तयोः "उलूखलं व्याख्यातम्" "उरुकरम् (१८१ पृ० १२ पं०)"—इत्येवमादिना, "मुसलं=मुहुःसरम्"। मुसलं कस्मात्? तद्धि मुहुर्मुहुः सरति वीहयादिषु॥

"तयोः एषा भवति" स्तुतिः—॥ १ (३५)॥

आयजी वाजसातमा ता ह्युच्चा विजर्भृतः। हरी इवान्धांसि बप्सता॥ आयष्टव्ये अन्नानां सम्भक्तमे ते ह्युच्चैर्विह्रियेते हरी इवान्नानि भुञ्जाने हविर्धाने हविर्धानिधाने तयोरेषा भवति॥ २ (३६)॥

"आयजी वाजसातमा"—इति (ऋ० सं० १, २, ६६, २)। आभिमुख्येन मर्यादया वा "यष्टव्ये" पूज्ये, 'वाजसातमे' "अन्नानां सम्भक्तमे" 'ता ह्युच्चा विजर्भृतः' "उच्चैर्विह्रियेते" उलूखलमुच्छ्रीयते च, अवहननाय मुसलमुद्यम्यते, एतदुच्चैर्विहरणम्। ते एते नित्यम् अश्नाक इह 'हरी' अश्वौ 'इव'। नित्यमविच्छेदेन। 'अन्धांसि' "अन्नानि" 'बप्सत' "भुञ्जाने" संस्कारकत्वेन स्याताम्।—इत्येतदाशास्महे।

"आयष्टव्ये अन्नानां सम्भक्तमे ते ह्युच्चैर्विह्रियेते हरी इवान्नानि भुञ्जाने"। गतार्थमेतत्॥

"हविर्धाने"—"हविषां निधाने" सोमास्तयोर्निधीयन्ते॥

"तयोः एषा भवति"॥ २ (३६)॥

आ वामुपस्थमद्रुहा देवाः सीदन्तु यज्ञियाः। इहाद्य सोमपीतये॥ आसीदन्तु वामुपस्थ उप-

स्थाने यज्ञिया देवा यज्ञसम्पादिन इहाद्य सोमपानाय द्याव्यापृथिव्यौ व्याख्याते तयोरेषा भवति ॥ ३ (३७) ॥

"आ वामुपस्थमद्रुहा"—इति (ऋ० सं० २, ८, १०, ६)। व्याख्यातमदस्यार्थम्। "द्यावा नः पृथिवी"—इति च (२११ पृ० १६ पं०)। हविर्द्धानप्रवर्त्तने विनियोगः। हे 'हविर्द्धाने।' 'अद्रुहा' अद्रोग्धव्ये युवामुच्येये। यत्र युवामुपगम्य स्थिते तत् 'वाम्' 'उपस्थ' उपस्थाने 'यज्ञियाः' "यज्ञसम्पादिन" 'देवा' 'इह' एतस्मिन् कर्मणि 'अद्य' उपगम्य 'सीदन्तु' निषीदन्तु 'सोमपीतये' "सोमपानाय"।—इत्येतदाशास्महे॥

"आसीदन्तु वामुपस्थ उपस्थाने यज्ञिया देवा यज्ञसम्पादिन इहाद्य सोमपानाय"। वर्णितमेतत्॥

"द्यावापृथिव्यौ" "व्याख्याते"। द्यौश्च पृथिवी च इत्येते पदे व्याख्याते॥

"तयोः" "एषा" स्तुतिः "भवति"—॥ ३ (३७)॥

द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशम्। यज्ञं देवेषु यच्छताम्॥ द्यावापृथिव्यौ न इमं साधनमद्य दिविस्पृशं यज्ञं देवेषु नियच्छतां विपाट्छुतुद्र्यौ व्याख्याते तयोरेषा भवति॥ ४ (३८)॥

"द्यावा नः पृथिवी"—इति (ऋ० सं० २, ८, १०, ५) 'द्यावापृथिवी' "द्यावापृथिव्यौ" 'नः' अस्माकम् 'सिध्रम्' "साधनम्" 'इमं' 'यज्ञं' सोऽयमस्मान् साधयति, 'अद्य

एतस्मिन् अहनि वर्त्तमानं 'दिविस्पृशं' द्यां यः स्पृशति पूरयति, तमेवङ्गुण यज्ञ देवेषु 'यच्छताम्' "नियच्छताम्" देवेभ्यो दत्तम् ।—इत्येतदाशास्महे ॥

"द्यावापृथिवी न इमं साधनमद्य दिविस्पृशं यज्ञं देवेषु नियच्छताम्"। गतार्थमेतत् ॥

"विपाट्छुतुद्यौ" "व्याख्याते" "विपाट् विपाटनाद्वा"— इत्यत्र (१८८ पृ०) विपाट् व्याख्याता, "शुतुद्री=शुद्राविणी" इत्यत्र (१८८ पृ०) शुतुद्री, "तद् यद् द्विवदुपरिष्टात् तद् व्याख्यास्याम"—इति एतत् ॥

"तयो" "एषा" स्तुति "भवति"—॥ ४ (३८) ॥

प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने । गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते ॥ पर्वतानामुपस्थादुपस्थानादुशत्यौ कामयमाने अश्वे इव विमुक्ते इति वा विषण्णे इति वा हासमाने हासतिः स्पर्धायां हर्षमाणे वा गावाविव शुभ्रे शोभने मातरौ संरिहाणे विपाट्छुतुद्रौ पयसा प्रजवेते आर्तौ अर्त्तन्यौ वारण्यौ वारिपण्यौ वा तयोरेषा भवति ॥ ५ (३९) ॥

"प्र पर्वतानाम्"—इति (ऋ० म० ३, २, १२, १)। विश्वामित्रो ब्रवीति। ये चैते "विपाट्छुतुद्रौ" 'पयसा' उदकेन पूर्णे 'प्रजवेते' प्रकृष्टेन जवेन गच्छत 'पर्वतानाम्' 'उपस्थात्' "उपस्थानात्" निर्झरात्, मेघाना वा। 'उशती' "उशत्यौ"

"कामयमाने" परस्परं समागमम्, समुद्रं वा। कथं प्रजवेते ? 'अश्वे इव' 'विषिते' "विमुक्ते" मन्दुरातः, "विषये इति वा" विभागेनैकस्मिन् सुक्ते, कस्मिंश्चित् सुक्ते युगादौ वा। 'हासमाने' स्पर्धमाने, परस्परेण हर्षमाणे वा ह्रस्यमाणे वा विपाट्छुतुद्र्यौ। 'गावा इव' "गावौ इव" 'शुभ्रे' "शोभने" कल्याण्यौ। 'मातरा' "मातरौ" "सं"'रिहाणे' वत्समेक प्रलेढुमिच्छन्त्यौ। य एवमिति प्रजवेते, ते अस्माक गाधे भवत। —इत्येतदाशास्महे ॥

"पर्वतानामुपस्था०—०पयसा प्रजवेते"। उक्तोऽस्यार्थः ॥

"आर्त्नी" धनु प्रान्ते। ते कस्मात् ? "अर्त्तन्यौ वा" ऋते-र्धातोर्गत्यर्थस्य, गमयतस्ते इषून्, "अरण्यौ वा" अरणार्हौ, "अरिघ्न्यौ वा" हन्त्र्यौ वा ॥

"तयो एषा भवति"—॥ ५ (३९) ॥

ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे। अप शत्रून् विध्यतां संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥ ते आचरन्त्यौ समनसाविव योषे मातेव पुत्रं बिभृतामुपस्थ उपस्थानेऽपविध्यतां शत्रून् संविदाने आर्त्न्याविमे विघ्नत्यावमित्राञ्छुनासीरौ शुनो वायुः शु एत्यन्तरिक्षे सीर आदित्यः सरणात्तयोरेषा भवति ॥ ६ (४०) ॥

"ते आचरन्ती समनेव"—इति (ऋ० सं० ५, १, १८, ४। य० वा० सं० २८, ४)। आर्त्नेगोरेवानुमन्त्रणमन्त्रमिदं

अनेन क्रियते। 'समना इव योषा' "समनसौ इव" एकभर्तृके योषिते यथैकं भर्त्तारं प्रत्याचरन्त्यौ भवतः परिष्वजतः, एवमाक्रष्टारम् प्रति नित्यमाचरन्त्यौ भवतः आनमन्त्यौ। "मातेव पवं बिभृतामुपस्थे" रक्षणाय ये बिभृतामाक्रष्टारम्। अमुना प्रकारेण ये विस्फुरन्त्यौ नित्यममित्रान् भवतः। ययोरेषः स्वभावः। ते 'आर्त्नी' नित्यम् अस्माकम् अमुना प्रकारेण 'संविदाने' संवादमिव कुर्वाणे। परस्परतः आकर्षणाभिप्रायमेतत्, आकृष्यमाणयोस्तयोः संवाद इव परस्परतो भवति। 'शत्रून्' 'अपविध्यताम्'।—इत्येतदाशास्महे॥

"शुनासीरौ"। "शुनः=वायुः, शु एति अन्तरिक्षे" शुनासीराविन्द्रव, स हि क्षिप्रमेत्यप्रतिबध्यमानोऽन्तरिक्षे। "सीरः =आदित्यः सरणात्" स हि नित्यं सरति गच्छति॥

"तयोः एषा भवति"—॥ ६ (४०)॥

शुनासीराविमां वाचं जुषेथां यद्दिवि चक्रथुः पयः। तेनेमामुपसिञ्चतम्॥ इति सा निगदव्याख्याता देवौ जोष्ट्री देव्यौ जोषयित्र्यौ द्यावापृथिव्याविति वाहोरात्रे इति वा शस्यञ्च समा चेति कात्थक्यस्तयोरेष सम्प्रैषो भवति ॥ ७ (४१)॥

"शुनासीराविमाम्"—इति (ऋ॰ सं॰ ३, ८, ८, ५। य॰ वा॰ सं॰ १२, ६८। अथ॰ सं॰ ३, १७, ७)। "इति सा निगदव्याख्याता"। वामदेवस्यार्षम्। शुनासीर्ये विनियोगः। हे 'शुनासीरौ!' युवां 'वाचम् इमां' स्तुतिलक्षणां 'जुषेथाम्' सेवेथाम्। कथं च पुनराशीरितीयं युवाभ्यां स्यात्?

"यद्द्दिवि उक्रथ. पय" । 'यत्' 'दिवि' द्युलोके 'चक्रथु', संभरथ युवाम् 'पय' उदकम् । 'तेन' 'इमां' पृथिवीम् 'उप सिञ्चतम्' । एवमनेनाश्वद्वागासेविता युवाभ्या भविष्यतीति ॥

"देवी जोष्ट्री"—"देव्यौ जोपयित्र्यौ" सर्वस्य तर्पयित्र्यौ । के पुनस्ते ? इति । "द्यावापृथिव्यौ" "अहोरात्रे वा" "अस्य च समा च इति कात्यक्य" अस्य व्रीह्यादि, समेति संवत्सर ॥

– "तयो एप सम्मैषो भवति"—॥ ८ (४१) ॥

देवी जोष्ट्री वसुधीती ययोरन्याघा द्वेषांसि यूयवदान्यावक्षद्वसु वार्य्याणि यजमानाय वसुवने वसुधेयस्य वीतां यज ॥ देवी जोष्ट्री देव्यौ जोषयित्र्यौ वसुधीती वसुधान्यौ ययोरन्याघानि द्वेषांस्यवयावयत्यावहत्यन्या वसूनि वननीयानि यजमानाय वसुवननाय च वसुधानाय च वीतां पिबेतां कामयेता वा यजेति सम्मैषो देवी जर्जाहुती देव्या जर्जाह्वान्यौ द्यावापृथिव्याविति वाहोरात्रे इति वा सस्यञ्च समा चेति कात्यक्यस्तयोरेष सम्मैषो भवति ॥ ८ (४२) ॥

'देवी जोष्ट्री"—इति (य० वा० स० २८, १५) । 'देवी जोष्ट्री "देव्यौ जोपयित्र्यौ" "वसुधीती=वसुधान्यौ" वसूनां निधानभूते, 'ययो' देव्यो अन्या एका 'अघा "अघानि" द्वेषांसि' हन्ति यान्यप्रियाख्मास्क तानि "यूयवत्" "अव

याययति" यवमिश्रयति नाशयत्यन्नत:। 'अन्या' पुन: 'आवक्षत्' "आवहति"। 'वसु वार्य्याणि' "यजमानाय वननीयानि (वरणीयानि) वसूनि"। 'वसुवने वसुधेयस्य' "वसुवननाय" च सम्भजनाय, "वसुधानाय" वसुविशिष्टस्य निधानाय च। ते देव्यौ जोषयित्र्यौ 'अस्य' षृषदाज्यस्य स्वमंश 'वीताम्' "पिबेता, कामयेता वा"। मैत्रावरुणो ब्रवीति,—हे होत ! त्वम् एते 'यज'—"इति सम्प्रैष:"॥

"देव्यौ जोषयित्र्यौ०—०यजेति सम्प्रैष"। एतस्यार्थ उक्त ॥

"देवी ऊर्जाहुती"="देव्यौ ऊर्जाहुत्यौ"। "द्यावापृथिव्यौ इति वा, अहोरात्रे इति वा, शस्य च समा च इति कात्थक्य" ॥

"तयो एष सम्प्रैष भवति"—॥ ९ (४२)॥

देवी ऊर्जाहुती इषमूर्जमन्यावक्षत् सग्धिं सपीतिमन्या नवेन पूर्वं दयमाना: स्याम पुराणेन नवं तामूर्जमूर्जाहुती ऊर्जयमाने अधातां वसुवने वसुधेयस्य वीतां यज ॥ देवी ऊर्जाहुती देव्या ऊर्जाहुत्यान्यावक्षच्च इषञ्चावहत्यावहत्यन्या सहजग्धिञ्च सहपीतिञ्चान्या नवेन पूर्वं दयमाना: स्याम पुराणेन नवं तामूर्जमूर्जाहुती ऊर्जयमाने अधातां वसुवननाय च वसुधानाय च वीतां पिबेतां कामयेतां वा यजेति सम्प्रैषो यजेति सम्प्रैष: ॥ १० (४३)॥

इति नवमाध्यायस्य चतुर्थ: पाद: ॥ ९, ४ ॥

"देवी ऊर्जाहुती"—इति (य० वा० सं० २८, १६)। "देव्यौ ऊर्जाह्वान्यौ" ऊर्जस्य अन्नस्य निष्पादयित्र्यौ" द्यावापृथिव्यौ ऊर्जाह्वान्यावुच्येते। 'इषम् ऊर्जम् आवक्षत्' "अन्नं च" अन्नादि-"रस च" व्रीह्याद्युपसेचनं क्षीरादिकञ्च, 'सजग्धि' एका उपनामि-तस्यान्नस्य "सहपीतिम्" अन्या "सहजग्धिम्" सहभोजनं बन्धु-भिरिति 'आवक्षत्' "आवहति" आभिमुख्येन यथा बन्धुभिः सह भुञ्जीमहि तथा करोतु। तथा च तत् बहुवमस्तु, यथा 'नवेन' 'पूर्वम्' पुराणं "दयमाना" रक्षन्तः 'स्याम' 'पुरा-णेन नवम्' पुराणेन नव धान्यं दयमानाः स्याम। तामेव-लक्षणम् 'ऊर्जम्' 'ऊर्जाहुती' "ऊर्जयमाने" बलवती ऊर्जतां च कुर्वाणे 'अधाताम्' दत्ताम्। 'वसुवने' "वसुवननाय च" 'वसु-धेयस्य' "वसुधानाय च" 'वीताम्' "पिबेतां कामयेतां वा" ॥

'यज'—"इति सम्प्रैषः" इति ॥ १० (४३) ॥

इति निरुक्तवृत्तौ चतुर्दशाध्यायस्य (नवमाध्यायस्य) चतुर्थः पादः ॥ ६, ४ ॥

जम्बूमार्गाश्रमवासिनो भगवद्दुर्गाचार्यस्य कृतौ ऋज्वर्थायां निरुक्तवृत्तौ चतुर्दशोऽध्यायः नवमोऽध्यायः समाप्तः ॥ ९ ॥ १४

(अथयान्यश्वोवोल्हामानोमित्रोकनिक्रद्-
दुद्रूंवद्सं वत्सरमुपप्रवदग्राविपामाप्रैतेवद्न्वम-
न्तानूयज्ञसं योगादृवनस्पत उपमश्वासयवस्रीना-
मह्रिर्विरथेतिष्ठन् स्वनागावच्यन्तीवेदासुपर्णं-

२० २१ २२ २३ २४ २५ २६
मामद्भन्तियच्चिद्विष्टपभोन्यक्रान्दयन्निमन्त्रं पितुन्वि-
२७ २८ २९ ३०
मंम आपो हिता या ओपधीरारावरण्याणि-
३१ ३२ ३३ ३४ ३५ ३६
यद्वयाग्निः स्योनामीपाञ्चित्तमिहेन्द्राण्ययात
३७ ३८ ३९ ४० ४१
आयज्यावांद्यावान:प्रपर्वतानान्ते आचरन्तीमु-
४२ ४३
नासीरौ देवीजोष्ट्रीदेवी ऊर्जाहुती त्रिचत्वा-
रिंशत् ॥)

इति निरुक्ते (उत्तरषट्के) नवमोऽध्यायः ॥९॥

अथ दशमाध्यायस्य

प्रथमः पादः ।

ॐ॥ अथातो मध्यस्याना देवतास्तासां वायुः प्रथमागामी भवति वायुर्वातेर्वेतेर्वा स्याद्गतिकर्मण एतेरिति स्थौलाष्ठीविरनर्थको वकारस्तस्यैषा भवति ॥ १ ॥

व्याख्यातानि पृथिवीस्थानदेवतापदानि, अधुना समाम्नायानुक्रमेणैव मध्यमस्थानदेवतापदानि निर्वक्ष्यामि, तदर्थमिदमारभ्यते,—"अथातो मध्यस्थाना देवता"—इति।

अथशब्दो विशेषाधिकारार्थः। अत शब्द आनन्तर्य्यार्थः। मध्य स्थानमेतासामिति मध्यस्थाना: देवता', वाय्वाद्याः 'वक्ष्यन्ते'—इति वाक्यशेष.। देवता इति बहुवचनं भेदपक्षे, एकैव, नैरुक्तानां देवतात्रित्वाभ्युपगमात् एतस्यैव मध्यमस्य पर्य्यायवचनान्येतानि वाय्वादीनि रोदस्यन्तानि गुणविशेषतो भवन्ति, यथैवोत्तमस्य ज्योतिषो दृश्यन्ते भगप्रभृतीनि ॥

"तासां वायु प्रथमागामी भवति"। नन्विन्द्र इति मध्य मस्य स्थानस्य मुख्यनभिधानम्, तत् प्रथमसमाम्नातव्यमासीत्? न, मध्यमस्य वर्षकर्मोपलक्षणत्वात्, वर्षकर्मणि च वायोरधिकार प्रथम. स्यात्। कथम्? इति। वाय्वात्मनैव हि मध्यम:, ऊर्जामासात् परत: सार्वदिक्कमुदकमुपसहरन्नोषधिवनस्पतिजलाशयेभ्यः उदकमन्तरिक्षलोकस्य गर्भमुपचिनोति, स मासाष्टकेन सम्भृतोदकगर्भो विपक्कः प्रावृष प्राप्य प्रसवाय प्रकल्पते। तदुक्तम्—"वान्ति पर्ण्यशुषो वाता-स्तत. पर्णमुचोऽपरे। तत पर्णरुहो वान्ति ततो देवः प्रवर्षति॥"—इति। तदेव वर्षकर्मप्रारम्भे वाय्वात्मनैव मध्यमो व्याप्रियत इति युक्तं वायुभिधानमिह प्रथम समाम्नातमिति। इतय युक्तं यदुच्यते "तासां वायु' प्रथमागामी भवति"—इति, स एष सम्भृतोदकगर्भो वायुर्विहरन् मेघजालेन नभ:, मध्यमो वरुण: सम्पद्यते, ततो रुदन् रुद्र', तत इरा ददत् इन्द्रः, ततो रसान् मार्जयत् पर्जन्यः। एवमादिर्मध्यमस्य जगदनुग्रहाय मर्षप्रदानसिद्धये गुणोपजननक्रम:। अनयैव गुणोपजननक्रमानुपूर्व्या वायुः १, वरुण. २, रुद्रः ३, पर्जन्य. ४,—इत्येवमाद्या समाम्नाये देवतानामानुपूर्वी। तदेतत् स्फुटं सुस्थाने गुणान्तरोपजननानुपूर्व्यं ज्योतिर्मण्डलस्य सवितृप्रभृतिषु ॥

"वायु." कस्मात्? "वाति:" "वा गतिगन्धनयो: (अदा॰

प०)"—इत्यस्य, सततमसौ वाति गच्छति। "वेतेः वा स्याद् गतिकर्मणः" अनेकार्थो वेतिः, तस्य वा गत्यर्थस्य। "एतेः—इति स्थौलाष्ठीविः"। अस्मिन् पक्षे "अनर्थकः वकारः" उपजनमात्रम्, एत्यसौ इति वायुः॥

"तस्य एषा भवति"—॥ १॥

वायवायाहि दर्शतेमे सोमा अरंकृताः। तेषां पाहि श्रुधि हवम्॥ वायवायाहि दर्शनीयेमे सोमा अरंकृता अलङ्कृतास्तेषां पिब शृणु नो ह्वानमिति कमन्यं मध्यमादेवमवक्ष्यत्तस्यैषापरा भवति॥ २॥

"वायवायाहि दर्शत"—इति (ऋ० सं० १, १, ३, १)। मधुच्छन्दस आर्षम्। आध्वर्यवे वायव्योपस्थाने विनियोगः, वाहॄच्ये प्रउगे शस्त्रे शस्यते। हे 'वायो!' 'दर्शत' "दर्शनीय!" दर्शनार्ह! त्वदर्थम् 'इमे' 'सोमाः' अस्माभिः 'अरङ्कृताः' "अलङ्कृता" पर्याप्ताः पात्रे संस्कृताः। स त्वमस्माकमिदम् 'हवम्' "आह्वानम्" 'श्रुधि' "शृणु"। श्रुत्वा च तत् 'आयाहि'। एत्य च 'तेषाम्' एतेषां सोमानां यः स्तोऽंशस्तं 'पाहि' "पिब"।—इत्येतदाशास्महे॥

वायोः सर्वस्थानतामपेक्ष्य विचारमापूर्य्य ततोऽवधारयति,—सर्वस्थानत्वेऽपि सति "कमन्यम्" इन्द्रात् "मध्यमात्" "एवम् अवक्ष्यत्" मन्त्रकृत्। सोमा अरङ्कृताः, तेषां पिब—इति प्रसिद्धं हि इन्द्रस्य मध्यमस्य सोमपानम्, तदर्थत्वात् सोमसंस्कारस्य, अप्रसाध्यमन्यस्य। तस्मादिन्द्र एव वायुः॥

"तस्य" इन्द्रस्य वायोः ऐन्द्रे एव सूक्ते यस्मामिन्द्रस्य विशे-

प्रणत्वेन वायुशब्द, तथा "एषा" "अपरा" ऋक् "भवति"—॥ २ ॥

आसस्राणासः शवसानमच्छेन्द्रं सुचक्रे रथ्यासो अश्वाः । अभि श्रव ऋज्यन्तो वहेयुर्नू चिन्नु वायोरमृतं वि दस्येत् ॥ आसस्वांसोऽभिबलायमानमिन्द्रं कल्याणचक्रे रथे योगाय रथ्या अश्वा रथस्य वोढार ऋज्यन्त ऋजुगामिनोऽन्नमभिवहेयुर्नवञ्च पुराणञ्च श्रव इत्यन्ननाम श्रूयत इति सतो वायोश्चास्य भक्षो यथा न विदस्येदितीन्द्रप्रधानेत्येके नैघण्टुकं वायुकर्मोभयप्रधानेत्यपरं वरुणो वृणोतीति सतस्तस्यैषा भवति ॥ ३ ॥

"आसस्राणासः."—इति (ऋ० सं० ४, ७, ८, १)। भरद्वाजस्यार्षम्। महाव्रते मरुदुक्थे शस्यते उत्तरे पक्षे। 'रथ्यास' "रथ्या" 'अश्वा' सुचक्रे' "कल्याणचक्रे" "रथे" योगार्थम् 'इन्द्र शवसानम् अच्छ' इन्द्रमभिबलायमानमधिकबलमात्मान मन्यमानम्, 'आसस्राणासः' "आसस्वास" नित्यमासर्पन्ति ये, तान् युक्त्वा रथेऽस्माकम्, आयाहि सोमपानाय यज्ञमिति। किमस्माकं ते कुर्वन्तु ? इति। "अभिश्रव ऋज्यन्तो वहेयु"। "ऋजुगामिन" भूत्वा 'श्रव' "अन्नम्" सोमाख्यमेतदस्मद्यज्ञे यत्। 'नूचित' "नव च पुराण च" तत्पानाय एवमिन्द्रमभिवहेयु। 'नु' क्षिप्रम्। यथा

"अस्य" 'वायोः' इन्द्रस्य इदम् 'असृतम्' एष सोमभक्षः न 'विदस्येत्'। अविदस्तेऽनुपक्षीणे एतस्मिन् सोमभक्षेऽभिवर्द्धेयुः।—इत्येतदाशास्महे॥

"नव:"—"इति" एतत् "नवनाम"। तद्धि सर्वत्र "नूयते"। "नूचित्"—इति नवपुराणाभिधायकौ निपातौ। नवम्, यः सोमो गृहीत्वा तत्कालमेव हूयते। पुराणं पुनः, यः, प्रातःसवने गृहीत्वा माध्यन्दिने सवने हूयते, तृतीयसवने वा, तद्यथा—अतिग्राह्या ध्रुवश्च॥

एवमेतस्मिन् मन्त्रे ऐन्द्रसूक्तमध्यपातित्वात् इन्द्रप्रधाने यद् वायुभिधानम्, तत् "नैघण्टुकम्" इन्द्रस्यैव विशेषणार्थं व्यञ्जनमात्रम्।—"इति एके"। "अपरे" पुनः "उभयप्रधाना" इयमृक् "इति" मन्यन्ते भेदपक्षवादिनः, तत् पुनरयुक्तम्, निष्केवल्ये विनियोगात्॥

"वरुणः" कस्मात्? "वृणोतीति सतः" स हि वियद् वृणोति मेघजालेन।

"तस्य एषा भवति"—॥ ३॥

नीचीनवारं वरुणः कवन्धं प्रससर्ज रोदसी अन्तरिक्षम्। तेन विश्वस्य भुवनस्य राजा यवन्न वृष्टिर्व्युनत्ति भूम॥ नीचीनद्वारं वरुणः कवन्धं मेघं कवनमुदकं भवति तदस्मिन्धीयत उदकमपि कवन्धमुच्यते बन्धिरनिभृतत्वे कमनिभृतञ्च प्रसृजति द्यावापृथिव्यौ चान्तरिक्षञ्च महत्त्वेन तेन सर्वस्य भुवनस्य राजा

यवमिव वृष्टिर्व्युनत्ति भूम॑ तस्यै॒षापरा॑ भवति ॥ ४ ॥

"नीचीनबारम्"—इति (ऋ० सं० ४, ४, ३, ३। अत्रे-रार्षम्। न्यक् अच्यते द्वारं यस्य, स भवति नीचीनद्वारः, अधो-द्वारः, तं "नीचीनद्वारम्" अधोविलं कृत्वा 'कवन्ध' "मेघ" 'वरुणः' मध्यमः। अतएव मेघसम्बन्धात् "कवनम् उदकम्" 'प्रससर्ज' "प्रसृजति" महत्त्वेन, न ह्यमहानेतच्छक्नुयात् कर्त्तुम्। 'रोदसी अन्तरिक्षम्' "द्यावापृथिव्यौ च अन्तरिक्षं च"। "मह-त्त्वेन" सर्वमापूरयिष्यन्निव। ततः तेन अतिप्रभूतोदकेन विसृष्टेन 'विश्वस्य भुवनस्य' भूतजातस्योदकस्य वा 'राजा' ईश्वरः 'यवं न' यवमिव, कश्चित् सत्कर्षी स्वम् 'वृष्ट्या' 'व्युनत्ति' विविध-मुनत्ति क्लेदयति 'भूम' "भूमिम्" कृतस्नाम् यः। सोऽस्माक-मिदं नाम करोतु॥

अथ चैवमन्यथा योज्यम्।—प्रसृजति द्यावापृथिव्यौ च अन्तरिक्षं च प्रकर्षेण सृजति उत्पादयति महत्त्वेन। यस्माच्चो-त्पादयति, तस्मात् स एव भुवनस्य राजा विश्वस्य भुवनस्य भूतजातस्य, तेन हेतुना तदनुग्रहाय नीचीनद्वारम् अधोविलं मेघं कृत्वा यवमिव वृष्टिर्व्युनत्ति भूमिमिति समानं पूर्वेण॥

कवन्ध इति मेघ उच्यते। कस्मात्? "कवनम्=उदकम्" कवतेर्गत्यर्थस्य "तदस्मिन् धीयते" इति कवन्धो मेघः। "उदक-मपि कवनमुच्यते"। तत् कस्मात्? अक्षीणत्वं भवे अथवा निराह,—"बन्धिः" धातुः "अनिभृतत्वे" निभृतस्तावद-चपलः, तद्विपरीतार्थवाची बन्धिः, कं च तच्चपलं चेति कबन्धम्, सुखं यानवस्थायि चेत्यर्थः॥

"तस्य" वरुणस्य मध्यमत्वे "एषा" "अपरा" ऋक्

"भवति"। सा पुनः किमर्थम्? वर्णकर्म वरुणाभिधानं च सूर्य्येऽपि दृष्टम्, उत्तरस्यान्तु शब्दत एव "मध्यमः"—वरुणः इति विशेषहेतुनोपपादयति—॥ ४॥

तमू षु समना गिरा पितॄणाञ्च मन्मभिः। नाभाकस्य प्रशस्तिभिर्यः सिन्धूनामुपोदये सप्तस्वसा स मध्यमो नभन्तामन्यके समे॥ तं स्वभिष्टौमि समानया गिरा गीत्या स्तुत्या पितॄणाञ्च मननीयैः स्तोमैर्नाभाकस्य प्रशस्तिभिर्ऋषिर्नाभाको बभूव यः स्यन्दमानानामासामपामुपोदये सप्तस्वसारमेनमाह वाग्भिः स मध्यम इति निरुच्यतेऽथैष एव भवति। नभन्तामन्यके समे। मा भूवन्नन्यके सर्वे ये नो द्विषन्ति दुर्द्धियः पापधियः पापसङ्कल्पा रुद्रो रौतीति सतो रोरूयमाणो द्रवतीति वा रोदयतेर्वा यदरुदत्तद्रुद्रस्य रुद्रत्वमिति काठकं यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति हारिद्रविकं तस्यैषा भवति॥ ५॥

"तमू षु समना"—इति (ऋ॰ सं॰ ६, ३, २६, १) नाभाकस्यार्षम्। सु-इत्येतस्योपसर्गस्य सम्बन्धि क्रियापदं नास्तीति "तं स्वभिष्टौमि"—इत्यभिपूर्वं क्रियापदमध्याह्रियते,—सुष्टुतमभिष्टौमि। केन? "समना" तत् "समानया" तद्योग्यया, 'गिरा' "गीत्या=स्तुत्या" "पितॄणां च मन्मभिः"

ये च पितृणा मननीया मननार्हा बहुमाना स्तोमा, तैश्चाहमभिष्टौमि। 'नाभाकस्य प्रशस्तिभि' याश्च मम नाभाकस्य प्रशस्तय स्तुतय. योग्या त वरुण प्रति, ताभिरभिष्टौमि। किलचण ? 'य' वरुण 'सिन्धूनाम् उपोदये' "स्यन्दमानानाम्" "अपाम्" 'उपोदये' उपोद्गमे। अन्तरिच्च लोके वर्षस्य 'सप्तस्वसा' सम्पद्यते। मध्यमाभि अम्बाद्याभि सप्तभि "वाग्भि" 'स मध्यम'—"इति" वरुण "निरुच्यते" शब्दत पर्वतस्मिन्मन्त्रे। तदनुग्रहादस्माक 'नभन्तामन्यके समे' "मा भूवन्नन्यके सर्वे" अन्य एव अन्यके शत्रव, ते मा भूवन्नस्माकमिति॥

"रुद्र" कस्मात्? "रौतीति सत" स हि स्तनयित्नु शब्द करोति, "रोरूयमाणो द्रवति इति वा" शब्द कुर्वाणो मेघो दरस्थो द्रवतीति "रोदयते वा" शत्रूनसौ रोदयति दु खयति। ब्राह्मणमपि चैतस्मिन्नर्थे भवति,—"यदरुदत् तद्रुद्रस्य रुद्रत्वम्"—"इति" "काठकम्" कठाना प्रवचनम्। ऐतिहासिकैरेतत् समवैति,—"स किल पितर प्रजापतिमिषुणा विध्यन्तमनुशोचन्नरुदत् तद्रुद्रस्य रुद्रत्वम्। यदरोदीत् तद्रुद्रस्य रुद्रत्वम्" —"इति, हारिद्राविकम्" स एवार्थ, केवलन्तु शाखान्तरमन्यत्। एव शाखान्तरेभ्योऽपि देवताभिधाननिर्वचनान्यवराण्युपेक्ष्याणीत्युपप्रदर्शनार्थम्। हारिद्रवो नाम मैत्रायणीयाना शाखाभेद॥

"तस्य एषा भवति"—॥ ५॥

इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने। अषाळ्हाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः। इमाः

रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवायान्नवतेऽषाढायान्नैः सहमानाय विधात्रे तिग्मायुधाय भरत शृणोतु नस्तिग्मम्तेजतेरुत्साहकर्मण आयुधमायोधनात्तस्यैषापरा भवति ॥ ६ ॥

इमा रुद्राय"—इति (ऋ॰ सं॰ ५, ४, १२, १)। वसिष्ठस्यार्षम्, उत्तरा (२२७ पृ॰) च। मूलगवे विनियोगः। हे स्तोतारः! यूयमुच्यध्वे,—'इमाः गिरः' स्तुतीः 'भरत' 'रुद्राय' किंलक्षणाय? 'स्थिरधन्वने' "दृढधन्वने" दृढधनुषे, 'क्षिप्रेषवे' शीघ्रेषवे 'देवाय' दानादिगुणयुक्ताय, 'स्वधाव्ने' स्वधावते "अन्नवते" शीघ्रे षवे, 'अषाळ्हाय' "अषाढाय" अनभिभूताय केनचित् "सहमानाय" नित्यमभिभवते शत्रून्, 'वेधसे' "विधात्रे" 'तिग्मायुधाय' तीक्ष्णायुधाय, स च इमा गिर उच्यमानाः 'शृणोतु' 'नः' अस्माकम्।—इत्येतदाशास्महे ॥

"सहमानाय"—इति बलकृतेः मध्यमः ॥

"तस्य एषा अपरा भवति"—सा पुनः किमर्थम्? "विधात्रे"—इत्युक्तं पूर्वस्यामपि (२२६ पृ॰ २ पं॰), तत्रैतत् भवति—किमसौ विधत्ते? इति, अतः परया निर्ब्रवीति—रक्षःपिशाचानिति ॥ ६ ॥

या ते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः। सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः ॥ या ते दिद्युदवसृष्टा दिवस्परि दिवोऽधि दिद्युद्द्यतेर्वा द्युतेर्वा द्योततेर्वा क्ष्मया चरति क्ष्मा पृथिवी तस्या-

स्वरति तया चरति विद्भाययन्ती चरतीति वा परिवृणक्तु नः सा सहस्रन्ते स्वाप्तवचन भैषज्यानि मा नस्त्वं पुत्रेषु च पौत्रेषु च रीरिषस्तोकं तुद्यतेस्तनयं तनोतेरग्निरपि रुद्र उच्यते तस्यैषा भवति ॥ ७ ॥

"या ते दिद्युदवसृष्टा"—इति (ऋ० सं० ५, ४, १३, ३) । हे भगवन् । 'या' 'ते' तव 'दिद्युत्' आयुधम्, ज्वरातीसारादिरोगाख्यम, येन प्राणिनो हंसि। 'दिवस्परि' द्युलोकादधि त्वया 'अवसृष्टा' 'चरति'। सर्वैव हि देवता द्युस्थाना इति गम्यते, दिवस्परीति लिङ्गात्, कर्माधिकारस्थानानि तु विशिष्टानि—इति तिसृणां त्रीणि कर्माधिकारस्थानानि नियतानि भवन्ति, अतएवोक्तमग्न्यधिकारे द्युस्थानो भवति—इति। कथम् ? या चरति दिद्युत् ? 'क्ष्मया' पृथिव्या व्रीह्यादिभावमुपगतया, "तस्या" व्रीह्यादिभावमुपगताया पृथिव्यामनुप्रविश्य चरति अन्नपानसमुद्भूता, तत्प्रभवत्वात् सर्वरोगाणाम्, तदुक्तम्,—"नमोऽस्तु रुद्रेभ्यो ये के च पृथिव्यां येषामन्न वातो वर्षमिषव"—इति (य० वा० सं० १६, ६६)। तस्या किम् ? दिद्युत सा अतो प्राणिनोऽस्मान् 'परिवृणक्तु' परिवर्त्तयतु 'न'। किमन्यदस्तु त्वत्तोऽस्माकम् ? "सहस्रं ते स्वपिवात भेषजा"। हे 'स्वपिवात' "स्वाप्तवचन !" कस्यचिदपि अनतिक्रमणीयाज्ञ। यानि तव 'सहस्र' 'भेषजा' "भैषज्यानि" यैर्बहुभिः बहुप्रकारम् भेषजं करोषि भक्तानाम्, तान्यस्मान् प्रति सन्तु। किञ्च, 'मा न' मा

अस्माकम् 'तोकेषु' "पुत्रेषु" 'तनयेषु' "पौत्रेषु च" 'रीरिषः' हिंसां नो मा प्रयुङ्क्ष्व।—इत्येतदाशास्महे॥

"दिद्युत्"—"द्यतेः वा" अवखण्डनार्थस्य (दि० प०), "द्युतेः वा" दीप्त्यर्थस्य (भ्वा० प०)। "विक्षापयन्ती चरतीति वा" हिंसन्ती चरतीति वा। "तोकम्"—इति पुत्रः, स हि नित्यं पित्रा विनयता तुद्यते इदं कुर्विदं मा कार्षीरिति। "तनयम्"—"तनोतेः" पौत्रम्, तद्धातितरां पितुः सकाशात् ततं भवति। सत्यप्यत्यनामत्वाविशेषे इत्थाजामितैव विशेषः। एवमन्यत्रापि समानार्थानामेकवाक्ये विशेषं चपेक्ष्य इति दर्शयति॥

"अग्निः अपि रुद्रः उच्यते"—इति। विचारानुस्मृतये मद्दैवप्रदर्शनम्॥

"तस्य" "एषा" "भवति" अग्नेः रुद्रस्य—॥ ७॥

जराबोध तद्विविड्ढि विशेविशे यज्ञियाय। स्तोमं रुद्राय दृशीकम्॥ जरा स्तुतिर्जरतेः स्तुतिकर्मणस्तां बोधतया बोधयितरिति वा तद्विविड्ढि तत् कुरु मनुष्यस्य मनुष्यस्य यजनाय स्तोमं रुद्राय दर्शनीयमिन्द्र इरां दृणातीति वेरां ददातीति वेरां दधातीति वेरां दारयत इति वेरां धारयत इति वेन्दवे द्रवतीति वेन्दौ रमत इति वेन्धे भूतानीति वा तद्यदेनं प्राणैः समैन्धंस्तदिन्द्रस्येन्द्रत्वमिति विज्ञायत

इदं करणादित्याग्रयण इदं दर्शनादित्यौपमन्यव इन्द्रमेवैश्वर्यकर्मणः इदञ्छत्रूणां दारयिता वा द्रावयिता वादरयिता च यज्वनां तस्यैषा भवति ॥ ८ ॥

"जरा बोध"—इति। (ऋ० सं० १, २, २३, ५। सा० सं० छ० आ० १, १, २, ६)। अन.शेपस्यार्षम्। "अग्ने न त्वा वारवन्तम्"—इति (ऋ० सं० १म० ६अनु० ४सू०)। एतस्मिन् सूक्ते प्रातरनुवाके विनियोग। येयं मया तव 'जरा' स्तुतिरुच्यते, भगवन्नग्ने! रुद्र! तां त्वं 'बोध' बुध्यस्व। अथवा हे जराबोधयितः! स हि जरया स्तुत्या शीघ्रत्वे वर्त्तमानोऽभिमतमर्थं यजमानानां सम्पादयन् देवान् बोधयति। 'तत् विविड्ढि' "तत् कुरु" 'विशेविशे' मनुष्याय, 'यज्ञियाय' यज्ञसम्पादिने जनाय, यत् त्वया यज्ञे कर्त्तव्यम्, ततः तुभ्यं रुद्राय देवानां स्तोत्रं स मनुष्यः 'दृशीकम्' "दर्शनीयम्" श्रवणीयम्, श्रवणार्हम् व्यपगतदोषं स्तोत्रमुच्चारयिष्यति॥ "यो अग्नौ रुद्रो यो अप्स्वन्तर्य ओषधीर्वीरुध आविवेश। य इमा विश्वा भुवनानि चाक्लृपे तस्मै रुद्राय नमो अस्त्वग्नये॥"—इति (अथ० सं० ७, ८७, १)।

"इन्द्र." कस्मात्? "इरां दृणाति—इति वा" इराम् अन्नं ओषध्यादि, दृणाति विदारयति, इराशब्दात् पूर्वपदम्, दृणातेरुत्तरपदम्, यथाङ्कुरितमङ्कुरं बीजं भिनत्ति, तमिन्द्रकारितम्, सोऽयम् "इरादारः सन् इन्द्रः"—इति परोक्षेणोच्यते, यथा "अग्रणीः सन्नग्निः"—इति। विज्ञायते हि "परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः"—इति। सर्वत्रैवं देवताभिधेये;

त्वभिधानत एव हि देवता आत्मनस्तत्त्वमन्तर्णीय व्यवधाय आत्मानमविदुषां परोक्षीकृत्य नित्यं वर्त्तते, तां तु विद्वांसः तदभिधानव्युत्पत्तिद्वारेण विहत्य दैवेन चक्षुषा मनसोपजात-दिव्यदृष्टयो दृष्ट्वा साक्षात्प्रतिपद्यन्ते इति तदभिधानव्युत्पत्तौ कृतयत्नः पुरुषार्थं आहितः। इन्द्रश्च भूयिष्ठभाक् प्रायदेवतानामुभयोरध्यात्माधिदैवतयोरिति तदभिधानमाचार्य्योऽतितरां निरवोचत्। "इरां ददाति—इति वा"। तदेव पूर्वपदम्, ददातिरुत्तरपदम्। यो वर्षद्वारेणासौ इरामन्नं ददाति। सोऽयम् इरादः=इरादाता=इन्द्रः। "इरां दधाति—इति वा"। तदेव पूर्वपदम्, दधातेर्दानार्थस्य धारणार्थस्य वा उत्तरपदम्। सोऽयम् इराधः=इराधारयिता=इन्द्रः। "इरां दारयति—इति वा"। तदेव पूर्वपदम्, दारयतेरुत्तरपदम्। सोऽयम् इरादारयिता=इन्द्रः। "इन्दवे द्रवति—इति वा"। इन्दुशब्दात् पूर्वपदम्, द्रवतेरुत्तरपदम्। इन्दुः सोमः, तं पातुमसौ द्रवति, द्रवतिर्गत्यर्थः, सोमपानार्थमसौ द्रवतीति। सोऽयम् इन्दुद्रवः=इन्द्रः।

"इन्दौ रमते—इति वा"। क्रीडत्ययं सोमे इतीन्द्रः। "इन्धे भूतानि—इति वा"। "ञि इन्धी दीप्तौ"—इत्यस्य। भूतानि ह्यसावसौ प्रत्यधिदैवस्थोऽध्यात्मस्थो वाऽध्यवहारयन् विभजमानश्च दीपयति द्युतिमन्ति करोति। सोऽयम् इन्धः=इन्द्रः। "तत्" इदमपरमिन्द्रस्य इन्द्रत्वं ब्राह्मणे उच्यते। "यदेनं" मध्यतोऽवस्थितं शरीरस्य "प्राणैः" प्राणभावेन विशिष्टेतरान् प्राणान् वागादीनितरप्राणवृत्तिमाहाभाग्यसम्प्रदानेन यदहं विशिष्टोऽस्मि त्वं तद्विशिष्टोऽसीत्येवमादिना प्राणाधिदेवताः "समैन्धन्" समदीपयन् सन्तानार्थं "तदिन्द्रस्येन्द्रत्व-मिति विज्ञायते"। इन्धे भूतानीति कर्त्तरि, प्राणैरेनं समै-

त्यतेति कर्मणि। "इदङ्करणात्—इति आग्रयण."। इदं-शब्दात् पूर्वपदम्, करोतेरुत्तरपदम्, इदमसौ सर्वमकरोदिति। सोऽयम् "इदङ्कर—इन्द्र"। "इदन्दर्शनात्—इति औप-मन्यव"। इदं पूर्वपदम्, दृशिरुत्तरपदम्, इदमसावद्राक्षीत् सर्वमिति। सोऽयम् "इदन्दर्शी=इन्द्र."।

"इन्दतेः वा ऐश्वर्य्यकर्मणः"। इन्देः पूर्वपदम्, द्रवतेः द्रावयतेः वा उत्तरपदम्। किमसौ द्रवति, दारयति वा? इति। "शत्रूणां दारयिता वा, द्रावयिता वा"। किमुक्तं भवति? ईश्वरश्चासौ द्रावयिता शत्रूणाम्, अथवा ईश्वरश्चासौ दारयिता च शत्रूणाम्, अथवा ईश्वरश्चासौ "आदरयिता च यज्वनाम्" आदरकर्त्ता यज्वनामुपरि॥

"तस्य एषा भवति"—॥ ८॥

अर्द॑र्द॒रुत्स॒मसृ॑जो॒ वि खानि॒ त्वम॑र्ण॒वान् ब॑द्बधा॒नाँ अ॑रम्णाः। म॒हान्त॑मिन्द्र॒ पर्व॑तं॒ वि यद्वः॑ सृ॒जो वि धारा॒ अव॑ दान॒वं ह॑न्॥

अदृणा उत्समुत्स उत्सरणाद्वोत्सदनाद्वोत्स्यन्दनाद्वोनत्तेर्वा व्यसृजोऽस्य खानि त्वमर्णवानर्णस्वत एतान्माध्यमिकान् संस्त्यायान् बावध्यमानानरम्णा रम्णातिः संयमनकर्मा विसर्जनकर्मा वा महान्तमिन्द्र पर्वतं मेघं यद्व्यवृणोर्व्यसृजोऽस्य धारा अवहन्नेनं दानवं दानकर्माणं तस्यैषापरा भवति॥ ९॥

"अर्द॑र्द॒रुत्स॒म्"—इति (ऋ० स० ४, १, १९, १४ व० ३

ऋ० भा० ४, १, ३, ३)। गातोरात्रेयस्यार्षम्। "उत्स." मेघ:। स: कस्मात्? "उत्सटनाद्वा" उत्पूर्वस्य सदे:, कर्तृ मसौ सत्र इत्युक्त:। उत्पूर्वस्य वा स्यन्दते., उपर्य्यसाववस्थित: स्यन्दतीत्युक्त:। उनत्ते: वा" "उन्दी क्लेदने (रु० प०)"—इत्यस्य, क्लेदयत्यसौ। तम् "उत्सम्" मेघं हे भगवन्! 'इन्द्र'! त्वम् 'अदर्द:, दारितवानसि त्वम्। दारयित्वा च जर्जरीकृत्य तस्य उत्सस्य 'खानि' 'विखानि' विलानि विहृतानि त्वमकरो:। उदकनिर्गमनद्वाराणि स त्वममुना प्रकारेण 'अर्णवान्', "अर्णस्वत:" अर्णसा उदकेन तद्वत:, "एतान् माध्यमिकान्" "सस्थायान्" मेघसङ्घातान्, उदकभारेणाति गुरुणा "वाध्यमानान्" यथाकालम् 'अरम्णा:' विसृष्टवानसि। "रम्णातिर्धातु:" "सयमनकर्मा" अन्यत्र, तद्यथा—"मुवितो युन्धे. पृथिवीमरम्णात्" (ऋ० सं ८, ८, ७, १)। इत्यत्र, इह पुनर्मेघविदारणसम्बन्धात् "विसर्जनकर्मा"। किञ्च, 'महान्तम्' योऽप्यतिमहान् पर्वतो मेघ', केनचिदप्यन्येनाशक्यो विहृतद्वार: कर्त्तुम्, तमपि 'वि यद् व:' "यद् व्यहृणो." विहृत्वम् अपाहृतोदकनिर्गमनद्वारमकरो:। विहृत्य च 'सृज: वि धारा.' "व्यसृज: धारा:" त्वम् उदकधारा: पुन: पुन: 'अवहन्' अवघ्नन् 'दानवम्' उदकदातारं मेघम्। य एतदकार्षी: त्वं स इदं नामाख्यातं कुरुष्वेति।

"तस्य" "एषा" अपरा "भवति"—। सा पुन: किमर्थम्? उक्तं हि "अथास्य कर्म—रसानुप्रदानम्, वृत्रवध., या च का च बलकृति." इति, तदेतदिह रसानुप्रदानं वृत्रवधश्च दर्शितम्, बलकृत्युपप्रदर्शनार्थमपर उदाह्रियते—॥ ८ ॥

यो जात एव प्रथमो मनस्वान् देवो देवान्

क्रतुना पर्य्यभूषत्। यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः॥ यो जायमान एव प्रथमो मनस्वी देवो देवान् क्रतुना कर्मणा पर्य्यभवत् पर्य्यगृह्णात् पर्य्यरक्षदत्यक्रामदिति वा यस्य बलाद् द्यावापृथिव्यावप्यबिभीतां नृम्णस्य मह्ना बलस्य महत्त्वेन स जनास इन्द्र इत्यृषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता पर्जन्यस्तृपेराद्यन्तविपरीतस्य तर्पयिता जन्यः परो जेता वा जनयिता वा प्रार्जयिता वा रसानां तस्यैषा भवति॥ १०॥

"यो जात एव प्रथम"—इति (ऋ० स० २, ६, ७, १)। गृत्समदस्यार्षम। इन्द्राय नमसते पुराडाश, तस्य याज्या। गृत्समदमिन्द्रवरप्रदानादैन्द्र रूप बिभ्रतमिन्द्रोऽयमिति मन्यमाना जिघांसवोऽसुरा किल मरुद्गणे विनाकृतोऽयमिदानीमेक शक्यो हन्तुमिति परिवव्रिर, स किल भीतोऽनेन सूक्तेनेन्द्र तुष्टाव,—आत्मानञ्च ब्राह्मण परेभ्य प्रतिवेदयाञ्चकार।—

'य' 'जात एव' जातमात्र एव 'प्रथम' मुख्य सर्वभूतानां प्रति मुख्यता सम्पेदे। "मनस्वी' च मेधावी, अन्ये हि कालेन मुख्या सम्पद्यन्ते मेधाविनश्च। "देवो देवान् क्रतुना पर्य्यभूषत्"। सत्यपि देवत्वाविशेषे इतरान 'देवान्' क्रतुना' "कर्मणा 'पर्य्यभूषत्' "पर्य्यगृह्णात् परिगृहीतवान् स्वामित्वेन, "पर्य्यरक्षद" मुख्यत्वात्, "अत्यक्रामत् वा"

प्रभावेण। 'यस्य' च 'शुष्मात्' शारीरात् "बलात्" 'रोदसी' "द्यावापृथिव्यौ अपि" 'अभ्यसेताम्' "अबिभीताम्"। 'नृम्णस्य मह्ना' "बलस्य" सेनालक्षणस्य "महत्त्वेन" अति महदसह्यमस्य बलमवश्यमयमावां सादयिष्यतीत्येवमतिमहत्त्वादिति द्यावापृथिव्यावबिभीतां यस्य शुष्मात्। 'जनासः !' हे असुरजनाः ! 'सः इन्द्रः' नाहमिन्द्रः, नाह्मणोऽहम्, तत्प्रसादादेवासतद्रूप इति ॥

"ऋषेः दृष्टार्थस्य" अनुभूतेन्द्रमैश्वर्यस्येन्द्रवयस्यस्य गृत्समदस्य इन्द्रे प्रति "प्रीतिः" स्तुतिः "भवति" "आख्यानसंयुक्ता" आख्यानसम्बन्धात्। अतश्च दर्शयति मन्त्राणामैतिहासिकोऽप्यर्थ उपेक्षितव्योऽनापदि तेषां विषय इति। अथवा "दृष्टार्थस्य"—इति देवतार्थम्, स तच्चतो दृष्टवता भावितान्तःकरणस्य "प्रीतेः" अतिदर्पात् "आख्यानसंयुक्ता" अन्येभ्यः कथनसंयुक्तेत्यर्थः ॥

"पर्जन्यः" "तृपेराद्यन्तविपरीतस्य"। "तृप तृप्तौ (दि० प०)"—इत्यस्य धातोः। स काय भवति ? आद्यन्तविपर्ययेण। अतस्तमाद्यन्तविपर्ययं स्वयमेव दर्शयति,—"तर्पयिता" स एव भवति। किम् ऐकदेशिकः। न-इत्युच्यते,—"जन्यः" सर्वजनपदतर्पयिता। अथवैवमन्यथा स्यात्,—"परो जेता वा" परः प्रकृष्टो जेता पर्जन्यः, परशब्दात् पूर्वपदम्, जयतेरुत्तरपदम्। "परो जनयिता वा" प्रकृष्टो जनयिता, तदेव पूर्वपदम्, जनयतेरुत्तरपदम्। "प्रार्जयिता वा" कस्य ? "रसानाम्" प्रपूर्वस्यार्जयतेः पर्जन्यः, स हि रसान् प्रकटीकरोति।

"तस्य एषा भवति"—॥ १० ॥

वि वृक्षान् हन्त्युत हन्ति रक्षसो विश्वं बिभाय भुवनं महावधात् । उतानागा ईषते वृष्ण्यावतो यत्पर्जन्यः स्तनयन् हन्ति दुष्कृतः ॥ विहन्ति वृक्षान् विहन्ति च रक्षांसि सर्वाणि चास्माद् भूतानि बिभ्यति महावधान्महान् ह्यस्य वधोऽप्यनपराधो भीतः पलायते वर्षकर्मवतो यत्पर्जन्यः स्तनयन् हन्ति दुष्कृतः पापकृतो बृहस्पतिर्बृहतः पाता वा पालयिता वा तस्यैषा भवति ॥ ११ ॥

"वि वृक्षान् हन्ति"—इति (ऋ० सं० ४, ४, २७, २)। अत्रं रार्थम्। कारीर्यां दिगुपस्थाने विनियोग । 'वि वृक्षान् हन्ति' "विहन्ति वृक्षान्" 'पर्जन्य' अशनिपाते । कदा? यदा तस्करादीन् अनाकालप्रभवान् 'दुष्कृत' "पापकृत" वर्षेण ओषधीरभिनिष्पादयन् 'स्तनयन्' 'हन्ति' उपशमयति, सुभिक्ष कुर्वन्, तदा। "विहन्ति च रक्षांसि" विविध हन्ति क्रूरकर्मण । 'विश्व बिभाय' "सर्वाणि चास्माद्भूतानि बिभ्यति 'महावधात्' पर्जन्यात्। कथम्? "उत अनागा ईषते" एव नाम महावधात् अस्मात् सर्वाणि भूतानि बिभ्यति, येन 'अनागा अपि' "अनपराधोऽपि" सन् सर्व एव "अस्मात्" "वर्षकर्मवत" स्तनयित्नुशब्दैरशनि सुहत 'ईषते' "पला यते" मामय 'स्तनयन् हन्ति'—इति मन्यमान । सोऽयमेव मतिमहानुभावो भगवान् पर्जन्य, स वर्षलक्षणकर्मेति ॥

"बृहस्पति." कस्मात्? "बृहतः पाता वा पालयिता वा"

'बृहतः' महतोऽस्य जगतः उदकस्य वा 'पाता' रक्षिता, 'पालयिता' अपि रक्षितैव, धात्वन्यत्वमर्थैकत्वम्॥

"तस्य एषा भवति"—॥ ११ ॥

अश्नापिनद्धं मधु पर्य्यपश्यन्मत्स्यं न दीन उदनि क्षियन्तम्। निष्टज्जभार चमसं न वृक्षाद् बृहस्पतिर्विरवेणा विकृत्य॥ अशनवता मेघेनापिनद्धं मधु पर्य्यपश्यन्मत्स्यमिव दीन उदके निवसन्तं निर्जहार तच्चमसमिव वृक्षा-च्चमसः कस्माच्चमन्त्यस्मिन्निति बृहस्पतिर्विरवेण शब्देन विकृत्य ब्रह्मणस्पतिर्ब्रह्मणः पाता वा पालयिता वा तस्यैषा भवति॥ १२॥

"अश्नापिनद्धम्"—इति (ऋ० सं० ८, २, १८, २)। अयास्यस्याङ्गिरसस्यार्षम्। 'अश्ना' "अशनवता" व्यापनवता "मेघेन" 'अपिनद्धम्' आत्मनो मध्यमतिनीय नद्धं बद्धं विहृतं व्यवहितमदृश्यमन्यैः, 'बृहस्पतिः' 'मधु' उदकम् "पर्य्यपश्यत्" सर्वतोऽपश्यत्। कथम्? "मत्स्यं न दीन उदनि क्षियन्तम्"। 'मत्स्यम्' 'न' "इव" 'दीने' 'उदनि' "उदके" उपक्षीयमाणप्राये 'क्षियन्तं' "निवसन्तम्" यथा मत्स्यमल्पो-ऽल्पउदके जिघृक्षुर्मत्स्यं परिपश्येच्छक्यो गृहीतुमयमिति, एवं पर्य्यपश्यत्। "निष्टज्जभार चमसं न वृक्षात्"। तच्च मधु दृष्ट्वा 'निर्जभार' "निर्जहार" निर्हृतवान्, कथम् 'चमसं न वृक्षात्' यथा कश्चित् कुशल शिल्पी वृक्षमध्यात् 'चमसं यज्ञपात्रं निर्हरेत् निष्पादयेत्, एवं निर्जहार बृहस्पतिः। अतएवादकनिर्हर-

यात् मध्यमः। कथमसौ निर्जहार? 'विरवेण विकृत्य' भौषयेन अतिमहता रवेण "शब्देन" सङ्क्षोभ्य मेघम्, सस्तसर्वाङ्गसन्धिबन्धनं कृत्वा विकृवम्, तत एव विश्लीभूतं विकृत्य समन्ततो विशकलीकृत्य। एवं निर्जहार मधु यो बृहस्पतिः, सोऽस्माकमपीदं करोत्विति॥

"चमस कस्मात्?" चमेर्भक्षणार्थस्य, तत्र हि सोमयश्यते॥

"ब्राह्मणस्पति" कस्मात्? "ब्रह्मण' पाता वा पालयिता वा" ब्रह्म=अन्नम्, ऋगादि वा तस्योभयस्याप्यसौ वर्षेणौषधीरभिनिष्पादयिता सम्पद्यते, वर्षाभावे ह्येतदुभयमुत्सीदति॥

"तस्य एषा भवति"—॥ १२ ॥

अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभि यमोजसाटृणत्। तमेव विश्वे पपिरे स्वर्दृशो बहु साकं सिसिचुरुत्समुद्रिणम्॥ अशनवन्तमास्यन्दनवन्तमवातितं ब्रह्मणस्पतिर्मधुधारमभि यमोजसा बलेनाभ्यतृणत् तमेव सर्वे पिबन्ति रश्मयः सूर्यदृशो बह्वेनं सह सिञ्चन्त्युत्समुद्रिणमुदकवन्तम्॥ १३ ॥

इति दशमाध्यायस्य प्रथमः पादः॥ १०, १ ॥

"अश्मास्यमवतम्"—इति (ऋ० सं० २, ७, १, ४)। अश्मशब्दात्‌ "अशनवन्तम्"—इति, आस्यशब्दात्‌ "आस्यन्दनवन्तम्"—इति, भाष्यकारश्चकार, तथा सामर्थ्यमपेक्ष्य। किमुक्तं भवति? उदकव्यापनक्रियया तद्-

न्तम्, आस्यन्दनक्रियया चोदकप्रचरणक्रियया तद्वन्तम्। 'अश्मास्यम्' मेघम् 'मधुधारम्' उदकं धारयितारं 'यम्' 'ओजसा' "बलेन" "अभ्यतृणत्" अभ्यहनत् 'ब्रह्मणस्पतिः' 'तम्' 'अवतम्' "अपातितम्" अवाङ्पतितं भूमिम् उदकभावेन गतम्, पुनरादानकालमुदकस्य प्राप्य 'तम् एव' 'विश्वे' "सर्वे" 'पपिरे' "पिबन्ति" तदुदकमाददते। के पुनस्ते? 'स्वर्दृशः' सूर्यस्य "रश्मयः" सूर्य इव ये दृश्यन्ते, ते सूर्यसमानदर्शनाः, स्वभावेन वा सूर्यभावेन ये मण्डलीभूता दृश्यन्ते, ते पिबन्ति, पुनश्च प्राप्य तदुत्सर्गकालं 'बहु साकम्' 'बहु' तत् उदकम्, 'साकम्' सहभूताः मण्डलात् अवाञ्चः आहत्य "एनम्" अन्तरिक्षे, 'उत्सम्' मेघम् 'उद्रिणम्' "उदकवन्तम्" कुर्वन्तः 'सिञ्चति'। तच्च पुनरेवं मेघं यो ब्रह्मणस्पतिः लोकानुग्रहाय प्रतिसंवत्सरं तृणेढि, सोऽस्माकमिद नाम करोत्विति ॥ १३ ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ चतुर्दशाध्यायस्य
(दशमाध्यायस्य) प्रथमः पादः ॥ १०, १ ॥

द्वितीयः पादः।

क्षेत्रस्य पतिः क्षेत्रं क्षियतेर्निवासकर्मण-स्तस्य पाता वा पालयिता वा तस्यैषा भवति ॥ १ (१४) ॥

"क्षेत्रस्य पतिः" कस्मात्? "क्षेत्रम्" तावत् "क्षियतेः निवासकर्मणः." तदाश्रयेण हि ग्रामे क्षियन्ति निवसन्ति कुटुम्बिनः। "तस्य पाता वा पालयिता वा" मध्यमः, तत्क-

मोपपत्तौ हि चेत्रस्य चेत्रलमाफल्यम्, यदा हि मध्यमेन दृष्ट भवति, अथ चेत्रं सफलं भवति। विगृहीतमेव समाम्नातम्, निगमे तथा दृष्टलात् ॥

"तस्य एषा भवति"—॥ १ (१४) ॥

क्षेत्र॑स्य॒ पति॑ना व॒यं हि॒तेने॑व जयामसि। गामश्वं॑ पोषयि॒त्न्वा स नो॑ मृळातीदृशे॑ ॥ क्षेत्रस्य पतिना वयं सुहितेनेव जयामो गामश्वं पुष्टं पोषयित्नु चाहरेति। स नो मृळाती-दृशे। बलेन वा धनेन वा मृळतिर्दानकर्मा पूजाकर्मा वा तस्यैषापरा भवति ॥ २ (१५) ॥

"क्षेत्र॑स्य॒ पति॑ना व॒यम्"—इति (ऋ० स० ३, ८, ८, १)। वामदेवस्यार्षम्। चेत्रस्य पतये चरौ पुरोऽनुवाक्या। 'चेत्रस्य पतिना' सुष्ठु 'हितेन' केनचिदाप्तेन मित्रेण इव सयुक्ता सन्त. 'वयम्' "जयाम" गवाश्वादीनि धनानि पुष्टानि बलवन्ति पोषयितॄणि पोषणाय समर्थानि उपनामितद्रव्याणि चास्माक चेत्रस्य पतिना त्वत्प्रसादादेव तानि भोक्तु शक्तिरस्तु। कथम्? इति। 'आ'—इत्यस्योपसर्गस्य सम्बन्धि क्रियापदमध्याजहार भाष्यकार "आहर"—इति। कोऽर्थ? उपजातशक्तयो वयमेवमाज्ञापयन्त. परिचारकानिदमाहरतेति सर्वद्रव्याणि यथा ब्रूवीमहि, तथा चेत्रस्य पतिरस्मान् करोतु। "मृळति: दानकर्मा"। "ईदृशे" धनलाभाय भोगाय चास्मान् ददातु, धारयतु, नित्य स्थिरान् करोतु।—इत्येतदाशास्महे ॥

"तस्य एषा अपरा भवति"—१ का पुन किमर्थम्? यस्य चरौ एषा पुरोऽनुवाक्या, तत्र ब्राह्मण भवति,—"इयं वै चेत्रं

पृथिव्यामदीनायां प्रतितिष्ठति"—इति, यतः परया वर्णलिङ्गयोपपादयति मध्यस्थान एवैष पतिरिति, भक्तिमात्रं प्राप्नुयमिति ॥ २ (१५) ॥

क्षेत्र॑स्य पते॒ मधु॑मन्तमू॒र्मिं धे॒नुरि॑व॒ पयो॑ अ॒स्मासु॑ धुक्ष्व । म॒धु॒श्चुतं॑ घृ॒तमि॑व॒ सुपू॑तमृ॒तस्य॑ नः॒ पत॑यो मृळयन्तु ॥ क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयोऽस्मासु धुक्ष्वेति मधुश्चुतं घृतमिवोदकं सुपूतमृतस्य नः पातारो वा पालयितारो वा मृळयन्तु मृळयतिरुपदयाकर्मा पूजाकर्मा वा तद्यत् समान्यामृचि समानाभिव्याहारं भवति तज्जामि भवतीत्येकं मधुमन्तं मधुश्चुतमिति यथा यदेव समाने पादे समानाभिव्याहारं भवति तज्जामि भवतीत्यपरं हिरण्यरूपः स हिरण्यसंदृगिति यथा यथा कथा च विशेषोऽजामि भवतीत्यपरं मण्डूका इवोदकान् मण्डूका उदकादिवेति यथा । वास्तोष्पतिर्वास्तुर्वसतेर्निवासकर्मणस्तस्य पाता वा पालयिता वा तस्यैषा भवति ॥ ३ (१६) ॥

"क्षेत्रस्य पते"—इति (ऋ० सं० ३, ८, ८, २)। आर्षे यदेव पूर्वस्या. । विनियोगो महाव्रते, आदित्यं चरूपवत्तः स्तनयत्, तस्य तृतीयमनयर्चा ग्रह्णते । हे 'क्षेत्रस्य पते !'

'मधुमन्तम् ऊर्मिम्' मधुरं स्वादु उदकसङ्घातम्, 'धेनुः' यथा 'पयः' दोग्धि, एवम् 'अस्मासु' 'धुक्ष्व' प्रक्षर। किञ्च "मधुश्चुतं घृतमिव सुपूतम्"। मधु इव यत् मुहुर्मुहुः श्चोतति, 'घृतमिव सुपूतम्' उदकमकलुषम्, तस्य दानेन "ऋतस्य नः पतयो मृडयन्तु"। 'ऋतस्य' उदकस्य 'पतयः' "पातारः" माध्यमिका देवाः चैतस्य पतिप्रमुखाः 'मृडयन्तु' नित्यमस्मान् रक्षन्तु, पूजयन्तु वा॥

अतएव मन्त्रात् प्रसक्तमत' परं सर्वमन्त्रेषु जाम्यजामिता पदानां चिन्त्यते।—जामीति पुनरुक्तस्य सञ्ज्ञा, सा पुनरियं निगमत एव। विज्ञायते हि—"जामि वा एतद् यज्ञे क्रियते, यन्मरुत्वतीयो ग्रहो गृह्यते मरुत्वतीय ग्रस्यते"—इति। तदेतत् पुनरुक्तं द्विविधम्।—समानशब्दार्थम्, असमानशब्दार्थञ्च। तत्र समानशब्दार्थं नाम, यदेकमेव पदमेकार्थमेकस्मिन्नेव वाक्याधिकारे पुनरुच्यते। तद्यथा—"मम्म रेजति रक्षोहा मम्म रेजति"—इति (ऋ० सं० २, १, १७, १)। तदधिकृत्यान्यार्थाप्रतिसमाधानाशक्तौ वक्ष्यति—"अभ्यासे भूयासमर्थं मन्यन्ते"—इति। यत् पुनरसमानार्थं पदमभ्यस्यते, तदपुनरुक्तमेव। यदसमानशब्दं समानार्थञ्च तदसुखप्रतिसमाधानमिति तदर्थमिदोपोदन्ति—

"तद्यत् समान्यामृचि"—इति। तदिति वाक्योपादाने। "यत्" "समान्यामृचि" एकस्यामृचि "समानाभिव्याहारं" पदं "भवति" समानमर्थमभिव्याहरति पदान्तरेण, यः कश्चित् पूर्वेऽर्द्धर्चेऽभिहितोऽर्थः, तमेव उत्तरेऽर्द्धर्चेऽभिदधत् जामि भवति। तत् "यथा—'मधुमन्तं, मधुश्चुतम्'—इति"। यो हि मधुश्चुत् अवश्यमसौ मधुमान्। "एकं" तावत् आचार्यमतम्।

पृथिव्यस्यामदीनाया प्रतितिष्ठति"—इति, यत. परया धर्मलिङ्गयोपपादयति मध्यस्थान क्षेत्रस्य पतिरिति, भक्तिमात्रं प्राक्षर्णमिति ॥ २ (१५) ॥

क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व। मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृळयन्तु ॥ क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयोऽस्मासु धुक्ष्वेति मधुश्चुतं घृतमिवोदकं सुपूतमृतस्य नः पातारो वा पालयितारो वा मृळयन्तु मृळयतिरुपदयाकर्मा पूजाकर्मा वा तद्यत्समानायामृचि समानाभिव्याहारं भवति तज्जामि भवतीत्येकं मधुमन्तं मधुश्चुतमिति यथा यदेव समाने पादे समानाभिव्याहारं भवति तज्जामि भवतीत्यपरं हिरण्यरूपः स हिरण्यसंदृगिति यथा यथा कथा च विशेषोऽजामि भवतीत्यपरं मण्डूका इवोदकान् मण्डूका उदकादिवेति यथा। वास्तोष्पतिर्वास्तुर्वसतेर्निवासकर्मणस्तस्य पाता वा पालयिता वा तस्यैषा भवति ॥ ३ (१६) ॥

"क्षेत्रस्य पते"—इति (ऋ० सं० ४, ८, ८, २)। आर्षं यदेव पूर्वस्या.। विनियोगो महाव्रते, आदित्यं चरुरूपस्थतुः स्तनपर्, तस्य तृतीयमनयर्चा दह्यते। हे 'क्षेत्रस्य पते!'

'मधुमन्तम् ऊर्मिम्' मधुरं स्वादु 'उदकसङ्घातम्, 'धेनु' यथा 'पय' दोग्धि, एवम् 'यस्मात्' 'धुक्ष' प्रचर। किञ्च "मधुश्चुतं घृतमिव सुपूतम्"। मधु इव यत् मुहुर्मुहुः श्चोतति, 'घृतमिव सुपूतम्' उदकमकलुषम, तस्य दानेन "ऋतस्य नः पतयो मृडयन्तु"। 'ऋतस्य' उदकस्य 'पतय' "पातारः" माध्यमिका देवा येवस्य पतिप्रमुखा 'मृडयन्तु' नित्यमस्मान् रक्षन्तु, पूजयन्तु वा॥

अतएव मन्त्रात् प्रसक्तमत परं सर्वमन्त्रेषु जाम्यजामिता पदाना चिन्त्यते।—जामीति पुनरुक्तस्य सञ्ज्ञा, सा पुनरपि निगमत एव। विज्ञायते हि—"जामि वा एतद् यज्ञे क्रियते, यन्मरुत्वतीयो ग्रहो गृह्यते मरुत्वतीय शस्यते"—इति। तदेतत् पुनरुक्तं द्विविधम्।—समानशब्दार्थम्, असमानशब्दार्थञ्च। तत्र समानशब्दार्थं नाम, यदेकमेव पदमेकार्थमेकस्मिन्नेव वाक्याधिकारे पुनरुच्यते। तद्यथा—"मम्न रेजति रक्षोहा मम्न रेजति"—इति (ऋ० सं॰ २, १, १७, १)। तदधिकृत्यान्याचार्यप्रतिसमाधानाशक्तो वक्ष्यति—"अभ्यासे भूयासमर्थ मन्यन्ते"—इति। यत् पुनरसमानार्थं पदमभ्यस्यते, तदपुनरुक्तमेव। यदसमानशब्द समानार्थञ्च तदसुखप्रतिसमाधानमिति तदर्थमिदमोपोद्घन्ति—

"तद्यत् समान्यामृचि"—इति। तदिति वाक्योपादाने। "यत्" "समान्यामृचि" एकस्यामृचि "समानाभिव्याहार" पद "भवति" समानमर्थमभिव्याहरति पदान्तरेण, यः कश्चित् पूर्वेऽर्द्धेऽभिहितोऽर्थं तमेव उत्तरेऽर्द्धेऽभिदधत् जामि भवति। तत् "यथा—'मधु'मन्त, मधुश्चुतम्'—इति"। यो हि मधुश्चुत् अवश्यमसौ मधुमान्। "एक" तावत् आचार्य्यसतम्।

"यदेव समाने पादे समानाभिव्याहारं भवति, तज्जामि भवतीत्यपरम्"। नानार्द्धर्चगतयोः समानार्थयोरपि पदयोरसमानपदान्तरव्यवधानात् प्रकृतार्थानुस्मृतये पुनरनुकीर्त्तनमजाम्येव, किन्तु यदेव समाने पदे एकस्मिन् पदान्तरेण व्यवहितं पदं समानार्थं पुनरुच्यते, अविच्छिन्नप्रसक्तानुस्मृति, तदेव जामीत्यपरम्। "हिरण्यरूपः स हिरण्यसन्दृक्—इति यथा"—इति (ऋ० सं० २, ७, २३, ५)। यो हिरण्यरूपः सोऽवश्यं हिरण्यसन्दृक्॥

तत् किं पौनरुक्त्येन योज्यं पदम्, तस्य योगाद्वा तदसाधु मन्त्रवाक्यम्? न—इति, उच्यते—"यथा कथा च विशेषोऽजामि भवतीत्यपरम्"। यथा कथञ्चित् यः कश्चित् स्वल्पोऽपि हि तत्र विशेषो वक्तव्यः, दृष्टानुविधानाच्छन्दसः, अर्थानुविधाने यतितैवम्। येन केनचित् स्वल्पेनापि विशेषेण तदजामि भवतीत्यपरम्। अपरे पुनः कृतवाक्यार्थपरिसमाप्त्यतिरिक्तं पदं पुनरभ्यस्यमानं निपातवत् पादपूरणत्वे नार्थवदिति प्रतिसमादधते। तदेतदवगतं भवति, इदमेव त्वभीष्टमाचार्यस्य—"यथा कथा च विशेषः" इति। तदर्थमुदाहरति—"मण्डूका इवोदकान् मण्डूका उदकादिव"—इति यथा"—इति (ऋ० सं० ८, ४, २४, ५)। एवमादिषु यथा समानशब्देषु असमानशब्देषु च पुनरुक्तेषु यः कश्चिद् विशेषो वक्तव्यः॥

स कथम्? इति मन्त्रमेव तं व्याचक्ष्महे। यत्रैष पादः—"योगक्षेमं व आदाय"—इति? (ऋ० सं० ८, ८, २४, ५)। ऋषभस्यार्षम्। कामसो देवता कल्प्याः। विहिप उच्यन्ते—"योगक्षेमं व आदायाहं भूयासमुत्तम आ वो मूर्द्धानमक्रमीम्। अधस्पदान्म उद्वदत मण्डूका इवोदकान् मण्डूका उदकादिव॥"—इति। योगो-

नाम लिप्सितार्थस्य प्राप्तिः, क्षेमो नाम तत्परिपालनम्। हे विद्विषः! एतत् उभयं भवद्भ्य आदाय मदधीनसर्वयोगक्षेमान् युष्मान् कृत्वा सर्वोर्थेऽपि 'अहं भूयासम्' 'उत्तमः' उत्कृष्टः युष्माकम्। 'आ वो मर्द्धानमक्रमीम्'। उपरि युष्मानधितिष्ठेयम्। ते यूयमाक्रान्तमूर्द्धानो मया। 'मे' मम 'अवस्पदात्' पादयोरधो वर्त्तमानाः मन्मुखप्रेक्षाः स्वस्वाधीनसर्वार्थवृत्तयो भूत्वा नित्यम् 'आवदत'। कथम्? 'मण्डूका इवोदकात्' यथा मण्डूकाः उदकात् ऋते नित्यमस्वाधीनवृत्तयो निर्वचनाः सम्पद्यन्ते, एवं मदृते यूयं मा भूत। एवमत्रैकत्र विद्विषां निर्वाक्त्वे मण्डूका उपमानम्, अन्यत्र उदकाभावे मण्डूका यथा न भवन्ति, एवं मदभावे यूयमित्युदकमुपमानम्॥

एष विशेषः पूर्वयोरपि मन्त्रयोर्भवति,—कश्चित् मधुमान् न तु मधु अविरतं मुहुर्मुहुर्यौततीति, यथा "हिरण्यरूपः स हिरण्यसन्दृक्" इति, अत्र भवति कश्चिद्धिरण्यरूपः न तु हिरण्यमिव दृश्यमानः प्रिय इति विशेषः॥

"वास्तोष्पतिः" वक्तव्यः। स च पुनरेव रुद्रात्मना मध्यमो वास्तोष्पतिः। विज्ञायते हि वास्तोष्पतीये याथावर्य्यप्रतिपत्तौ गृहगमनमधिकृत्य—"न हीनमन्वाहरेयु रुद्राय हि तद्धीयते यद्धीनमन्वाहरेयुः रुद्रं भूतमन्वाहरेयुः"—इति। स एष गृहाधिदेवता रुद्रो वास्तोष्पतिः। स पुनः "अमीवहा" —इति बलकृतिलिङ्गात् मध्यमः॥

तस्य पूर्वपदं विगृह्य निराह—"वास्तुः, वसतेः निवासकर्मणः"। "वास्तु"—इति गृहमुच्यते, उष्यते हि तस्मिन् "तस्य" "पाता" रक्षिता, तदधिदेवताभावेन रुद्रात्मना च तत्कृतेनोपकारेण रक्षिता मध्यमः, इतरथा ह्युत्सीदेयुर्गृहाः॥

"तस्य एषा भवति"—॥ ३ (१६) ॥

अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् । सखा सुशेव एधि नः ॥ अभ्यमनहा वास्तोष्पते सर्वाणि रूपाण्याविशन् सखा नः सुसुखो भव शेव इति सुखनाम शिष्यतेर्वकारो नामकरणोऽन्तस्थान्तरोपलिङ्गी विभाषितगुणः शिवमित्यप्यस्य भवति यद्यद्रूपं कामयते तत्तद्देवता भवति । रूपं रूपं मघवा बोभवतीत्यपि निगमो भवति । वाचस्पतिर्वाचः पाता वा पालयिता वा तस्यैषा भवति ॥ ४ (१७) ॥

"अमीवहा वास्तोष्पते"—इति (ऋ० सं० ५, ४, २२, १)। वसिष्ठस्यार्षम्। गृहकण्डारिकाखाबौपाके यायावर्य्यप्रतिपत्तौ च वास्तोष्पतीयहोमे विनियोगः। हे भगवन्! 'वास्तोष्पते!' त्वम् अस्माकम् 'अमीवहा' भव। अमीवा रोगः, तस्य हन्ता। कथम्? 'विश्वा' "सर्वाणि" 'रूपाणि' 'आविशन्'। यस्य अस्मद्दुःखहेतोर्यः प्रतिपक्षः, सर्पादेर्नकुलादिः, तस्य रूपमाविशन् तं तमस्माकममीवामं जहि। अमुना प्रकारेण 'घ्नन्' अस्मदुपद्रवान्, 'सखा' मित्रम्, 'सुशेवः' सुष्ठु सुखः 'भव'। "शेव इति सुखनाम"। तत् कस्मात्? "शिष्यतेः वकारो नामकरणः" शिषिधातुः, वकारः प्रत्ययः। शिष इत्यस्य स पुनः "अन्तस्थान्तरोपलिङ्गी" अन्ते तिष्ठति धातोर्यो वर्णः सोऽन्तस्थः, न सञ्ज्ञा, यथा अन्तस्था यरलवाः। कथं पुनरसौ? षकारः। तस्यान्तरमवकाशस्थानम् उपलि-

क्रयति उपगच्छति यः, स भवत्यन्तस्थान्तरोपलिङ्गी। कश्च पुनरसौ? पकारः। स पकारस्य स्थानमुपगच्छति। ततो गुणे कृते शेव इति भवति। स च पुनरयं धातुः "विभाषितगुणः" इति "शिवम् इति चापि अस्य भवति" अगुणपक्षे॥

"सर्वाणि रूपाण्याविशन्"—इत्यतः प्रसक्तमुच्यते, शक्नोति पुनर्वास्तोष्पतिः सर्वाणि रूपाण्याविष्टुमित्युच्यते—"यद्यद् रूपं कामयते तत्तद्देवता भवति"। अस्त्येतदैश्वर्यं देवतायाः यद्यदिच्छति रूपं तत्तत् करोति, निगमोऽपि हि भवत्यैश्वर्यप्रख्यापकः।—"रूपं रूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं१ परि स्वाम्। त्रिर्यद्दिवः परि मुहूर्तमागात् स्वैर्मन्त्रैरनृतुपा ऋतावा।"—इति (ऋ॰ सं॰ ३, ३, २०, ३)। विश्वामित्रस्यार्षम्। यावन्ति कानिचिद्रूपाणि 'मघवा' इन्द्रो भवितुमिच्छति, तानि सर्वाण्यप्रतिघातेन 'बोभवीति' पुनः पुनर्भवतीति। कथम्? 'मायाः कृण्वानः' इदमभवामीदमभवामीत्येवम् 'तन्वं परि स्वां' तनुं तत्तदाकृत्यानेकविधां विकुर्वाणः। "त्रिर्यद्दिवः परि मुहूर्तमागात्"। 'दिवः परि' दिवः अधि द्युलोकात्, 'मुहूर्तं' मुहूर्तकालं प्रति 'यत्' य. 'त्रिः' 'आगात्' आगच्छति। 'स्वैर्मन्त्रैः' हूयमानो वा स्तूयमानो वा युगपद्यजमानानां यज्ञेषु। 'अनृतुपाः' अऋियतसोमपानकालः, सर्वदा यागोत्पत्तेः। 'ऋतावा' ऋतवान् यज्ञवान्। येनामायैवमात्मानं विकरोत्येवं च दिवो मुहूर्तं त्रिरागच्छति। तेनामायचिन्त्यप्रभावत्वाच्छक्नोति तत्तद्रूपमाविष्टुम्॥

एवञ्च सुष्ठु यदेतदुच्यते—सर्वाणि रूपाण्याविशन्नोवद्दा भवाद्यक्त्वमिति॥

"वाचस्पतिः" वक्तव्य । स पुनरेव. "वाचः पाता वा पालयिता वा" प्राणात्मनेन्द्रः ॥

"तस्य एषा भवति"—॥ ४ (१७) ॥

पुन॒रेहि॑ वाचस्पते दे॒वेन॒ मन॑सा स॒ह।
वसो॑ष्पते॒ निर॑मय॒ मय्ये॒व त॒न्वं१॑ मम॑ ॥

इति सा निगदव्याख्यातापान्नपात्तनूनपा व्याख्यातस्तस्यैषा भवति ॥ ५ (१८) ॥

"पुन॒रेहि॑ वाचस्पते"—इति। (अथ० सं० १, १, २। ऋ० सं० १०, ६, १३, ७)। अपगतप्राणमिवात्मानं मन्यमान पापकृत् पापसम्बन्धात् कुतयित् कृतानिर्वेशन सन् प्राण ब्रवीति ।—हे प्राण। 'पुनरेहि' त्व मा प्रतीति। किम्पुनरेवाकी? न—इति, उच्यते,—'देवेन मनसा सह' सर्वेन्द्रियवृत्तिदीपकेन मनसा सह। एत्य च हे 'वसोष्पते' हे धनस्य अन्नस्य च पते! 'निरामय' नियमेन रमय। 'मयि एव' एता 'तन्व' 'मम' मा यासोर्मत्त इति। प्राणात् पृथग्भूतमात्मान पश्यन् स्तोता ब्रवीति ॥

"अपान्नपात्" "तनूनपत्रा व्याख्यातः" शब्दनिर्वचनत, अभिधेयतस्तु मध्यम । भद्रा आदित्य, ततो मध्यमः, एवमपा पौत्र ॥

"तस्य एषा भवति"—॥ ५ (१८) ॥

यो अ॒निध्मो दीदय॑द॒प्स्व१॒॑न्तर्यं विप्रा॑स ईळ॑ते अध्व॒रेषु॑। अपा॑न्नपा॒न्मधु॑मतीर॒पो दा॒ या॒भिरिन्द्रो॑ वावृ॒धे वी॒र्या॑य ॥ योऽनिध्मो दीद-

यद् दीप्यसेऽभ्यन्तरमप्सु यं मेधाविनः स्तुवन्ति यज्ञेषु सोऽपान्नपान्मधुमतीरपो देह्यभिषवाय याभिरिन्द्रो वर्द्धते वीर्य्याय वीरकर्मणे यमो यच्छतीति सतस्तस्यैषा भवति ॥ ६ (१८) ॥

"यो अनिध्मो दीदयत्"—इति (ऋ० सं० ७, ७, २४, ४)। कवषस्यार्षम्। सर्व एव प्रत्यक्षकृतत्वेन द्वे गम्यते। 'अपांनपात्' 'यः' त्वम् 'अनिध्मः' अनिध्मनोऽपि 'दीदयत्' "दीप्यसे" 'अन्तः' "अभ्यन्तर" प्रदेशं प्रति 'अप्सु' वर्त्तमानः। 'यम्' च त्वाम् 'अध्वरेषु' "यज्ञेषु" 'विप्रासः' "मेधाविनः" 'ईळते' "स्तुवन्ति"। "सः" त्वमपान्नपात् 'मधुमतीः' मधुररसाः मधुरस्वादाः 'अपः' 'दाः' "देहि" "अभिषवाय"। 'याभिः' त्वमेव 'इन्द्रः' ईश्वरः सोमपानद्वारेण 'वावृधे' वर्द्धिता 'वीर्य्याय' "वीरकर्मणे"। इत्येतत् प्रार्थयामहे॥

"यमः" वक्तव्यः। स पुनरेव "यच्छति" उपरमयति जीवितात् सर्वं भूतग्राममिति यमः। अत एव बलवान् इति मध्यमः॥

"तस्य एषा भवति"—॥ ६ (१८) ॥

परेयिवांसं प्रवतो महीरनु बहुभ्यः पन्थामनुपस्पशानम्। वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषा दुवस्य॥ परेयिवांसं पर्यागतवन्तं प्रवत उद्वतो निवत इत्यवतिर्गतिकर्मा बहुभ्यः पन्थानमनुपस्पाशयमानं वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषा

दुवस्येति दुवस्यती राध्नोतिकर्माग्निरपि यम उच्यते तमेता ऋचोऽनुप्रवदन्ति ॥ ७ (२०) ॥

"परेयिवांसम्"—इति (ऋ० सं० ८, ६, २४, १)। यमस्यार्षम्। याम्ये पशौ वपायां विनियोगः। 'परेयिवांसम्' "पर्य्यागतवन्तम्" सर्वतः प्राप्तवन्तम्। कान् पुनः? 'प्रवतः' "उद्वतः" "निवतः" च भूतसङ्घातान्। 'प्रवतः'—इति मन्त्रे, "उद्वतो निवतः"—इति भाष्यकारोऽध्याजहार, तथा सामर्थ्यात्, 'प्रवतः'=मनुष्याः, "उद्वतः"=देवाः, "निवतः"= तिर्य्यञ्चः, तथा गत्युपपत्तेः। तमेतमेवं 'महीः' महतीः भूतजातीः, परेयिवांसम्। 'बहुभ्यः' पुण्यकृद्भ्यः पापकृद्भ्यश्च 'पन्थाम्' "पन्थानम्" 'अनुपस्पशानम्' "अनुपस्पाशयमानम्" अमुना मार्गेण अयं प्राणी जीवनादुत्सर्पति, तमेतमेवङ्गर्माणम् 'वैवस्वतम्' विवस्वतः पुत्रम्, 'सङ्गमनं जनानाम्' सममेव चक्षुः कृत्वा योऽस्माल्लोकादमुं लोकं यथाकृतकर्मफलोपभोगवशेन जनान् गमयति। तमेव 'यमम्' 'राजानम्' ईश्वरं सर्वप्राणभृताम्, हे यजमान! 'हविषा' अनेन पशुलक्षणेन 'दुवस्य' राध्नुहि परिचरस्वेत्यर्थः॥

"अवतिर्गतिकर्मा"—इत्येतदत्र निर्वचनं कथं सम्बध्यत इति विज्ञातव्यम्, अथवा प्रवत इत्यवतिरेवायमादिलुप्तः मपूर्व इति भाष्यकाराभिप्रायः॥

तत्रसङ्गाद्वा यम्शब्दसारूप्याद्वा निराह—"अग्निरपि यम उच्यते" इति विचारोपप्रदर्शनाय॥

"तम् एताः ऋचः अनुप्रवदन्ति"—इति प्रतिज्ञातार्थोपपादनाय, यथाग्निरपि यमशब्देन उच्यते, तथा इमा ऋचः अनुप्रवदन्ति—॥ ७ (२०)॥

सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत् त्वेषप्रतीका। यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम्। तं वश्चराथा वयं वसत्यास्तन्न गावो नक्षन्त इद्धम्॥ इति द्विपदाः सेनेव सृष्टा भयं वा बलं वा दधात्यस्तुरिव दिद्युत् त्वेषप्रतीका भयप्रतीका बलप्रतीका महाप्रतीका दीप्तप्रतीका वा। यमो ह जात इन्द्रेण सह सङ्गतः। यमाविहेह मातरेत्यपि निगमो भवति॥ यम इव जातो यमो जनिष्यमाणो जारः कनीनां जरयिता कन्यानां पतिर्जनीनां पालयिता जायानां तत्प्रधाना हि यज्ञसंयोगेन भवन्ति॥ तृतीयो अग्निष्टे पतिरित्यपि निगमो भवति॥ तं वश्चराथा चरन्त्या पश्वाहुत्या वसत्या च निवसन्त्यौषधाहुत्यास्तं यथा गाव आप्नुवन्ति तथाप्नुयामेद्धं समिद्धं भोगैर्भिवः प्रमीतेस्त्रायते सम्भिन्धानो द्रवतीति वा मेदयतेर्वा तस्यैषा भवति॥ ८ (२१)॥

"सेनेव सृष्टा"—इत्येषमाद्याः (ऋ० सं० १, ५, १०, ७)। पराशरस्यार्षम्। एताः "द्विपदाः" विराजः। प्रातरनुवाकाश्विनयोः विनियोगः। 'सेना इव सृष्टा' निचिता, अथवा सेनापतिना विसृष्टा प्रेरिता। 'अमं दधाति' "भयं वा बलं

वा दधाति" भयं परेभ्य', बलं स्वेभ्य', अथवा अतर्किता भयं दधाति, अतर्किता बलं दधाति प्रणेतुः। 'अस्तुः न दिद्युत्' "अस्तुः इव" चेतुर्यथा 'दिद्युत्' आयुधम् 'त्वेष-प्रतीका' "महाप्रतीका" महती या दृश्यते प्रतीकं दर्शनम्, "भयप्रतीका" दर्शनादेव भयानका, "दीप्तप्रतीका वा" दीप्तदर्शना। भयं वा बलं वा ददाति स्वेभ्यः परेभ्यश्चेति वर्त्तते। का पुनरसौ? इति, अग्नेः अर्चिः। रक्षोभ्यो भयं ददाति, स्वेभ्यो बलम् ॥

"यमो ह जातो यमो जनित्वम्"—इति (ऋ० सं० १, ५, १०, ८)। यस्य इदम् एवंलक्षणमर्चिः, स एव 'यमः' अग्निः, सर्वमिदं जातं जनिष्यमाणञ्च। कथमेतद् गम्यते पार्थिवोऽग्निर्यमशब्देनोच्यते, न मध्यमो नोत्तमो वा? इति। तावपि हि यमावुच्येते, यतो निगमान्तरेण विभज्य दर्शयति—"यमाविह मातरा (ऋ० सं० ४, ८, २५, १)—इत्यपि निगमो भवति"—इति। यत्रैष पादः, तस्मिन् मन्त्रे शक्यते यम-शब्देन अग्निरुच्यत इति विभावयितुं व्यपदेशः। तद्यथा—वळित्था महिमा वामिन्द्राग्नी पनिष्ठ आ। समानो वां जनिता भ्रातरौ युवं यमाविहेहमातरौ।"—इति (ऋ० सं० ४, ८, २५, १)। भरद्वाजस्यार्षम्। बृहती। "वट्"—इति सत्यनाम। हे 'इन्द्राग्नी!' 'इत्था' सत्यम्, अमुना प्रकारेण यः सूक्ते महाभाग्यप्रकारोऽधिकृतः, तमित्थेत्यभिनयेनोपदिशन् ब्रवीति। 'महिमा' माहाभाग्यम् 'वां' युवयोः 'आपनिष्ठः' सर्वतोऽतिशयेन स्तुत्यः। यौ युवामेव मतिमहानुभावौ, तयोः 'समानः' 'वां' 'जनिता' जनयिता सूर्यः। तौ युवामेवकुलैकपितृकौ एकजन्मानौ 'यमौ भ्रातरौ'। 'इह इह मातरौ' इह च पृथिवी-

लोके इह च अन्तरिक्षलोके अवस्थितौ मातारौ सर्वस्य लोकस्य निर्मातारौ। एवमिह मन्त्रे पितृत्वेन सूर्यो व्यपदिष्ट, इन्द्राग्नी यमौ इति यमशब्दो मध्यमस्थानपृथिवीस्थानयोरत्रापि द्वयोर्यमयोरिह चेह च निर्मातारावित्ति प्रथमेन 'इह'शब्देन अग्निर्यम इति लक्ष्यते, तस्मादिहापि "यमो ह जातो यमो जनित्वम्"—इति युक्त यदग्निरेवोच्यते। "जार कनीना पतिर्जनीनाम्"। स एवाग्नि 'जार' "जरयिता" 'कनीनाम्' "कन्यानाम" कन्याभावस्य, यदा ह्याग्नसन्निधावूढा भवन्ति, अथ तासा कन्याभावो जीर्णो भवति 'पति जनीनाम' "पालयिता जायानाम्"। कथम्? "तत्प्रधाना" सम्पद्यन्ते, यग्नौ व्रतोपगमनात्, आव्रतावमोकात् अग्निपारतन्त्र्यात्॥

यथा वै तासा यथाधिकृता यमो ह जातो यमो जनित्वमिति अग्निरव यमो ह जात, पतित्वेन कन्याभावस्य जरयिता, तथायमपरो निगम स्फुटतर—"तृतीयो अग्निष्टे पति (ऋ० स० ८, ३, २७, ५)—इत्यपि निगमो भवति"। "सोम प्रथमो विविदे गन्धर्वो विविद उत्तरः। तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजा॥"—इति (ऋ० स० ८, ३, २७, ५)। सूर्याया आषम्। विवाहे विनियोग। हे कन्ये। त्वमुच्यसे। 'सोम' त्वा 'प्रथम' 'विविदे' विन्नवान् प्राप्तवान् सौम्ये प्रथमकौमारके। "गन्धर्वो विविदे उत्तर" उपजायमान चारुताङ्गप्रविभाग स्वरसौष्ठवाभीप्सदनङ्गाङ्कसमाकृतहृदया 'गन्धव' विश्वावसु त्वा विविदे' विन्नवान्। अथ पुनरिदानीं वैवाहिके उपगताया कर्मणि "तृतीयो अग्निष्टे पति" तृतीयस्त्वायमग्नि। अत ऊर्ध्वनात् परम् 'तुरीय' चतुर्थ 'ते' तवाय 'मनुष्यजा' पति। इत्येवमनेनाप

मन्त्रेण समवैति जारत्वं पतित्वं चाग्नेः।" एवञ्चेत् "यमो ह जातो यमो जनित्वम्"—इति यदधिकृतं सोऽग्निरेवेति सिद्धम्॥

"अग्निर्मह्यमथो इमाम् (ऋ० सं० ८, ३, २८, १)"—इति च केचिदधीयते निगमम्, उपचयहेत्वर्थम्। स निरुच्यते—"सोमो ददद् गन्धर्वाय गन्धर्वो ददद्ग्नये। रयिञ्च पुत्रां-श्चादाद्ग्निर्मह्यमथो इमाम्॥"—इति (ऋ० सं० ८, ३, २८, १)। स एव विनियोगः, आर्षञ्च। 'सोमः' एतां प्रथमं कौमारादभ्युह्य 'गन्धर्वाय' 'ददत्' अदात्। अथ 'गन्धर्वः' अप्येनामभ्युह्य आयौवनाधिकारात् 'अग्नये ददत्'। अथ 'अग्निः' अपि एनाम् अस्मिन् विवाहे संस्कृत्य 'रयिं' धनं 'च' 'पुत्रान्' 'च' 'मह्यम्' 'अदात्' ददाति। 'अथो' अपि च धनेन च पुत्रैश्च सह मह्यमदात् मह्यं ददाविति॥

"तं वयुराया वयम्"—इति (ऋ० सं० १, ५, १०, ८)। 'तम्' अग्निं यमम्। 'वः'—इति अनर्थकः। अथवा यजमाना ऋत्विग्भिरुच्यन्ते। 'चराया' "चरन्त्या" जङ्गमया "पशाहुत्या" 'वसत्या' "च" "निवसन्त्या" "औषधाहुत्या" जङ्गमेन स्थावरेण च हविषा "अस्तं न गावो नक्षन्ते। 'अस्तं' गृहं यथा 'गावः' अवश्यं 'नक्षन्ते' आप्नुवन्ति, स्वं भोपकारेण सायंवा-साय, तथेममग्निमुभयलक्षणेन हविषा वयमाप्नुयामः। 'इद्ध' "समिद्ध भोगैः" सर्वभोगानामीश्वर प्रदातारमिति॥

"मित्रः" कस्मात्? स हि "प्रमीतेः त्रायते"। प्रमीतिः प्रमरणम्, ततः सर्वलोकं त्रायते वर्षदानेन। "सम्मिन्वानो द्रवति इति वा" समन्ततो मिन्वानः उदकेन द्रवति अन्तरिक्षलोके। "मेदयते. वा" स्नेहनार्थस्य, सर्वं भूतमुदकेन स्नेहयति॥

"तस्य एषा भवति"—॥ ८ (१७) ॥

मि॒त्रो जना॑न्यातयति ब्रुवा॒णो मि॒त्रो दा॑धार पृथि॒वीमु॒त द्याम्। मि॒त्रः कृ॒ष्टीरनि॑मिषा॒भि च॑ष्टे मि॒त्राय॑ ह॒व्यं घृ॒तव॑ज्जुहोत ॥ मित्रो जनानायातयति प्रब्रुवाणः शब्दं कुर्वन् मित्र एव धारयति पृथिवीञ्च दिवञ्च मित्रः कृष्टीरनिमिषन्नभिविपश्यतीति कृष्टय इति मनुष्यनाम कर्मवन्तो भवन्ति विकृष्टदेहा वा मित्राय हव्यं घृतवज्जुहोतेति व्याख्यातं जुहोतिर्दानकर्मा कः कमनो वा क्रमणो वा सुखो वा तस्यैषा भवति ॥ ६ (२२) ॥

"मि॒त्रो जना॑न्यातयति"—इति (ऋ० सं० ३, ४, ५, १)। विश्वामित्रस्यार्षम्। अवष्टहोमे प्रायश्चित्तम्। अग्निहोत्रे पूर्वस्यामाहुतौ विनियोगः। "मि॒त्रो जना॑न्यातयति ब्रुवा॒ण"। 'आयातयति' कृष्यादिषु प्रवर्त्तयति, तत्कर्मपूर्वकत्वात् कृष्यादिकर्मणाम्, न ह्यदृष्टे कृष्यादीनि आयात्यन्ते। आयातनमारम्भ। तद्यथा—भोजनमायातितमनेनेति। कथमायातयति प्रब्रुवाणः? स्तनयित्नु "शब्दं कुर्वन्"। एवं प्रवर्त्तयन् कर्मसु ओषधीरुत्पादयन् यज्ञद्वारेण। स एव 'मित्रः' 'दाधार' "धारयति" 'पृथिवीम्' पृथिवीलोकनिवासिन सर्वान्। 'उत' 'द्यां' धारयति, अमुना प्रकारेण मनुष्यान्। स 'मित्र' 'कृष्टी' मनुष्यान् 'अनिमिषाभिचष्टे' "अनिमिषमभिविपश्यति" उपकारद्वारेण, यो हि यथा

तेमां कस्मै देवाय हविषा विधेम ॥ हिरण्य-गर्भो हिरण्यमयो गर्भोऽस्येति वा गर्भो गृभे-र्गृणात्यर्थे गिरत्यनर्थानिति वा यदा हि स्त्री गुणान् गृह्णाति गुणाश्चास्या गृह्यन्तेऽथ गर्भो भवति समभवदग्रे भूतस्य जातः पतिरेको बभूव स धारयति पृथिवीञ्च दिवञ्च कस्मै दे-वाय हविषा विधेमेति व्याख्यातं विधतिर्दान-कर्मा सरस्वान् व्याख्यातस्तस्यैषा भवति ॥ १० (२३) ॥

"हिरण्यगर्भः"—इति (ऋ० सं० ८, ७, ३ व० १ । १०, १०, ८ सू० १)। हिरण्यगर्भस्यैवार्षम्। सर्वात्मकत्वात्तदार्षत्वेऽपि मन्त्रस्य प्रथमपुरुषप्रयोगो अविप्रतिषिद्धः, अथवा परस्य ब्रह्मणो या हिरण्यगर्भावस्था प्रतिकल्पमाविर्भावतिरोभाव-धर्मिणी बुद्धिपूर्विका नित्या, तस्याश्च नित्यो मन्त्रो विवक्षि-ताभिधानाभिधायक आश्रयमात्रेणाभिधातारमुपादाय प्रव-र्त्तमानोऽनुवक्तृत्वविवक्षितः पुरुषप्रयोगः, कृतकत्वे हि नियमत एवोत्तमपुरुषप्रयोगो मन्त्रस्याभविष्यत्। 'भूतस्य' अस्य उत्प-न्नस्य स्थावरजङ्गमस्य जगतः "हिरण्यगर्भः" एव 'अग्रे' 'सम-वर्त्तत' समभवत् उदपद्यत। तमुत्पन्नमन्विदं सर्वमुत्पेदे स च पुनरग्रे जातः सन् तस्य पश्चाद्भूतस्य 'एकः' असपत्नः अद्वि-तीयः 'पतिः' पाता रक्षिता ईश्वरः स्वतन्त्रः 'आसीत्'। कथम्? इति, 'स दाधार' यतः पतिः, अतः स एव दाधार, स एव धारयति, अद्यत्वेऽपि। किम्? इति "पृथिवीम् इत

दितयो: सम्पर्कात् गर्भग्रहणञ्च। तदेवं गर्भग्रहणहेतुकोऽयमिति ग्रहैर्गर्भः ॥

"सरस्वान्" "व्याख्यात:" सरस्वत्या, केवलं लिङ्गकृतो विशेषः ॥

"तस्य एषा भवति"—॥ १० (२३) ॥

ये ते॑ सरस्व ऊर्मयो॒ मधु॑मन्तो घृत॒श्चुत॑: । तेभि॑र्नोऽवि॒ता भ॑व ॥ इति सा निगदव्याख्याता ॥ ११ (२४) ॥

इति दशमाध्यायस्य द्वितीयः पादः ॥ १०, २ ॥

"ये ते॑ सरस्वन्"—इति (ऋ० स० ५, ६, २०, ५)। वसिष्ठस्यार्षम्। सारस्वते हविषि विनियोगः। हे भगवन्! 'सरस्वन्!' 'ये' 'ते' तव 'ऊर्मय' येऽत्वर्णोपि, नभो मेघेभ्यादयस्ति, 'मधुमन्त:' उदकवन्तः, 'घृतश्चुत' घृतवन्तः उदकप्रचरा, 'तेभि.' तैः त्वम् अस्माकम् 'अविता' तर्पयिता 'भव'। —इत्येतदाशास्महे ॥ ११ (२४) ॥

इति ऋज्वर्थाया निरुक्तवृत्तौ पञ्चदशस्य (दशमस्य) अध्यायस्य द्वितीय. पाद ॥ १०, २ ॥

तृतीयः पादः ॥

विश्वकर्मा सर्वस्य कर्त्ता तस्यैषा भवति ॥ १ (२५) ॥

"विश्वकर्मा" वक्तव्य.। स कस्मात्? "सर्वस्य कर्त्ता"

यावदिदं किञ्चिद् भूतं भविष्यमाणं क्रियमाणञ्च तस्य सर्वस्य कर्त्ता, वाय्वात्मकत्वात् सर्वचेष्टानां मध्यमः। स कथं सर्वं करोति? पार्थिवाप्यौ धातू तेजसा परिपच्यमानौ वायुव्यूहेन विचरन् सर्वभावानुप्रवेशी सर्वमिदमत्यद्भुतमचिन्त्यमहात्माभिर्जगत् करोतीति स मध्यमः, विश्वकरणाद् विश्वकर्मा। 'वज्ञायते हि वैश्वकर्मण इविरधिकृत्य साकमेधेषु—"अथैष वैश्वकर्मणो विश्वानि मे कर्माणि कृतान्यासन्निति विश्वकर्मा हि सोऽभवत्"—इति। भवति चोदकसम्बन्धमस्य मध्यमलिङ्गं विश्वकर्माणमधिकृत्य वैश्वकर्मणे सूक्ते,—"तमिद् गर्भं प्रथमं दध्र आपः"—इति (ऋ० सं० ८, ३, १०, ६)। विषुवति च वैश्वकर्मण ग्रहमधिकृत्य विज्ञायते हि—"इन्द्रो वै वृत्रमहन् स इमं लोकमभ्यजयदसुं तु लोकं नाभ्यजयत् तं विश्वकर्मा भूत्वाभ्यजयत्"—इति। तस्यैव ग्रहस्य पुरोरुचमधिकृत्य विज्ञायते हि—"यदैन्द्रीं वैश्वकर्मणीं विद्यात्, तयैव गृह्णीयात्"—इति। स एष एवमादिभ्यो लक्षणेभ्यः सर्वस्थानानुभावित्वेऽपि सति विशेषतो मध्यम इति मध्यमस्थाने समाम्नातः॥

"तस्य एषा भवति"—॥ १ (२५)॥

विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत सन्दृक्। तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऋषीन् पर एकमाहुः॥ विश्वकर्मा विभूतमना व्याप्ता धाता च विधाता च परमश्च सन्द्रष्टा भूतानां तेषामिष्टानि वा कान्तानि वा क्रान्तानि वा गतानि वा मतानि

वा नतानि वाद्भिः सह सम्मोदन्ते यत्रैतानि सप्तऋषीणानि ज्योतींषि तेभ्यः पर आदित्य स्तान्येतस्मिन्नेकं भवन्तीत्यधिदैवतमथाध्यात्मं विश्वकर्मा विभूतमना व्याप्ता धाता च विधाता च परमश्च सन्दर्शयितेन्द्रियाणामेषामिष्टानि वा कान्तानि वा क्रान्तानि वा गतानि वा मतानि वा नतानि वान्नेन सह सम्मोदन्ते यत्रेमानि सप्तऋषीणानीन्द्रियाण्येभ्यः पर आत्मा तान्येतस्मिन्नेकं भवन्तीत्यात्मगतिमाचष्टे तत्रेतिहासमाचक्षते विश्वकर्मा भौवनः सर्वमेधे सर्वाणि भूतानि जुहवाञ्चकार स आत्मानमप्यन्ततो जुहवाञ्चकार तदभिवादिन्येषर्ग् भवति। य इमा विश्वा भुवनानि जुह्वदिति तस्योत्तरा भूयसे निर्वचनाय ॥ २ (२६) ॥

विश्वकर्मा"—इति (ऋ० स० ८, ३, १७, २)। भौवनस्य विश्वकर्मण. प्रजापतेरार्षम्। अग्नौ वैश्वकर्मणाभ्यां सूक्ताभ्यां षोडशगृहीतं हूयते, तत्र विनियोग.। 'विश्वकर्मा' 'विमना.' "विभूतमना" विभूतप्रज्ञान, सर्वत्राप्रतिहतमस्य प्रज्ञानम्। किं प्रज्ञानमेव केवलम्? न इति, उच्यते—'आहिहाया.' अप्यसावात्मनाविहाया', आत्मनापि सर्वप्रकार महान्, महत्त्वाच्च "व्याप्ता"। एव सर्वप्रकार सर्वस्य जगत. यत एव

माहुः सततदृष्टो ब्राह्मणाः। यथा चानुपचीणस्वधाशक्तिनि-त्यवृत्तं सर्वभावपरं तत् परम्ब्रह्म यदात्मविदः प्रतिपद्यन्ते, तथा पुराणसूक्तेऽपि परमेष्ठिन आर्षम्। मन्त्रो दर्शयति,— "स्वधया तदेकं तस्माद्धान्यं न परः किञ्चनास" —इति (ऋ० सं० ८, ७, १७, २)।

एव सर्वत्र सम्भवो यावद्विषयो मन्त्राणां योज्यः।—इत्यु-पप्रदर्शनायोभयथा मन्त्रो वर्णितः ॥

"इत्यात्मगतिमाचष्टे" अमुना प्रकारेण वक्ष्यमाण एष मन्त्र आत्मगतिमाचष्टे प्रख्यापयति। यथा चेयमात्मगति-वाचिका ऋक्, "तत्र" एतस्मिन्नर्थे "इतिहासमाचक्षते" आत्मविदः। इतिवृत्तं परकृत्यर्थवादरूपेण। यः कश्चित् आध्यात्मिक आधिदैविक आधिभौतिको वार्थ आख्यायते दिध्युदितार्थावभासनार्थं स इतिहास इत्युच्यते। स पुनरय-मितिहास. सर्वप्रकारो हि नित्यमविवक्षितस्वार्थ, तदर्थप्र-तिपत्तृणामुपदेशपरत्वात्। "विश्वकर्मा ह भौवन" यथो-दितमिदं वैदिकं कर्म सम्बन्धदर्शनेन य. सर्वं करोति, सर्वा-त्मकत्वात् सर्वस्य वैश्वकर्मणीमवस्थामात्मन्युत्तीय स यजमानो विश्वकर्मा भुवनानां भूतानामात्मनि होता भूतेषु चात्मानम्। तथाहि विज्ञायते—"हन्ताहं भूतेष्वात्मानं जुहवानि भूतानि चात्मनि"—इति। तथा च विदुषो दर्शनकृतः सर्वमेधसम्प-त्सर्वकर्मसु। विज्ञायते ह्यग्निहोत्रमधिकृत्य—"स यत् साय जुहोत्यग्निमेव तदनेन सर्वेणादित्ये जुहोत्यग्निमेवेदं सर्वमनु सर्वं तद्यथाऽनेन सकृत् सर्वं तेनेष्ट्वा लोकं जयेत, तावद्दुह प्रातराहुत्या लोकं जयते, यस्यैते आहुती न बह यावज्जीव-माप्नोति, स हि बहूनि च न बहानि, एतयोर्देवतयोरन्यतरा-मनु"—इति। न बहमित्यनन्तमुच्यते। तदेवं यस्मिन् कश्चि-

विश्वमेधे कर्मणि अग्निहोत्रादौ सर्वः सर्वस्य सर्वस्मिन् सर्वस्मै सर्वार्थं, हुत्वात्मानं सर्वमेवं भवतीति समासार्थः। स एषः सर्वस्य विदुषः सर्वः सर्वहुत् यज्ञः सर्वभावाय सम्पद्यते दर्शनतः। यो ह्येतत् सर्वमेधो निरूढसञ्ज्ञोऽहीनः। तद्यथा—चौण्याश्वमेधिकानि, पञ्च पौरुषमेधिकानि, वाजपेयाप्तोर्यामौ चेति, तत्र "स आत्मानमपि अन्ततो जुहवाञ्चकार"—इति। स एतदात्महोमस्य विधानाच्चोपपद्यते, दर्शनतस्तु सर्वमुपपद्यते। सर्वभूतानि विशेषान् सामान्यात्मनि जुहाव पश्यन्, सामान्य चात्मान विशेषे जुहाव पश्यन्, सर्वकर्मसु स्वयमेवाय-मात्मयाजीत्युच्यते। यमधिकृत्य दृष्ट तदाहुरात्मयाजी श्रेयान् देवयाजीति। यथा चैतदेवमधिदेवविद आत्मवित् श्रेयान्॥

यमधिकृत्य "विश्वकर्मा विमना आद्विहाया:"—इतीयमृक् आत्मगत्या निरुक्ता, "तदभिवादिनी" तस्यैवार्थस्य इतिहासोक्तस्याभिवादिनी आभिमुख्येन वादिनी "एषा ऋक् भवति" यथा—"य इमा विश्वा भुवनानि जुह्वत्"—इति (ऋ० सं० ८, ३, १६, १)। अनेकेषा समानप्रयोगदर्शनाधिकारवता 'यः' नाम ऋषित् किमिस्थेव न्यसीदेव कर्मण्यङ्गभावमुपजगाम। कथम्? ऋषित्वेन, 'होता' द्रव्यगुणकर्मदेवतायाथार्थ्यद्रष्टृत्वेन 'विश्वा भुवनानि जुह्वत्' सर्वभूतान्यसुना सर्वमेधसम्पद्दर्शनप्रक्रमेण जुह्वत् अहावयत्। तस्य किम्? इति। 'स. आशिषा' आशी.—प्रार्थना, कामः, प्रयोगदर्शनहेतुः, सर्वमिदमहं स्यामिति, येन प्रेर्यमाणः सर्वकर्मसु सर्वमेधं, सर्वप्राप्तये प्रायुङ्क्त। 'द्रविणमिच्छमानः' प्रयोगजनितापूर्वफल सर्वभावमिच्छन्। तत् किं नाप? न—इति, उच्यते—आप। कथम्? इति। 'प्रथम-

च्छत्' प्रथमोऽग्रजत्वात्, प्रजापतिभावेन सृष्टस्य छादयिता। यतः सम्पदे तथा मन् 'अवरान्' पश्चादुत्पन्नान् अस्मदादीन् विशेषान् 'आविवेश' व्याप्तवान् व्याप यस्यैवं प्रयोगफलयोर्वृत्तिः 'स नः पिता' "जनिता" सोऽस्माकं पिता पाता जनयिता रचिता चेत्येवं विजानीमः, अतः तान्नाव्यमग्नवीमहीति।

यथा चैतदेवं नान्यथेति तथेयम् "उत्तरा ऋक्" "भूयसे" बहुतराय "निर्वचनाय"—॥ २ (२६) ॥

विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम्। मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु॥ विश्वकर्मन् हविषा वर्द्धयमानः स्वयं यजस्व पृथिवीञ्च दिवञ्च मुह्यन्त्वन्ये अभितो जनाः सपत्ना इहास्माकं मघवा सूरिरस्तु प्रज्ञाता तार्क्ष्यस्त्वष्ट्रा व्याख्यातस्तीर्णे अन्तरिक्षे क्षियति तूर्णमर्थं रक्षत्यश्नोतेर्वा तस्यैषा भवति ॥ ३ (२७) ॥

"विश्वकर्मन् हविषा"—इति (ऋ० सं० ८, ३, १६, ६। य० वा० सं० १७, २२)। प्रयोगावस्थां फलावस्थाञ्च विश्वकर्मणः प्रतीत्योच्यते।—हे 'विश्वकर्मन्' प्रयोगावस्थित! त्वमुच्यसे। अनेन 'हविषा' सर्वमेधदर्शनसम्पदादियुक्तेन त्वं वर्द्धमानः विश्वकर्मत्वमापद्यमानः तत्फलविपरिणामकाले 'स्वयं यजस्व' स्वयं सङ्गच्छस्व व्याप्नुहि। 'पृथिवीम् उत द्याम्' "पृथिवीञ्च दिवञ्च" सर्वव्यापी भव। अपि च तवैतस्मिन् दर्शनकृते

मंहिष्ठि "मुह्यन्त्वन्ये अभितो जनासः" मोहमुपगच्छन्तु 'अभितः' सर्वतः ते "जना" ये त्वदुपासनापराङ्मुखाः सन्तः सव "सपत्नाः" समानं पतित्वमिच्छन्ति। अथ पुनः 'इह', त्वद्दर्शनोपासनाकर्मणि वर्त्तमानानाम् 'अस्माकम्' 'मघवा' सर्वधनेशानः, 'सूरिः' मेधावी, सर्वत्राप्रतिहतप्रज्ञानः, "प्रज्ञाता" विशेषतोऽस्माकम् 'अस्तु'।—इत्येतदाशास्महे॥

त्वष्टा, विश्वकर्मा,—इत्यधिभूतप्रधानाः पुराणविदः, तथापि कलाकौशलादिसर्वज्ञानहेतुको नामप्रतिलम्भ इत्यविप्रतिषिद्धम्। एवं सर्वासु देवतासु॥

"तार्क्ष्यः"—इति वक्तव्यम्। स पुनरेषः "त्वष्ट्रा व्याख्यातः"। तद्यथा—"तूर्णमश्नुते"—इत्येवमादि, अथवा "तीर्णे अन्तरिक्षे" सर्वतो गते "क्षियति" निवसति। अथवा "तूर्णम्" उदकाख्य "रक्षत्यश्नुते वा" अर्थविकल्पेन तूर्णशब्दात् पूर्वपदम्, रक्षतेरश्नोतेर्वोत्तरपदम्॥

"तस्य एषा भवति"—॥ ३ (२७)॥

त्यमू षु वाजिनं देवजूतं सहावानं तरुतारं रथानाम्। अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहा हुवेम॥ तं भृशमन्नवन्तं जूतिर्गतिः प्रीतिर्वा देवजूतं देवगतं देवप्रीतं वा सहस्वन्तं तारयितारं रथानामरिष्टनेमिं पृतनाजितमाशुं स्वस्तये तार्क्ष्यमिह ह्वयेमेति कमन्यं मध्यमादेवमवक्ष्यत् तस्यैषापरा भवति॥ ४ (२८)॥

"त्यम् षु वाजिनम्"—इति (ऋ० सं० ८, ८, ३६, १। सा० स० छ० आ० ४, १, ५, १)। अरिष्टनेमेरार्षम्। विषुवति निष्के-वल्ये शस्यते, "सद्यश्चित्"—इति च (२६६ पृ०२०प०)। यः तार्क्ष्यं 'वाजी' वेजनवान्, भयदाता परेभ्य, बलवान् वा। 'त्य' त 'देवजूत' देवैर्गतम्, परत्वेन ज्ञातं वा परोऽयमस्माक-मिति। "देवप्रीतम्" देवैर्वा समानप्रीतम्। 'सहावानम्' सहो बलम्, तेन तद्वन्तम्, एतदेव मध्यमलिङ्गम्। 'तरुता-रम' "तारयितारम्" 'रथानाम्' रंहितृणा भूतानाम्, गति मता गमयितारमित्यर्थ, बलहेतुकत्वाद् गमनस्य। एवमादि-गुणयुक्तम् 'अरिष्टनेमिम्' केनचिदप्यप्रतिहतवज्रप्रहरणम्। नेमिरिति वज्रनाम। 'पृतनाजम्' पृतनाना जेतारम्। 'आशुम्' शीघ्रम्। 'स्वस्तये' आत्मन स्वस्त्ययनाय। सुष्ठु वयम 'इह' एतस्मिन् कर्मणि 'हुवेम' आह्वयामहे ॥

"तस्य एषा अपरा भवति"। सा पुन किमर्थम्? बल कृतिरूपप्रदर्शिता, वर्षकर्मोपप्रदर्श्यतेऽनया, सत्यामपि हि बलकृतौ पक्षिराजे गरुत्मति सन्देहोऽसावपि बलवाय तार्क्ष्य नामा च, वर्षकर्म त्वसमान तेनास्य। अतश्चोक्तमेतदेव विचारा सदमपेक्ष्य "कम् अन्यम् मध्यमात् एवम् अवक्ष्यत्"—इति ॥ ४ (२८) ॥

सद्यश्चिद्यः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषापस्ततान। सहस्रसाः शतसा अस्य रंहिर्न स्मा वरन्ते युवतिं न शर्य्याम् ॥ सद्यो-ऽपि यः शवसा बलेन तनोत्यपः सूर्य इव ज्योति-तिषा पञ्च मनुष्यजातानि सहस्रसानिनी शत-

मानिन्यस्य सा गतिर्न स्नैनां वारयन्ति प्रयुवतीमिव शरमयीमिषुं मन्युर्मन्यतेर्दीप्तिकर्मणः क्रोधकर्मणो वधकर्मणो वा मन्युं त्वस्मादिषवस्तस्यैषा भवति ॥ ५ (२६) ॥

"सद्यश्चिद्यः शवसा पञ्च क्रुष्टीः"—इति (ऋ० सं० ८, ८, २६, ३)। "सद्योऽपि" 'यः' तार्क्ष्यः, "बलेन तनोति अपः" वर्षभावेन। 'सद्यः'शब्दो लक्षणार्थः,—यदा, श्वः, परश्वः, परुत्, परारि चेति। 'चित्'—इति अप्यर्थे, न कदाचिदप्यन्यः, सर्वदा तार्क्ष्य एवेति। किं प्रति अपः तनोति? 'पञ्च क्रुष्टीः' पञ्च मनुष्यजातानि प्रति, ब्राह्मणप्रमुखान् निषादपञ्चमान् वर्णान् प्रति, तदनुग्रहपूर्वकत्वात् सर्वलोकानुग्रहस्य, दृष्टिग्रहणेन तद्विवक्षा। कथम्? 'सूर्यः इव ज्योतिषा' यथा सूर्यो ज्योतिःप्रकाशं लोकानुग्रहाय तनोति, तथा तार्क्ष्यः अपः तनोति। यथा हविषा विधेमेति नम्यते, तत्र कस्मै देवायेति सम्प्रदानश्रुतेः सम्प्रदानावैधुर्याय, एवमिहाप्युपमानोपमेयकारकसम्बन्धावैधुर्याय ज्योतिरिति नम्यते। कस्मात् पुनरयमपस्ततान? इति। इतः—यस्मात् "सहस्रसाः शतसा अस्य रंहिः" बहुंश्च बहुतरांश्च प्रकारान् मेघविदारणाय भजते 'अस्य' तार्क्ष्यस्य 'रंहिः' गतिः। अपि चैवमसह्यास्य गतिः, तस्माद् वरं तेनैव "एताम्" अस्य "वारयन्ति" न प्रतिबद्धुं शक्नुवन्ति केचन, अतिवेगवत्त्वात्। कथम्? 'युवतिं न शर्याम्' अतिबलवता धनुष्मता मुक्तां "शरमयीम् इषुम्" अन्येन वान्येन वाकाशप्रदेशेन प्रतिमिश्रयन्तीमात्मानम्। य एवमादिगुणयुक्तः तार्क्ष्यः, स इदं नामाख्यं करोतीति।

"मन्युः", "मन्यतेः" क्रोधार्थस्य, दीप्त्यर्थस्य वा, उभयमप्युपपद्यते, बलवत्त्वात् मध्यमस्य ॥

"तस्य एषा भवति"—॥ ५ (२९) ॥

त्वया मन्यो सरथमारुजन्तो हर्षमाणासोऽधृषिता मरुत्वः । तिग्मेषव आयुधा संशिशाना अभिप्रयन्तु नरो अग्निरूपाः ॥ त्वया मन्यो सरथमारुह्य रुजन्तो हर्षमाणासोऽधृषिता मरुत्वस्तिग्मेषव आयुधानि संशिश्यमाना अभिप्रयन्तु नरो अग्निरूपा अग्निकर्माणः सन्नद्धाः कवचिन इति वा दधिक्रा व्याख्यातस्तस्यैषा भवति ॥ ६ (३०) ॥

"त्वया मन्यो"—इति (ऋ० सं० ८, ३, १८, १। अथ० सं० ४, ३१, १)। तपसः पुत्रो मन्युर्नाम, तस्यार्षम्। इयं नाजिरादिषु निष्केवल्ये विनियोगः। हे भगवन्! मन्यो!' त्वया 'सरथम्' एकमेव त्वया सह रथं समारुह्य 'रुजन्तः' अभिभवन्त', 'हर्षमाणासः' तवाश्रयादधिकलाः हृष्यन्तः, 'अधृषिताः' अनाधर्षिताः परैः, अपि च हे 'मरुत्वः!' 'तिग्मेषवः!' एते अस्मद्योधाः 'आयुधा' "आयुधानि" 'संशिशानाः' संशिश्यमाना', तीक्ष्णानामिषूणामायुधानाञ्च योऽयः समनुतिष्ठन्तः भिन्दन्तः इषुभि', छिन्दन्तः आयुधैः, अमुना प्रकारेण एते 'नरः' नराः अस्मन्मनुष्याः योधाः, "अग्निरूपाः" "अग्निकर्माणः" अग्नय इवैते सेनाम् 'अभि' भवन्तः 'यन्तु' इति ॥

'दधिक्राः"—इति वक्तव्यम्। सः "व्याख्यातः"—"दधत् क्रामति" इत्येवमादि। सर्वं मध्यमे योज्यम्।

"तस्य एषा भवति"—॥ ६ (३०) ॥

आ दधिक्राः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषापस्ततान। सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा वचांसि ॥ आतनोति दधिक्राः शवसा बलेनापः सूर्य इव ज्योतिषा पञ्च मनुष्यजातानि सहस्रसाः शतसा वाजी वेजनवानर्वरणवान् सम्पृणक्तु, नो मधुनोदकेन वचनानीमानीति मधु धमतेर्विपरीतस्य सविता सर्वस्य प्रसविता तस्यैषा भवति ॥ ७ (३१) ॥

"आ दधिक्राः शवसा"—इति (ऋ० सं० ३, ७, १२, ५)। वामदेवस्यार्षम्। 'आततान' "आतनोति" सर्वतस्तनोति। कोऽसौ? इति, 'दधिक्राः'। केन? 'शवसा' "बलेन"। किमातनोति? 'अपः'। क्व? 'पञ्च कृष्टीः' "पञ्च मनुष्यजातानि" प्रति। कथम्? 'सूर्यः इव ज्योतिषा' 'सहस्रसाः शतसाः' बहूनां बहुतराणाञ्च उदकानां सम्भक्ता, 'वाजी' "वेजनवान्" 'अर्वा' "ईरणवान्" उदकैरणक्रियायोगी। य एवमादिगुणयुक्तो दधिक्राः, सोऽस्माकम् 'इमा' "इमानि" स्तुतिवाक्यानि स्तुतिलक्षणानि 'वचांसि' 'सम्पृणक्तु' 'मध्वा' "मधुना, उदकेन"।

"मधु"—"धमतेः" आद्यन्त"विपरीतस्य" उदकं स्तुत्यनन्तरमेव ददातीत्यर्थः ॥

बलकृतिः, वर्षकर्म चोभयमप्यस्ति, तस्मात् मध्यमः ॥

"सविता"—इति वक्तव्यम्। सः "व्याख्यातः" "इममेवाग्निं सवितारमाह"—इत्यत्र। स पुनरिह वर्षकर्मयोगात् मध्यमः ॥

"तस्य एषा भवति"—॥ ७ (३१) ॥

सविता यन्त्रैः पृथिवीमरम्णादस्कम्भने सविता द्यामदृंहत्। अश्वमिवाधुक्षद्धुनिमन्तरिक्षमतूर्ते बद्धं सविता समुद्रम् ॥ सविता यन्त्रैः पृथिवीमरमयदनारम्भणेऽन्तरिक्षे सविता द्यामदृंहदश्वमिवाधुक्षद्धुनिमन्तरिक्षे मेघं बद्धमतूर्ते बद्धमतूर्ण इति वात्वरमाण इति वा सविता समुदितारमिति कमन्यं मध्यमाद्देवमवक्ष्यदादित्योऽपि सवितोच्यते तथा च हैरण्यस्तूपे स्तुतोऽर्चन् हिरण्यस्तूप ऋषिरिदं सूक्तं प्रोवाच तदभिवादिन्येषर्ग् भवति ॥ ८ (३२) ॥

"सविता यन्त्रैः"—इति (ऋ० सं० ८, ८, ७, १)। अर्चन्नामा हैरण्यस्तूप ऋषिः, उपरिष्टाद्याख्यास्यते (२७१ पृ०)। 'सविता' मध्यमः, सर्वबलेशानः। किम्? इति,—'यन्त्रैः पृथिवीम् अरम्णात्' यावत् किञ्चित् यन्त्र्यते तत् सर्वं बलेनैव, यन्त्रिता च इयं पृथिवी नियता, न चान्य इन्द्रात्

बलवान् यन्त्रयितास्ति, तस्मात् इन्द्र एवेमां संयच्छन् स्थिरामकरोत्। "रम्णातिः संयमनकर्मा"—इति उक्तम्। अथवा वर्षेणोपकारेण पृथिवीलोकनिवासिनो धारयति, तदस्याः संयमनम्। किमेतावदेव? न—इति, उच्यते—"अस्कम्भने सविता द्यामदृंहत्"। एवमप्येतस्मिन् 'अस्कम्भने' "अनारम्भणे" अमूर्त्तेऽन्तरिक्षे, यत्र पर्णमपि नालमवस्थानाय, तत्रैवमप्यतिगुर्वीं सौपर्णीं 'द्यां' 'सविता' एव 'अदृंहत्' स्थिरामकरोत्—आभूतसंप्लवान्। को हि नाम मध्यमात् सवितुरन्य एतदतिदुष्करं कुर्यात्? अपि च 'अश्वम् इव अधुक्षत्' यथा अश्वबन्धो अश्वं धूनुयात्, उपाहृतम् अनायासेन रजः तस्मादपनेष्यन्। एवं 'धुनिं समुद्रम्' उदकबन्धितारम् "मेघम्" 'अधुक्षत्' 'सविता' अधूनोत् अकम्पयत् उदकप्रक्षरणाय। क्व? 'बद्धम् अतूर्त्ते' एतस्मिन्नन्तरिक्षे अहिंसिते अत्वरमाणे वा, सर्वगतत्वादाकाशे, गमनायोग्ये वा। वायात्मनैव विष्टभ्य निश्चेष्टं बद्धमिवाधुक्षत् यः सविता, सोऽस्माकमिदं नाम करोतु इति। "समुदिता" = 'समुद्रः' = "मेघः"॥

"कम् अन्यम् मध्यमात् एवम् अवक्ष्यत्"—'मेघमधूनोत्' इति? कुतः संशयः? अन्योऽपि यस्मात् मध्यमात् सवितोच्यते, यत आह—"आदित्यः अपि सविता उच्यते" इति॥

यथा च एतत् एवम्, "तथा" एतस्मिन्नेव "हैरण्यस्तूपे" सूक्ते स्तवः हैरण्यस्तूपमिदं सूक्तमिति। कुत एतत्? अत आह—"अर्चन् हिरण्यस्तूपऋषिः इदं सूक्तं प्रोवाच" इति। अर्चन्-नाम्ना हिरण्यस्तूपः, तद्रूपः तद्व्रतो वा, स यथा एतत् सूक्तं प्रोवाच॥

"तदभिवादिनी एषा ऋक् भवति" अस्मिन्नेव सूक्ते—

हिरण्यस्तूपः सवितर्यथा त्वाङ्गिरसो जुह्वे वाजे अस्मिन्। एवा त्वार्चन्नवसे वन्दमानः सोमस्येवांशुं प्रति जागराहम्॥ हिरण्यस्तूपो हिरण्मयस्तूपो हिरण्मयस्तूपोऽस्येति वा स्तूपः स्त्यायतेः सङ्घातः सवितर्यथा त्वाङ्गिरसो जुह्वे वाजे अन्ने अस्मिन्नेवं त्वार्चन्नवनाय वन्दमानः सोमस्येवांशुं प्रतिजागर्म्यहं त्वष्टा व्याख्यातस्तस्यैषा भवति॥ ९ (३३)॥

"हिरण्यस्तूप सवितर्यथा"—इति (ऋ० सं०८,८,७,५)। हे 'सवित !' 'यथा' अन्यकालीन 'हिरण्यस्तूपः' 'त्वा' त्वाम् 'आजुह्वे' आजुहाव, कर्मण्याहूतवान, एवम् 'अहम्' अपि तस्मिन् कल्पे हिरण्यस्तूपतामापद्य 'अर्चन्'नामा 'अवसे' अवनाय 'वाजे अस्मिन्' "अन्ने" सस्कृते हविषि त्वामाहूय 'वन्दमान' स्तुवन् 'सोमस्य इव अंशुम्' सोममिव क्रीत्वा आहृत 'प्रति' 'जागर' "जागर्मि" अनन्यमना त्वामायागादुपासे इति॥

"स्तूप स्त्यायतेः"। "स्त्यै सङ्घाते (भ्वा० प०)" तस्य स्तूपः ="सङ्घात." इति॥

"त्वष्टा"—इति वक्तव्यम्। स "व्याख्यात."॥

"तस्य एषा भवति"—॥ ९ (३३)॥

देवस्त्वष्टा सविता विश्वरूपः पुपोष प्रजाः पुरुधा जजान। इमा च विश्वा भुवनान्यस्य महद्देवानामसुरत्वमेकम्॥ देवस्त्वष्टा सविता

सर्वरूपः पोषति प्रजा रसानुप्रदानेन बहुधा चेमा जनयतीमानि च सर्वाणि भूतान्युदकान्यस्य महच्चास्मै देवानामसुरत्वमेकं प्रज्ञावत्त्वं वानवत्त्वं वापि वासुरिति प्रज्ञानामास्यत्यनर्थानस्ताश्चास्यामर्था असुरत्वमादिलुप्तं वातो वातीति सतस्तस्यैषा भवति ॥ १० (३४) ॥

"देवस्त्वष्टा"—इति (ऋ० स० ३, ३, ३१, ४)। वैश्वामित्रस्य प्रजापतेरार्षम्। वैश्वदेवे विनियोगः। 'त्वष्टा' देवो मध्यमः, 'सविता' सर्वस्य भूतग्रामस्य प्रसविता उत्पादयिता उदकसम्प्रदानद्वारेण। किमुत्पादयिता एव? न—इति, उच्यते—'पुपोष प्रजाः' पुष्णाति चास्मादुत्पाद्य। न केवलं पुष्णाति, किन्तर्हि? 'पुरुधा जजान' इति, "बहुधा चैनाः जनयति" वर्द्धयति। केन पुनरसौ जनयति, पुष्णाति, वर्द्धयति च? यत आह—"इमा च विश्वा भुवनान्यस्य"। इमानि विश्वानि भुवनानि "उदकानि" अस्य यतः स्वतया वर्त्तन्ते, तस्मात् जनयति पुष्णाति वर्द्धयति च। अतश्च सर्वमिदं शक्तः कर्त्तुम्, यत.—"महद्देवानामसुरत्वमेकम्"। 'महत्' 'असुरत्वम्' "प्रज्ञावत्त्वम्" "असुरिति प्रज्ञानाम" तया तद्वत्त्वम्। तया महत्या प्रज्ञया उदकेन साधनेन सर्वमिदं जनयति, पुष्णाति, वर्द्धयति च, अप्रज्ञो हि साधनसम्पत्तावपि किं कुर्यात्। अथवा "अनवत्त्वम्" असुः=प्राणः, तेन तद्वत्त्वम्। एवमपि सति प्राणेनैव शक्यते एतत् सर्वं कर्त्तुम्, अप्राणो हि किं कुर्यात्। "अन्नवत्त्वम्"—इति केचित्। तेषामन्नहेतुनोदकेन तद्वत्त्वम्, तथापि योज्यम् ॥

"असुरिति प्रज्ञानाम"। तत् कस्मात्? "अस्यति अनर्थान्" प्रज्ञैव हि प्रज्ञावतोऽस्यति विपल्लनर्थान्, नाशयति। "अस्ताय अस्याम् अर्थाः" न हि तदस्ति यन्नेर्यत् सर्वं प्रज्ञावतां प्रज्ञायां नास्ति, एतावांस्तु विशेषोऽभिव्यक्तमिति। अथवा यदेतदसुरत्वं वसुमतो भावः "वसुरत्वम्" एतत्, रो मत्वर्थे वकारलोपश्च, वसुना उदकेन तद्वान् असौ त्वष्टा॥

"वातः" कस्मात्? "वातीति सतः"। "वा गतिगन्धनयोः (अदा० प०)"—इत्यस्य। सत इति धातुकारकावधारणम्। वायुशब्दो हि वयायां धातूनां विकल्पेन, अयन्तु वातेरेवेति विशेषः॥

"तस्य एषा भवति"—॥ १० (३४)॥

वात॒ आ वा॑तु भेष॒जं श॒म्भु म॑यो॒भु नो॑ हृ॒दे। प्र ण॒ आयूं॑षि तारिषत्॥ वात आवातु भैषज्यानि शम्भु मयोभु च नो हृदयाय प्रवर्द्धयतु च न आयुरग्निर्व्याख्यातस्तस्यैषा भवति॥ ११ (३५)॥

"वात आवातु"—इति (ऋ० सं० ८, ८, ४४, १। सा० सं० छ० आ० २, २, ४, १०)। उलस्य वातायनस्यार्षम्। 'वात' अस्मान् आभिमुख्येन 'भेषजम्' यद् यत् पथ्यम् अस्माकम्, अत्तत् गृहीत्वा 'आवातु'। तत्र अस्माकं 'शम्भु' अस्तु। 'शम्'—इति सुखनाम, तद्भावकमस्तु। तदात्वे च आयतौ परिणामे 'मयोभु' अस्तु। 'मयः'—इति सुखनाम, हृदयाय सुखमस्तु। स्तूयमानः प्रत्यक्षीभूत इव मनसि, यतः

प्रत्यक्षमुच्यते—"प्र ण आयूंषि तारिषत्"। हे भगवन् ! वायो ! प्रवर्द्धय त्वमस्माकमायूंषि सपुत्रपौत्रादिवर्गाणाम्, भैषज्यञ्च त्वमस्माकं नित्यमावह ।—इत्येतदाशास्महे ॥

"अग्निः"—"व्याख्यातः"।

"तस्य एषा भवति"—॥ ११ (३५) ॥

प्रति॒ त्यं चारु॑मध्व॒रं गो॑पी॒थाय॒ प्र हू॑यसे । म॒रुद्भि॑रग्न॒ आग॑हि ॥ तं प्रति चारुमध्वरं सोमपानाय प्रहूयसे सोऽग्ने मरुद्भिः सहागच्छेति कमन्यं मध्यमादेवमवक्ष्यत्तस्यै षापरा भवति ॥ १२ (३६) ॥

"प्रति॒ त्यं चारु॑म्"—इति (ऋ० सं० १, १, ३६, १ । सा० सं० छ० आ० १, १, २, ६)। मेधातिथिः ऋग्द्रष्टा। 'त्यं' तम् अङ्गवैकल्यरहितम् 'अध्वरं प्रति' हे भगवन् 'अग्ने !' त्वमस्माभिः 'गोपीथाय' "सोमपानाय" 'प्रहूयसे' आहूयसे। स त्वमेतद् ज्ञात्वा 'मरुद्भिः' सह 'आगहि' "आगच्छ" एतस्मिन्नस्य कर्मणि सोम पातुम्।—इत्येतदाशास्महे ॥

"गोपीथाय" "मरुद्भि." सहेति मध्यमं लिङ्गम् ।

"तस्य एषा अपरा भवति"—सा पुन. किमर्थम् ? गोपीथायेत्यव्यक्त सोमपानं, व्यक्तसोमपानलिङ्गा उत्तरा। तद्यथा —॥ १२ (२६)।

अ॒भि त्वा॑ पू॒र्वपी॑तये सृ॒जामि॑ सो॒म्यं मधु॑। म॒रुद्भि॑रग्न॒ आग॑हि ॥ अभिसृजामि त्वा पूर्व-

पीतये पूर्वपानाय सोम्यं मधु सोममयं सोऽग्ने मरुद्भिः सहागच्छेति ॥ १३ (३७) ॥

इति दशमाध्यायस्य तृतीयः पादः ॥ १०, ३ ॥

अभि त्वा पूर्वपीतये"—इति (ऋ० सं० १, १, ३०, ४। सा० सं० छ० आ० ३, २, २, ४)। हे भगवन्! 'अग्ने!' 'पूर्वपीतये' "पूर्वपानाय" पूर्वकाले प्रवृत्ताय पानाय 'त्वा' त्वाम् 'अभिसृजामि' वदे। किम्? इति—इद 'सोम्यं मधु' "सोममय" तत् मधु। स त्वमागच्छ एतस्मिन् कर्मणि एतत् पातुम्।—इत्येतदाशास्महे ॥ १३ (३७) ॥

इति ऋत्वर्थाया निरुक्तवृत्तौ पञ्चदशस्य (दशमस्य) अध्यायस्य तृतीयः पादः ॥ १० । ३ ॥

चतुर्थः पादः ॥

वेनो वेनतेः कान्तिकर्मणस्तस्यैषा भवति ॥ १ (३८) ॥

"वेन."—इति वक्तव्यम्। स एषः "वेनतेः कान्तिकर्मणः" सर्वलोककान्तो हि मध्यम', सर्वस्योपकारित्वात् ॥

"तस्य एषा भवति"—॥ १ (३८) ॥

अयं वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने। इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥ अयं वेनश्चोदयत् पृश्निगर्भाः प्राष्टवर्णगर्भा आप इति वा

ज्योतिर्जरायुर्ज्योतिरस्य जरायुस्थानीयं भवति जरायुर्जरया गर्भस्य जरया यूयत इति वेमसपां च सङ्गमने सूर्य्यस्य च शिशुमिवं विप्रा मतिभी रिहन्ति लिहन्ति स्तुवन्ति वर्द्धयन्ति पूजयन्तीति वा शिशुः शंसनीयो भवति शिशीतेर्वा स्याद्दानकर्मणश्चिरलब्धो गर्भ इत्यसुनीतिरसून्नयति तस्यैषा भवति ॥ २ (३८) ॥

"अयं वेनः"—इति (ऋ० सं० ८, ७, ७, १। य० वा० सं० ७, १६)। भार्गवस्य वेनस्यार्षम्। शक्रोऽनया स्तूयते। अन्तर्भावितप्रज्ञान. तस्मिन्मनसि प्रत्यक्षीभूतमभिनयेन दर्शयन्निव कश्चित् ब्रवीति—'अयं वेनः' इति। किं करोति? चोदयति—'पृश्निगर्भा'। पृश्निः=आदित्य., प्रकृष्टो ह्यनेन वर्णः प्राष्टः प्राप्त., यास्तस्य गर्भत्वमुपगताः रश्म्यन्तर्गताः परिपक्वाः आपो मासाष्टकेन सम्भृता', ताः वेनश्चोदयति प्रावृषि वर्षभावेन प्रेरयति। किंलक्षणः? 'ज्योति. जरायु' "ज्योतिः अस्य" विद्युदाख्यं कर्मात्मलक्षणम्, "जरायुस्थानीयं" प्रच्छादनः। तदधिष्ठातृः मध्यमस्य गर्भस्येव परिवेष्टनं भवति। क्वावस्थितश्चोदयति? 'रजसो विमाने' रज. उदकम्, तद्यत्र निर्मीयते, तत्रावस्थितः, अन्तरिक्षलोके इत्यर्थ.। योऽयमेवमादिगुणयुक्तो वेन, तम् 'इमं' वेनम् 'अपां' "च" 'सङ्गमे' 'सूर्यस्य' "च" 'सङ्गमे' समागमनस्थाने, यत्र सूर्य्यस्य रश्मिभिः आपः सङ्गच्छन्ते, तत्र वर्त्तमानम्, मध्यस्थाने।

'विप्राः' मेधाविनः स्तोतारः 'मतिभिः' स्तुतिभिः प्रज्ञापूर्विकाभिः 'शिशुम्' 'न' "इव" 'रिहन्ति'। यथा हि शिशुर्नित्यं स्तूयते एवं स्तूयते। यदेतत् "रिहन्ति"—इति, एतत् "लिहन्ति" लिहेः (अदा॰ उ॰) धातोः, वर्द्धयन्ति, पूजयन्ति वेत्यर्थः ॥

"जरायुः" कस्मात् ? तद्धि "जरया गर्भस्य" भवति, यथा यथा गर्भो भवति तथा तथा तदुत्पद्यते। "जरया यूयते इति वा" यदेतत् जरेति प्रसिद्धम्, प्रसूताया गोः स्त्रिया वा, पश्चात् पतति, सा जरेत्युच्यते, तया च यूयते मिश्र्यते तज्जरायुरित्युच्यते।—"शिशुः" कस्मात् ? स हि "शंसनीयो भवति" प्रयोजनेऽप्रयोजने वा अर्चन्ति, किञ्चन प्रलापेषु। "शिशीतेः वा स्यात्" धातोः दानार्थस्य, दीयते हि स पुरुषेण स्त्रियै धारणाय,—भवति च वादः स्त्रीणामभिनवगृहीतगर्भाणाम् 'अचिरात् लब्धो मे गर्भः' इति ॥

"असुनीतिः"—इति। एतत् देवतापदम्। स पुनरयमिन्द्रः, मध्यमः, प्राणः। स पुनर्यदेतस्मात् शरीरादुत्क्रामति, अथेतरान् प्राणान् "असून्" अन्यत्र "नयति" विज्ञायते हि— 'प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीति ॥

"तस्य एषा भवति"—॥ २ (१८) ॥

असु॑नीते॒ मनो॑ अ॒स्मासु॑ धारय जी॒वात॑वे॒ सुप्र॒तिरा॑ न॒ आयुः॑। रा॒रन्धि॑ नः॒ सूर्य॑स्य सं॒दृशि॑ घृ॒तेन॒ त्वं त॒न्वं॑ वर्धयस्व ॥ असुनीते मनः अस्मासु धारय चिरं जीवनाय प्रवर्द्धय च न आयूरन्धय च नः सूर्यस्य सन्दर्श-

नाय रध्यतिर्वशगमनेऽपि दृश्यते । मा रधाम द्विषते सोम राजन्नित्यपि निगमो भवति । घृतेन त्वमात्मानं तन्वं वर्द्धयस्वत्तो व्याख्यातस्तस्यैषा भवति ॥ ३ (४०) ॥

"असुनीते मनो अस्मासु"—इति (ऋ० सं० ८, १, २२, ५)। श्रुतबन्धोरार्षम्। हे 'असुनीते' प्राण! 'मनः अस्मासु धारय' मनःप्रभृतीनेतान् प्राणान् आत्मनोऽवस्थानेनास्मच्छरीर एव धारय, मा त्वमुत्क्रमीः, त्वदनुत्क्रमेण अवस्थास्यन्ते इति। 'जीवातवे' "चिरम्" अस्माकं "जीवनाय" मनो धारय। "सुप्रतिरा न आयुः"। अमुना प्रकारेण सुष्ठु प्रतिर प्रकर्षेण वर्द्धयास्माकमायुः। किञ्च 'रारन्धि नः' संसाधयास्माकम्। तथा अनुगृहाण, यथा 'सूर्य्यस्य' 'सन्दृशि' "सन्दर्शनाय" सम्यग् दर्शनाय अलं स्याम, दिव्यं नः चक्षुरुत्पादय, येन सम्यक् सूर्य्यं पश्येम। सर्वं चैतदन्नप्राचुर्य्ये सति भवति, यतो ब्रूमः—"घृतेन त्वं तन्वं वर्द्धयस्व"। घृतेन उदकेन, त्वमात्मानं यथाकालं वर्द्धयस्व, त्वय्युदकं ददति सर्वमिदं भवति। अस्यविशेषादसुनीतेर्घृतमित्युदकनामेत्यवोपपद्यते ॥

"रध्यतिः वशगमने अपि दृश्यते"। तद्यथा—"मा रधाम द्विषते (ऋ० सं० ८, ७, १, ५)"—इत्यत्र। "देवीः षडुर्वीरुरु नः कृणोत विश्वे देवास इह वीरयध्वम्। मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन्॥"—इति (ऋ० सं० ८, ७, १५, ५। अथ० सं० ५, ३, ६—७)। वैश्वदेवी। विहव्यस्यार्षम्। वैहव्यं सूक्तम्। तत्रैषा दर्शपूर्णमासादिषु हविषामभिमर्शने विनियुज्यते।

'देवो:' 'षट्' द्यौश्च पृथिवी च अहश्च रात्रिश्च आपश्च ओष-धयश्चेति। ता उच्यध्वे—हे देव्यः! उर्व्यः षट्, सर्वमिदम् ऊर्णुवत्यः यूयमुच्यध्वे। 'उरु' बहु यद् यद् वयं युष्माभिः बहु-क्रियमाणमिच्छामः, तत्तत् 'उरु' बहु कुरुध्वे। हे 'विश्वेदेवासः' विश्वेदेवाः! यूयमपि 'इह' एतस्मिन् कर्मणि अस्माक-मङ्गभावमुपगताः सन्त 'वीरयध्वम्' वीरान् पुत्रान् इच्छत दातुम्। अपि च जातपुत्रा सन्तः 'मा हास्महि प्रजया' मा अस्मान् प्रजा कदाचित् अपि हासीत्, कष्टं हि पुत्रमर-णम्। 'मा तनूभिः वयं स्वाभिः हास्महि' मास्माकमायुप-च्छेदोऽभूत्, युष्मदनुध्यानात्। अपि च "मा रधाम द्विषते सोम राजन्" हे भगवन्! 'सोम!' 'राजन्!' विशेषत त्वमु-च्यसे, सर्वस्या अस्या आशिषः त्वदनुध्यानात् 'मा रधाम' मा वशं गच्छेम। 'द्विषते' द्विषन्त एवास्माकमर्थसम्प्रदानादिना वश्यतामुपयान्तु, यतः अनिष्टं हि द्विषतो विधेयत्वमिति। सामर्थ्यादिह "रध्यतिर्वशगमने"॥

"ऋत."-इति, एतत् पदम्। तत् "व्याख्यातम्" निर्व-चनत.,—"ऋतमित्युदकनाम प्रत्यृतं भवति"—इति। इह ऽभिधेयो मध्यमः॥

"तस्य एषा भवति"—॥ २ (४०)॥

ऋतस्य हि शुरुधः सन्ति पूर्वीर्ऋतस्य धीतिर्वृजिनानि हन्ति। ऋतस्य श्लोको बधिरा ततर्द कर्णा बुधानः शुचमान आयोः॥ ऋतस्य हि शुरुधः सन्ति पूर्वीर्ऋतस्य प्रज्ञा वर्जनीयानि हन्त्यृतस्य श्लोको बधिर-

स्यापि कर्णावातृणत्ति बधिरो बद्धश्रोत्रः कर्णौ बोधयन् दीप्यमानस्यायोरयनस्य मनुष्यस्य ज्योतिषो वोदकस्य वेन्दुरिन्वेरनत्तेर्वा तस्यैषा भवति ॥ ४ (४१)॥

"ऋतस्य हि शुरुधः"—इति (ऋ० सं० ३, ६, १०, २)। वामदेवस्यार्षम। सम्पातसूक्ते निष्केवल्ये पृष्ठ्याभिप्लवयो शस्यते। 'ऋतस्य' मध्यमस्य। किम्? इति—'शुरुधः' आप 'सन्ति' विद्यन्ते। किंलक्षणा? 'पूर्वी' अनेककाल सम्भूता। यतश्चासाविड्डोऽङ्गिरतस्तस्य 'ऋतस्य' उदकसम्प्रदानहारिणानाकाल नाशयन्ती, 'धीति' "प्रज्ञा" सर्वलोकस्य, 'वृजिनानि' "वर्जनीयानि" अयशांसि 'हन्ति' नाशयति। अकाले हि क्षुत्परिगृहीतानामयशस्करेषु जिह्वादिषु प्रवृत्तिर्भवति। ददतश्चोदकं सर्वलोकवृजिनाय वाताय। तस्य 'ऋतस्य' एवमतिमहान् 'श्लोकः' शब्द स्तनयित्नुलक्षणो भवति, य "बधिरस्यापि" बद्धश्रोत्रस्य, विधातुरपि निसर्गतः अपिहितश्रोत्रस्य, 'आयो' "अयनस्य" "मनुष्यस्य" बोधयत्यसुत इति। 'कर्णौ' अतिदुर्भेदी 'आततर्द' "आतृणत्ति" आभिनत्ति। 'शुचमान' "दीप्यमान" "ज्योतिष" च "उदकस्य" च श्लोक। एव सततो ह्यसाहृत इति॥

"इन्दु"—इति, एतत् पदम्। स कस्मात्? "इन्धे" दीप्त्यर्थस्य, "उनत्ते वा" क्लेदनार्थस्य, उभयमप्येन्दौ उपपद्यते चन्द्रमसि॥

"तस्य एषा भवति"—॥ ४ (४१)॥

प्र तद्वोचेयं भव्यायेन्दवे हव्यो न य

इषवान्नन्व ऐर्न्यति रक्षोहा नन्न ऐर्न्यति।
स्वयं सो अस्मदानिदो बधैरजेत दुर्मतिम्।
अवस्रवेदघशंसोऽवतरमव क्षुद्रमिव स्रवेत्॥
प्रब्रवीमि तदिन्द्रायेन्दवे हवनार्ह इव य इषवा-
नन्नवान् कामवान् वा मननानि च नो ऐर्न-
यति रक्षोहा च बलेन ऐर्नयति स्वयं सो अस्म-
दभिनिन्दितारम्। बधैरजेत दुर्मतिम्। अव-
स्रवेदघशंसः। ततश्चावतरं क्षुद्रमिवावस्रवेद-
स्यासि भूयांसमर्थं मन्यन्ते यथाहो दर्शनीयाहो
दर्शनीयेति तत्परुच्छेपस्य शीलं परुच्छेप ऋषिः
पर्ववच्छेपः परुषि परुषि शेपोऽस्येति वेतीमानि
सप्तविंशतिर्देवतानामधेयान्यनुक्रान्तानि सूक्त-
भाञ्जि हविर्भाञ्जि तेषामेतान्यहविर्भाञ्जि वेनो-
ऽसुनीतिरृत इन्दुः प्रजापतिः प्रजानां पाता
वा पालयिता वा तस्यैषा भवति॥ ५ (४२)॥

"प्र तद्वोचेयम्"—इति। अतिच्छन्दा (ऋ० स० २, १
१७, १) पारुच्छेपी। षष्ठेऽहनि मरुत्वतीये शस्यते। यद्यदिह
तस्येदो. तत्तदह प्रब्रवीमि, यस्मै 'इन्दवे' प्रीत्यर्थम्। किल
क्षण ? 'य' इन्दु 'भव्य' भवनार्ह, आत्मवान् अभिप्रेताना
पात्रभूत इत्यर्थ। भव्यो भावनार्ह इव, यो हविषा भावन
मर्हति, न च भाव्यते, अहविर्भाक्त्वात्। 'हव्यो न' "हवनार्ह
इव" यो यज्ञेन च पुनराहूयते, अहविर्भाक्त्वादेव। 'इषवान्'

नित्यम "अन्नवान्" "कामवान् वा" कामिना होतृणा नित्य मभिमतफलसम्प्रदानोन्मुख । तत्सम्प्रदानोन्मुखतया च नित्य मस्माक 'मन्म रेजति' "मननानि" प्रज्ञानानि "रेजयति" आकम्पयति, आकम्पितहृदयानुपकारितया नित्यमस्मान् करोति। कथ नाम एत नित्य स्तुयामिति। अपि च 'रचोहा' रचासि 'बलेन' घ्नन सुतरामस्माक 'मन्म रेजति । किञ्च "स्वय मो अस्मदाद्रिद"। 'स्वयम्' आदरवान भूत्वा 'स' इन्दु. 'अस्मादानिद' "अस्मदभिनिन्दितारम्" 'वधै' वज्रप्रहा रैरतिदु सहै 'अनीत' जयेत्, छिपेद्वा 'दुर्मति पापमति योऽस्मान् प्रति। तेन वातिबलवतेन्दुना हन्यमानोऽस्मद् 'अवशस' अस्माक य पापाना शसिता, कथयिता, ख्याना मपि स्फोतिकर्त्ता जनपदे। असौ 'अवस्रवेत्' अधोगति स्यात्। "अवतरमवं चुद्रमिव स्रवेत" यावच्च प्रथम स्तुत अधोगत, ततोऽवतरम्, ततोऽवतरमिति, तावत् स्रवेत्, चुद्र मिव द्रव्य किञ्चित् यावदामूलतो नष्टम्।—इत्येतदाशास्महे॥

बलकृतेर्मध्यम इति॥

इहाभ्यासबाहुल्य दृष्ट्वा 'रेजति' 'रजति' 'स्रवेत्' 'स्रवेत्'—इति, प्रतिसमाधत्ते—"अभ्यासे भूयासम् अर्थ मन्यन्ते"—इति। शब्दाभ्यासे यद्यन्यो विशेषो नास्ति, तत्रैव विशेषमाचार्या मन्त्रार्थसतत्त्वविदो मन्यन्ते—यदुतार्थभूयस्त्वमिति, न शक स्मात् स एव शब्द पुनरभ्यस्यते। लोकेऽपि चैतद् दृष्टम्—शब्दाभ्यासेऽर्थभूयस्त्वमिति,—"यथा—अहो दर्शनीय। अहो दर्शनीय। इति" गुणातिशये हि स्त्रिया शब्दाभ्यास, तस्मा, मन्त्रेष्वपि तद्वदेवेति न्याय्यम। "तत्" च पुनरेतत् "परुच्छे पस्य" मन्त्रदृश "शीलम्"। स हि नित्यमभ्यस्तै शब्दै स्तौति। मन्त्रदृशाऽपि स्वभाव उपेच्य इत्युपपदर्शनायेद

सुक्तम्। अथ पुनः "परुच्छेपः" कस्मात्? परुच्छेप ऋषिः, तस्य हि "पर्ववत्" महान् "शेपः" प्रजननम्। "परुषिपरुषि शेपोऽस्येति वा" सर्वाङ्गसन्धिषु शेपकृतो योगः सुखात् किल। तस्य शेपोऽस्येति वा॥

"इति इमानि सप्तविंशतिः देवतानामधेयानि अनुक्रान्तानि"। इतिकरणः प्रकारवचनः। एवमेतानि यथा समाम्नातानि 'सप्तविंशतिः' सप्ताधिका विंशतिः 'देवतानामधेयानि' "वायुः"—इत्यत आरभ्य यावत् "इन्दुः" इति। तेषां पुनः किमर्थमनुकीर्त्तनम्? विशेषविवक्षया। कः पुनरसौ? इति, —तेषां कानिचित् "सूक्तभाञ्जि हविर्भाञ्जि" च, सूक्तं च हविश्चोभय भजन्ते, कानिचित् सूक्तमेव न हविः—"तेषाम् एतानि अहविर्भाञ्जि"। तद्यथा—"वेनः, असुनीतिः, ऋतः, इन्दुः" इति। एभ्यो यान्यन्यानि त्रयोविंशतिः, तान्युभयं भजन्ते सूक्तं हविश्च। देवतास्वभावोपप्रदर्शनार्थमिदमुक्तम्। 'घृतेन'="उदकेन" त्वमात्मानं वह यस्वेत्येवमाद्यभिधानार्थं विशेषप्रविभागप्रज्ञप्तये अहविर्भाक्त्वादुदकमेव घृतमित्येवमादि तद्दृतेषु मन्त्रेषु विशेष उपेक्ष्य इति॥

"प्रजापतिः"—"प्रजानां पाता वा पालयिता वा"। तस्य एषा भवति"—॥ ५ (४२)॥

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्॥ प्रजापते न हि त्वदेतान्यन्यः सर्वाणि जातानि तानि परिबभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयं

स्याम पतयो रयीणामित्याशी रहिर्व्याख्यात-
स्तस्यैषा भवति ॥ ६ (४३) ॥

¹ "प्रजापते न"—इति (ऋ० सं० ८, ७, ४, ५। य० वा० सं० १०, २०—२३, ६५)। प्राजापत्यस्य हिरण्यगर्भस्यार्षम्। पितृयज्ञउपस्थाने विनियुक्ता, राजसूये च विनियोगो होमे। हे 'प्रजापते।' 'न त्वत् अन्य' न कश्चिदपि 'एता' "एतानि" सर्वदेवतारूपाणि 'परिबभूव, परिगृह्य भवति, त्वमेवैतानि सर्वाणि सर्वत परिगृह्य सर्वतो भवसि। यत एव त्वा वय सर्वता विभूत पश्याम सर्वस्य ग्रासम, अतो ब्रूम —'यत्कामा ते' येन येन युक्ता सन्तो वय तुभ्य 'जुहुम' 'तत् न अस्तु' स कामोऽस्माक त्वदनुध्यानात् सम्रद्धाता नित्यमेव च। "वय स्याम पतयो रयीणाम"। 'रयीणा' धनाना 'पतय'। —"इति" इयम् अपरा "आशी" द्वितीया, यत्कामा इति प्रथमा। अथवा "आशी"—इति आचार्य्यो दर्शयति इय मन्त्रगतैव, यत्रापि न स्यात तत्राप्यध्याहार्य्येति, स्तुत्याशिषो-र्नित्यसम्बन्धादिति ॥

"अहि" "व्याख्यात." निर्वचनत —"अहिरयनात्" इति। इह त्वभिधेयो मध्यम ॥

"तस्य एषा भवति"—॥ ६ (४३)॥

अब्जामुक्थैरहिं गृणीषे बुध्ने नदीनां रजःसु षीदन् ॥ अब्जमप्सुजमुक्थैरहिं गृणीषे बुध्ने नदीनां रजःसु उदकेषु सीदन् बुध्नमन्तरिक्ष' बद्धा अस्मिन् धृता आप इति वा इदमपीतरद्ध बुध्नमेतस्मादेव बद्धा अस्मिन् धृताः प्राणा इति

योऽहिः स बुध्नो बुध्नमन्तरिक्षं तन्निवासात्त-स्यैषा भवति ॥ ७ (४४) ॥

"अब्जामुक्थैः"—इति (ऋ॰ सं॰ ५, ३, २६, ६)। वसिष्ठस्यार्षम्। दशरात्रस्य चतुर्थेऽहनि वैश्वदेवे विनियोगः। हे स्तोतः! त्वमेतम् 'अहिम्' 'अब्जाम्' "अप्सुजम्" उदकजन्मानम् 'उक्थैः' 'शृणोपि' स्तौषि। 'बुध्ने' 'नदीनां' "नदनानाम्" अपां बन्धने एतस्मिन्नन्तरिक्षे, वर्त्तमान 'रजःसु सीदन्' उदकेषु लब्धव्येषु निमित्तभूतेषु एतस्मिन् कर्मणि अङ्गभावमुपगच्छन्॥

"बुध्नम्=अन्तरिक्षम्, बद्धा अस्मिन् धृता आपः"—इति। "इदम् अपि इतरत्" शरीरं बुध्नमित्युच्यते, "बद्धा अस्मिन् धृताः प्राणाः"—इति। "यः अहिः, सः बुध्नः" एतावांस्तु विशेषः "बुध्नम्=अन्तरिक्षम्, तन्निवासात्" अहिः=बुध्नः॥

"तस्य एषा भवति"—॥ ७ (४४)॥

मा नोऽहिर्बुध्न्यो रिषे धान्मा यज्ञो अस्य स्रिधदृतायोः॥ मा च नोऽहिर्बुध्न्यो रेषणाय धान्मास्य यज्ञोस्या च स्रिधद्यज्ञकामस्य सुपर्णो व्याख्यातस्तस्यैषा भवति ॥ ८ (४५) ॥

"मानोऽहिर्बुध्न्यः"—इति (ऋ॰ सं॰ ५, ३, २६, ७)। पूर्वया समानं सर्वमिति। 'मा' अस्मान् 'अहिर्बुध्न्यः' 'रिषे' 'धात्' मा रेषणाय हिंसनाय कस्मैचित् धात्। किञ्च "मा यज्ञो अस्य स्रिधदृतायोः"। मा यज्ञोऽस्य ऋतायोः, अस्य यजमानस्य यज्ञकामस्य 'मा स्रिधत्' मा स्रसत्, नित्यमविनाशेन वर्त्ततामिति॥

"सुपर्णः" "व्याख्यात." "सुपतनः"—इति। इह त्वभिधेयो मध्यम.॥

"तस्य एषा भवति"—॥ ८ (४५)॥

एकः सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे। तं पाकेन मनसा पश्यमन्तितस्तं माता रेळ्हि स उ रेळ्हि मातरम्॥ एकः सुपर्णः स समुद्रमाविशति स इमानि सर्वाणि भूतान्यभिविपश्यति तं पाकेन मनसापश्य मन्तित इत्यृषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता त माता रेढि वागेषा माध्यमिका स उ मातरं रेढि पुरूरवा बहुधा रोरूयते तस्यैषा भवति॥ ९ (४६)॥

"एकः सुपर्ण."—इति (ऋ० सं० ८, ६, १६, ४)। सप्रेः धर्मस्य वेश्मार्षम्। 'एक' एव अद्वितीय, यस्य पतने गमने प्रतिमायानम् अन्य द्वितीय नास्ति। 'सः' 'सुपर्ण.' सुपतनो वायु 'समुद्रम्' अन्तरिक्षं नित्यम् 'आविवेश' "आविशति" न कदाचिदप्यनाविष्टस्तत्र। 'स' च पुनः सर्वभूतानुप्रवेशी, तदा विपश्य 'विश्व' 'भुवन' "सर्वाणि इमानि भूतानि" 'विचष्टे' "अभिविपश्यति"। यथा द्रष्टव्यानि 'तम्' एव वर्त्तमान अह 'पाकेन मनसा' विपक्वप्रज्ञानेन सर्वगतमपि सन्तम् अन्तिकम् इव 'अपश्यम्'। ऋषिर्दृष्टदेवतासतत्व, कस्मैचिदाचचाणो ब्रवीति—"त माता रेळ्हि स उ रेळ्हि मातरम्"।

'माता' = "माध्यमिका" वाक्, 'तम्' उपजीवति, परस्परा-श्रयत्वात्तयोर्वृत्तेरध्यात्मवदिति ॥

"पुरूरवाः" मध्यमः। विज्ञायते हि—"प्राण एव हि पुरूरवाः" इति। सः "बहुधा रोरूयते" स्तनयति, तेन पुरूरवाः ॥

"तस्य एषा भवति"—॥ ८ (४६) ॥

समस्मिञ्जायमान आसत ग्ना उतेमवर्धन्नद्यः१ स्वगूर्त्ताः। महे यत्त्वा पुरूरवो रणायावर्धयन्दस्युहत्याय देवाः ॥ समासतास्मिञ्जायमाने ग्ना गमनादापो देवपत्न्यो वापि चैनमवर्धयन्नद्यः स्वगूर्त्ताः स्वयङ्गामिन्यो महते च यत्त्वा पुरूरवो रणाय-रमणीयाय संग्रामायावर्धयन् दस्युहत्याय च देवा देवाः ॥ १० (४७) ॥

इति दशमाध्यायस्य चतुर्थः पादः ॥ १०, ४ ॥

"समस्मिन् जायमानः"—इति (ऋ० सं० ८, ५, २, २)। उर्वश्या आर्षम्। 'अस्मिन्' एतस्मिन् पुरूरवसि 'जायमने' वर्षकर्मणि आत्मानं प्रति लभमाने प्रावृट्काले, "कर्मजन्मानः" —इति ह्युक्तम्। 'समासत ग्नाः' "आपः" सम्भागम्य तं परिवार्य, तद्विधेयतामुपगम्य 'आसते' तिष्ठन्ति। 'उत' अपि च यथायथैवस्तुवशात् वर्षासु नद आरोहति, तथातथैनं ताः 'नद्यः' नदना आपः, 'स्वगूर्त्ताः' "स्वयं गामिन्यः" भूत्वा इतरां तद्विधेयतामुपगच्छन्त्य, तदधिकारोद्भवेन 'ईम्' "एनम्"

'अवर्द्धन्' वर्द्धयन्ति । अत पर स्तूयमान: प्रत्यक्षीभूत: प्रत्यक्षकृत उत्तरोऽर्द्धर्च: । हे 'पुरूरव: !' 'यत् त्वा महे रणाय' यस्मात् त्वां "महते रणाय" मेघेन सह "रमणीयाय" सङ्ग्रामाय 'अवर्द्धयन्' वर्द्धयन्ति माध्यमिका: "देवा." । 'दस्युहत्याय' मेघवधाय चेति । तस्मात् त्वामवश्यं ग्ना: समागम्यासते, वर्द्धयन्ति च नद्य, सर्वथापि महानुभाव: त्वं सर्वमेव त्वय्युपपद्यते इति ॥

"देवपत्न्य. वा"—इति । पृथक्त्वेन दर्शयति, तथापि योज्यते । समागम्येतस्मिन्नेहे पुरूरवसि 'आसत ग्ना:' सर्वा देवपत्न्य., स हि स्त्रीणा स्वभावो यत् प्रजायमानां स्त्रिय परिवार्य्यासते । 'उत ईम् अवर्द्धन्' अपिचैतमवर्द्धयन् । नदना ग्ना. स्तुतिपरा', तस्य 'स्वगूर्त्ता.' "स्वयं गामिन्य." अपरप्रणेया: ईश्वरा. । अपि च सर्वमेतदुपपद्यते, पुरूरवस्त्वयि, यस्मात् "महते" 'रणाय' "रमणीयाय" "सङ्ग्रामाय" असुरै. सह, 'दस्युहत्याय' शत्रुवधाय अवर्द्धयन् स्वैर्महिमभि: त्वं न: असुरान् जेष्यसीति पुरस्कुर्दवा इति ॥

हिरण्यस्तोमोऽध्यायपरिसमाप्तौ, यस्मात्स्यते समाप्तम् ॥१०(४०) ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ पञ्चदशस्य (दशमस्य)

अध्यायस्य चतुर्थ: पाद: ॥ १० । ४ ॥

इति श्रीजम्बूमार्गाश्रमवासिन आचार्य्यभगवद्दुर्गस्य कृतौ

ऋज्वर्थायां निरुक्तवृत्तौ

पञ्चदशोऽध्याय: (दशमोऽध्याय.) परिसमाप्त: ॥१०॥

---

(१)   (२) (३)   (४)

(अथातोमध्यस्थानाव्रायवास्ताणामोनोचो-

(५) (६) (७) (८) (९)
नवारन्तमूष्मिमारुद्रायथातेदियु्व्सरा बोधादर्द-
(१०) (११) (१२) (१३) (१४)
रुद्योजात एवविद्यानत्रापिनडूमस्माश्रङ्चेच-
(१५) (१६) (१७) (१८)
स्यपतिःचेत्रस्यपतिनाच्चे वस्यतेपऽमीवहापुनरे-
(१९) (२०) (२१) (२२) (२३)
ह्यिो अनिघ्योपरेयियांसंसेनेवमिवोहिरण्यग-
(२४) (२५) (२६) (२७)
र्भोयेतेविश्वकर्मा सर्वस्यविश्वकर्माविमनाविश्वक-
(२८) (२९) (३०) (३१) (३२)
र्मनृत्यमूपुसद्यायिद्यास्ययामन्ययादधिक्षाःसविता-
(३३) (३४) (३५) (३६)
चन्त्रैर्हिरण्यस्तूपोदेवस्त्वष्टावात आवातुमतित्व-
(३७) (३८) (३९) (४०) (४१) (४२)
र्माभत्वावेनोवेनतेरयंवेनोऽसुनीतनरतस्यहिमत-
(४३) (४४) (४५) (४६)
होयेयं मजापतेऽस्मामुक्षमैनानोहिरेकः सुपर्णः
(४७)
समस्मिन् सप्तचत्वारिंशत् ॥)

इति निरुक्ते (उत्तरषट्के) दशमोऽध्यायः
समाप्तः ॥ १० ॥

अथ एकादशाध्यायस्य

प्रथमः पादः।



ॐम्। श्येनो व्याख्यातस्तस्यैषा भवति ॥ १ ॥

श्रीः ॥ "श्येनः" व्याख्यातः,—"श्येनः शंसनीयं गच्छति"—इति। इह त्वभिधेयो मध्यमः ॥

"तस्य एषा भवति"—॥ १ ॥

आदाय श्येनो अभरत्सोमं सहस्रं सवाँ अयुतञ्च साकम्। अत्रा पुरन्धिरजहादरातीर्मदे सोमस्य मूरा अमूरः ॥ आदाय श्येनोऽहरत्सोमं सहस्रं सवानयुतञ्च सह सहस्रं सहस्रसाव्यमभिप्रेत्य तत्रायुतं सोमभक्षास्तत्सम्बन्धेनायुतं दक्षिणा इति वा तत्र पुरन्धिरजहादमित्रानदानानिति वा। मदे सोमस्य मूरा अमूरः। ऐन्द्रे च सूक्ते सोमपानेन च स्तुतस्तस्मादिन्द्रं मन्यन्त ओषधिः सोमः सुनोतेर्यदेनमभिषुण्वन्ति बहुलमस्य नैघण्टुकं वृत्तमाश्चर्यमिव प्राधान्येन तस्य पावमानीषु निदर्शनायोदाहरिष्यामः ॥ २ ॥

"आदाय श्येनः"—इति (ऋ० सं० ३, ६, १५, ७)। वामदेवस्यार्षम्। श्येनाजिरादिषु मरुत्वतीये शस्यते, ऋत्विग्भिर्विधानतः। अत्तं 'श्येनः' इन्द्रः 'सोमम्' 'आदाय' 'अभरत्' अपिबत्। क्व? 'सहस्रं सवान्' सहस्रं सुत्यानां यत्र कुर्वन्ति, 'अयुतं च' दक्षिणाः प्राप्नुवन्ति, न तु दीयन्ते, सत्रत्वात्, पृष्ठशमनाभिप्रायं वा दक्षिणादानं स्यात्, सहस्रसाध्ये सत्रे तेषां तत्सम्बन्धात्। 'अत्रा पुरन्धिः' अत्र अस्मिन् सहस्रसाध्ये सत्रे सः श्येनः 'पुरन्धिः' बहुनो धनस्य दाता। 'मदे' 'सोमस्य' तृप्तौ, सोमस्य प्राप्तायाम् 'अजहात् अरातीः' असुरानमित्रान् पृथक्पक्षे अभ्यजयत्, प्राणैर्मूढान् अप्रतिपत्तिकान् कृत्वा विषादमुपनीय अमूढो निःसाध्वसः। विकल्पपक्षे तु "अदानान्"—"इति वा"। रातिर्दानार्थः, तत्प्रतिषेधेनारातिः, प्राक् सोमपानमदप्राप्तेः। अदानानिति न दास्यामीत्येवन्धियः 'मूराः' मूढमतयः, कार्पण्यसयुक्ताः ये आसन्, तान् प्रति 'सोमस्य मदे, प्राप्ते 'अमूरः' अमूढः अकृपणो भूत्वा 'अजहात्' अत्यजत्, दाता सम्पेदे॥

सहस्रसाध्यमभिप्रेत्य तत्सम्बन्धेनायुतं दक्षिणा इति वा। "इति वा"—शब्देन किं विकल्प्यते,—सहस्रसाध्यं वा सत्रम्? यत् पठन्ति याज्ञिकाः। तद्यथा—अतिरात्रयोर्मध्ये सहस्रमहानि शतकृत्वो दशरात्रस्यावृत्तिरन्ते सहस्रसाध्यमिति। तदर्थं सहस्रं दशभियमसैर्गुणितं चमसपरिसङ्ख्ययोपलक्ष्यमाणमयुतं सोमभक्षाणां सम्पद्यते। सोमभक्षनिष्क्रयणश्रुतिश्च दक्षिणानामस्ति,—"यां सदस्येभ्यो ददाति सोमपीथं तया निष्क्रीणीत" इति, न चासति प्रश्ने रूढिबाधो न्याय्य इति। असत्यपि ऋत्विग्दक्षिणादानसम्बन्धे सहस्रसाध्यमेव सत्राणां प्रासर्पकाभिप्रायं वा अयुतम्। अथवा सहस्रमिति

बहुनाम। 'सहस्र' सवान्' अभियवा बहवः, प्रतिसवनमभि-
षवमभिप्रेत्य यस्मिन् कस्मिंश्चिद्दक्षिणावति सोमे प्रयुत
च दक्षिणा', बहुश्च इत्यर्थः, अस्ति हि प्राप्तिः विशेषशब्दाः
सामान्येषु भवन्तीति। तद्यथा—हिमेनोदकेनेति। अद-
क्षिणत्वात् सत्राणामिवं वेत्यभिप्रेत्य वा शब्द चकार॥

"सोमः"—इति वक्तव्यम्। स पुनरेषः "ओषधिः" सोम',
हैमवतो मौजवतो वा। स कस्मात्? "सुनोतेः" "षुञ् अभि-
षवे (स्वा० उ०)"—इत्यस्य, अभिषूयते ह्यसौ यज्ञे। "यदेन-
मभिषुण्वन्ति"—इति कर्मकारकं दर्शयति। स कथम्?
मध्यमस्थानो भवति हि तमधिकृत्य—"यत्ते' सोम। दिवि
ज्योतिः (य० वा० स० ६, ३३)"—इति, "सोमो वै राजस्तस्य
चन्द्रमास्तृतीयमयं यः पवते स तृतीयमिति स तनूकरणे त
सर्वं स्वतनूभूतमाप्याययति (श० ब्रा० ३, ८, ४, १२)"—
इति। तस्मादस्यैव सा तनूर्यश्चन्द्रमा', रसात्मकत्वात्।
वायुर्वा सोऽयमिवमात्मानमापाद्याभिपूयत इति भवति
स मध्यमः।

"बहुलमस्य नैघण्टुकं हत्तम्" अस्यार्थो स्तुतिः परार्था।
तद्यथा—प्रायः पावमानं मण्डलम् "प्राचुर्यमिव प्राधा-
न्येन"। स्वप्रधाना स्तुति', क्वचिदाश्चर्यं चित्रतः स्तुतिः स्यात्।
"तस्य पावमानीषु" अस्तु "निदर्शनाय" उभयम् "उदाहरि-
ष्यामः"—परार्थत्वं स्तुतेः स्वार्थत्वञ्च। परार्थं तावदुदाह्रियते,
तद्यथा—॥ २॥

**स्वादिष्ठया मदिष्ठया पवस्व सोम धारया।
इन्द्राय पातवे सुतः॥ इति सा निगदव्याख्या-
'तायैषापरा भवति चन्द्रमसो' वैतस्य वा॥ ३॥**

"स्वादिष्ठया मदिष्ठया"—इति (ऋ॰ सं॰ ६, ७, १६, १। सा॰ सं॰ छ॰ आ॰ ५, २, ४, २)। मधुच्छन्दस आर्षम्। ग्रावस्तोत्रे विनियोगः। हे 'सोम !' 'स्वादिष्ठया' स्वादुतमया, 'मदिष्ठया' मादयितृतमया च त्वं 'धारया' 'पवस्व' प्रक्षर। किमर्थम् ? 'इन्द्राय' इन्द्रार्थम्, 'पातवे' पानाय 'सुत.' अभिषुतः। इन्द्रार्थं पवस्वेत्यस्यार्थता लक्ष्यते ॥

"अथ एषा अपरा भवति, चन्द्रमसो वा एतस्य वा"—इति। अथ शब्देन विशेषाधिकारवाचिना स्वप्रधानता स्तुतेरधिकरोति। चन्द्रमसो वेति चन्द्रत्वमापन्नस्याप्योषधिसोमस्य वा, यथोक्तम्—"स तनूकरणे" (२८३ पृ॰ १२प॰), इतरथा ह्यप्राकृतप्रक्रिया स्यादनधिकारादस्मिन् प्रक्रमे चन्द्रमसः। चन्द्रमसो वाधिदैवमापन्नस्य। ओषधिसोमस्य वाधियज्ञमापन्नस्य। तदेतदुभयथा प्रदर्शयति—॥ ३ ॥

सोमं मन्यते पपिवान्यत्सम्पिषन्त्योषधिम्।
सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ॥
सोमं मन्यते पपिवान्यत्सम्पिषन्त्योषधिमिति वृथासुतमसोममाह सोमं यं ब्रह्माणो विदुरिति न तस्याश्नाति कश्चनायज्वेत्यधियज्ञमथाधिदैवतं सोमं मन्यते पपिवान्यत् सम्पिषन्त्योषधिमिति यजुः सुतमसोममाह सोमं यं ब्रह्माणो विदुश्चन्द्रमसं न तस्याश्नाति कश्चनादेव इत्यथैषापरा भवति चन्द्रमसो वैतस्य वा ॥ ४ ॥

"सोमं मन्यते"—इति (ऋ॰ सं॰ ८, ३, २०,) १

सूर्याया आर्षम् । विवाहे विनियोगः । 'यत्' 'सम्पिषन्ति' सञ्चूर्णयन्ति अभिषुत्य पिबन्ति भौमम् ओषधिम् केचिद्रासायनिकाः । ते मन्यन्ते सोमं पपिवांसः सोममपास्यमिति, न च पुनस्ते सोमपाः, तथा सोमः स इति । अनेन तावदृदर्शनार्थं मन्त्र एवं "तया सुतमसोममाह" पात्रं च । अथ कः सोमः ? के च सोमपाः ? यतो ब्रवीति—"सोमं०—०कश्चन" । 'यं' ब्राह्मणाः 'सोमं विदुः' अधियज्ञे अङ्गभूतम्, 'न तस्य अश्नाति' 'कश्चन' "अयज्वा" अनधिकृतो यजमानत्वेन । "इति अधियज्ञम्" इति विषयमुपप्रदर्शयति ॥

"अथाधिदैवतम्"—इति विषयान्तरमधिकरोति । उक्तं हि "चन्द्रमसो वा"—इति, तदुपप्रदर्शनार्थमाह—"सोमं ०—०षधिम्"—"इति" "यजुः" । "सुतम्" अधियज्ञं चन्द्रमसमपेक्ष्य "असोममाह" । यथा पूर्वस्मिन् रासायनिकसोमस्यासोमत्वमधियज्ञमपेक्ष्य, एवमिहाप्यधियज्ञसोमस्यासोमत्वमधिदैवसोमं चन्द्रमसमपेक्ष्य । एवं कृत्वा 'सोमं' 'यं' 'ब्रह्माणः' 'विदुः' "चन्द्रमसम्" 'न तस्य अश्नाति' 'कश्चन' "अदेवः इति" देवानां हि भक्षत्वेन विपरिणतश्चन्द्रमाः, "सोमो नूनमेष तद्देवानामन्नम्"—इति ह विज्ञायते । एवमस्य स्वप्रधाना सोमस्य स्तुतिः ॥

"अथ एषा अपरा भवति चन्द्रमसो वा एतस्य वा" । सा किमर्थम् ? "आश्चर्यमिव प्राधान्येन" इत्युक्तम् (२८१पृ० १५ पं०) । तथा चेयम् 'अपरा' अन्या स्वार्थप्राधान्या स्तुतिरप्यस्ति सोमस्येत्युपप्रदर्शनार्थमाह—॥ ४ ॥

यत्त्वा देव प्रपिबन्ति तत आप्यायसे पुनः ।
वायुः सोमस्य रक्षिता समानां मास आकृतिः ॥

यत्त्वा देव प्रपिबन्ति तत आप्यायसे पुनरिति नाराशंसानभिप्रेत्य पूर्वपक्षापरपक्षाविति वा वायुः सोमस्य रक्षिता वायुमस्य रक्षितारमाह साहचर्याद्रसहरणाद्वा समानां संवत्सराणां मास आकृतिः सोमो रूपविशेषैरोषधिश्चन्द्रमा वा चन्द्रमाश्चायन् द्रमति चन्द्रो माता चान्द्रं मानमस्येति वा चन्द्रश्चन्दतेः कान्तिकर्मणश्चन्दनमित्यप्यस्य भवति चारु द्रमति चिरं द्रमति चमेर्वा पूर्वं चारु रुचेर्विपरीतस्य तस्यैषा भवति ॥ ५ ॥

"यत्त्वा देव"—इति (ऋ० सं० ८, ३, २०, ५)। यदा त्वां हे 'देव!' सोम! 'प्रपिबन्ति' प्रारभन्ते सोमं पातुमृत्विग्यजमानाः, त्रिषु सवनमुख्येषु। तदा किम्? इति —"तत आप्यायसे पुनः"। 'ततः' अनन्तरम् 'पुनः आप्यायसे'। तदुक्तमधियज्ञे—"आप्यायनमाप्यायस्व 'सं ते पयांसि' —इति (ऋ० सं० १, ६, २२, ३। य० वा० सं० १२, ११३। सा० सं० आ० ३, २)। अभ्यग्निपान्"—इति। "वायुः सोमस्य रक्षिता"—इति, वायव्येष्वसौ पात्रेषु गृहीतो रक्ष्यत इति "वायुमस्य रक्षितारमाह" मन्त्रदृक् "साहचर्यात् रसहरणात् वा" वायुसहचरितो ह्यसौ, तेन नित्यं सहचरणादविनाभावात्कर्मणः, रसहरणात् वा सर्वरसापहारो वायुः समर्थः सन् यच्च शोधयति सोमम्, तेन सोमो रक्षितो भवति। "समानां मास आकृतिः"। 'मासः' "माता" निर्माता सोम ओषधिः,

सर्वस्य किलौषधिः। 'सोमस्य' चन्द्रमसः कलोपचयमनु प्रत्यहमेकैकत्वेनकला इव चन्द्रमसः पर्णान्युपचीयन्ते, स पौर्णमास्यां पञ्चदशपर्णः सम्पद्यते, पौर्णमास्याः पुन. परतः कलाहानौ चन्द्रमस इव एकैकं पर्णमपचीयते इति ओषधे सोमस्य चन्द्रमसः सम्पद्यते। तदायुर्वेदविदः सोमलक्षणं रसायनतन्त्रे स्मरन्ति। अमुना प्रकारेणोपचयापचयाभ्यां पर्णानां सोमलक्षणद्वारेण 'समानां' "संवत्सराणाम्" 'आकृतिः' आकर्त्ता भवति "सोमः रूपविशेषैः"। तदेव पर्णानामुपचयापचयाभ्यामन्यदन्यद्रूपं प्रतिपद्यते एवमधियज्ञेऽपि स एव ओषधिः सोमः॥

अथाधिदैवे—"यत्त्वा देव प्रपिबन्ति"—इति। अपरपक्षेषु पीयते रश्मिभिः। तदुक्तम्—"यमक्षितिमक्षितयः पिबन्ति" इति। "तत आप्यायसे पुनः" त पूर्वपक्षमाप्याययन्तीति। तदप्युक्तम्—"यथा देवा अंशुमाप्याययन्ति" इति। वायु सोमस्य चन्द्रमसो रक्षितारमाह, एष ह्येनं सूक्ष्मया रश्मिनाड्या सुषुम्नाख्यया पुनर्यथाकालमापूरयति। 'समानां' "संवत्सराणाम्" 'मासः' चन्द्रमा.—सोम', लक्षणत्वात् मासः द्वादशकलो मासभूतमात्मानमावर्त्तयन् संवत्सराणां कर्त्ता भवति। "रूपविशेषैः"—इति। कलानामुपचयापचयविशेषाभ्यां रूपविशेषाच्चन्द्रमसः प्रतितिथि भवन्ति॥

"स्वादिष्ठया मदिष्ठया"—इत्यस्यामपि केचित् अधिदैवमर्थं व्याचक्षते। तन्मतेनोच्यते—हे 'भगवन्!' 'सोम!' चन्द्र! 'स्वादिष्ठया' अतिशयेन स्वादुतमया, 'मदिष्ठया' अतिशयेन मदयितृतमया 'पवस्व' प्रक्षर 'धारया' प्रत्यहमेकैककलया, 'इन्द्राय' सूर्याय 'पातवे' 'सुत.' आपूरितः सुषुम्नेन रश्मिना॥

"चन्द्रमाः" कस्मात्? स हि "चायन्"-पश्यन् सर्वभूतानि उपर्य्यवस्थितः "द्रमति" गच्छति, चायतेः पूर्वपदम्, द्रमतेरुत्तरपदम्। अथवा "चन्द्रो माता" चन्द्रश्चासौ माता च निर्माता सर्वस्येति चन्द्रमाः, चन्द्रः पूर्वपदम्, मातोत्तरपदम्। "चान्द्रं मानमस्य—इति वा" चन्द्रमाः, चन्द्रः पूर्वपदम्, तदेवोत्तरपदम्, केवलं तु समानाधिकरणः पूर्वं, बहुव्रीहिरुत्तरः॥

अथ "चन्द्रः" कस्मात्? "चन्दतेः कान्तिकर्मणः" नित्यकान्तो ह्यसौ।—"चन्दनम्"—इत्यप्यस्यैव चन्दतेर्भवति, तदपि हि कान्तम्। अथवा "चारु द्रमति" चारुशब्दात् पूर्वपदम्, द्रमतेः (१भा० २११पृ०) उत्तरपदम्, चार्विति द्रमतिक्रियाविशेषणम्। अथवा "चिरं द्रमति" तदेवोत्तरपदम्, चिरशब्दात् पूर्वपदम्। "चमेः (भ्वा० प०) वा पूर्वम्" द्रमतेरेवोत्तरपदम्, कोऽर्थः, चम्यमानो भक्ष्यमाणो देवैरसौ द्रमतीति चन्द्रमाः॥

अथ "चारु" कस्मात्? "रुचेः (भ्व० आ०)" आद्यन्तविपरीतस्य" दीप्तिकर्मणः॥

"तस्य एषा भवति"—॥ ५ ॥

नवो॑ नवो भवति॒ जाय॑मा॒नोऽह्नां॑ के॒तुरु॒षसा॑मे॒त्यग्र॑म्। भा॒गं दे॒वेभ्यो॒ वि द॑धात्या॒यन् प्र च॒न्द्रमा॑स्तिरते दी॒र्घमायुः॑॥ नवो नवो भवति जायमान इति पूर्वपक्षादिमभिप्रेत्याह्नां केतुरुषसामेत्यग्रमित्यपरपक्षान्तमभिप्रेत्यादित्यदैवतो द्वितीयः पाद इत्येके भागं देवेभ्यो विदधात्याय-

न्नित्यर्द्धमासेज्यामभिप्रेत्य प्रवर्द्धयते चन्द्रमा दीर्घमायुर्ध्व्युमीरयतीति मतो म्रतं च्यावयतीति वा शतबलाक्षो मौद्गल्यस्तस्यैषा भवति ॥ ६ ॥

"नवोनवो भवति"—इति (ऋ० सं ८, ३, २३, ४)। सूर्य्यायां आर्षम्। दूणाशे चान्द्रमसे चरौ विनियोगो राजयक्ष्मण्हीतेष्टौ च। "नवोनवो भवति जायमानः" चन्द्रमाः, प्रतीच्यां दिशि पूर्वपक्षाद्युपक्रमस्य, उपक्रान्तवृद्धिः, अस्तं गते आदित्ये पश्चादादित्यस्य प्रतिमास जायमानो नवो नवो भवति। "अह्नां केतुरुषसामेत्यग्रम्"—"इति अपरपक्षान्तमभिप्रेत्य" अपरपक्षान्ते पु प्राच्यां दिशि प्रक्षीणः कलामात्रावशेषः 'अह्नां केतुः' लक्षणम्, तत्कलोपचयापचयाभ्यां हि प्रतिपत्प्रभृतीन्यहानि लक्ष्यन्ते, अथवा 'अह्नां केतुः' कर्त्ता स्वगतिविशेषैः 'उषसामेत्यग्रम्' इति। उषसो य. प्रकाशः, तस्य प्रान्ते पुरस्तात् उद्यतः सूर्य्यस्य दृश्यते। स पुनरेव एव पर्य्यायेण प्रतीचीप्राच्यौ दिशौ 'आयन्' पूर्वपक्षापरपक्ष एकैकशोऽपि पूर्णमास्यमावस्ययोः आगत्य कालौ भिन्दन् हविर्भाग वा विभागेन यथाविभाग 'देवेभ्यो भागं' 'विदधाति' एककर्मेऽपि पूर्वपक्षात् पौर्णमास्यमावास्ययोः स्वगत्या काले तिथि विभज्य देवेभ्यो ददाति विभागदाने हेतुर्भवति, पूर्णे चन्द्रमसि उपचये पौर्णमास्यदर्शनेऽमावास्यायामिति हि विज्ञायते। य एष करोति 'चन्द्रमाः' सः 'प्रतिरते'—प्रवर्द्धयते देवानाना 'दीर्घम् आयु.'। वयमपि च यजामहे, तमनेन हविषा। अतः सोऽस्माकमप्येतत् करोतु।—इत्येतदाशास्महे।

"आदित्यदैवतो द्वितीयः पाद इत्येके"। "पूर्वापरं चरतो मायये तौ"—इति (ऋ० सं० ८, ३, २३, ३)। इत्यतोऽनन्तरमेवेयम्, मैत्रावरुणीये समाने हविषि विनियोग इत्यपेक्ष्येयमपि सौर्याचन्द्रमसीति अह्नां केतुरित्यतो विशेषलिङ्गात् अब्रवीति—"आदित्यदैवतो द्वितीयः पादः" इति। तदर्थयोजना—यः 'चन्द्रमाः' "नवो नवो भवति जायमानः" यश्च "भागं देवेभ्यो विदधात्यायन्" यश्च 'प्रतिरते दीर्घमायुः' सोऽस्माकमप्येतत् करोतु। अयं यश्च सूर्यः 'अह्नां' 'केतुः' कर्त्ता, उदयास्तमयाभ्याम्, 'उषसां' च 'अग्रम्' 'एति' मुख्यत्वमागच्छति, तत्कृतत्वादुषसो जन्मनः। तद्रश्मिप्रान्तप्रोत्सार्यमाणे हि तमस्युषसो जायन्तेऽतः स तासां जनयितेति मुख्यः। अतः सोऽस्माकमेतदेवं करोतु।—इत्येतदाशास्महे॥

इह कथं चन्द्रमा मध्यस्थानः?—ननु सूर्यात् परतः शतसहस्रे योजनानां चन्द्रमसः स्थानमिति पौराणिकाः स्मरन्ति। सत्यं स्मरन्ति, कर्मसंयोगेन तु द्युस्थानत्वे सति सर्वदेवतानां विशेषतः स्थाननियमो विवक्षितः, तदेतदैन्द्रं कर्म रसानुप्रदानं वृत्रवधो बलकृतिरिति, तथा बाहुल्येनैन्द्रेषु दृष्टत्वात्, बलकृतिश्च चन्द्रे दृष्टा, यथा—"वृधे्रजेत दुर्मतिम्" प्रसिद्ध चेदम् इन्दुः=चन्द्रः इति, रसात्मकत्वाच्चन्द्रमसो रसानुप्रदानसम्बन्धः। एवञ्चेदिन्द्रश्चन्द्रमाः, तस्य मेघवधाधिकारसम्बन्ध, कर्त्तृत्वेन सूर्य्यादर्वागिति युक्तं मध्यस्थानश्चन्द्रमाः। अपि च ओषधिसोमश्चन्द्रमा भवति अधियज्ञमापन्नः, स चेन्द्रस्थानम्, अन्न चाश्नादस्यात्मसाद्भवति, पच्यमानस्यान्यत्वेनावस्थानादित्यतो युक्तं मध्यस्थान इति। यथा च सर्वगतो वायुविशेषतो मध्यस्थान इत्येवमित्यसोऽदोषः॥

"मृत्युः"—इति वक्तव्यम्। स कस्मात्? "मारयतीति

सत:" मध्यमो हि प्राणो मृत्यु, उत्क्रामन् शरीरादितरैः प्राणैः प्राणिनो वियोजयति, एव मारयति। विज्ञायते हि— "प्राणमूत्क्रामन्त सर्वे प्राणा अनूत्क्रामन्ति"—इति। अथवा "मृत च्यावयति" य एवोपचोणायुर्भवति, उपचोण-कर्मा, तमेवासावपगमनेन प्रच्यावयति। "शतबलाच." "मौद्गल्य" आचार्यो मन्यते। बहुबलानि अचाणि इन्द्रि-याणि यस्य स शतबलाच बहिन्द्रिय, मुद्गलस्यापत्यं मौद्गल्य ॥

"तस्य" मृत्यो "एषा भवति"—॥ ६ ॥

परं मृत्यो अनुपरेहि पन्थां यस्ते स्व इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्र-वीमि मा नः प्रजां रीरिषो मोत वीरान् ॥ परं मृत्यो ध्रुवं मृत्यो ध्रुवं परेहि मृत्यो कथितं तेन मृत्यो मृतं च्यावयते भवति मृत्यो सुदेवे। मुद् वे। तेषामेषा भवति ॥ ७ ॥

त्वेष मित्था समरणं शिमीवतोरिन्द्रा-विष्णू सुतपा वामुरुष्यति। या मर्त्याय प्रति-धीयमानमित् कृशानोरस्तु रसनामुरुष्यथः ॥ इति सा निगदव्याख्याता। विश्वानरो व्याख्या-तस्तस्यैषा भवति ॥ ८ ॥

"परं मृत्यो अनुपरेहि"—इति (ऋ० स० ७, ६, २६; २७—नि—२६

१। य॰ वा॰ सं॰ ३५, ७। आ॰ गृ॰ ४, ६)। सङ्कुसुको नाम, तस्यार्षम्। आज्यहोमे पुत्रकामके कर्मणि स्थालीपाकविधाने पञ्चाहुति। हे 'मृत्यो!' 'परम्' अन्यम् 'अनुपरेहि' अनुपरागच्छ त्वं 'पन्थाम्' पन्थानम्। 'य ते स्व'। कतम स? 'इतरो देवयानात्' यस्मात् देवयाने पथि वय स्थिता अनाधृष्या तव पितृयान पन्थानम् अनुपरेहि त्वम्। अपि च 'चक्षुष्मते शृण्वते' च 'ते' तुभ्य 'ब्रवीमि'—'मा' त्वम् 'न' अस्माक 'प्रजा पुत्रान् पौत्रांश्च 'रीरिष,' हिंसी, 'मा उत वीरान्' अन्यानपि, येऽस्मदाश्रया पुरुषास्तानपि मा हिंसीरिति॥

"विश्वानर व्याख्यात" अभिधानतोऽभिधेयतश्च॥
"तस्य एषा भवति"—॥ ७, ८॥

प्र वो॑ म॒हे मन्द॑माना॒यान्ध॒सोऽर्चा॑ वि॒श्वान॑राय विश्व॒भुवे॑। इन्द्र॑स्य॒ यस्य॒ सुम॑खं॒ सहो॒ महि॒ श्रवो॑ नृ॒म्णं च॒ रोद॑सी सप॒र्यतः॑॥
प्रार्चत यूयं स्तुति महतेऽन्धसोऽन्नस्य दात्रे मन्दमानाय मोदमानाय स्तूयमानाय शब्दायमानायेति वा विश्वानराय सर्वं विभ्रतायेन्द्रस्य यस्य प्रीतौ सुमहद् बलं महच्च श्रवणीयं यशो नृम्णञ्च बलं नृन्नतं द्यावापृथिव्यौ वः परिचरत इति कमन्यं मध्यमादेवमवक्ष्यत्तस्यैषापरा भवति॥ ६॥

"प्र वो मुहे"—इति (ऋ० सं० ८, १, ८, १। य० वा० सं० ३३, ३५)। वैकुण्ठस्यार्षम्। जगती। महाव्रते विनियोगः। हे स्तोतारः! 'प्र अर्च' "प्रार्चत" प्रोच्चारयत स्तुतिम्, उच्चार्य्यमाणं चार्च्यैः प्रपूजयत। कस्मै? 'विश्वानराय' किंलक्षणाय विश्वानराय? 'महे' "महते" 'अन्धसः' "अन्नस्य" दात्रे, 'मन्दमानाय' हृष्यमाणाय, अथवा शब्दायमानाय स्तोतृभिः, 'विश्वाभुवे' सर्वप्रकारविभूतियुक्ताय। 'इन्द्रस्य' ईश्वरस्य 'यस्य' विश्वानरस्य, 'सुमख सहः' "सुमहद् बलम्" 'महि श्रवः' "महच्च श्रवणीय यशः" बलमायतिर्महती 'नृम्णं च' "नृन्" मनुष्यान् प्रति यद् विशेषतः "नतम्" "बलम्" तच्च यस्य, महदपि चैता "वः" स्तुति यस्य विश्वानरस्य प्रोच्यमाना "द्यावापृथिव्यौ" "परिचरत" पूजयत, अभिनन्दत, सर्वभूतानामियमभिमता स्तुतिरस्त्वित्यभिप्रायः॥

"तस्य एषा अपरा भवति"। सा पुनः किमर्थम्? द्युस्थानोऽपि हि विश्वानरः समाम्नातः। अस्यां तु परस्या व्यपदेशादुत्तमेन ज्योतिषा विश्वानरस्यासंशयं मध्यमत्वमित्येवमुदाह्रियते—॥ ८॥

उदु ज्योतिरमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत्॥ उदशिश्रियज्ज्योतिरमृतं सर्वजन्यं विश्वानरः सविता देव इति धाता सर्वस्य विधाता तस्यैषा भवति॥ १०॥

"उदु ज्योतिः"—इति (ऋ० सं० ५, ५, २३, १)। वसिष्ठस्यार्षम्। प्रातरनुवाके विनियोगः। 'उत् अश्रेत्' उच्छ्रयति, ऊर्द्ध्वम् उपनयति 'विश्वानरः' मध्यमो वायुः, 'सविता'।

किम्? एतत् 'ज्योतिः' "अमृतं" सूर्याख्यम्, सर्वगमनानां वायुपूर्वकत्वात् गमनस्योपपद्यते। 'विश्वजन्य' सर्वलोकहितम्॥

एवमत्र विश्वानरो ज्योतिरकृण्वतीति व्यपदेशान्मध्यमो विश्वानरः। एवञ्चाभिप्रेत्योक्तम्—"कमन्यं मध्यमादेवमवक्ष्यत्" इति॥

श्रोपस्योऽर्द्धर्च उत्तर इति "क्रत्वा देवानामजनिष्ट चक्षुराविरकर्भुवनं विश्वमुषा" इति भाष्यकारो नाधिजगे, प्रसङ्गतस्तु निर्ब्रूमः।—यदा तत् ज्योतिः द्युस्थानमुपनीयते विश्वानरेणाथ तदा 'क्रत्वा' तत्कर्मणा 'देवानां' रश्मीनां 'चक्षु' ख्यानं प्रकाश. 'अजनिष्ट' जायते 'उषा'। सा न पुन जाता 'आविरकः भुवनं विश्वं' सर्वमाविः करोति भूतजातमित्यर्थः॥

"धाता" कस्मात्? स हि "सर्वस्य विधाता"-स्रष्टा, उदकपूर्वकत्वात् सर्वविधानस्य मध्यमः॥

"तस्य एषा भवति"—॥ १०॥

धाता द॒दातु दा॒शुषे॒ प्राचीं॑ जी॒वातु॒मक्षि॑ताम्। व॒यं दे॒वस्य॑ धीमहि सुम॒तिं स॒त्यध॑र्मणः॥ धाता ददातु दत्तवते प्रवृद्धां जीविकामनुपक्षीणां वयं देवस्य धीमहि सुमतिं कल्याणीं मतिं सत्यधर्मणो विधाता धात्रा व्याख्यातस्तस्यैष निपातो भवति बहुदेवतायामृचि ॥ ११॥

"धाता ददातु"—इति (अथ० सं० ७, १७, २)। वामदेवस्यार्षम्। देविकासु धात्रे हविषि विनियोगः। य एकः कश्चित् धात्रे दत्तवान् हविर्भवति, तस्मै 'दाशुषे' सः 'ददाति'। किं ददाति? "प्राची जीवातुमक्षिताम्"। 'प्राची' "प्रवृद्धां" महती 'जीवातुं' "जीविकाम्" 'अक्षिताम' "अनुपक्षीणाम्"। यत एवमतो ब्रूमः—'वय' 'देवस्य' धातुः 'धीमहि' धारयामहे, 'सुमतिम्' "कल्याणीं मतिम्" नित्यं हविर्दानयुक्ताः 'सत्यधर्माण' नित्यमवितथार्थकारिणः॥

"विधाता" "धाता व्याख्यात." धातैव विधाता॥

"तस्य एष निपातो भवति" स्तुतिसाधारण्येन "बहुदेवतायामृचि"—॥ ११॥

सोमस्य राज्ञो वरुणस्य धर्मणि बृहस्पतेरनुमत्या उ शर्मणि। तवाहमद्य मघवन्नुपस्तुतौ धातर्विधातः कलशान् अभक्षयम्॥ इत्येताभिर्देवताभिरभिप्रसूतः सोमकलशानभक्षयमिति कलशः कस्मात् कला अस्मिञ्छेरते मात्राः कलिश्च कलाश्च किरतेर्विकीर्णमात्राः॥ १२॥

इत्येकादशाध्यायस्य प्रथमः पादः॥ ११, १॥

"सोमस्य राज्ञ"—इति (ऋ० स० ८, ८, २५, ३)। विश्वामित्रस्यार्षम्। 'सोमस्य' 'राज्ञ' 'धर्मणि' कर्मणि, यत्र साम इष्यते तस्योपस्तुतौ प्रवर्त्तमानः, तेन "प्रसूतः" 'कलशान्' "सोमकलशान्" 'अभक्षयम्'। 'वरुणस्य' च एवमेव। 'बृहस्पते.' च, 'अनुमत्या.' च 'शर्मणि' शरणे आश्रये वर्त्तमान,

ताभ्याम् "अभिप्रसुत."। 'तव' 'अहम्' हे 'भगवन्!' 'अद्य' 'उपस्तुतौ' शुवयोश्च हे 'धातः!' हे 'विधातः!' सर्वैर्भवद्भिरनुज्ञातः एतान् "सोमकलशान्" 'अभक्षयम्' इति ॥

"कलशः कस्मात्"? "कलाः अस्मिन् शेरते मात्राः"। 'कलाः' अवयवाः सोमसमुदायात् केचित् पृथक्कृताः, ते 'शेरते' आसते 'अस्मिन्' कलाशब्दात् पूर्वपदम्, शीङः (आ० आ०) उत्तरपदम्।— अथ कलाः कस्मात्? अत आह कलानिर्वचनानिर्वचनप्रसङ्गेन—"कलिश्च कलाश्च किरतेर्विकीर्णमात्रा"। "कॄ विक्षेपे (तु० प०)"—इत्यस्य, कलौ वचांसि परस्परं विक्षिप्यन्ते, कला अपि विक्षिप्ता भवन्ति कुतश्चित् समुदायादिति ॥ १२ ॥

इति ऋज्वर्थाया निरुक्तवृत्तौ षोडशस्य (एकादशस्य) अध्यायस्य प्रथम. पादः ॥ ११ । १ ॥

द्वितीयः पाद ॥

अथातो मध्यस्थाना देवगणास्तेषां मरुतः प्रथमागामिनो भवन्ति मरुतो मितराविणो वा मितरोचिनो वा महद् द्रवन्तीति वा तेषा-मेषा भवति ॥ १ (१३) ॥

"अथातो मध्यस्थाना देवगणाः"। अथातःशब्दावुक्तार्थौ, तयो पुनरुपन्यासो बहुवचनविशिष्टोऽयमपरोऽधिकार. इति, मध्यस्थाना देवगणा इतीदमपि प्रसिद्धमेव ॥

"तेषां" "मरुत" "प्रथमागामिनः भवन्ति"। कस्मात्? वायुरेव हि भेदेनापेक्ष्यमाणो मरुदभिधानो बहुवचनभाग्

भवति। तेषां प्राथम्यं वायुना व्याख्यातम्, एतावांस्तु विशेषः—बहुसाध्ये कर्मणि बहुधा मध्यमो भवति, पृथक्त्वेन तु विज्ञाता मरुतः शुक्रज्योतिश्च चित्रज्योतिश्चेत्येवमादयः, सप्तसप्तका देवगणाः मारुतेषु गणेषु सप्तकपालेषु, अग्नौ पुराणे चैत एव प्रसिद्धाः, सप्तधा पुत्रत्वमिनारिणः मारीचात् कश्यपाददित्यां ये जज्ञिरे। नैरुक्तसमयस्तु सर्व एव गणा मरुतः। उक्तं च वार्त्तिके—"मध्यमा वाक् स्त्रियः सर्वाः, पुमान् सर्वश्च मध्यमः। गणाश्च सर्वे मरुतो गणभेदाः पृथक्कृताः॥"—इति॥

अथ "मरुतः" कस्मात्? "मितराविणो वा" मितं नाम सुश्लिष्टम्, यथा तेषां योग्य रवितुं तथा रुवन्ति स्तनयन्ति। अथवा "मितरोचिनः" तथैव सुश्लिष्टं रोचन्ते। "अमितराविणः"—इति केचिदिच्छन्ति,—"मरुतोऽमितराविणः"—इति समानसंहितत्वात् भाष्यस्य, तेषां बहुप्रकारं च ते रुवन्तीत्यर्थः। "अमितरोचिनः"—इत्यत्राप्येवमेव। "महद् द्रवन्ति—इति वा"। इह शब्दमहत्ताभिप्रेता, पूर्वत्र बाहुल्यं बहुप्रकारता च॥

"तेषाम् एषा भवति"—॥ १ (१३)॥

आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्यात ऋष्टिमद्भिरश्वपर्णैः। आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः॥ विद्युन्मद्भिर्मरुतः स्वर्कैः स्वञ्चनैरिति वा स्वर्चनैरिति वा स्वर्चिर्भिरिति वा रथैरायात ऋष्टिमद्भिरश्वपर्णैरश्वपतनैर्वर्षिष्ठेन च नोऽन्नेन वय इवापतत सुमा-

या: कल्याणकर्माणो वा कल्याणप्रज्ञा वा रुद्रा व्याख्यातास्तेषामेषा भवति ॥ २ (१४) ॥

"आ विद्युन्मद्भि."—इति (ऋ० सं० १,६,१४,१)। गोतमस्यार्षम्। आस्तारपङ्क्तिः। 'हे मरुतः!' 'आयात' यूयम्। केन? कीदृशेन वा? 'विद्युन्मद्भि.' विद्योतन विद्युत्, विद्युद्दोसियुक्तै। 'स्वर्कै रथेभि' रहणे मेघे "स्वर्चने" सुगमने, यद्वा "स्वर्चने" शोभनमर्चनं येषां ते, सुष्ठु पूजितै, अथवा "स्वर्चिभि" अनुपरतविद्युत्सम्पातै.। 'ऋष्टिमद्भि' रेषणवद्भि, वनाकालस्य नाशनै। पृथक्—विद्युन्मद्भिरिव ऋष्टिमद्भि आयुधोपेतै अश्वपतनै आप्नुवन्तो ये अन्तरिक्षे मेघा. पतन्ति, पृथक् सम समेता अश्वयुग्भिरिति। अपि च किमेवमेव यथाकथञ्चिदागच्छतेत्यागमनमात्रे वयमर्थिन? न—इत्युच्यते—"आ वर्षिष्ठया०—०सुमाया"। हे 'सुमाया' सुकर्माणः। सुप्रज्ञा.। वा 'आपप्तत' "आपतत" आगच्छतेत्यर्थं। कथम्? 'वर्षिष्ठया' 'इषा' "अन्नेन" अस्मदर्देयेन सयुक्ताः। किं शनकै आपतत? न—इत्युच्यते—'वय न' "वय इव" पक्षिण इव शीघ्रमापतत।—इत्येतदाशास्महे।

"रुद्रा" "व्याख्याता"। "तेषाम् एषा भवति"—॥ २ (१४)॥

आ रुद्रास इन्द्रवन्तः सजोषसो हिरण्यरथाः सुविताय गन्तन। इयं वो अस्मत्प्रति हर्यते मतिस्तृष्णजे न दिव उत्सा उदन्यवे॥ आगच्छत रुद्रा इन्द्रेण सहजोषणाः सुविताय कर्मण इयं वो अस्मदपि प्रतिकामयते मतिस्तृ-

तृष्णज इव दिव उत्सा उदन्यवे इति तृष्णक् तृष्यतेरुदन्युरुदन्यतेर्ऋभव उरु भान्तीति वर्त्तेन भान्तीति वर्त्तेन भवन्तीति वा तेषामेषा भवति ॥ ३ (१५) ॥

“आ रुद्रास इन्द्रवन्तः”—इति (ऋ० सं० ४, ३, २१, १)। श्यावाश्वस्यार्षम्। जगती। आग्निमारुते शस्यते। हे ‘रुद्राः!’ आगच्छत यूयम्। ‘इन्द्रवन्तः’ “इदि परमैश्वर्ये (भ्वा० प०)”। ‘सजोषसः’ परमैश्वर्येण नित्यमासेविताः, पृथक्पक्षे तूपपद्यत एव इन्द्रेण सह प्रीयमाणा इति। ‘हिरण्यरथाः’ उदकहरणार्थे रंहणाः, पृथक्पक्षे तु हिरण्यविकृतरथाः। ‘सुविताय’ तस्मै “कर्मणे” सुष्ठु सगुणाय, यथाशास्त्रं क्रियमाणाय प्राप्त्यर्थम्। किमिति आगच्छत? ‘वः’ युष्मान् ‘इयम्’ ‘अस्मत्’-मतिः ‘प्रतिहर्यति’ “प्रतिकामयते” युष्मद्विनाकृतमिदं कर्म गुणवदप्येतैरङ्गैर्मा भूद् विगुणमित्येवमर्थं प्रतिहर्यते। अपि च हविः पूर्वं देवताः प्रेप्सन्ति ब्राह्मणा इवोपनिमन्त्रणम्, ततो यजमानः संस्कृते हविषि तदव्यापत्तये यागकालानतिक्रमणाय चान्नपतिरिवान्ने संस्कृते तदव्यापत्तये भोजनकालानतिक्रमणाय च देवताः प्रतिप्रेप्सति। विज्ञायते हि—“देवता वै सर्वा आशंसन्ति यज्ञे गृह्यमाणे मह्यं गृह्णाति”—इति, अत इदमुक्तम्—“इयं वो अस्मत्प्रतिहर्यते मतिः” इति। कथं पुनः प्रतिहर्यते? ‘तृष्णजे न’ “तृष्णज इव” तृडुपजायते यस्मिन् विशेषतः काले, स तृडुपजः कालो घर्मान्तः, तस्मिन् यथा। ‘दिवः उत्साः’ द्युलोकात् उत्साः, उत्सप्रभवा मेध्या आपः। ‘उदन्यवे’ उदकमिच्छते लोकाय आगच्छन्ति प्रावृषि

तथाक्रमत्या प्रतिहर्यमाणा आगच्छतीति। उदगुवातत इति केचित्। तस्य प्रेषती यथा दिव उत्रा मेघा आगच्छन्ति, तथाक्रमागच्छतीति, एवं तेषां योजना ॥

"ऋभवः" कस्मात्? "उरु भान्ति—इति वा" ते हि बहु भान्ति दीप्यन्ते, उरुशब्दात् पूर्वपदम्, भातेरुत्तरपदम्। "ऋतेन भान्ति—इति वा" यज्ञेन सत्येन वा भान्ति, तदेवोत्तरपदम्, पूर्वपदे विकल्पः। "ऋतेन भवन्ति—इति वा" भवतेर्वोत्तरपदम्, ते हि ऋतेन सत्येन वा भवन्ति, यज्ञेन वा भवन्ति, भूत्वा देवत्वेन सर्वे युज्यन्ते ॥

"तेषाम् एषा भवति"—॥ ३ (१५) ॥

विष्ट्वी शमी॑ तरणि॒त्वेन॑ वा॒घतो॒ मर्ता॑सः॒ सन्तो॑ अमृत॒त्वमा॑नशुः। सौ॒ध॒न्व॒ना ऋ॒भवः॒ सूर॑चक्षसः संवत्स॒रे सम॑पृच्यन्त धी॒तिभिः॑ ॥

कृत्वा कर्माणि क्षिप्रत्वेन वोढारो मेधाविनो वा मर्त्तासः सन्तो अमृतत्वमानशिरे सौधन्वना ऋभवः सूरख्याना वा सूरप्रज्ञा वा संवत्सरे समपृच्यन्त धीतिभिः कर्मभिर्ऋभुर्विभ्वा वाज इति सुधन्वन आङ्गिरसस्य त्रयः पुत्रा बभूवुस्तेषां प्रथमोत्तमाभ्यां बहुवन्निगमा भवन्ति न मध्यमेन तदेतदृभोश्च बहुवचनेन चमसस्य च संस्तवेन बहूनि दशतयीषु सूक्तानि भवन्त्यादित्यरश्मयोऽप्यृभव उच्यन्ते। अगोह्यस्य

बहुवचनेन चमसस्य च संस्तवेन बहूनि दशतयीषु सूक्तानि भवन्ति"। तद्यथा—

"इदं तृतीयं सवनं कनीनामृतेन ये चमसमैरयन्त"—इति॥

"आदित्यरश्मयोऽप्यृभव उच्यन्ते"—इति। अभिधयव्यभिचारमुपप्रदर्शयति। क्व च पुनस्ते उच्यन्ते? यतः पठति—"अगोह्यस्य यदसस्तना"—इति। "उद्वत्स्वस्मा अकृणोतना तृणं निवत्स्वपः स्वपस्यया नरः॥"—इति (ऋ० सं० २, ३, ६, १)। दीर्घतमस आर्षम्। जगती। 'उद्वत्सु' ये उन्नताः प्रदेशाः भुवः अद्भिरनाक्रान्ताः, तेषु 'अस्मै' लोकाय उपकारिष्यन्तो यूयम् ऋभवः 'अकृणोतन' प्रतिसंवत्सरं कुरुध्वे। तृणकुशादिवर्षणादित्यमण्डलादौ वर्तमानाः। 'निवत्सु' पुनर्निम्नेषु भुवः प्रदेशेषु 'अपः' उदकं कुरुध्वे। 'स्वपस्यया' लोकानुग्रहप्रवृत्तया वर्षक्रियया हे 'नरः!'। किञ्च, 'अगोह्यस्य' योऽयम् "अगोह्यः= आदित्यः, अगूहनीयः" न गूहितुं शक्यः केनचिदपि, "यस्य" 'यदसस्तना गृहे' यावदस्य मण्डले सुप्ता इव निगूढा भवथ। "तद्द्येदमृभवो नानुगच्छथ"। हे ऋभवः! "यावत् तत्र" निगूढा "भवथ" रात्रौ, न तावदिह "भवथ" ततश्च युष्मद्विनाभावे निरालोकोऽयं लोकः सम्पद्यते। एतद् वो माहाभाग्यमहमनुकीर्त्तयामि, ते यूयमिदं नामाख्यातं कुरुतेति॥

"अङ्गिरसः" "व्याख्याताः" एकवचनेन, "अङ्गारेष्वङ्गिराः" —इति॥

"तेषाम् एषा भवति"—॥ ४ (१६)॥

विरूपास इदृषयस्त इद्गम्भीरवेपसः। ते

अङ्गि॑रसः सूनव॒स्ते अ॒ग्नेः परि॑जज्ञिरे ॥ बहु-रूपा ऋषयस्ते गम्भीरकर्माणो वा गम्भीरप्रज्ञा वा ते अङ्गिरसः पुत्रास्ते अग्नेरधिजज्ञिर इत्यग्निजन्म पितरो॑ व्याख्याता॒स्तेषा॑मे॒षा भवति ॥ ५ (१७) ॥

"विरू॑पास॒—इति (ऋ० सं० ८, २, १, ५)। नाभानेदिष्टस्यार्षम्। अनुष्टुप्। षाष्ठिके षष्ठेऽहनि विनियोगः। 'विरूपा.' नानारूपाः। के पुनस्ते ? इति—ऋषयः' अवितथस्य ब्रह्मणो द्रष्टारः। न केवलं पश्यन्ति, अपि च 'गम्भीरवेपस.' अप्रमेयकर्माण', अप्रमेयबुद्धयो वा। ऋष्यनेकत्वे कतमास्ते ? इति—"ते अङ्गिरसः सूनव." येऽङ्गिरसः सुनवस्त एते विवचिताः। कदा पुनस्ते अङ्गिरसो जज्ञिरे ? अत आह —"ते अ॒ग्नेः परि॑जज्ञिरे"—इति। अग्नित्वमापन्नस्याङ्गिरसोऽधि सकाशात् ये जज्ञिरे। ते एते विरूपाः गम्भीरवेपसश्च ममेद नाम कुर्वन्त्विति ॥

"पितरः" "व्याख्याताः" "द्यौर्मे पिता"—इत्यत्र ॥

"तेषाम् एषा भवति"—॥ ५ (१७) ॥

उदी॑रता॒मव॑र॒ उत्परा॑स॒ उन्म॑ध्य॒माः पि॒तरः॑ सो॒म्यासः॑। असुं॒ य ई॒युर॑वृ॒का ऋ॑त॒ज्ञास्ते नो॑ऽवन्तु पि॒तरो॒ हवे॑षु ॥ उदीरतामवर उदीरतां पर उदीरतां मध्यमाः पितरः सोम्याः सोमसम्पादिनस्तेऽसुं ये प्राणमन्वीयुरवृका अनमित्राः सत्यज्ञा वा यज्ञज्ञा वा ते

न आगच्छन्तु पितरो ह्वानेषु माध्यमिको यम इत्याहुस्तस्मान्माध्यमिकान् पितॄन्मन्यन्तेऽङ्गिरसो व्याख्याताः पितरो व्याख्याता भृगवो व्याख्याता अथर्वाणोऽथनवन्तस्सर्वतिश्चरतिकर्मा तत्प्रतिषेधस्तेषामेषा साधारणा भवति ॥ ६ (१८) ॥

[1] "उदीरतामवर"—इति (ऋ० सं० ७, ६, १७, १। य० वा० स० १८, ४८)। ग्रहस्यार्षम्। पितृमेधे विनियोग। ये तावत् 'अवरे' 'पितरः' पृथिवीमाश्रिता, ते तावत् 'उदीरताम्' ऊर्ध्वं गच्छन्तु। अथ पुनर्ये 'परासः' "परे" द्युलोकमाश्रिता, तेऽप्युदीरताम्, तेषामप्यप्रच्युतिरस्तु, मुच्यन्तां वा तदधिकारप्रचये। 'उन्मध्यमाः' पितरो येऽपि 'मध्यमाः' मध्यस्थानाश्रया, तेऽप्युदीरताम् उत्तमं लोकमाश्रयताम्। 'सोम्यास' "सोमसम्पादिन" कर्मण्यङ्गभावमुपगच्छन्तो ये सोम सम्पादयन्ति। किम्प्रकारा ? 'असुं य ईयु.' प्राणमात्रमूर्त्तयः, अस्थूलविग्रहा.। 'अवृका' "अनमित्रा." पर साम्यमुपगता। 'ऋतज्ञा' यथावत् सत्यवेदितार', यज्ञस्य वा। य एवमादिगुणयुक्ता. 'पितर.' ते 'न.' अस्माकम् 'अवन्तु' नित्यम् "आगच्छन्तु" 'हवेषु' आ"ह्वानेषु"।—इत्येतदाशास्महे।

[2] "माध्यमिको यम इत्याहु." नैरुक्ताः। "तस्मात् पितॄन् माध्यमिकान् मन्यन्ते" स हि तेषां राजेति। पुन उत्तरे "अथर्वाण (१३)" "भृगव (१४)"— इत्येते पद समाम्नाते न चैतयो, समस्तयोः प्रत्येकं वा

स्तुतिरस्ति, अस्ति तु पितृङ्गिरोभृगुभिः' साधारणस्तुति'।
यतस्तदृङ्निर्वचनाय प्रसङ्गमाणानभिप्रेत्याथर्वशब्दनिर्वचनप्र-
सङ्गात् ब्रवीति—"अङ्गिरस." "व्याख्याता." (३१२ पृ०),
येऽस्या मृचि वक्ष्यमाणायाम्,—"पितरः" "व्याख्याताः"
(३१३ पृ०),—"भृगव." "व्याख्याताः" ॥

"अथर्वाण." कस्मात् ? ते ह्येते "थर्वनवन्त." किमिदमथ-
नम्, येन ते तद्वन्तः ? अत आह—"थर्वति चरतिकर्मा"
गत्यर्थः । ततः किम् ? "तत्प्रतिषेध." पुरस्तादकारः,—
न थर्वन्ति—इति अथर्वाणः, स्थिरप्रकृतयो हि ते ॥

"तेषाम् एषा साधारणा भवति"—अङ्गिर.प्रभृतीनाम्
॥ ६ (१८) ॥

अङ्गि॑रसो नः पि॒तरो॒ नव॑ग्वा॒ अथ॑र्वाणो॒ भृग॑वः सो॒म्यासः॑। तेषां॑ व॒यं सु॑म॒तौ य॒ज्ञियाना॒-मपि॑ भ॒द्रे सौ॑मन॒से स्या॑म ॥ अङ्गिरसो नः पितरो नवगतयो नवनीतगतयो वाथर्वाणो भृगवः सोम्याः सोमसम्पादिनस्तेषां वयं सुमतौ कल्याण्यां मतौ यज्ञियानामपि चैषां भद्रे भन्दनीये भाजनवति वा कल्याणे मनसि स्या-मेति माध्यमिको देवगण इति नैरुक्ताः पितर इत्याख्यानमथाप्युपर्यं स्तूयन्ते ॥ ७ (१९) ॥

"अङ्गिरसो नः पितर."—इति (ऋ० सं० ७, ६, १५, १ ।
य० वा० सं० १६, ५०) । यमस्यार्षम् । त्रिष्टुप् । "अङ्गिरसः'
"न ' अस्माकम् 'सोम्यासः' "सोमसम्पादिन." मित्यं 'सुमतौ'

"कल्याण्यां मतौ" वर्त्तन्ते। 'पितरः' च 'नवग्वाः' "नवगतयः" पितृयज्ञानागन्तुं येषां प्रतिमासं नवा गतिर्भवति, "नवनीतगतयो वा" नवनीतं प्रति येषां मनसो गतिरिदमस्माकमिति, ते नवग्वाः। विज्ञायते हि—"स्वयं विलीनं पितृणाम्" इति। पितरश्चैवंलक्षणाः—'अथर्वाणः' च 'भृगवः' च, य एते "सोमसम्पादिनः" अस्माकं "कल्याण्यां मतौ" "वयम्" अपि तेषां 'सुमतौ' "कल्याण्यां मतौ" उपकारप्रवृत्तायाम्, 'यज्ञियानाम्' यज्ञसम्पादिनाम् 'स्याम'। अपि च तेषां 'भद्रे' "भन्दनीये" स्तुत्ये 'सौमनसे' "कल्याणे मनसि" 'स्याम'। "भाजनवति" वा, येन मनसा भाजयन्ति अभिमतैरर्थैः स्तोतॄन्। तस्मिन् शोभने च सङ्कल्पे शोभने वा अध्यवसाये स्याम इत्यर्थः॥

"माध्यमिको देवगणः—इति नैरुक्ताः"। ऋभवः, अङ्गिरसः, भृगवः, अथर्वाणः—इति, स्तुत्युपपत्तेः, देवतापदमध्ये समाम्नानादेकैकश एषां देवगण इति नैरुक्ता मन्यन्ते। "पितर इत्याख्यानम्"। को विशेषः? अग्न्यादिदेवतापदविपर्ययसमाम्नातदेवताप्रकार एवायं य एते पितरो नामत एव ऋभुममतकमारादयः इत्याख्यानविदः आहुः। अमावपि मन्त्राणां विषय इत्युपेक्ष्यः। अपि च देवगणा एते उत पितरः? इति। कुतो विचारः? ऋभवः, अङ्गिरसः, भृगवः—इत्येवमादीनामभिधानानामृषिषु प्रसिद्धेः। "अथापि" इदमपरं कारणमपर एवेत इति,—यतोऽन्येऽपि "ऋषयः स्तूयन्ते"। तद्यथा—वसिष्ठाः॥७(१८)॥

सूर्य्यस्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः। वातस्येव प्रजवो नान्येन

स्तोमो वसिष्ठा अन्वे॑तवे वः ॥ इति यथा आप्नोतेस्तेषामेष निपातो भवत्यैन्द्र्याम्‌चि ॥ ८ (२०) ॥

"सूर्यस्येव वक्षथ"—इति (ऋ० सं० ५, ३, २२, २)। इन्द्र स्यार्षम्। 'सूर्यस्येव ज्योतिः' यथा सूर्यस्य दीप्तिरवभासिकार्थानाम्, एवम् 'एषाम' वसिष्ठाना 'वक्षथ' वचनस्य दीप्ति अधिदैवादिगतानामर्थानामसन्देहेनावभासिका वाच्येऽर्थे। अपि च न केवलमेषामसन्दिग्धार्थानि वचांसि,—गम्भीराणि च, महार्थवन्ति गम्भीरार्थतया दुरवगाहानि। यत आह—"समुद्रस्येव महिमा गभीरः"। यथा उदकमपरिमेय समुद्रे, एव मपरिमेयार्थानि। सत्यपि च सद्धार्थत्वे नैते विलम्बितस्तुतय, किन्तर्हि? "वातस्येव प्रजवः"। प्रकृष्टो जव आशुप्रतिपत्तितद्रूपता वर्णपदवाक्येषु निर्मलमनोवाग्वृत्ती शब्दार्थविषयेन प्रतिपद्यते। अपि चैवमतिमहानुभावा एते, नैतेषामन्य स्तोता वचनपदवीमनुगन्तु शक्तः। यतो ब्रवीमि—'नान्येन, केनचित् स्तोत्रा हे 'वसिष्ठा'। प्रत्यक्षोक्त्योत्तरेण पादेन ब्रवीति—एष 'स्तोमः' इय स्तुति, भावती, असन्दिग्धार्था, गम्भीरा, अविलम्बिता च। 'न अन्येन अन्वेतवे' नानुगन्तु मन्येन शक्या, क एनामनुकरिष्यतीति स्तुतिपरितुष्ट इन्द्रो वसिष्ठानस्तौत् ॥

एवम्प्रयोऽपि सूक्ते इति प्रदर्शनमप्यस्तीति सन्त्यणा विषय इति ॥

अपरे पुन—"सूर्यस्येव वक्षथ"। सूर्यतेजःसमान दीप्तेरस एते वसिष्ठाः तेजस्विन, समुद्रोपमगम्भीरस्वभावाश्,

गीघ्रगतयश्च, सर्वत्राप्रतिहतजवाः, नैतेषामन्येन गतिरनुगन्तुं शक्येति वर्णयन्ति ॥

"आस्याः" अपीन्द्रसहचारिण ऋषयः, एकतद्वितत्रिताः, ते इन्द्रेण सह चेरुरिति विज्ञायते। ऋभ्वादयोऽप्येतस्मादेव दर्शनादृषिपक्षे मध्यस्थानाः। ते कस्मात्? "आप्नोतेः" आप्नुवन्ति हि ते स्तुतिभिः स्तुत्यान् ॥

"तेषाम् एष निपातः भवति ऐन्द्राम् ऋचि" इन्द्रो यस्यां स्तूयते, तस्यामृचि—॥ ८ (२०) ॥

स्तुषेय्यं पुरुवर्पसमृभ्वमिनतममाप्त्यमाप्त्यानाम्। आ दर्षते शवसा सप्त दानून् प्रसाक्षते प्रतिमानानि भूरि ॥ स्तोतव्यं बहुरूपमुरुभूतमीश्वरतममाप्तव्यमाप्तव्यानामादृणाति यः शवसा बलेन सप्त दातूनिति वा सप्त दानवानिति वा प्रसाक्षते प्रतिमानानि बहूनि साक्षतिराप्नोतिकर्मा ॥ ९ (२१) ॥

इति एकादशाध्यायस्य द्वितीयः पादः ॥११, २॥

"स्तुषेय्यं पुरुवर्पसम्"—इति (ऋ० सं० ८, ७, २, १)। बृहद्दिवस्यार्षम्। महाव्रते विनियोग.। 'स्तुषेय्यम्' "स्तोतव्यम्" अहं स्तौमि इन्द्रम्। किंलक्षणम्? 'पुरुवर्पसम्' "बहुरूपम्" 'ऋभ्वम्' "उरुभूतम्" 'इनतमम्' "ईश्वरतमम्" 'आप्त्यम् आप्त्यानाम्' ऋषीणां स्तुतिभिः अतिशयेन "आप्तव्यम्" 'आदर्षते' "आदृणाति" यः 'शवसा' "बलेन" आदारयति। किम्? 'सप्त दानून्' "सप्त दातॄन्" मेघान्, असुरान् वा

"दानवान्" नमुचिप्रभृतीन्। पृथक्पक्षे—केन ? 'शवसा' बलेन आदारयति। 'प्रसाक्षते' च, य आप्नोति अभिभवति च 'प्रतिमानानि' 'भूरि' "बहूनि" अपि। तदुक्तम्—येरेन प्रतिमिमते,नैनं तानि दत्त्वन्वोति "न त्वा कैता आदभ्नुवन्ति भूर्णय."—इति च (ऋ० सं० १, ४, २०, २)।

"साक्षति: आप्नोतिकर्मा" ॥ ८ (२१) ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ षोडशस्य (एकादशस्य) अध्यायस्य द्वितीय पादः ॥ ११, २ ॥

तृतीयः पादः।

अथातो मध्यस्थाना: स्त्रियस्तासामदिति: प्रथमागामिनी भवत्यदितिर्व्याख्याता तस्या एषा भवति ॥ १ (२२) ॥

"अथ अत. मध्यस्थाना. स्त्रियः"। बहुवचनविशिष्टस्य मध्यमस्य गणशोऽवस्थितस्य विभवो व्याख्यात। लिङ्गविशिष्टस्येदानीं यथासमाम्नायमेव व्याख्यातव्य, तदर्थं पुनर्विशेषतोऽधिकारवचनम् 'अथात.'—इति। मध्यमासा स्थानमिति 'मध्यस्थाना'—इति। का पुन ता:? 'स्त्रियः' इति, वक्ष्यन्ते इति शेषः।

"तासाम् अदितिः प्रथमागामिनी भवति"। सा कस्मात्? उक्त हि—"अदीना देवमाता"—इति ॥

"तस्या एषा भवति"—॥ १ (२२) ॥

दक्षस्य वादिते जन्मनि व्रते राजाना मित्रा-वरुणा विवाससि। अतूर्तपन्था: पुरुरथो

अर्यमा सप्तहोता विषुरूपेषु जन्मसु ॥ दक्षस्य वादिते जन्मनि व्रते कर्मणि राजानौ मित्रावरुणौ परिचरसि विवासतिः परिचर्यायां हविष्मान् आविवासतीत्याशास्तेर्वाहृत्तपन्था अत्वरमाणपन्था बहुरथो अर्यमादित्योऽरीन्नियच्छति सप्तहोता सप्तास्मै रश्मयो रसानभिसन्नामयन्ति सप्तैनमृषयः स्तुवन्तीति वा विषमरूपेषु जन्मसु कर्मसूदयेष्वादित्यो दक्ष इत्याहुरादित्यमध्ये च स्तुतोऽदितिर्दाक्षायणी। अदितेर्दक्षो अजायत दक्षाद्वदितिः परीति च ॥ तत्कथमुपपद्येत समानजन्मानौ स्यातामित्यपि वा देवधर्मेणेतरेतरजन्मानौ स्यातामितरेतरप्रकृती अग्निरप्यदितिरुच्यते तस्यैषा भवति ॥ २ (२३) ॥

“दक्षस्य वादिते”—इति (ऋ० सं० ८, २, ५, ६)। गय आर्षम्। वैश्वदेवे शस्यते। अहोरात्रे मित्रावरुणौ, तयोर्या सन्धिवेला, तस्यां प्रथममवश्यायरसानुप्रदानसम्बन्धात्ता मध्यमामदितिमभिप्रेत्योच्यते।—“दक्षस्य वादिते”—इति। ‘वा’शब्दः किमर्थः ? यदा दक्ष आदित्य’, त्वत्तो जातः, त्वं वा आदित्यात्, सन्धिवेलानन्तरं ह्यादित्यस्योदयो जन्म, तदेवास्य व्रतकर्म। तदुक्तम्—“कर्मजन्मान” इति। अथ

तदेवं 'दक्षस्य' 'जन्मनि' उदये चाईवर्त्तिन्यादित्ये, यतो वा लुब्धाभिकालम्। अथवाहोरात्रे उभे 'विवाससि' परिचरसि, सर्वतो व्याप्नोषि, यद्देनाहर्व्याप्नोषि मित्रम्, अह्नेन च रात्रिं वरुणम्। 'राजानौ' सर्वलोकेश्वरौ, स्वाधिकारयुक्तास्विलिकर्त्तव्यतासु, तदधीनत्वात् प्रवृत्तेरिति। किंलक्षणो यो दक्षः तस्य जन्मनि ? इति, यत आह—'अतूर्त्तपन्थाः' योऽयमादित्यः "अत्वरमाणपन्थाः" अत्वरमाणः पथि वर्त्तते, नियतगतिः प्रतिमुहूर्त्तं प्रत्यहञ्च। 'पुरुरय.' बहुरहणः। 'अर्य्यमा' अरीणान्तमसान्नियन्ता। 'सप्तहोता' "सप्तास्ये रश्मयः रसानभिसन्नामयन्ति" तदस्य सप्तहोतृत्वम्, "सप्तैनमृषय आह्वयन्ति" नमन्ति,—स्तुवन्ति वसिष्ठाद्याः, तद्वास्य सप्तहोतृत्वम्। 'विपुरूपेषु जन्मसु' "विषमरूपेषु" अन्यस्मिन्नन्यस्मिंश्च नभसः प्रदेशे अयमुदेति, मण्डलान्तर मण्डलान्तरं हित्वा दक्षिणोत्तरायणयोस्तदस्य विषमरूपत्वं विषमजन्मता ततो लब्धालिका तं वा जनयन्ती। या त्वमेतौ मित्रावरुणौ परिचरसि, सा त्वमिदं नामास्माकं कुरुष्वेत्येतदाशास्महे।—इति समस्तार्थः॥

अथवा 'दक्षस्य वा' यदा दक्षस्त्वत्तो जातः, 'क्रतौ' च 'कर्मणि' प्रवृत्तः। स्वाधिकारयुक्तोऽयम् 'अतूर्त्तपन्थाः' "पुरुरयो'०—०जन्मसु"। य एष वर्त्तते भगवानादित्यः। अथ तदा मित्रावरुणौ विवासस्याप्नासे।—ममैतावपि पुत्रत्वे लोकोपकारित्वेन सम्यग्वर्त्तयातां यथैव दक्ष इत्यैतिहासिकपक्षे योजना॥

"विवासतिः परिचर्य्यायाम्"—इत्यत्र निगमः।—"हुविष्मान् आविवासति"—इति (ऋ० सं० १, १, २३, ३)॥

"यो अग्निं देववीतये हविष्मान् आविवासति। तस्मै

पावकमृडय।" (ऋ० सं० १, १, २३, ३)। मेधातिथेरार्षम्। गार्हपत्यानुगमने पूर्णाहुतिरनया हूयते। हे 'पावक!' अग्ने। 'देववीतये' देवभोजनाय 'हविष्मान्' हविःप्रयुक्तो यस्त्वाम् 'आविवासति' परिचरति, तस्मै 'मृडय' उपदयां रक्षां कुर्वित्यतदाशास्महे॥

"आदित्यो दक्ष इत्याहुः" देवतामतत्त्वविदः। केन दर्शनेन? "आदित्यमध्ये च स्तुत."। चशब्दो हेत्वर्थः, यस्मादादित्यमध्ये स्तुतः, स्तुतिप्रामाणिका हि ते देवतामतत्त्वचिन्तां प्रति। कथमादित्यमध्ये स्तुतः? इति "इमा गिरः"—इत्युपक्रम्य ब्रवीति (ऋ० सं० २, ७, ६, १)।—"तुविजातो वरुणो दक्षो अंशः"—इति आदित्यमध्ये स्तुतिः आदित्य एवासौ इति॥

यद्येवं नन्विदमपरं विरुध्यते—यदेतिहासिका आहुः "अदितिर्दाक्षायणी"—इति। उभयमपि चैतस्मिन्निगमे श्रूयते—आदित्यो दक्षो दाक्षायण्यदितिरिति। तद्यथा—"अदितेर्दक्षो अजायत दक्षाद्वदितिः परि। भूर्जज्ञ उत्तानपदो भुव आशा अजायन्त"—इति (ऋ० सं० ८, ३, १, ४)। अदितेर्दाक्षायण्या आर्षम्। उत्तानपाद्राजा कश्चिद् यः पुराणेऽपि स्मर्यते, ततस्तावद् नाम कश्चिज्जज्ञे। ततोऽपि 'भुव' 'आशाः' दिशः 'अजायन्त' दिक्प्रजननभावमसौ कथमपि बिभर्त्ति, देवताजन्मप्रतिक्रियया वा। 'अदितेर्दक्षः' 'अजायत' प्रादुर्बभूव। 'दक्षात्' 'उ' च 'परि' अधि सकाशात् 'अदितिः' प्रादुर्बभूव॥

"तत्" इतरेतरविरुद्धं "कथमुपपद्येत"? अत प्रतिसमाधानं ब्रवीति—"समानजन्मानौ स्यातामिति"। समनन्तरजन्मानौ समानजन्मानौ यथोपवर्णितं मन्त्रे "दक्षस्य आदिते"—इत्यत्र। "अपि वा देवधर्मेण" महदात्मना

अदितिमपेक्ष्य तस्याः कारणत्वं च कार्यत्वं च दक्षस्य, अथवा महदात्मना दक्षमपेक्ष्यादितेः कार्यत्वम्। एव कर्त्तोक्तम्—"इतरेतरजन्मानौ"—"इतरेतरप्रकृती" इति ॥

अधुना व्यभिचारं दर्शयति—"अग्निरप्यदितिरुच्यते"—इति। "तस्य" अग्नेरदितिशब्दवाच्यत्वे "एषा भवति"— ॥ २ (२३) ॥

यस्मै त्वं सुद्रविणो ददाशोऽनागास्त्वमदिते सर्वताता । यम्भद्रेण शवसा चोदयासि प्रजावता राधसा ते स्याम ॥ यस्मै त्वं सुद्रविणो ददास्यनागास्त्वमनपराधत्वमदिते सर्वासु कर्मततिष्वाग आङ्पूर्वाद्गमेरेन एतेः किल्बिषं किल्भिदं सुकृतकर्मणो भयं कीर्त्तिमस्य भिनत्तीति वार्यं भद्रेण शवसा बलेन चोदयसि प्रजावता च राधसा धनेन ते वयमिह स्यामेति सरमा सरणात्तस्या एषा भवति ॥ ३ (२४) ॥

"यस्मै त्वं सुद्रविण"—इति (ऋ० स० १, ६, २२, ५)। कुत्सस्यार्षम्। प्रातरनुवाके विनियोगः। हे 'सुद्रविणः' सुधन! 'अदिते!' अग्ने। 'यस्मै' 'त्वं' 'ददाशः' 'ददासि'। किम्? इति—'अनागास्त्वं' "अनपराध! त्वं" 'सर्वताता' "सर्वासु कर्मततिषु" इष्टिपशुसोमलक्षणासु अवैगुण्यं करोषि। 'यं' च 'भद्रेण' 'शवसा' 'बलेन' स्वजात्यविरोधिना, 'प्रजावता' च 'राधसा' प्रजासयुक्तेन च धनेन त्वं 'चोदयासि'

"चोदयसि" अनुगच्छसि। ते वयमेवानुगच्छामस्तव 'स्याम'।— इत्येतदाशास्महे॥

"आग. आङ्पूर्वाद्गमे." अवश्यमेवैतदागच्छति कर्तारमित्याग.। प्रसङ्गादाह—"एन: एते."। तदप्येवमेवावश्यमेवैति। यदेतत् "किल्बिषम्" एतत् "कीर्त्तिं भिनत्ति"॥

"सरमा" देवशुनीत्यैतिहासिकपक्षेण, माध्यमिका वाक् नैरुक्तपक्षेण, सा कस्मात्? "सरणात्" गमनात्। "तस्या एषा भवति"—॥ ३ (२४)॥

किमिच्छन्ती सरमा प्रेदमानड् दूरे ह्यध्वा जगुरिः पराचैः। कास्मेहितिः का परितक्म्यासीत् कथं रसाया अतरः पयांसि॥ किमिच्छन्ती सरमेदं प्रानड् दूरे ह्यध्वा जगुरिर्जङ्गम्यते: पराञ्चनैरञ्चित: का तेऽस्मास्वर्थहितिरासीत् किं परितकनं परितक्म्या रात्रि: परित एनां तक्म तक्मेत्युष्णनाम तकत इति सत: कथं रसाया अतर: पयांसीति रसा नदी रसते: शब्दकर्मण: कथं रसानि तान्युदकानीति वा देवशुनीन्द्रेण प्रहिता पणिभिरसुरै: समूद इत्याख्यानं सरस्वती व्याख्याता तस्या एषा भवति॥ ४ (२५)॥

"किमिच्छन्ती"—इति (ऋ० सं ८, ६, ५, १)। देव पणय: किलासुरा देवगवीरपजह्रु:। तत्र किलेन्द्रस्तदन्वे-

पणाय तदालयं सरमां प्राहिणोत्। ते च देवपणयः तां दृष्ट्वा पप्रच्छुरनयर्चा—"किमिच्छन्ती सरमा"—इति। 'इदम्' अस्मन्निवासस्थानं सरमा 'किमिच्छन्ती' किमस्मत्तः प्रार्थयन्ती 'प्रानट्' प्राप्तवती ? कदाचिदप्यनागतपूर्वेति। अपि च 'दूरे ह्यध्वा' महदेतदध्वानं न यदृच्छया प्रक्यमागन्तुम्, य एव 'जगुरि.' स्यात् भृशङ्गन्ता, स एव प्रक्त आगन्तुम्। 'पराचैः' "पराञ्चनैरचितः" पराङ्मुखैः अञ्चनैर्गमनैः अचितो गतः, विप्रकृष्टो देवनिवासात्। यतो ब्रूम—हे सरमे! 'कास्मेहितिः' "का तव अस्मास्वर्थहितिः" अर्थस्याभिधानम्? कोऽस्मत्तोऽर्थस्तव प्राप्तव्योऽभिप्रेत आसीद्? येनायमति महानध्वा व्यवसित आगन्तुम्। अपि च 'का परितक्म्यासीत्' "किं परितकनम्"? अपि नाम सुखा रात्रिः अनन्तरा तवासीत् "परितक्म्या रात्रि"। "तक्मेत्युष्णनाम" तकतेर्गत्यर्थस्य, सर्वतो हि तद् गत भवति। तदेनामुभयत परिगृह्य वर्त्तते इति परितक्म्या रात्रिः। अपि च "कुथ रसाया अतरः पयांसि"। "रसा" नाम "नदी" अध्यर्धयोजनविस्तारा, तस्याः पयास्यतिदुस्तराणि कथमतरः कथन्तीर्णवत्यसि? अथवा "कथ रसानि तान्युदकानि" अपि नाम स्वादूनि, अपि श्रान्तायास्तवान्तरावासा केप्यासन्निति॥

"देवशुनीन्द्रेण प्रहिता"—इति निदानप्रख्यापनं मन्त्रार्थाभिव्यक्तये। "समूदे" संवादं कृतवतीत्यर्थः। इत्याख्यानविद. एव मन्यन्ते॥

वाक्पक्षे तु चिरकालीनवृष्ट्युपरमे कदाचिदभिनवमेघसंप्लवे सहसैव स्तनयित्नुपश्चुत्य कुत इयं माध्यमिका वाक् चिरेणागतेति स्मितस्तामस्तुवन्निव ब्रवीति—"किमिच्छन्ती सरमा"—इति। इदमस्मच्छ्रोत्रं चिरमनागम्य

'सरमा' माध्यमिका वाक् 'किमिच्छन्ती' 'प्रानट्' प्राप्तवती ? अपि च 'दूरे हि अध्वा' चिरकालश्रुतैयमस्माभिः 'जगुरिः' भृशं यो गन्ता स्यात्, सचिरविच्छिन्न मेतद्दर्पवर्त्म पुनरागच्छेत्सन्त-नुयात् 'पराचैः' 'पराङ्मुखैः,—एतदचिन्त्य' चिरनष्टमित्यर्थः । अपि च 'कास्मे हितिः' किमस्यास्तथाभिधान मासीत् ? पूर्वन्तव हे सरमे । येनागमः, किं वा न जातं येनापुनरा-गम । अपि च चिरप्रोषितायास्तव किं परिसकनमासीत् ? अन्तरिचनद्या अपि महत्या 'रसायाः' 'कथमतरः पयांसि' कथ मतिबह्न्युदकानि सङ्क्षोभ्याक्रामं प्रतिलब्धवत्यसि ? इति वा, "वाग्वै सरमा"—इति हि विज्ञायते ॥

"सरस्वती" "व्याख्याता"—"नदीवत्"—इति,—"तद्-द्देवतावत्"—इत्युक्तमिदन्तत् । "तस्या एषा भवति"— ॥ ४ (२५) ॥

पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥ पावका नः सरस्वत्यन्नैरन्नवती यज्ञं वष्टु धियावसुः कर्म-वसुस्तस्या एषापरा भवति ॥ ५ (२६) ॥

"पावका नः सरस्वती"—इति (ऋ० सं० १, १, ६, ४ । य० वा० सं० २०, ८४) । मधुच्छन्दस आर्षम् । प्रउगे विनि-योगः, सारस्वते च हविषि 'पावका' प्रचारयन्त्युदर्केन । *का पुनरसौ ? इति—'सरस्वती' माध्यमिका वाक् । "वाजे-भिर्वाजिनीवती"*। अन्नेन, हविषोदकेन वा, तद्वती । 'यज्ञम्' एतमस्माकम्, 'वाजेभिः' "अन्नैः" युक्तं 'वष्टु' काम-यताम् । अथवा च्छगादिभावमापन्ना देवान् प्रति वहतु,

वक्ष्यति हि "तां विश्वरूपाः पशवो वदन्ति"—इति। 'धियावसुः' कर्मधना॥

"तस्या एषा अपरा भवति"—स्फुटतरोदकलिङ्गा॥ ५ (२६)॥

म॒हो अर्णः॒ सर॑स्वती॒ प्र चे॑तयति के॒तुना॑। धियो॒ विश्वा॒ वि रा॑जति॥ महदर्णः सरस्वती प्रचेतयति प्रज्ञापयति केतुना कर्मणा प्रज्ञया वेमानि च सर्वाणि प्रज्ञानान्यभि विराजति वागर्थेषु विधीयते तस्मान्माध्यमिकां वाचं मन्यन्ते वाग्व्याख्याता तस्या एषा भवति॥ ६ (२७)॥

"म॒हो अर्णः॒ सर॑स्वती"—इति (ऋ० स० १, १, ६, ६)। पूर्ववदार्षं विनियोगश्च। 'महो अर्णः' महदुदकं 'सरस्वती' माध्यमिका वाक्, किङ्करोति? 'प्र चेतयति' "प्रज्ञापयति" आविःकरोति वर्षभावेन। केन पुनराविःकरोति? 'केतुना' स्वेन "कर्मणा, प्रज्ञया वा" न ह्यप्रज्ञानवत्यबलिष्ठा चैतच्छक्ता कर्त्तुम्। एवं चोदकमाविःकुर्वती "धियो विश्वा वि राजति"। "सर्वाणि प्रज्ञानान्यभिविराजति"। कथम्? उदकादन्नम्, अन्नात्प्रज्ञानमित्येव सर्वप्रज्ञानानामसावीष्टे इति॥

"वाक् अर्थेषु विधीयते"—इत्युपपत्तिवचनम्। के पुनर्वाचोऽर्थाः? "चत्वारि॒ ऊर्जन्दुदुहे पयांसि"—इत्येवमादयः, उदकाधिकारलक्षणाः। तेष्वियमपि सरस्वती विधीयते "म॒हो अर्णः॒"—इत्येवमादिषु। "तस्मान्माध्यमिकां वाचं मन्यन्ते" नैरुक्ताः॥

'सरमा' माध्यमिका वाक् 'किमिच्छन्ती' 'प्रानट्' प्राप्तवती ? अपि च 'दूरे हि अध्वा' चिरकालस्रुतियमस्माभिः 'जगुरिः' भृशं यो गन्ता स्यात्, सचिरविच्छिन्न मेतदपर्वर्त्म पुनरागच्छेत्सन्तनुयात् 'पराचैः' 'पराङ्मुखैः',—एतदर्चिचन्द्र' चिरनष्टमित्यर्थः। अपि च 'कास्मे हितिः' किमस्याखर्थाभिधान मासीत्? पूर्वन्तव हे सरमे! येनागमः, किं वा न जातं येनापुनरागम। अपि च चिरप्रोषितायास्तव किं परितकनमासीत्? अन्तरिक्षनद्या अपि महत्या 'रसायाः' 'कथमतरः पयासि' कथ मतिबह्न्युदकानि सङ्क्षोभ्यात्मानं प्रतिलब्धवत्यसि? इति वा, "वाग्वै सरमा"—इति हि विज्ञायते॥

"सरस्वती" "व्याख्याता"—"नदीवत्"—इति,—"तद्देवतावत्"—इत्युक्तमिदन्तत्। "तस्या एषा भवति"— ॥ ४ (२५) ॥

पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः॥ पावका नः सरस्वत्यन्नैरन्नवती यज्ञं वष्टु धियावसुः कर्मवसुस्तस्या एषापरा भवति॥ ५ (२६) ॥

"पावका नः सरस्वती"—इति (ऋ० सं० १, १, ६, ४। य० वा० सं० २०, ८४)। मधुच्छन्दस आर्षम्। प्रउगे विनियोगः, सारस्वते च हविषि 'पावका' प्रचारयन्त्युदकेन। का पुनरसौ? इति—'सरस्वती' माध्यमिका वाक्। "वाजेभिर्वाजिनीवती"। अन्नेन, हविषोदकेन वा, तद्वती। 'यज्ञम्' एतमस्माकम्, 'वाजेभिः' "अन्नै" युक्तं 'वष्टु' कामयताम्। अथवा ऋगादिभावमापन्ना देवान् प्रति वहतु,

वक्ष्यति हि "तां विश्वरूपाः पृषवो वदन्ति"—इति।
'धियावसुः' कर्मधना ॥

"तस्या एषा अपरा भवति"—स्फुटतरोदकलिङ्गा ॥ ५ (२६) ॥

महो अर्णः सरस्वती प्र चेतयति केतुना। धियो विश्वा वि राजति ॥ महदर्णः सरस्वती प्रचेतयति प्रज्ञापयति केतुना कर्मणा प्रज्ञया वेमानि च सर्वाणि प्रज्ञानान्यभि विराजति वागर्थेषु विधीयते तस्मान्माध्यमिकां वाचं मन्यन्ते वाग्व्याख्याता तस्या एषा भवति ॥ ६ (२७) ॥

"महो अर्णः सरस्वती"—इति (ऋ० सं० १, १, ६, ६)। पूर्ववदार्थे विनियोगश्च। 'महो अर्णः' महदुदकं 'सरस्वती' माध्यमिका वाक्, किङ्करोति ? 'प्र चेतयति' "प्रज्ञापयति" आविःकरोति वर्षभावेन। केन पुनराविःकरोति ? 'केतुना' स्वेन "कर्मणा, प्रज्ञया वा" न ह्यप्रज्ञानवत्यबलिष्ठा चैतच्छक्ता कर्त्तुम्। एवं चोदकमाविःकुर्वती "धियो विश्वा वि राजति"। "सर्वाणि प्रज्ञानान्यभिविराजति"। कथम् ? उदकादन्नम्, अन्नात्प्रज्ञानमित्येव सर्वप्रज्ञानानामसावोष्ट इति॥

"वाक् अर्थेषु विधीयते"—इत्युपपत्तिवचनम्। के पुनर्वाचोऽर्थाः ? "चतस्र ऊर्मिन्दुदुह्रे पयांसि"—इत्येवमादयः, उदकाधिकारलक्षणाः। तेष्वियमपि सरस्वती विधीयते "महो अर्णः"—इत्येवमादिषु। "तस्मान्माध्यमिकां वाचं मन्यन्ते" नैरुक्ताः॥

"वाग्" वक्तव्या। सा पुन "व्याख्याता"—"वचे" इति ॥
"तस्या एषा भवति"—॥ ६ (२७) ॥

यद्वाग्वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा। चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदस्याः परमं जगाम ॥ यद्वाग्वदन्त्यविचेतनान्यविज्ञातानि राष्ट्री देवानां निषसाद मन्द्रा मदना चतस्रोऽनु दिश ऊर्जं दुदुहे पयांसि क्व स्विदस्याः परमं जगामेति यत् पृथिवीं गच्छ-तीति वा यदादित्यरश्मयो हरन्तीति वा तस्या एषापरा भवति ॥ ७ (२८) ॥

"यद्वाग्वदन्ति"—इति (ऋ॰ स॰ ६, ७, ५, ४)। नेमस्यार्षम्। सारस्वते पशौ विनियोग। यदा माध्यमिका 'वाग्वदन्ती' निर्वचयन्ती। कानि? 'अविचेतनानि' "अविज्ञातार्थानि" शब्दरूपाणि स्तनयित्नुलक्षणानि। 'राष्ट्री' ईश्वरा, माध्यमिकाना, देवतानाम्। 'निषसाद' निषीदति, व्याप्नुणोति आत्मान वर्षकर्मणि। 'मन्द्रा' "मदना" हर्षकरी, तर्पयित्री वा लोकस्य। अथ तदा किम्? इति—"चतस्र ऊर्जं दुदुहे पयांसि। 'चतस्र' दिश प्रत्यनुदिशश्च 'दुदुहे' दुग्धे, प्रक्षरति, —'ऊर्जम्' अन्न 'पयांसि' उदकानि। तेषा च पयसा—"क्व स्विदस्या' परम जगाम"। क्वैतानि निष्पाद्यौषधीर्गच्छन्ति? कुतो वा प्रतिसंवत्सर पुनरागच्छन्तीति? कस्तत्र 'जगाम' अजाम। यानि पृथिव्यामवतिष्ठन्ते, यानि चादित्यरश्मयो हरन्तीति। एवमनुपक्षीणपयस्तोयमिति श्रूयते॥

"तस्या एषा अपरा भवति"—। सा पुन किमर्थम् ? इयमेव वाक् सर्वप्राण्यन्तर्गता माध्यमिकी सर्वार्थाभिवादिनी भवतीति विभूत्युपप्रदर्शनार्थम् ॥ ७ (२८) ॥

दे॒वीं वाच॑मजनयन्त दे॒वास्तां वि॒श्वरू॑पाः प॒शवो॑ वदन्ति । सा नो॑ म॒न्द्रेष॒मूर्जं॒ दुहा॑ना धे॒नुर्वाग॒स्मानुप॒ सुष्टु॒तैतु॑ ॥ देवीं वाचमजनयन्त देवास्तां सर्वरूपाः पशवो वदन्ति व्यक्तवाचश्चाव्यक्तवाचश्च सा नो मदनान्नञ्च रसञ्च दुहाना धेनुर्वागस्मानुपैतु सुष्टुतानुमतो राकेति देवपत्न्याविति नैरुक्ताः पौर्णमास्याविति याज्ञिका या पूर्वा पौर्णमासी साऽनुमतिर्योत्तरा सा राकेति विज्ञायतेऽनुमतिरनुमननात्तस्या एषा भवति ॥ ८ (२९) ॥

"देवीं वाचमजनयन्त"—इति (ऋ० स० ६, ७, ५, ५)। तद्देवार्षम्। 'देवी' दावीमुदकानाम्, या वाचम् 'अजनयन्त' माध्यमिका 'देवा' 'ताम्' एवैता यथाभिमतार्था भिधायिका 'विश्वरूपा' "सर्वरूपाः" 'पशवो वदन्ति' तत् पूर्वकत्वाद्वाक्प्रवृत्तेः, "व्यक्तवाचश्चाव्यक्तवाचश्च" व्यक्तवाचा मनुष्यादयः, अव्यक्तवाचो गवादयः। यैवं सर्वपशुभिरुच्यते, 'सा नः' अस्माकं 'मन्द्रा' "मदना" 'इषम्' "अन्नं" पयोघृतादिरूपम्, "रसञ्च" 'ऊर्जञ्च' 'दुहाना' प्रक्षरन्ती। 'धेनुः' तर्पयित्री 'वाग्' 'अस्मानुपैतु' 'सुष्टुता' सुष्टु स्तुता।— एवं तदाम्नाये।

"अनुमति." "राका"—"इति देवपत्न्यौ इति नैरुक्ताः"। सद्यपदयोरुपन्यासस्तुल्योऽनयोरभिधेयविचार इति। मध्यस्थाने देवपत्न्याविति निर्वाते तदभिधाने इति नैरुक्ताः। "पौर्णमास्यौ—इति याज्ञिकाः"। ते च ब्राह्मणमुदाहरन्ति —"या पूर्वा पौर्णमासी"—इत्येवमादि। कालाधिदैवते चन्द्रमश्चचारिण्याविति मध्यस्थाने। पौर्णमास्यमावास्ययोर्नैचत्रे टकामध्य उपधानाद्यचत्वमतय दर्शनात् सर्व एवायं ज्योतिर्गणो ग्रहनक्षत्रतारकारूपो रसमायो मूर्त्तिमान्नम-ध्यस्थान एवेति लक्ष्यते॥

"अनुमति." "अनुमननात्"। अनुमता किलेय ऋषिभिर्देवैश्च चतुर्दशके पचे अस्त्वियं पौर्णमासीति॥

"तस्या एषा भवति"—॥ ८ (२८)॥

अन्विदनुमते त्वं मन्यासै शंच नस्कृधि।
क्रत्वे दक्षाय नो हिनु प्र ण आयूंषि तारिषः॥
अनुमन्यस्वानुमते त्वं सुखञ्च नः कुर्वन्नञ्च
नोऽपत्याय धेहि प्रवर्द्धय च न आयूंषि। राका रातेर्दानकर्मणस्तस्या एषा भवति॥ ६ (३०)॥

"अन्विदनुमते"—इति (य० वा० स० ३४, ८) । वामदेवस्यार्षम्। देविकासु विनियोगः हे 'अनुमते' 'त्वम्' 'अनुमन्यासै' 'अनुमन्यस्व' अस्माकम् यदनुमन्तव्यं त्वया। "अथ नस्कृधि, "सुखञ्च" अस्माकं "कुरु"। इयम् "अस्मद्धि" अस्माकं 'तोकाय' "अपत्याय" 'धेहि'। 'आयूंषि' च 'नः' 'प्रतारिषः' प्रतीर्णानि कुरु "प्रवर्द्धय"।—इत्येतदाशास्महे॥

८ सैव पौर्णमासी पञ्चदशके पक्षे "राका"—इत्युच्यते। सा पुनः कस्मात्? "रातेः दानकर्मणः" हविर्दाननिमित्तं हि सा भवति॥

"तस्या एषा भवति"—। ८ (३०)॥

राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतुत्मना। सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम्॥ राकामहं सुह्वानां सुष्टुत्याह्वये शृणोतु नः सुभगा बोधत्वात्मना सीव्यत्वपः प्रजननकर्म सूच्याच्छिद्यमानया सूची सीव्यतेर्ददातु वीरं शतमदमुक्थ्यं वक्तव्यप्रशंसं सिनीवाली कुहूरिति देवपत्न्याविति नैरुक्ता अमावास्ये इति याज्ञिका या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूरिति विज्ञायते सिनीवाली सिनमन्नं भवति सिनाति भूतानि वालं पर्व वृणोतेस्तस्मिन्नन्नवती वालिनी वा वालेनेवास्याम् अणुत्वाच्चन्द्रमाः सेवितव्यो भवतीति वा तस्या एषा भवति॥ १० (३१)॥

राकामहं सुहवाम्"—इति (ऋ० सं० २, ३, १०, ४)। गृत्समदस्यार्षम्। दैविकासु विनियोगः। 'राकाम्' 'अहं' 'सुहवा' "स्वाह्वानां" यस्याः शोभनमाह्वानं तां 'सुष्टुती,

"सुष्टुत्या" शोभनया स्तुत्या 'ह्वये' "आह्वये"। सा च पुनः 'सुभगा' सुधनाऽस्माभिराहूयमाना 'शृणोतु'। श्रुत्वा च 'बोधतु' कर्त्तव्यतया तदवगच्छतु, यदपि च न ब्रूमहे तदपि 'त्मना' "आत्मना" एव बुध्यताम्। अपि चेदसुच्यते— एवं 'सीव्यतु अपः सन्तनोतु "प्रजननकर्म" अस्माकं "सूच्याऽच्छिद्यमानया" अविच्छिन्नेन प्रजासन्तानेन। न च पुनः प्रजामात्रमर्थयामहे, किं तर्हि ? 'ददातु' 'वीरं' पुत्रम्। किंलक्षणम् ? 'शतदाय' "बहुमदम्" 'उक्थ्यम्' "वक्तव्यप्रशंसम्" अपरिसमाप्तस्तुतिम् ॥

"सिनीवाली" "कुहूः"—इति पूर्ववदुपन्यासः। "अमावास्ये—इति याज्ञिकाः"। तथैव ब्राह्मणमपि चोदाहरन्ति। —तथैव पूर्वा सिनीवाली उत्तरा कुहूः ॥

"सिनीवाली" कस्मात् ? "सिनमन्नं भवति"। तत् कस्मात् ? "सिनाति" बध्नाति "भूतानि" रसादिभिः धातुभिः। "वालम्" किमुच्यते ? "पर्व"। तत्कस्मात् ? "वृणोतेः" हरन्ति देवास्तत्र हवींषि। "तस्मिन्" पर्वणि, असौ सिनिनी "अन्नवती" इति सिनीवाली। अथ वोत्तरपदे विकल्पः।— "वालिनी" वालैस्तद्वती, सिनिनी च सा वालिनी चेति सिनीवाली। औपमिकं वा। कथम् ? इति—"वालेनेवास्यामणुत्वाच्चन्द्रमाः" "सेवितव्यः" बोद्धव्यो "भवति"। एवं मणुत्वो चन्द्रमा भवत्यस्या येन ज्ञायते, वालेनाप्यय सीयेत बोध्येतेति ॥

"तस्या एषा भवति"—॥ १० (११) ॥

सिनीवालि पृथुष्टुके या देवानामसि स्वसा। जुषस्व हव्यमाहुतं प्रजां देवि दिदि-

दृढि नः ॥ सिनीवालि पृथुजघने स्तुकस्त्यायतेः सङ्घातः पृथुकेशस्तुके पृथुष्टुते वा या त्वं देवानामसि स्वसा। स्वसा सु असा स्वेषु सीदतीति वा जुषस्व हव्यं सदनं प्रजाम्त्व देवि दिश नः कुहूर्गूहतेः क्वाभूदिति वा क्व सती हूयत इति वा क्वाहुतं हविर्जुहोतीति वा तस्या एषा भवति ॥ ११ (३२) ॥

"सिनीवालि पृथुष्टुके" इति (ऋ० सं० २, ७, १५, ६, य० वा० सं० ३४, १०, अथ० सं० ७, १०, २)। गृत्समदस्यार्षम्। देविकासु विनियोग। हे 'सिनीवालि' 'पृथुष्टुके' विस्तीर्णजघने, अथवा 'पृथुष्टुके' "पृथुकेशस्तुके" पृथुकेशकलापे, अथवा "पृथुष्टुते"। 'या' "त्व" 'देवाना' 'स्वसा' भगिनी माध्यमकानाम्। सा त्वम् आसिवस्व एतत् 'हव्यम्' 'आहुतम्' मर्य्यादया विधानतो हुतमस्माभिः। आसेव्य च "प्रजा देवि दिदिड्ढि नः" प्रजामस्माकं "दिश" अतिसृज, देहि इत्याशास्महे ॥

"कुहूः" "गूहतेः" निगूहत्यसौ चन्द्रमसम्। "क्वाभूत्? इति वा" तस्यामप्रत्यक्षत्वात् वितर्कयत्यन्द्रमा भवति क्वासावभूदस्येति। "क्व सती हूयते?—इति वा" सेवात्मना देवताभावादप्रत्यक्षान् आयते, क्वापि सत्याहूयते इति अत वितर्क्या भवति ॥

"तस्या एषा भवति"—॥ ११ (३२) ॥

कुहूमहं सुवृतं विद्मनापसमस्मिन्यज्ञे

सुहवां जोहवीमि। सा नो ददातु श्रवणं पितृणां तस्यै ते देवि हविषा विधेम॥ कुहू-महं सुकृतं विदितकर्माणमस्मिन् यज्ञे सुह्वाना-माह्वये सा नो ददातु श्रवणं पितृणां पित्र्यं धनमिति वा पित्र्यं यश इति वा तस्यै ते देवि हविषा विधेमेति व्याख्यातं यमी व्याख्याता तस्या एषा भवति॥ १२ (३३)॥

"कुहूमहं सुवृतम्"—इति (तै० ब्रा० ३अष्ट० ३प्र० ११अनु०, अथ० सं० ७, १०, ५, आ० गृ० १, १०)। देविकासु विनियोगः। 'कुहूम्' 'अहं' 'सुवृत' "सुकृत" शोभनानां कर्मणां कर्त्रीं, 'विद्मनापसं' सर्वत्रप्रत्यक्षकर्माणम्, 'अस्मिन् यज्ञे' 'सुहवां' "स्वाह्वानां" शोभनमाह्वानं यस्याः तां 'जोह-विमि, "आह्वये" आहुयामि। 'सा' अस्माभिराहूतास्मिन्यज्ञे एत्य हविर्भुक्त्वा 'नः' अस्माकं 'ददातु' 'श्रवण' 'पितृणाम्' "पित्र्यन्धनमिति वा" "पित्र्यं वा यशः" कुलोचित-मित्यर्थः। प्रत्यक्षीकृत्योत्तरेण पादेनास्तौत्।—या त्वमस्माक-मेतत् करोषि, 'तस्यै' 'ते' तुभ्यं हे 'देवि!' कुहु! 'हविषा विधेम' हविर्दद्म इत्यर्थः, अथवा तान्त्वां हविषा परिचरेम इति॥

"यमी" "व्याख्याता" यमेन, लिङ्गमात्रविशेषः॥

"तस्या एषा भवति"—॥ १२ (३३)॥

अन्य मूषु त्वं यम्यन्य उ त्वां परिष्वजाते लिबुजेव वृक्षम्। तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्राम्॥ अन्य-

मेव हि त्वं यम्यन्यस्यां परिष्वङ्ग्यते लिबुजेव वृक्षं तस्य वा त्वं मन इच्छ स वा तवाधानेन कुरुष्व संविदं सुभद्रां कल्याणभद्रां यमी यमं चकमे तां प्रत्याचचक्षेत्याख्यानम् ॥ १३ (३४) ॥

इत्येकादशे तृतीयः पादः ॥ ११, ३ ॥

"अन्य मू षु त्व यम्यन्य"—इति (ऋ० सं० ७, ६, ०८, ४)। यमी किल यमञ्चकमे भ्रातरम्, तां किल यमोऽनयर्चा प्रत्याचचे। कथम् ? हे 'यमि।' "अन्यम् ऊ षु' 'त्व' "अन्य मेव हि त्वम्" परिष्वजस्व मैथुनाभिप्रायेण। 'लिबुजेव वृक्षम' वल्लीव काचिद्गाढ समीपज वृक्षम, अन्य एव त्वा परिष्वजताम् यस्य योग्या त्वमनेनाभिप्रायेण परिष्वक्तुम। "तस्य वा त्व मनं इच्छा" तस्य च त्व मन प्रवेष्टुमिच्छ, 'स वा तव'। 'अधा' अथैवमैकचित्यमुपगम्यमानेन समानेन सह 'क्षणुष्व' 'सविदम्' सङ्कल्पादि मैथुनकार्यम। 'सुभद्रा' "कल्याण भद्राम"। सविदमुभयलोकविरोधिनीमित्यभिप्राय: ॥

विलपचे तु माध्यमिको यमो माध्यमिका वाच सुपम मात्मन प्रविभक्तामिव लत्वोभयस्थाना तां ब्रवीति।—हे यमि। अतीतस्तेऽस्मत्परिष्वङ्गसमय, प्रभातमिदानीम। लिबुजेव वृक्ष द्युस्थान परिष्वक्तुमिच्छ। तस्य च त्व मन प्रकाशमनुप्रवेष्टुमिच्छ, स च तव प्रकाशमनुप्रविशतु। अथैवमितरेतरसम्पर्कात् तेन सहैकीभूता लोकोपकाराय कुरुष्व परस्पर सविद सविलाधन प्रकाशमिति ॥ १३ (३४)॥

इति ऋज्वर्थायां निरुक्तवृत्तौ षोडशस्य (एकादशस्य) अध्यायस्य तृतीय. पाद ॥ ११ ३ ॥

चतुर्थ पाद।

उर्वशी व्याख्याता तस्या एषा भवति॥ १ (३५)॥

"उवशी" वक्तव्या, सा पुन "व्याख्याता" तदिहापि देवतायां योज्यम्,—"उर्वभ्यश्नुते" बह्वुदक व्याप्नोति, "उरुर्वा वशोऽस्या" महानस्या काम उदके॥

"तस्या एषा भवति"—। १ (३५)॥

विद्युन्न या पतन्ती दविद्योद्भरन्ती मे अप्या काम्यानि। जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः॥ विद्युदिव या पतन्त्यद्योतत हरन्ती मे अप्या काम्यान्युदकान्यन्तरिक्षलोकस्य यदा नूनमयं जायेताद्भ्योऽध्यप इति नर्यो मनुष्यो नृभ्यो हितो नरापत्यमिति वा सुजातः सुजाततरोऽथोर्वशी प्रवर्द्धयते दीर्घमायुः पृथिवी व्याख्याता तस्या एषा भवति॥ २ (३६)॥

"विद्युन्न या पतन्ती"—इति (ऋ॰ सं॰ ८, ५, २, ५)। मध्यम पुरूरवा विलपन्ने ब्रवीति।—प्राक्तनो ज्योतिष शब्दस्य च विभागमिव कृत्वा "विद्युन्न" "विद्युदिव"। सम्मत्यर्थ चा नकार। किम? इति— या 'पतन्ती' गच्छन्त्यन्तरिक्षे मेघादरपु 'दविद्योत्' पुन पुनर्द्योतिते पुन पुनरात्मान प्रति लभत। कथम? 'भरन्ती' "हरन्ती" 'मे' मम

स्वभूतानि 'अप्या' आप्यानि, 'काम्यानि' "उदकानि" अचरमाणानि "अन्तरिक्षलोकस्य" अधिपत्नी या उर्वशी, सा यदैवमुदकानि हरन्ती मेघेभ्यः पतन्ती भृशं स्वयं विद्योतते, "नूनं" निश्चयेन तदा "जनिष्ट." 'अपः' "अध्यपः" अधिक उदकोर्मिर्जायते, यः सर्वमिदमाच्छादयति। 'नर्य्यः' "नृभ्यो हित" सस्यसम्पत्कर, "नरापत्यमिति वा" इत्यैतिहासिकपक्षं द्योतयति। 'सुजातः' "सुजाततरः" शोभनादपि शोभनतरः उदकोर्मिः। अथ तेन महतोदकोर्मिणा सस्यमभिनिष्पाद्य लोकस्यान्नसम्प्रदानद्वारेण 'प्रोर्वशी तिरते' प्रतिरते "प्रवर्द्धयते" 'दीर्घ मायुः'॥

ऐतिहासिकपक्षे त्वेलः पुरूरवाः उर्वश्या अप्सरसा वायुक्तो ब्रवीति।—विद्युदिव या पतन्ती अद्योतत भृशं वपुषस्तया भरन्ती धारयन्ती अनेकानि स्वर्गतानि हावभावादीनि काम्यानि वस्तूनि मे मम अप्या नित्यमाप्तव्या प्रिया। सा च पुनराहितगर्भा यतः, अतो ब्रवीमि।—जनिष्ठो अपः निश्चयेन जनिष्यते। अध्यपः अधिककर्मा। नर्य्यः नृभ्यो हितः सम्यक् परिपालयिता नराणाम्। अथवा मम नरस्यापत्यमायुर्नाम राजाय पुराणविदः कथमन्ति। सुजातो मच्छुक्रात् वीर्य्यवतो जातः, विशेषत उर्वश्या चैवगुणात् सुजाततरः। तस्य वावश्यमुर्वशी अस्मद्सान्निध्येऽपि प्रवर्द्धयते तद्योग्यैः कर्मभिर्दीर्घमायुरिति॥

"पृथिवी" "व्याख्याता" "अथ वै दर्शनेन पृथु."—इत्यत्र, इह तु माध्यमिका॥

"तस्या एषा भवति"—॥ २ (२६)॥

बळित्था पर्वतानां खिद्रम्बिभर्षि पृथिवि।

ऋ०—नि—२१

प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि ॥ सत्यं त्वं पर्वतानां मेघानां खेदनच्छेदनं भेदनं बलमसुत्र धारयसि पृथिवि प्रजिन्वसि या भूमिं प्रवणवति महत्त्वेन महतीत्युदकवतीति वेन्द्राणीन्द्रस्य पत्नी तस्या एषा भवति ॥ ३ (३७) ॥

"बलित्था पर्वतानाम्"—इति (ऋ० सं० ४, ४, २८, १)। अत्रेरार्षम्। 'बल्'—इति सत्यनाम। 'इत्था'—इति अमुत्रेत्यर्थः। हे 'पृथिवि' माध्यमिके! "सत्य" यथाभूतम्, "अमुत्र" अमुष्मिन्नन्तरिक्षलोके वर्त्तमाना, 'खिद्रं' "खेदनं" "छेदनम्" येन पर्वताः मेघाश्छेत्तुं शक्यन्ते, तद् "बल" 'बिभर्षि' "धारतसि"। हे 'प्रवत्वति' "प्रवणवति" गमनवति! 'या' त्वं 'भूमिं' 'प्रजिनोषि' "प्रजिन्वसि" वर्षसुखजन्ती, 'मह्ना' "महत्वेन" हे 'महिनि' "महति!" अथवा "उदकवति!"। या त्वमिमं भूमिं प्रजिन्वसि, सा कथं न "मेघानां" पर्वतानां, छेदनसमर्थम्बलं धारयिष्यसि? अवश्यं धारयसीत्यभिप्रायः॥

पृथिवि! त्वं भूमिं प्रजिन्वसीति व्यपदेशान्माध्यस्थाना। हिरण्यनाम्येष्या भौमस्यैककपालस्येयं याज्या। तत्र विज्ञायते—"अथ यद्भौमोऽस्यां हि स तदविन्दत्"—इति। तेन तत्रेयं भूमिरिज्यते, न च भूमिरस्यामृचि प्रधानत्वेन वर्त्तते, यथा चायमाचार्यो निराह। तदयमस्योदाहरणाभिप्रायः, स च विनियोगः,—इत्यविरोधोऽनयोर्मेधाविना समनुगन्तव्ये॥

"इन्द्राणी" "इन्द्रस्य पत्नी" इन्द्रस्य विभूतिः। पृथक्त्वेन निर्ज्ञाता पौराणिकैः।

"तस्याः एषा भवति"—॥ ३ (१०)॥

इन्द्राणी मासु नारिषु सुभगां मृहमंश्रवम्। न ह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः॥ इन्द्राणीमासु नारिषु सुभगामहमश्रवं न ह्यस्या अपरामपि समां जरया म्रियते पतिः सर्वस्माद्य इन्द्र उत्तरस्तमेतद् ब्रूमस्तस्या एषापरा भवति॥ ४ (३८)॥

"इन्द्राणीमासु नारिषु"—इति (ऋ० स० ८, ४, ३, १)।—वृषाकपेरार्षम्। पङ्क्तिः। पृष्ठस्य षष्ठेऽहनि ब्राह्मणाच्छंसिन शस्त्रे विनियोगो निर्धार्य ब्रवीति।—सर्वास्वेव 'आसु नारिषु' 'इन्द्राणीम्' एव 'अहं' 'सुभगां' सौभाग्ययुक्तां लक्षणवतीम् 'अश्रवम्' "अशृणवम्"। केन हेतुना? यत आह—"न ह्यस्या अपरं चन" हि शब्दो हेत्वर्थः, चनेत्यप्यर्थे। यस्मादस्या अपरा मपि "समा" सम्वत्सरं प्रति न कदाचिदपि 'पतिः' "म्रियते" नापि जीर्य्यते यथाऽन्यासां प्राकृतानां नारीणाम्। कतम पतिः? 'विश्वस्मात्' "सर्वस्मात्" जगतो य 'इन्द्र' 'उत्तर' योऽयमिन्द्र उद्गततर "तमेतम्" इन्द्रमधिकृत्य "ब्रूम"—इत्याचार्य्यो ब्रवीति॥

"तस्या एषा अपरा भवति"—। सा पुन किमर्थम्? *ऋषिः एव वृषाकपिः प्रसिद्धः, स पुनरादित्योऽभिमतो नैरुक्तानाम्*, तदुपप्रदर्शनायापरामाह॥ ४ (३८)॥

नाहमिन्द्राणि रारण सख्युर्वृषाकपेर्ऋते। यस्येदमप्यं हविः प्रियं देवेषु गच्छति विश्व-

स्मादिन्द्र उत्तरः ॥ नाहमिन्द्राणि रमे सख्युर्वृषाकपेर्ऋते यस्येदमप्यं हविरप्सु श्रुतमद्भिः संस्कृतमिति वा प्रियं देवेषु निगच्छति सर्वस्माद्य इन्द्र उत्तरस्तमेतद् ब्रूमो गौरी रोचतेर्ज्वलतिकर्मणोऽयमपीतरो गौरो वर्ण एतस्मादेव प्रशस्यो भवति तस्या एषा भवति ॥५(३८)॥

"नाहमिन्द्राणि"—इति (ऋ० सं० ८, ४, १, १)। समानो विनियोगः पूर्वया, आर्षञ्च। इन्द्रो ब्रवीति।—विभक्तामिवेन्द्राणीमात्मनः कृत्वाह। "नाहमिन्द्राणि! रारण" "न रमे" अहं "सख्युर्वृषाकपेर्ऋते" य एष मम सखा वृषाकपिः, तस्मादृते। किं योऽय मृषिर्मनुष्येषु प्रसिद्धः ? नेत्युच्यते—"यस्येदं मप्यं हविः"। अप्सु शृतम्" चरुपुरोडाशादि वा "अद्भिः संस्कृतमिति वा"। सोऽस्य मे प्रिय इष्टः सर्वेष्वपि 'देवेषु' निर्धार्य्योच्यते।;यस्य विशेषतो 'गच्छति'। विश्वस्मात्' "सर्वस्मात्" अपि जगतो योऽहम् 'इन्द्रः' 'उत्तरः' उद्गततरः, सेऽप्यहमेवं ब्रवीमीति ॥

"गौरी" "रोचतेः" ज्वलत्यर्थस्य। माध्यमिका वाक्, सा पुनः दीप्तिमती। "अयमपीतरः" "यो "गौरो वर्णः" सोऽपि "एतस्मादेव" रोचतेः, स हि दीप्तिरूपत्वात् कृष्णादीनपेक्ष्य "प्रशस्यो भवति" ॥

"तस्याः एषा भवति"—॥ ५ (३८) ॥

गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी

बभूवुषी सहस्राक्षरा परमे व्योमन्॥ गौरीर्मिमाय सलिलानि तक्षती कुर्वत्येकपदी मध्यमेन द्विपदी मध्यमेन चादित्येन च चतुष्पदी दिग्भिरष्टापदी दिग्भिश्चावान्तरदिग्भिश्च नवपदी दिग्भिश्चावान्तरदिग्भिश्चादित्येन च सहस्राक्षरा बहूदका परमे व्यवने तस्या एषापरा भवति॥ ६ (४०)॥

"गौरीर्मिमाय"—इति (ऋ० स० २, ३, २२, १, अथ० स० ८, २६, २१)। अस्यवामीये दीर्घतमस आर्षम्। 'गौरी' सर्वमिदं निर्मिमीते। कथम्? 'सलिलानि तक्षती' "कुर्वती" उदकपूर्वकत्वात् सर्वनिर्माणस्य। कथमुदकानि कुर्वती? 'एकपदी' 'बभूवुषी' एकपदी भवति, "मध्यमेन" मद्देकत्वमापन्ना,—'द्विपदी' "मध्यमेन चादित्येन च"—'चतुष्पदी' "दिग्भि." प्रनवेक्ष्येन्द्रादित्यो,—'अष्टापदी "दिग्भियावान्तर दिग्भिश्च"—'नवपदी' "दिग्भियावान्तरदिग्भिश्च" सह आदित्येन च"। 'सहस्राक्षरा' "बहूदका"। 'परमे' "व्योमन्" "व्यवने" विभक्तानां भूतानां यत्परममवनमेकम्, सर्वभावानामविभक्त एक आत्मा, यस्तदात्मनैव भूतानां सलिलनिर्माणद्वारेण सर्व मिदं निर्मिमीते॥

"तस्याः एषा अपरा भवति"—। सा पुनः किमर्थम्? इति—गौरीति गुणाभिधानमप्रसिद्धाभिधेयं छन्दसि देवतायाम्, यतः परया समर्थयति। ६ (४०)।

तस्याः समुद्रा अधि वि क्षरन्ति तेन

जीवन्ति प्रदिशश्चतस्रः । ततः क्षरत्यक्षरं तद्विश्वमुपजीवति ॥ तस्याः समुद्रा अधिविक्षरन्ति वर्षन्ति मेघास्तेन जीवन्ति दिगाश्रयाणि भूतानि ततः क्षरत्यक्षरमुदकं तत्सर्वाणि भूतान्युपजीवन्ति गौर्व्याख्याता तस्या एषा भवति ॥ ७ (४१) ॥

"तस्याः समुद्रा अधि वि क्षरन्ति"—इति (ऋ० सं० २, ३, २२, २)। अलिङ्गो मन्त्र इति चेत् ? तस्या इत्येतदेव लिङ्गमन्वादिश्यते सम्बन्धाहचो, तस्मान्नालिङ्गः। 'तस्याः' गौर्य्या 'अधि' सकाशात् 'समुद्राः' मेघाः 'अधि विक्षरन्ति' "वर्षन्ति"। 'तेन' उदकेन 'जीवन्ति' 'प्रदिशश्चतस्रः' दिक्प्रतिदिङ्निवासीनि "भूतानि" तेन जीवन्ती। 'ततः क्षरत्यक्षरम्' पुनः पुनः प्रतिसंवत्सरम्, ततः एव क्षरत्युदकं मेघद्वारेण। 'तत्' 'विश्वं' भूतजातं 'उपजीवति' ॥

एष सैव सर्वोदकेशाना गौरीत्यभिप्रायः ॥

"उदकम्" "अक्षरम्"—इत्युच्यते। तत्कस्मात् ? तद्धि सर्वमिदमभिव्याप्य "क्षरति"। सर्वमिदं सचराचरं सञ्चरति ॥

"गौः" "व्याख्याता"।

"तस्याः एषा भवति"—॥ ७ (४१) ॥

गौरमीमेदनु वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ। सृक्वाणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः ॥ गौरन्वमीमेद्वत्सं निमिषन्तमनिमिषन्तमादित्यमिति वा-

मूर्द्धानमस्याभिहिङ्ङ्करोन्मननाय सृक्वाणं स-
रणं घर्मं हरणमभिवावशानामिमाति मायु
प्प्यायते पयोभिमायुमिवादित्यमिति वा वागेषा
माध्यमिका घर्मधुगिति याज्ञिका धेनुर्धयतेर्वा-
धिनोतेर्वा तस्या एषा भवति ॥ ८ (४२) ॥

"गौरमीमेत्"—इति (ऋ० सं० २, ३, २८, ३, अथ० सं० ९, २७, ६)। दीर्घतमस आर्षम्। महाव्रते विनियोगः। 'गौः' "माध्यमिका वाक्" 'वत्सम्' पुत्रम् 'अन्वमीमेत्' अनुशब्दयति, महद्भि स्तनयित्नुशब्दैः "आदित्यम्" स हि तस्या रसहरणाद्वत्स । 'मिषन्तम्' "अनिमिषन्तम्" अव्यवहितदर्शनं सर्वदा। अपि च 'मूर्द्धानम्' शिरो रश्मीन् "अस्य" मध्यस्थानप्राप्तं प्राप्य। 'हिङ्ङ् कृणोत्' हिङ्कारेणोपशब्दयति। 'मातवै' सर्वलोकमानाय। उदकाना 'सृक्वाणं' "सरणम्" अनवस्थायिनमादित्यम्। 'घर्मं' "हरण" रसानाम्। 'अभिवावशाना' पुन पुनः वाश्यमाना, वाशन्ती प्रतिसंवत्सरमिव 'मिमाति मायु' शब्दं करोति। 'पयते' "प्प्यायते" च प्रकर्षेण वर्द्धते "पयोभि." उदकै ॥

घर्मधुक्पक्षे—गौरिव 'गौः' 'अन्वमीमेत्' अनुशब्दयति, वत्समिव 'वत्स" 'मिषन्तम्' तमेवोन्मुखं पश्यन्तम्। अपि च प्राप्य 'मूर्द्धानम्' अस्य उपघ्राय हिङ्ङित्येवं शब्द करोति। स हि गोः स्वभावः। 'मातवै' कथ नामाय मां जानीयात् मातामयमिति। 'सृक्वाणम्' तामेव प्रत्यभिमुखं "सरणं" 'घर्मं "हरण" पयसाम्। 'अभिवावशाना' पुन. पुनर्वाश्यमाना,

प्रत्यक्ष मेव शब्दं करोति, 'प्रप्यायते' च 'पयोभिः' वत्समस्माय या वर्धयति, सा नित्यमेवमस्त्विति ॥

"धेनुः" "धयतेः वा"। धयतेऽसौ वत्सेनेति, "धिनोतेः वा" तर्पयत्यसौ उदकेन पयसा वा ॥

"तस्या एषा भवति"—॥ ८ (४२) ॥

उप॑ ह्वये सु॒दुघां॑ धे॒नुमे॒तां सु॒हस्तो॒॑ गो॒धु॒गु॒त दो॑हदेनाम्। श्रेष्ठं॑ स॒वं स॑वि॒ता सा॑विषन्नो॒ऽभी॑द्धो घ॒र्मस्तदु॒ षु प्र वो॑चम् ॥ उपह्वये सुदोहनां धेनुमेतां कल्याणहस्तो गोधुगपि च दोग्ध्येनां श्रेष्ठं सवं सविता सुनोतु न इत्येष हि श्रेष्ठः सर्वेषां सवानां यदुदकं यद्वा पयो यजुष्मदभीद्धो घर्मस्तं सु प्रब्रवीमि वागेषा माध्यमिका घर्मधुगिति याज्ञिका अग्नयाहन्तव्या भवत्यघ्नेति वा तस्या एषा भवति ॥ ९ (४३) ॥

"उप ह्वये सुदुघाम्"—इति (ऋ० स० २, ३, १९, १)। पूर्ववैव समानार्थं विनियोगश्च। 'उप' गम्य मनसा 'ह्वये' आह्वयेऽह स्तुतिभि। 'सुदुघां' कल्याणमुदक या दुग्धे, ताम्, 'धेनु' तर्पयित्री सर्वलोकस्य, 'एताम्' माध्यमिका वाचम्। 'उत' "अपि च" मयैतामुपहूता 'सुहस्त' "कल्याणहस्त" 'गोधुक्' इन्द्र दोग्धु, प्रचारयतूदकानि। अमुना प्रकारेण 'श्रेष्ठम्' अतिशयेन प्रशस्यमेतम्, 'सवम्' उदकं 'सविता' योऽयम् 'अभीद्ध' 'घर्म' मध्यस्थाना विद्युदाख्य, स 'साविषत् स "सनोतु" नित्य ददात्विति त सुष्ठु प्रब्रम. ॥

घर्मधुक्पत्ते—धेनुरेवः धेनुः, तामुपह्वये। 'सुदुघा' सुदोह्यां 'धेनुमेताम्' अस्मिन् कर्मणि अङ्गभावमुपगताम्। होता ब्रवीति।—मया चैवमुपह्वता 'सुहस्त' 'गोधुक्' अध्वर्युः अपि च दोग्धॄणां 'श्रेष्ठम्' अतिशयेन प्रशस्यम्, एत 'सवम्' एतत् "यजुस्तय." 'साविषत्' "सुनोतु" अभ्यनुजानातु 'सविता'। यदि सविता प्रसूतं क्रियते, तदेव साधु भवति। 'अभीद्धः' एष "घर्म." रुचितो महावीरः। तमधिकृत्य प्रब्रूमः—"आह्वरेतस्मिन् पय आसेचनाय" इति ॥

"अघ्न्या" कस्मात्? सा हि सर्वस्येव "अहन्तव्या भवति" "अघघ्नीति वा" सा हि पाप हन्ति ॥

यदि वाग् यदि गौः, "तस्या एषा भवति"—॥ ८ (४३) ॥

सूयवसाद्भगवती हि भूया अथो वयं भगवन्तः स्याम। अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ॥ सुयवसादिनी भगवती हि भवाथेदानीं वयं भगवन्तः स्यामाद्धि तृणमघ्न्ये सर्वदा, पिब च शुद्धमुदकमाचरन्ती तस्या एषापरा भवति ॥ १० (४४) ॥

"सूयवसात्"—इति। (ऋ० सं० २, ३, २१, ५)। पूर्ववदार्थम्। माध्यमिका वागुच्यते। शोभनं यवसमुदकमध्यामीकृत्यस्य्यात् तेन 'भगवती' धनवती, उदकेन उदकवती भव। "अथ" पुनः "इदानीम्" एव त्वयि भगवत्या वयमपि त्वदुत्सृष्टेनोदकेन 'भगवन्त.' धनवन्तः 'स्याम'। सा च पुनरेवं प्रतिसवत्सरम् 'अद्धि तृण' मेघम्, छद्यतेऽसाविति तृणः,

तम्, पश्चि सख्वर्णय। 'विश्वदानीं' "सर्वदा" यथाकालम् 'पिब' "च" सूर्यरश्मुपकृतम् 'उदकम्' 'आचरन्ती' आसेवन्ती, 'शुद्धम्' अकलुषं सर्वतो मध्यस्थाने चरन्ती ॥

घर्मधुक्पक्षे—यवसमेव यवसम्, तज्जग्ध्वा पयस्विनी भव। वयमपि च ततः त्वत्प्रसादेन पयसा धनवन्तः स्याम। या त्वमस्माकमेवमुपकारिणी, सा त्वं नित्यमघ्नि हणमघ्ने ! 'विश्वदानीं' नित्यकालम्, पिब च शुद्धमकलुषमुदकमाचरन्ती आसेवन्ती आ सर्वतो यथाकाममरण्ये चरन्ती ॥

"तस्याः एषा अपरा भवति"—सा पुनः किमर्थम् ? रूपतो हि पूर्वस्मिन्मन्त्रे घर्मधुक् सुतरामुपपद्यते, यतः परया वसुभिर्देवैः सम्बन्धात् माध्यमिकैव देवतेत्युपपादयति ॥ १० (४४) ॥

हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागात्। दुहामश्विभ्यां पयो अघ्न्येयं सा वर्द्धतां महते सौभगाय ॥ इति सा निगदव्याख्याता पथ्या स्वस्तिः पन्था अन्तरिक्षं तन्निवासात्तस्या एषा भवति ॥ ११ (४५) ॥

"हिङ्कृण्वती"—इति। (ऋ॰ सं॰ २, ३, १८, २)। पूर्ववदार्षादि। 'हिङ्'—इत्येवं प्रकार शब्दं स्तनयित्नुं कुर्वती 'वसुपत्नी' वसूनामुदकानामीश्वरा। 'वसूना' वा आदित्यरश्मीनां मरुतां वा। 'वत्स' वत्स आदित्यो मध्यस्थानो वा रसहरणात् वत्सः तम्, 'इच्छन्ती' 'मनसा' या माध्यमिका वाक् नित्यम् 'अभ्यागात्'। 'सेयम्' 'अश्विभ्याम्' द्यावापृथिवीभ्यां सूर्याचन्द्राभ्यां वा वर्षाय 'दुहां'

दुग्धा प्रक्षरताम् 'पय' उदकम्। अमुना प्रकारेण प्रतिसव त्सर 'वर्द्धताम्' उदकेनाम्नाक 'महते सौभगाय' यथा महत् सौभाग्य धनवत्त्व स्यात् तथा वर्द्धतामिति ॥

"पथ्या स्वस्ति"—इति वक्तव्यम्। अत्र पूर्वपद "पन्था अन्तरिक्षम्" "तन्निवासात्" पथ्या स्वस्ति इत्युक्त निर्वचनम्। यथा प्रायणीयाया यजतिप्रयोगो दृष्ट, तथा समाम्नात— "पथ्या स्वस्ति पूर्वा यजति"—इति ॥

"तस्या एषा भवति"—॥ ११ (४५) ॥

स्वस्तिरिद्धि प्रपथे श्रेष्ठा रेक्णस्वत्यभि या वाममेति। सा नो अमा सो अरणे नि पातु स्वावेशा भवतु देवगोपा॥ स्वस्तिरेव हि प्रपथे श्रेष्ठा रेक्णस्वती धनवत्यभ्येति या वसूनि वननीयानि सा नोऽमा गृहे सा निरमणे सा निर्गमने पातु स्वावेशा भवतु देवी गोप्त्री देवान् गोपायत्विति देवा एनां गोपायन्त्विति वोषा व्याख्याता तस्या एषा भवति॥१२(४६) ॥

"स्वस्तिरिद्धि"—इति (ऋ० स० ८, २, ५, ६)। वसु कर्णस्यार्षम्। 'इत्'—इत्यवधारणार्थे। 'स्वस्ति' "एव हि" 'प्रपथे' अन्तरिक्षे 'श्रेष्ठा' प्रशस्या सर्वदेवताभ्य। 'रेक्ण स्वती' "धनवती" उदकेन "अभि या वाममति" या "वननी- यानि" तदुदकानि नित्यम् "अभ्येति"। तस्या किम? इति—'सा न' सा अस्मान् 'अमा' अमति गृहनाम "गृहे" वसत 'अरणे' अरण्ये च 'निर्गमने च बहिर्देशात् 'पातु'

रक्षतु। 'स्वाविशा' सूपचरणा 'भवतु' अस्माकम्। 'देवगोपा' "देवी" चासौ "गोप्त्री" चेति देवगोपा, "देवान् गोपायत्विति, देवा एनां गोपायन्त्विति वा"। दातृनस्मान् किं सर्वस्मात् हविषो गोपायतु, अथवा देवा माध्यमिका द्युस्थाना वा रश्मय, एनां गोपायन्त्विति वा॥

"उषा" "व्याख्याता"॥

"तस्याः एषा भवति"—॥ १२ (४६)॥

अपोषा अनंसः सरत्सम्पिष्टादह बिभ्युषी। नि यत्सीं शिश्नथद्वृषा॥ अपासरदुषा अनसः सम्पिष्टान्मेघाद्विभ्युषी वायुरनितेरपि वोपमार्थे स्यादनस इव शकटादिवानः शकटमानद्धमस्मिंश्चीवरमनितेर्वा स्याज्जीवनकर्मण उपजीवन्त्येनन्मेघोऽप्यन एतस्मादेव यन्निरशिश्नथद्वृषा वर्षिता मध्यमस्तस्या एषापरा भवति॥ १३ (४७)॥

"अपोषा अनसः सरत्"—इति (ऋ० सं० ३, ६, २० ५)। वामदेवस्यार्षम्, परा च। 'अपासरत्' 'उषा.' अपासर्पत्। कुत ? 'अनस' वायो, यदा सम्पिनष्टि वायुर्मेघान् तदा तन्निवासिन्युषाः मामप्ययं हनिष्यतीति बिभ्यत्यपसरति। 'नियत्सीं' 'शिश्नथत्' यदा "निरशिश्नथत्" निर्जघान निर्हन्ति 'वृषा' वर्षिता वायु', तदा अपासरदुषाः॥

"अनो वायु" "अनिते." धातोः प्राणनार्थस्य। "अपि वोपमार्थे स्यात्"—"अनस इव" "शकटात्" यथा शाकटिक:

शकटात् केनचित् सम्पिष्यमाणादपसर्पेत, एव वायुना सम्पिष्यमाणान्मेघादपासरदुषा । इति द्वितीया कल्पना ॥

"तस्या एषा अपरा भवति"—। सा पुन किमर्थम् ? यत्तमापि ह्युषा आदित्यसम्रयाद्भवति, इय तु मध्यमा मेघ मन्त्रया वायोरव संस्तवादिति मध्यमास्वभावप्रायोहत्त्व प-प्रदर्शनार्थम् ॥ १३ (४७) ॥

ए॒तद॑स्या॒ अन॑: शये॒ सुसं॑म्पिष्टं॒ विपा॒श्या । स॒सार॒ सीं॑ प॒रा॒वत॑: । एतदस्या अन आशेते सुसम्पिष्टमितरदिव विपाशि विमुक्तपाशि ससारोषा: परावत: प्रेरितवत: परागताद्देला व्याख्याता तस्या एषा भवति ॥ १४ (४८) ॥

"ए॒तद॑स्या॒ अन॑. शये॒"—इति (ऋ० स० २, ६, ३१, १) । विशीर्णमुदकभावेन पृथिवी सङ्क्षेपावस्थित दर्शयन् ब्रवीति मेघम ।—'एतत' 'अस्या' उषस 'अन.' मेघाख्यमाश्रयभूत 'सुसम्पिष्ट सुष्ठु सञ्चूर्णित वायुना "इतरदिव" शकटान । 'विपाशि' छिन्नसर्वपाशबन्धनम् । 'आ शये' "आशेते" आतत्य पृथिवी शेत आस्ते । यत सम्पिष्यमाणात 'ससार' माध्यमिका "उषा" 'परावत' दूराद्दूरतर ननाशेति ॥

"इला" "व्याख्याता" "ईट्टे स्तुतकर्मण"—इति ॥

"तस्या एषा भवति"—॥ १४ (४८) ॥

अ॒भि न॑ इ॒ला यू॒थस्य॑ मा॒ता स्म॒न्नदी॑भिरु॒र्वशी॑ वा गृणातु । उ॒र्वशी॑ वा बृ॒हद्दि॑वा गृणा॒नाभ्यू॒र्ण्वा॒ना प्र॑भृ॒थस्या॒योः । सिष॑क्तु न ऊ॒र्ज-

व्यस्य पुष्टेः ॥ अभिगृणातु न इळा यूथस्य माता सर्वस्य माता स्मदभि नदीभिरुर्वशी वा गृणातूर्वशी वा बृहद्दिवा महद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्य प्रभृतस्यायोरयनस्य मनुष्यस्य मनुष्यस्य ज्योतिषो वोदकस्य वा सेवतां नोऽन्नस्य पुष्टे रोदसी रुद्रस्य पत्नी तस्या एषा भवति ॥ १५ (४८) ॥

"अभि न इळा"—इति (ऋ० सं० ४, २, १६, ६-७, अथवा ५, ३, ८, १९-२०)। सर्वे रायेम्। शक्वरी। 'अभिगृणातु' अभिशब्दयतु अस्मान्। कासौ? 'इळा'। किंलक्षणा? 'यूथस्य माता' मेघयूथस्य निर्मात्री मध्यमा। केनाभिगृणातु? 'नदीभिः' नदनाभिरद्भिः। 'उर्वशी वा' उर्वशीति वा योच्यते, ऽइडेति वा, सा 'गृणातु' 'नः' अस्मानिति अभिस्तनयतु। "उर्वशी वा बृहद्दिवा गृणाना"। उपमार्थे वा वाशब्दः, भेदापेक्षया, उर्वशीव 'बृहत्' महत् गृणातु, 'दिवा' द्योतनवता विद्युत्सहितेनोदकसमूहेन, 'गृणाना' शब्दयन्ती। 'अभ्यूर्ण्वाना' सर्वमिदमभिप्रच्छादयन्ती, 'प्रभृथस्य' "प्रभृतस्य" प्रकर्षेण सम्भृतस्य, 'आयोः' "अयनस्य" गमनशीलस्य "उदकस्य" समूहेन 'सिषक्तु' "सेवताम्" 'नः' अस्मान् 'ऊर्जव्यस्य पुष्टेः', यवादेः "अन्नस्य" पोषणाय।

"रोदसी" "रुद्रस्य पत्नी" रुद्रस्य विभूतिः॥

"तस्या एषा भवति"—॥ १५ (४८)॥

रथं नु मारुतं वयं श्रवस्युमा हुवामहे ।

आ यस्मिन्तस्थौ सुरणानि बिभ्रती सचा मरुत्सु रोदसी ॥ रथं क्षिप्रं मारुतं मेघं वयं श्रवणीयमाह्वयामहे आ यस्मिन्तस्थौ सुरमणीयान्युदकानि बिभ्रती सचा मरुद्भिः सह रोदसी-रोदसी ॥ १६ (५०) ॥

इत्येकादशाध्यायस्य चतुर्थः पादः ॥ ११, ४ ॥

"रथं नु मारुतम्"—इति (ऋ० सं० ४, ३, २०, ३)। श्यावाश्वस्यार्षम्। आग्निमारुते विनियोग। स्तोता ब्रवीति। —'नु' "क्षिप्रम्" 'वय' 'रथम्' 'आहुवामहे' "आह्वयामहे"। 'मारुत' मरुत्सम्बन्धम्, 'श्रवस्युम्' "श्रवणीय" यशस्विनम्। यस्मिन् किम्? इति—"आ यस्मिन् तस्थौ" यस्मिन्नातिष्ठति, रहणे गमने 'रोदसी' 'सचा' सह 'मरुत्सु' "मरुद्भि" सहिता मरुद्भि रोदसी। किम्? इति—'सुरणानि' "सुष्ठु रमणीयानि" "उदकानि" 'बिभ्रती' धारयन्त्यातिष्ठति—इति। त वयं मेघ रथमाह्वयामहे वर्षार्थमिति ॥ १६ (५०) ॥

इति ऋज्वर्थाया निरुक्तवृत्तौ षोडशस्य (एकादशस्य) अध्यायस्य चतुर्थ पाद. ॥ ११ । ४ ॥

इति श्रीजम्बूमार्गनिवासिनो भगवद्दुर्गाचार्य्यस्य कृतौ ऋज्वर्थाया निरुक्तवृत्तौ षोडशोऽध्याय. (एकादशोऽध्याय) समाप्त. ॥ ११ ॥

---

(१) (२) (३) (४) (५) (६)
श्येनआदायखादिष्ठयासोमंयत्त्वानवोनवो-

आ यस्मिन्तस्थौ सुरणानि बिभ्रती सचा मरुत्सु रोदसी ॥ रथं क्षिप्रं मारुतं मेधं वयं अवणीयमाह्वयामह आ यस्मिन्तस्थौ सुरमणीयान्युदकानि बिभ्रती सचा मरुद्भिः सह रोदसी-रोदसी ॥ १६ (५०) ॥

इत्येकादशाध्यायस्य चतुर्थः पादः ॥ ११, ४ ॥

"रथ नु मारुतम्"—इति (ऋ० स० ४, ३, २०, ३)। श्यावाश्वस्यार्षम्। आग्निमारुते विनियोग। स्तोता ब्रवीति।—'नु' "चिप्रम्" 'वय' 'रथम्' 'आहुवामहे' "आह्वयामहे"। 'मारुत' मरुत्सयुक्तम, 'अवस्यु म्' "अवणीय" यशस्विनम। यस्मिन् किम्? इति—"आ यस्मिन् तस्थौ" यस्मिन्नातिष्ठति, रहणे गमने 'रोदसी' 'सचा' सह 'मरुत्सु' "मरुद्भि" सहिता मरुद्भि रोदसी। किम्? इति—'सुरणानि' "सुष्ठु रमणीयानि" "उदकानि" 'बिभ्रती' धारयन्त्यातिष्ठति—इति। त वय मेघ रथमाह्वयामहे वर्षार्थमिति ॥ १६ (५०) ॥

इति ऋज्वर्थाया निरुक्तवृत्तौ षोडशस्य (एकादशस्य) अध्यायस्य चतुर्थ पाद ॥ ११। ४ ॥

इति श्रीजम्बूमार्गनिवासिनो भगवद्दुर्गाचार्य्यस्य कृतौ ऋज्वर्थाया निरुक्तवृत्तौ षोडशोऽध्याय (एकादशोऽध्याय) समाप्त ॥ ११ ॥

---

(२) (३) (४) (५) (६)
श्येनआदायस्वादिष्ठयासोमंयत्त्वानवोनवो-

(७) (८) (९) (१०) (११)
परंमृत्योत्वेषमित्थामवोमहेउदुज्योतिर्धातासो-
(१२) (१३) (१४)
मस्याथातोमध्यस्थानादेवगणास्त्वाविद्यु न्मद्भिरा-
(१५) (१६) (१७) (१८) (१९)
रुद्रासविष्टीश्रमोविरूपासइदीरतामङ्गिरसःस्व-
(२०) (२१) (२२)
र्यस्थे वस्तुषे व्यमथातोमध्यस्थानाःस्त्रियोदधस्य-
(२३) (२४) (२५) (२६) (२७)
वायस्मैत्वंकिमिच्छन्तीपावकानोमहोअर्णोयदा-
(२८) (२९) (३०) (३१)
ग्वदन्तीदेवींवाचमन्विदनुमतेराकामहंसिनीवा-
(३२) (३३) (३४) (३५) (३६) (३७) (३८)
लिकुहूमहमन्यमूपूर्वेयोविद्युन्नबलित्थेन्द्राणीना-
(३९) (४०) (४१) (४२) (४३)
हमिन्द्राणिगौरीर्मिमायतस्यागौरमीमेदुपह्वये-
(४४) (४५) (४६) (४७) (४८)
सूयवसाद्विङ्गवतीस्वस्तिरिद्धिप्रपेपा एतदस्याश्व-
(४९) (५०)
भिनोरथन्नुमारुतमिति पञ्चाशत् ॥

इति निरुक्ते (उत्तरषट्के) एकादशोऽध्यायः

समाप्तः ॥ ११ ॥

अथ द्वादशाध्यायस्य

प्रथमः पादः।

—०○०—

व्याख्याता मध्यस्थाना देवता, सवचनलिङ्गविशेषा, अधुना एतेनैव समाम्नायानुक्रमेण द्युस्थाना व्याख्येया, तदर्थं विशेषत पुनरधिकारवचनम॥

ॐ॥ अथातो द्युस्थाना देवतास्तासामश्विनौ प्रथमागामिनौ भवतोऽश्विनौ यद्व्याश्नुवाते सर्वं रसेनान्यो ज्योतिषान्योऽश्वैरश्विनावित्यौर्णवाभस्तत्कावश्विनौ द्यावापृथिव्यावित्येकेऽहोरात्रावित्येके सूर्याचन्द्रमसावित्येके राजानौ पुण्यकृतावित्यैतिहासिकास्तयोः काल ऊर्द्ध्वमर्द्धरात्रात प्रकाशीभावस्यानुविष्टम्भमनुतमो भागो हि मध्यमो ज्योतिर्भाग आदित्यस्तयोर्-देषा भवति॥ १॥

"अथातो द्युस्थाना देवता"—इति। बहुवचनं पञ्चोऽर्थं पत्। द्यौस्तेषां स्थानमिति द्युस्थाना, दवता व्याख्यास्यन्त इति शेष॥

"तासामश्विनौ प्रथमागामिनौ भवत"। तौ कस्मात? कालतो हि द्युस्थानाना देवताना विशेषो व्यवस्थित, आश्विने च स्तुतशस्त्रके कर्मणि प्रथममश्विनौ काल मन्त्रा।

एकश्चाश्वी मध्यस्थानः एको द्युस्थानो नैरुक्तानाम्, अतो द्युस्थानमध्यस्थानत्वात्तयोरश्विनोरुपन्यासः। यद्येवमेकस्य मध्यस्थाने एकस्य द्युस्थाने उपदेशः प्राप्नोति? न, एकैकस्य तयोः अश्विशब्दस्य पृथग्भावेन स्तुत्यभावादश्विशब्दस्य चात्यन्तमवियोगात्, नासत्याविति च पृथक् स्तुत्यभावात्। सत्यप्यवियोगे प्राधान्यात् प्रथमस्य समाम्नानं युक्तम्? इति चेत्, न, तत्कालेन मध्यस्थानस्य हीयमानरूपत्वात्, द्युस्थानस्य च वर्धमानरूपत्वात्, अतोऽनन्तरञ्च द्युस्थानदेवतारूपान्तरसस्थानादिति॥

"अश्विनौ कस्मात्? "यद् व्यश्नुवाते सर्वम्"। केन? "रसेनान्यः" रसेनोदकेन सर्वं व्यश्नुते व्याप्नोति। "ज्योतिषान्यः" ज्योतिषैकः। "अश्वैः अश्विनौ इत्यौर्णवाभः"। अश्वैरश्ववन्तौ तावित्यौर्णवाभ आचार्यो मन्यते।

"तत् कौ अश्विनौ"? इति विचारः। तदिति वाक्योपादाने। कावेतावश्विनाविति विचारार्थः प्रश्नः। "द्यावापृथिव्यौ इत्येके"। विज्ञायते हि—"तौ यौ प्रत्यक्षदेवतमश्विनाविमे एव ते द्यावापृथिव्यौ"—इति द्यौर्ज्योतिषा व्याप्नोति, पृथिव्यन्नेन।—"अहोरात्रौ इत्येके"। अहर्ज्योतिषा व्यश्नुते, रात्रिरवश्यायेः।—"सूर्याचन्द्रमसौ इत्येके"। सूर्यो ज्योतिषा व्यश्नुते, रसेन चन्द्रमाः।—"राजानौ पुण्यकृतौ इत्यैतिहासिकाः" अश्वैरश्विनावित्यैतिह्यपक्षं (१३०) यथाश्विन् पक्षे इतिहासे समवैति।

"तयोः कालः ऊर्ध्वमर्धरात्रात् प्रकाशीभावस्यानुविष्टम्भम्"। ज्योतिषा व्यतिभिद्यमानमूर्ध्वमर्धरात्रात् तमो यदा ज्योतिरनुविष्टभाति, सोऽश्विनोः कालः। तत. प्रभृति [illegible] परोऽर्धरात्रादिवम. इतीते सोऽर्थाणि। तत्र

यत्तमोऽनुप्रविष्ट ज्योतिषि, तद्भागः "मध्यम," तन्मध्यमस्य रूपम्। यत् "ज्योति" तमसि अनुप्रविष्टं तद्भाग तद्रूपम् "आदित्य."। तावेतौ मध्यमोत्तमाविति समतमाचार्य्यस्य॥

यतः समर्थनायोदाहरति "तयो. एषा भवति"—॥ १॥

वसातिषु स्म चरथोऽसितौ पेत्वाविव। कदेदमश्विना युवमभि देवाँ अगच्छतम्॥ इति सा निगदव्याख्याता तयोः समानकालयोः समानकर्मणोः संस्तुतप्राययोरसंस्तवेनैषोऽर्द्धर्चो भवति। वासात्यो अन्य उच्यत उषःपुत्रस्त्वान्य इति तयोरेषापरा भवति॥ २॥

"वसातिषु स्म"—इति। उपजातदेवतादर्शनचक्षु अतीतेषु रात्रिपर्य्यायेषु सन्धौ प्राप्ते सहसैवाश्विनौ दृष्ट्वा मन्त्रदृक् ब्रवीति।—'वसातिषु' रात्रिषु, तासु हि प्राणिनो निवसन्ति। किं तासु? इति—'चरथ' युवाम्। कथम्? 'असिताविव पेत्वौ' कृष्णाविव मेषौ समानरूपौ। उषसि कथमपि मया लक्षितौ यतो ब्रवीति,—"कदेदमश्विना युवम्"। कदेदमस्मत्कर्म प्रति ये देवा आगता, तान् प्रति हे युवामश्विनौ। 'आगच्छतम्' आगतवन्तौ स्थ॥

"तयो" अश्विनो "समानकालयोः" उभयोरपि हि तयोरर्द्धमर्द्धरात्रात् काल इति समानकाल। "समानकर्मणो" उभयोरपि तयोरेकं कर्म, तिरो अह्न्याः सोमा आश्विनस्य द्विकपाल। "संस्तुतप्राययो." प्रायेण हि तयो बाहुल्येन सस्तव एव॥

तयोः पुनः "असंस्तवेनैषोऽर्द्धर्चो भवति"॥

एकश्चाग्नी मध्यस्थानः एको द्युस्थानो नैरुक्तानाम्, अतो द्युस्थानमध्यस्थानत्वात्तयोरश्विनोरुपन्यासः। यद्येवमेकस्य मध्यस्थाने एकस्य द्युस्थाने उपदेशः प्राप्नोति ? न, एकैकस्य तयोः अश्विशब्दस्य पृथग्भावेन स्तुत्यभावादश्विदन्दस्य चात्यन्तसमयियोगात्, नासत्याविति च पृथक् स्तुत्यभावात्। सत्यप्यवियोगे प्राथम्यात् प्रथमस्य समाम्नानं युक्तम् ? इति चेत्, न, तत्कालेन मध्यस्थानस्य हीयमानरूपत्वात्, द्युस्थानस्य च वर्द्धमानरूपत्वात्, अतोऽनन्तरञ्च द्युस्थानदेवतारूपान्तरसस्थानादिति॥

"अश्विनौ कस्मात्?" "यद् व्यश्नुवाते सर्वम्"। केन? "रसेनान्यः" रसेनोदकेन सर्वं व्यश्नुते व्याप्नोति। "ज्योतिषान्यः" ज्योतिषैकः। "अश्वैः अश्विनौ इत्यौर्णवाभः"। अश्वैस्ताश्नन्तौ तावित्यौर्णवाभ आचार्यो मन्यते।

"तत् कौ अश्विनौ"? इति विचारः। तदिति वाक्योपादाने। कावेतावश्विनाविति विचारार्थः प्रश्नः। "द्यावापृथिव्यौ इत्येके"। विज्ञायते हि—"तौ यौ प्रत्यक्षदेवतमश्विनाविमे एव ते द्यावापृथिव्यौ"—इति द्यौर्ज्योतिषा व्याप्नोति, पृथिव्यन्नेन।—"अहोरात्रौ इत्येके"। अहर्ज्योतिषा व्यश्नुते, रात्रिरवश्यायैः।—"सूर्याचन्द्रमसौ इत्येके"। सूर्यो ज्योतिषा व्यश्नुते, रसेन चन्द्रमाः।—"राजानौ पुण्यकृतौ इत्यैतिहासिकाः" अश्वैरश्विनावित्येतन्निर्वचनं (१३प) अथास्मिन् पक्षे इतिहासे समवैति।

"तयोः कालः ऊर्द्धमर्द्धरात्रात् प्रकाशीभावस्यानुविष्टम्भम्"। ज्योतिषा व्यतिभिद्यमानमूर्द्धमर्द्धरात्रात् तमो यदा ज्योतिरनुविष्टमाति, सोऽश्विनोः कालः। ततः प्रभृति सन्निस्तोत्रं परोदयादाश्विनम्, उदिते सौर्यादि। तत्र

यत्तमोऽनुप्रविष्टं ज्योतिषि, तद्भागः "मध्यमः" तन्मध्यमस्य रूपम्। यत् "ज्योतिः" तमसि अनुप्रविष्टं तद्भागं तद्रूपम् "आदित्यः"। तावेतौ मध्यमोत्तमाविति स्वमतमाचार्य्यस्य॥

यतः समर्थनायोदाहरति "तयोः एषा भवति"—॥ १॥

वसातिषु स्म चरथोऽसितौ पेत्वाविव।
कुदेदमश्विना युवमभि देवाँ अगच्छतम्॥ इति सा निगदव्याख्याता तयोः समानकालयोः समानकर्मणोः संस्तुतप्राययोरसंस्तवेनैषोऽर्द्धर्चो भवति। वासात्यो अन्य उच्यत उषःपुत्रस्त्वान्य इति तयोरेषापरा भवति॥ २॥

"वसातिषु स्म"—इति। उपजातदेवतादर्शनचक्षुः अतीतेषु रात्रिपर्य्यायेषु सन्धौ प्राप्ते सहसैवाश्विनौ दृष्ट्वा मन्त्रदृक् ब्रवीति।—'वसातिषु' रात्रिषु, तासु हि प्राणिनो निवसन्ति। किं तासु? इति—'चरथः' युवाम्। कथम्? 'असिताविव पेत्वौ' कृष्णाविव मेषौ समानरूपौ। उपसि कथमपि मया लक्षितौ यतो ब्रवीति,—"कुदेदमश्विना युवम्"। कदेदमद्यतत्कर्म प्रति ये देवा आगताः, तान् प्रति हे युवामश्विनौ! 'आगच्छतम्' आगतवन्तौ स्थः॥

"तयोः" अश्विनोः "समानकालयोः" उभयोरपि हि तयोरहर्महरायात् काल इति समानकालः। "समानकर्मणो." उभयोरपि तयोरेकं कर्म, तिरो अह्नाः सोमा आश्विनय हिकपानः। "संस्तुतप्राययो." प्रायेण हि तयोः साहत्येन संस्तव एव॥

तयोः पुनः "असंस्तवेनैषोऽर्द्धर्चो भवति"॥

ननु अस्यामपि वसातिषु स्म चरथ इति वसातयो हि जनपदा अपि प्रसिद्धा, तदधिपती पुरुषकृतौ राजानौ अश्विनावेताविति शक्यते कल्पयितुम् ? तद्यथा—वासात्यौ तद्देशाधिपती कौचिद्राजानौ बहुशो पुरुषकृतौ यज्ञकर्मणि देवान् प्रति गतौ केनचिदुच्येते।—यौ युवां वसातिषु जनपदेषु नित्यमसिताविव पितौ समानवेषौ चरथ, तौ युवामिद देवस्थान प्रतिपदे वावर्त्तन्ते, तान् प्रति कदा हि अश्विनौ युवामागतवन्ताविति। मा भूदेषा मन्त्रार्थयोजनेत्यथयोऽनन्तरमाह,—

"वासात्योऽन्य उच्यते, उषः पुत्र' तवान्य इति"। एको वासात्य उच्यते, एकश्च उषस पुत्र इति। एवमेतस्मिन् भिन्न स्तुतावर्द्धे उषस पुत्रेण सूर्येण सह समानव्याख्यानादस्याय मध्यमो वासात्यो रात्रे पुत्र इति॥

"तयो एषा अपरा भवति"। सा पुन किमर्थम्? मध्यमोत्तमावश्विनाविल्यस्यैवार्थस्य दृढतायै स्फुट यदेतस्यामतत्परस्यामपि—॥ २॥

इहेह जाता समवावशीतामरेपसा तन्वा३ नामभिः स्वैः। जिष्णुर्वामन्यः सुमखस्य सूरिर्दिवो अन्यः सुभगः पुत्र ऊहे॥ इह चेह च जातौ संस्तूयेते पापेनालिप्यमानया तन्वा नामभिश्च स्वैर्जिष्णुर्वामन्यः सुमहतो बलस्येरयिता मध्यमो दिवो अन्यः सुभगः पुत्र उह्यते आदित्यस्तयोरेषापरा भवति॥ ३॥

"इहेह जाता"—इति (ऋ० स० २, ४, २५, ४)। अगस्त्यस्यार्षम्। प्रातरनुवाकाश्विनयो. विनियोग.। हे अश्विनौ। युवामुच्येथे।—'इहेह जाता' "इह च" मध्यस्थाने "इह च" द्युस्थाने "जातौ" 'समवावशीता' "सस्तूयेथे"। केन? 'अरेपसा तन्वा' "अपापया तन्वा"। यथासङ्कल्पतया। 'नामभि. स्वै.' परमनाम्नित्य यानि स्वस्तुतिनिमित्तानि तै। किञ्च 'जिष्णुर्वामन्य.' नित्यमेव जेता युवयोरन्य। 'सुमखस्य सूरि.' "सुमहतो बलस्येरयिता" गवुषु, स च नान्यो मध्यस्थानात् इति "मध्यम:" मध्यस्थान.। "दिवो अन्य:" "सुभग. पुत्र" सुभग: सुधन:, ऊहे "उह्यते" वायुना नित्यम्, स च नान्य: सूर्यादित्येवमत्रापि मध्यमोत्तमाविति॥

"तयो. एषा अपरा भवति"—। सा पुन. किमर्थम्? सस्तुतप्रायावेतौ समानकालौ समानकर्माणौ इत्यत्र तदुपप्रदर्शनार्थम्॥ ३॥

प्रातर्युजा विबोधयाश्विनावेह गच्छताम्। अस्य सोमस्य पीतये॥ प्रातर्योगिनौ विबोधयाश्विनाविहागच्छतामस्य सोमस्य पानाय तयोरेषापरा भवति॥ ४॥

"प्रातर्युजा"—इति (ऋ० स० १, २, ४, १)। मेधातिथेरार्षम्। प्रातरनुवाके विनियोग'। हे स्तोत:। यावेतौ प्रातर्युज्येते हविषा स्तुत्या च। तावेतौ 'अश्विनौ' विस्पष्टाभि. स्तुतिभि' अस्मदर्थं 'विबोधय'। विबोधितौ च त्वया 'इह' कर्मणि 'आगच्छताम्' अस्माकम् 'अस्य सोमस्य' 'पीतये' "पानाय"।

"तयोः एषा अपरा भवति"। सा पुनः किमर्थम्? नैवानयोः अन्यस्मिन् काले इज्यास्ति, यद्यपि क्रियते, अनिज्यैव सेति सुतरां परया संस्तवकालस्योपप्रदर्शयति—॥ ४ ॥

प्रातर्यजध्वमश्विना हिनोत न सायमस्ति देवया अजुष्टम्। उतान्यो अस्मद्यजते विचावः पूर्वःपूर्वो यजमानो वनीयान्॥ प्रातर्यजध्वमश्विनौ प्रहिणुत न सायमस्ति देवेज्या अजुष्टमेतदप्यन्यो अस्मद्यजते वि चावः पूर्वःपूर्वो यजमानो वनीयान्वनयितृतमस्तयोः कालः सूर्योदयपर्यन्तस्तस्मिन्नन्या देवता ओप्यन्त उषा वृष्टेः कान्तिकर्मण उच्छतेरितरा माध्यमिका तस्या एषा भवति॥ ५॥

"प्रातर्यजध्वम्"—इति (ऋ॰सं॰ ४, ४, १८, २)। अत्रेदार्थम्। प्रातरनुवाके विनियोगः, आश्विने च। हे स्तोतारो यूयमुच्यध्वे।—तौ "अश्विनौ" 'प्रात' एव 'यजध्वम्'। कथम्? इति, यतो ब्रवीमि,—'प्रहिणोत' प्रकर्षेण तौ प्रति स्तुतीर्हवींषि च गमयतेति। किमित्येवं ब्रवीमि।—प्रातर्यजध्वमिति। इतः,—यस्मात् 'न सायमस्ति देवयाः' अनयोर्देवयोः न सायमस्ति "इज्या"। यद्यपि कथञ्चित् स्यात्, 'अजुष्टम्' अनासेवित तदश्विभ्यां कर्म। "उतान्यो अस्मद्यजते"। "अपि" च अनादृते त्वयि 'अन्यः' अस्मत्तः एतावश्विनौ 'यजते' 'वि च अवः' व्यावर्यति च, तर्पयति हविर्भिः। 'पूर्वः पूर्वः' 'यजमानः'

प्रथमः प्रथमो यजमानो 'वनीयान्' "वनयितृतमः" सम्भक्तृतमः, आहृतत्वात्, तस्यैव हविरासेवितं अश्विनौ, नेतरस्येति ॥

"तयोः काल, सूर्योदयपर्य्यन्त." प्रकाशीभावस्यानुविष्टम्भमित्यतः कालात् प्रभृति सूर्योदयपर्यन्तस्तयोः कालः, तत परं यागकालः। तत किम्? "तस्मिन् अन्याः देवता" तस्मिन् स्तुतिकाले अन्याः देवताः आश्विने शस्त्रे याः स्तुति लभन्ते, ताः "ओप्यन्ते" तासामावापः तत्कालस्तुतिप्रतिलम्भ इति। तत्र तावदुषा. प्रथममोप्यते, तद्दैवतानि सूक्तानि शस्यन्ते ॥

"उषा" "वष्टेः कान्तिकर्मणः"। "वश कान्तौ (अ० प० ७०)"—इत्यस्य। यदोक्तम् "उच्छतीति सत्या"—इति, तदा इद विकल्पेन द्युस्थानायाः, या पुनः "इतरा माध्यमिका" उषा, न तस्या विकल्प, किं तर्हि? उच्छतेरेव सा विवासनार्थस्य,—उदकानि विवासयति, विवासयते वा मेघान्मध्यमेनेति ॥

"तस्या एषा भवति"—॥ ५ ॥

उषस्तच्चित्रमाभराऽस्मभ्यं वाजिनीवति।
येन तोकञ्च तनयञ्च धामहे ॥ उषस्तच्चित्रं चायनीयं मंहनीयं धनमाहराऽस्मभ्यमन्नवति येन पुत्रांश्च पौत्रांश्च दधीमहि तस्या एषापरा भवति ॥ ६ ॥

"उषस्तच्चित्र मा भर"—इति (ऋ० सं० १, ६, २६, ३। य० वा० स० ३४, ३३। मा० स० उ० आ० ८, ३, ८, १)। गोतमस्यार्षम्। प्रातरनुवाके आश्विने च विनियोगः। हे

'उषः!' 'वाजिनीवति!' तदस्माकं 'चित्रं' "चायनीयं धनम्" 'आभर' "आहर" त्वम्। 'येन' त्वद्दत्तेन वयं "पुत्रांश्च पौत्रांश्च" अविच्छेदेन दृढान् 'धामहे' "दधीमहि"।

"तस्याः एषा अपरा भवति"। सा पुनः किमर्थम्? पूर्वस्य ऋचि चित्रं धनमाहरेत्युक्तम्, तच्च पुनरुभयोरप्युषसोरविशिष्टम्, विशिष्टन्तु परस्यामुक्तमलिङ्गम्—"पूर्वे अर्द्धे रजसो भानुमञ्जते"—इति, अतः परा उदाह्रियते—। ६।

एता उ त्या उषसः केतुमक्रत पूर्वे अर्द्धे रजसो भानुमञ्जते॥ निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यन्ति मातरः॥ एतास्ता उषसः केतुमकृषत प्रज्ञानमेकस्या एव पूजनार्थे बहुवचनं स्यात् पूर्वे अर्द्धे अन्तरिक्षलोकस्य समञ्जते भानुना निष्कृण्वाना आयुधानीव धृष्णवः। निरित्येष समित्येतस्य स्थाने। एमीदेषां निष्कृतं जारिणीवेत्यपि निगमो भवति। प्रतियन्ति गावो गमनादरुषीरारोचनान्मातरो भासो निर्मात्र्यः सूर्या सूर्यस्य पत्न्येषैवाभिसृष्टकालतमा तस्या एषा भवति॥ ७॥

"एता उ त्या."—इति (ऋ० सं० १, ६, २४, १। सा० सं० उ० आ० ८, २, १६, १)। याः 'पूर्वे अर्द्धे' 'रजसः' "अन्तरिक्षलोकस्य" 'समञ्जते' "भानुना" भासा आत्मानमभिव्यञ्जयति। 'एताः' 'त्याः' "ताः" 'उषसः'। किमिति?

'केतुम् अक्रत' "अक्रवत" कुर्वन्ति लोकस्य "प्रज्ञानम्"। कथन्ताः प्रज्ञानं लोकस्य कुर्वन्ति ? अत आह,—"निष्कृण्वाना आयुधानीव धृष्णवः"। "निरित्येष समित्येतस्य स्थाने"। यथा—संस्कुर्वाणाः निव्यन्निर्मजन्तः आयुधानि निर्मलानि कुर्वन्ति धृष्णवः धर्षयितारः ते आयुधिनस्तज्जीवनाः, एवं भानुना स्वेन भासा तमोमलमपनीय निर्मलानि प्रज्ञानानि लोकस्योषसः संस्कुर्वन्ति। ततश्च "प्रति गावोऽरुषीर्यन्ति मातरः"। यत एवोदितास्तमेव सूर्य्यम्प्रति यन्ति तत्रैवान्तर्धीयन्ते, सूर्यस्यैव हि रश्मिप्रान्तग्रोत्सार्य्यमाणे तमस्यपररात्रे जाते प्रकाश उपजायते, ता उषस इत्याचक्षते, स एष परमार्थतः सूर्य एव स्त्रीलिङ्गविशिष्टो भवति, सूर्यकार्य्यत्वात् प्रकाशस्य ॥

"एकस्या एव पूजनार्थे बहुवचनम्"—इति वचनभेदप्रतिसमाधानम् ॥

निरित्येष समित्येतस्य स्थाने सामर्थ्याद् व्यत्ययः, संस्क्रियमाणानि ह्यायुधानि अतिनिर्मलानि भवन्ति ॥

यथा चोपपद्यते उपसर्गव्यत्ययः, तथा निगमसुदाजहार। —"एमीदेषाम्"—इति। "यदा दीध्ये न दविषाण्येभिः परायद्भ्योऽवहीये सखिभ्यः। न्युप्ताश्च बभ्रवो वाचमक्रत एमीदेषां निष्कृतं जारिणीव॥"—इति (ऋ० सं० ७, ८, ३, ५)। कवषस्य वा अचस्य वा आर्षम्। कृतनिवृत्तिर्देवनादशक्तवदात्मानं धारयितुं ब्रवीति।—'यदा दीध्ये' ध्यायमभिध्यायामि निश्चयेन 'न दविषाणि' न देविष्यामि 'एभिः' अक्षैरिति। अथ तदा 'सखिभ्यः' समानख्यानेभ्यः कितवेभ्यः 'परायद्भ्यः' परागच्छद्भ्यः देवनस्थानमहमेभ्यः 'अवहीये' भृशं हीनोऽस्मीति। यदा च पुनस्ते माम् आस्कारं निवपन्ति

अद्यान्, अथ पुनस्तदा तैर्न्युसाश्च ते 'बभ्रवः' बभ्रुवर्णा अश्वाः 'वाचमक्रत' शब्दमकुर्वत, अथ तदा निह्रस्तिमविगणय्य 'एमि इत्' आगच्छाम्येव 'एषाम्' अश्वेषां अश्वेव 'निष्कृतं' संस्कृतम् अलम्यानम् आस्फारं संस्कृतं 'जारिणीव' व्यभिचारिणीव काचिद् दुःस्त्रीचारित्रमात्मनोऽविगणय्येति ॥

"सूर्या"—इति वक्तव्यम्। सा पुनरियं "सूर्यस्य पत्नी" "एषैव" उषाः, "अभिसृष्टकालतमा" यथा सूर्यस्योदयकालं प्रत्यभिसृष्टतमा भवति, गततमा भवति, तथा तथा सैषा उषाः सूर्या सम्पद्यते । "तस्याः एषा भवति"—॥ ७ ॥

सुकिंशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम् ॥ आरोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व ॥ सुकाशनं शल्मलं सर्वरूपमपि वोपमार्थे स्यात्सुकिंशुकमिव शल्मलिमिति किंशुकं क्रंशतेः प्रकाशयतिकर्मणः शल्मलिः सुशरो भवति शरवान्वारोह सूर्ये अमृतस्य लोकमुदकस्य सुखं पत्ये वहतुं कुरुष्व सविता सूर्यां प्रायच्छत् सोमाय राज्ञे प्रजापतये वेति च ब्राह्मणं वृषाकपायी वृषाकपेः पत्न्येवाभिसृष्टकालतमा तस्या एषा भवति ॥ ८ ॥

"सुकिंशुकं शल्मलिम्"—इति (ऋ० सं० ८, ३, २१, ५)। ऋच्योदा आपम्। विवाहे विनियोगः। तत्रे तावदुच्यते प्रथमाः

मात्मनो विभज्य तदधिदेवता ब्रवीति ।—सुकिंशुक सुष्ठ, काशन दीपन लोकानाम्, 'शल्मलि' "शल्मल" व्यपगतमलम्, 'विश्वरूप' "सर्वरूपम" 'हिरण्यवर्ण' हिरण्योपमवर्णं हिरण्यमिव वरणीयम, 'सुवृत सुवर्त्तन शोभनैर्वा रश्मिभिर्वृतम्, 'सुचक्र सुचक्रम सुदीप्तम्। एत मेवलक्षण मण्डलं रथम् 'आरोह' त्व हे 'सूर्य्ये'। 'अमृतस्य' उदकस्य 'लोकं' स्थानम्। तत एवमधिरुह्य 'स्योन' सुखमेतस्मै 'पत्ये' मण्डलाधिष्ठात्रे 'वहतु' 'कृणुष्व' कुरुष्व ।

पृथक्कपक्षे तु—रथ एव रथ, सूर्य्य उद्दोढा, कन्या सूर्य्योच्यते। एवलक्षण रथमारोहेति॥

"अपि वोपमार्थे स्यात्—"सुकिंशुकमिव शल्मलिमिति"। किंशुकमिति पलाशपुष्पं प्रसिद्धि, इह तु रक्तपुष्पत्वसामान्यात् सुपुष्पितमिव शल्मलिमिति सामर्थ्यात्, तेनोपमानयोग आदित्यस्य पुष्टतर इति किंशुकशब्द पुष्पितशल्मली गौण इति भाष्यकाराभिप्राय ॥

"किंशुक क्रशत." धातो प्रकाशनार्थस्य, तद्धि दीप्तिमद्भवति ।—"शल्मलि सुशरो भवति"। "शृ हिंसायाम" —इत्यस्य धातो., स हि मृदुत्वात सुहिंस्यो भवति। "शरवान् वा"। हिंसावान, कण्टकैरसौ हिनस्ति हि। "सविता सूर्य्यां प्रायच्छत् सोमाय राज्ञे प्रजापतये वेति च ब्राह्मणम्"। निरुक्तपक्षे ज्यात्स्ना सोमाय ददाति। यदुक्तम्—"आदित्यतोऽस्य दीप्तिर्भवति"—इति। "प्रजापतये वेति" उषस वा मध्यस्थानाय प्रजापतये ददाति, केचित्त्वैतिहासिकपक्षे इच्छन्ति॥

तेषामितिहासं शृणु। कथमेतत्? इति—"वृषाकपायी" "वृषाकपे पत्नी"। वृषाकपिरादित्य, तस्य पत्नी,

तद्विभूतिः, उषःकाले यदवश्यायान् वर्षति कम्पयति च तद्‌योगात् । सा पुनः "एषैव" सूर्या, "अभिव्यष्टकालतमा" वृषाकपायीत्युच्यते ॥

"तस्याः एषा भवति"—॥ ८ ॥

वृषा॑कपायि॒ रेव॑ति॒ सुपु॑त्र॒ आदु॒ सुस्नु॑षे । घस॑त्त॒ इन्द्र॑ उ॒क्षणः॑ प्रि॒यं का॑चित्क॒रं ह॒विर्विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः ॥ वृषाकपायि रेवति सुपुत्रे मध्यमेन सुस्नुषे माध्यमिकया वाचा स्नुषा साधुसादिनीति वा साधुसानिनीति वा स्वपत्यं तत् सनोतीति वा । प्राश्नातु त इन्द्र उक्षण एतान्माध्यमिकान् संस्त्यायानुक्षण उक्षतेर्वृद्धिकर्मण उक्षन्त्युदकेनेति वा प्रियं कुरुष्व सुखाचयकरं हविः सुखकरं हविः सर्वस्माद्य इन्द्र उत्तरस्तमेतद्ब्रूम आदित्यं सरण्यूः सरणात्तस्या एषा भवति ॥ ९ ॥

"वृषाकपायि रेवति"—इति (ऋ॰ सं॰ ८, ४, ३, ३)। इन्द्रस्यार्षम् । षष्ठे षडहस्य वृषाकपौ विनियोगः । हे 'वृषाकपायि !' 'रेवति' धनवति । रयिमति । 'सुपुत्रे !' मध्यमेनेन्द्रेण सहचरणसामान्यात्—सहस्थानसामान्यात्, 'सुस्नुषे' "माध्यमिकया वाचा" मिथुनसामान्यात् । किम् ? इति—'घसत्त इन्द्र उक्षणः' प्राश्नातु ते इन्द्रः तव सम्भूतानेतान्माध्यमिकानुक्षणोऽवश्यायसंस्त्यायान् एव इन्द्र आदित्यः,

स हि तानुयन् पिबति। 'प्रियम्' इष्टम्, एतत् 'काचित्करं हविः'। कमिति सुखनाम, तस्य यदाचितमाचयन करोति, तद्भवति काचित्करम्। किं पुनस्तत्? 'हवि' उदकम्, तत् कुरुष्वावस्थायलक्षणं हविः अवसमवस्थायैरभिनिष्पादय। किमर्थम्? 'विश्वस्मात्' सर्वस्मात् य एष इन्द्र आदित्यः 'उत्तरः' तदर्थमिति॥

"स्नुषा" "साधुसादिनीति वा साधुसानिनीति वा"। शोभने अर्थे श्वशुरस्य सन्तानलक्षणे सीदत्यङ्गभावमुपैतीति स्नुषा, साधु सनोति सन्तति सम्भजतीति वा स्नुषा, "सु अपत्यम्, तत्सनोतीति वा"। सु—इत्यपत्यनाम, प्रसूयते हि तदिति, तदिय श्वशुरस्य। सनोति सम्भजतीति वा स्नुषा। "उक्षण" "उक्षते" वृद्धयर्थस्य। वर्द्धयन्ति हि ते घोषधीरवश्यायाय, त एव वा बहुत्वाद् वृद्धा भवन्ति। उक्षतेर्वा सेचनार्थस्य, "उदकेन" हि अवश्याया सर्वमिद सिञ्चन्ति॥

"सरण्यू"—इति वक्तव्यम्। सैव यदा सूर्य्ये प्रत्यविभासेन सता प्रसृता भवति, तदा "सरणात्" सरण्यूरित्युच्यते॥

"तस्या एषा भवति"—॥ ८॥

अपागूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णामदद्विवस्वते। उताश्विनावभरद्यत्तदासीदजहादु द्वा मिथुना सरण्यूः॥ अपगूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णामदद्विवस्वतेऽप्यश्विनावभरद्यत्तदासीदजहाद् द्वौ मिथुनौ सरण्यूः, मध्यमं च माध्यमिकाञ्च वाचमिति नैरुक्ता यमञ्च यमीञ्चेत्यैतिहासिकास्तस्मे तिहासपा

चक्षते त्वाष्ट्री सरण्यूर्विवस्वत आदित्याद्यमौ मिथुनौ जनयाञ्चकार सा सवर्णामन्यां प्रतिनिधायाश्वं रूपं कृत्वा प्रदुद्राव स विवस्वानादित्य आश्वमेव रूपं कृत्वा तामनुसृत्य सम्बभूव ततोऽश्विनौ जज्ञाते सवर्णायां मनुस्तदभिवादिन्येषर्ग् भवति ॥ १० ॥

"अपागूहन्"—इति (ऋ० सं० ७, ६, २३, २)। देवश्रवस आर्षम्। 'अपागूहन्' 'अस्तताम्' एतासुपस इयाकणाव्यवस्थायां 'मर्त्येभ्यः' मनुष्येभ्यः। के ते? रश्मयः? "कृत्वी सवर्णामदुर्विवस्वते"। तत्सवर्णामितां कृत्वा सरण्युम् अददुर्विवस्वते आदित्याय। 'उत अश्विनौ अभरत्' स्तुतिभिः सोपाः, स ह्यश्विनोः स्तुतिकालः। अथवा सरण्यूरभरत् हविषा, स ह्यश्विनोर्यागकालः। 'यत् तत् आसीत्' उपसो रूपं सरण्वा वा 'अजहात्' अत्यजत्। 'द्वा' "द्वौ" 'मिथुनः' "मिथुनौ" सरण्यूः, "मध्यमस्य माध्यमिकाय वाचमिति नैरुक्ताः" यदा हि सरण्यूरादित्यस्य सकाशं मण्डलमनुप्रविष्टा भवत्यविभागेन, तदोदिते आदित्ये विच्छिद्यते मध्यमस्य माध्यमिकायाश्च वाचः काल इति, एष तयोस्त्यागः॥

"यमश्च यमीचेत्यैतिहासिकाः"। तन्मतेन मन्त्रार्थस्य योजना। त एव रश्मयः प्राणाधिदेवताभावमापन्नाः, तेषन्यत्तद्रूपं चेत्यैतिहासिको व्यवहारः। तान्त्वाष्ट्री सरण्यूमस्माद्भूत्वा, तथा सत्यश्विनोर्जन्म भविष्यत् पश्यन्तो लोकहि-

मर्त्येभ्यो मनुष्येभ्य उत्तरान् कुरून् प्रति निन्युः । ततश्चान्यां तत्सवर्णाञ्छायाप्रभवां कृत्वा तामदद्विवस्वते। उताश्विना-वभरत् यत् ग्राम तदा रूपमासोत्तेन सा सरण्यूरश्विनाव-भरत् अजनयत् वा अपुष्णात् उत्तरेषु कुरुषु। प्रजहाद् द्वा मिथुना सरण्यू. द्वावन्यौ मिथुनौ यमश्च यमी चेति विवस्वतः सकाशादजहात् हित्वा ननाशेति ॥

"तदेतिहासमाचचत"। ऋगुरितिहासार्थ.। यथा त्वाष्ट्री सरण्यू विवस्वतोढा, सा च तस्मात् ननाश। "तदभि-वादिन्येषर्ग्भवति"—। १० ॥

त्वष्टा दुहित्रे वहतुं कृणोतीतीदं विश्वं भुवनं समेति। यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश ॥ त्वष्टा दुहितु-र्वहनं करोतीतीदं विश्वं भुवनं समेतीमानि च सर्वाणि भूतान्यभिसमागच्छन्ति यमस्य माता पर्युह्यमाना महतो जाया विवस्वतो ननाश रात्रिरादित्यस्यादित्योदयेऽन्तर्धीयते ॥ ११ ॥

इति निरुक्ते द्वादशाध्यायस्य
प्रथमः पादः ॥ १२, १ ॥

त्वष्टा दुहित्रे इति (ऋ० स० ८, ६, १३, १)। पूर्वयैव समानार्थ विनियोगश्च। 'त्वष्टा' देवो विश्वकर्मा च पुराणविदो वदन्ति, स 'दुहित्रे' "दुहितु" 'वहतुं' "वहनं" विवाह "करोतीति" 'इदं विश्वं' 'भुवनं' भूतजातं विवाहदर्शन-प्रेप्सया 'समेति' स हि विवाहानां स्वभाव.। 'यमस्य माता'

भविष्यता योगेनोच्यते 'पर्य्युह्यमाना' पर्य्यूढा, यमश्च यमीश्च जनयित्वा, ततः 'मह:' "महत." 'जाया' 'विवस्वतः' देवस्य जाया भार्य्या हित्वा अपत्ये मिथुनावास्य रूपं कृत्वा 'ननाश' इति ॥

नैरुक्तपक्षे तु 'त्वष्टा' मध्यमः, तमोभागस्य उषसः 'दुहित्रे' दुहितुः दूरे हितायाः प्रकाशरूपायाः 'वहतु' "वहन" विवस्वत "करोति"। 'इदं विश्व भुवनं समेति' प्रभातमिति मत्वा "सर्वाणि भूतानि" स्वासुस्वास्वितिकर्त्तव्यतासु अभिसमागच्छन्ति। 'यमस्य माता पर्य्युह्यमाना' यमस्य मध्यमस्य माता देवधर्मेण अथवा द्यु स्थानस्य यैव जाया सा मातेति। जायतेऽस्या पुत्रत्वेन पतिः 'जाया' भार्य्या, "महतो विवस्वत." प्रकाशेन प्रोत्सार्य्यमाणा 'ननाश' नश्यति। सङ्क्षेपतो भाष्यकारोऽर्थं निराह।—"रात्रिरादित्यस्य" उषा जाया, सा "आदित्यस्योदयेऽन्तर्द्धीयते"—इति ॥ ११ ॥

इति ऋज्वर्थाया निरुक्तवृत्तौ सप्तदशाध्यायस्य (द्वादशाध्यायस्य) प्रथम पाद ॥ १२ । १ ॥

द्वितीय पाद ।

सविता व्याख्यातस्तस्य कालो यदा द्यौरपहततमस्काकीर्णरश्मिर्भवति तस्यैषा भवति ॥ १ (१२) ॥

"सविता"--इति वक्तव्यम्। स पुनरेव. "व्याख्यात" अभिधानत, इह पुनरादित्य। "तस्य कालो यदा द्यौरपहततमस्काकीर्णरश्मिर्भवति" यदा यस्मिन् काले द्यौरेव अप-

त्ततमस्का भवति, न पृथिवी, पृथिव्या तमो भवति, दिव्य पद्दते तमसि विच्छिन्ना अस्या रश्मयो भवन्ति, स सावित्र कालः, तस्मिन् काले आदित्य सवितोच्यते। "तस्य" सवितु तत्कालोपलक्षितस्य "एषा" ऋक् प्राधान्यस्तुति "भवति" ॥ १ (१२) ॥

विश्वा रूपाणि प्रतिमुञ्चते कविः प्रासा-वीद्भद्रं द्विपदे चतुष्पदे। विनाकमख्यत् स-विता वरेण्योऽनु प्रयाणमुषसो विराजति ॥ सर्वाणि प्रज्ञानानि प्रतिमुञ्चते मेधावी कविः क्रान्तदर्शनो भवति कवतेर्वा प्रसुवति भद्रं द्विपाद्भ्यश्च चतुष्पाद्भ्यश्च व्यचिख्यपन्नाकं सविता वरणीयः प्रयाणमनूषसो विराजत्यधोरामः सावित्र इति पशुसमाम्नाये विज्ञायते कस्मात् सामान्यादित्यधस्तात्तद्वेलायां तमो भवत्येत-स्मात् सामान्यादधस्ताद्रामोऽधस्तात् कृष्णः क-स्मात् सामान्यादित्यग्निं चित्वा न रामामुपेया-द्रामा रमणायोपेयते न धर्माय कृष्णजातीयैत-स्मात् सामान्यात् कृकवाकुः सावित्र इति पशु-समाम्नाये विज्ञायते कस्मात् सामान्यादिति का-लानुवादं परीत्य कृकवाकोः पूर्वं शब्दानुकरणं वचेरुत्तरं भगो व्याख्यातस्तस्य कालः प्रागुत्-सर्पणात्तस्यैषा भवति ॥ २ (१३) ॥

"विश्वा रू॒पाणि॒ प्रति॑मुञ्चते क॒विः"—इति (ऋ० सं० ४, ४, २४, २। य० वा० सं० १२, ३)। श्यावाश्वस्यार्षम्। आभिप्लविके प्रथमेऽहनि विनियोगः, शिक्यपाशप्रतिमोके च यजमानस्याग्नो। 'विश्वानि' "सर्वाणि" 'रूपाणि' रूपवस्तूर्येषु 'प्रतिमुञ्चते' आबध्नाति। तमोऽपघ्नन् रूपाण्याविःकुर्वन्। 'कविः' "क्रान्तदर्शन." अथवा "कवते." धातोः गत्यर्थस्य कविः, कवति गच्छत्यसो नित्यम्। किञ्च कवित्वादेव 'प्रासावीत्' "प्रसुवति" जनयति। अभ्यनुजानाति च 'भद्रं द्विपदे चतुष्पदे' "द्विपाद्भ्यः" मनुष्यादिभ्यः "चतुष्पाद्भ्यः" गवादिभ्यः, यद्यत्तेषां भद्रं कल्याणं तत्तत्प्रसुवति। किञ्च। 'वि नाकम् अख्यत्' विख्यापयति नाकं द्याञ्च विदर्शयति, तदा हि तस्य विकीर्णरश्मयो भवन्ति। किञ्च 'अनुप्रयाणम्, उषसः विराजति' उषसः प्रयाणमनु विराजति प्रकाशते। सोऽस्माकं नामेदं करोत्वित्याशिषा स्तुतिर्निराकाङ्क्षा॥

"वि नाकमख्यत्"—इति सवितुः कालोपलक्षणकं मन्त्रलिङ्गम्, तत्पशुगुणसामान्येन समर्थयन्नाह। "अधोरामः सावित्र इति पशुसमाम्नाये विज्ञायते"। "कस्माद्गुणसामान्यात्"? इति—"अधस्तात्तद्वेलायान्तमो भवति" उपरिष्टाच्च ज्योतिः। शुक्लं तदा दिवि भवति, कीर्णरश्मित्वात्तस्याः, अधस्तात्तु भूम्यां तदा तमो भवति। एतस्मात् कालदेवतागुणसामान्यात् पशुरपि तथारूप एव भवति सावित्रः॥

आह,—"अधोरामः" इति किमुक्तं भवति? उच्यते,—"अधस्तात् कृष्ण."—इति यदुक्तं स्यात् तदुक्तं भवत्यधोराम इति॥

आह,—"कृष्ण कस्मात् सामान्यात्" राम इत्युच्यते ? शृणु,—विज्ञायते हि "अग्निञ्चित्वा" प्रथमं चित्वा "न रामा सुपेयात्"—इति। "रामा"—इति शूद्रोच्यते, सा हि "रमणाय" एव "उपेयते"—"न धर्माय" रमणार्थमेव सा। "कृष्णजातीया" —इत्येकार्थौ शब्दावधुना एतत्सत्य रामा स्त्रिय प्रवीणा-दिशब्दवत् पश्चावय रामशब्दो वृत्त कृष्णसामान्यमात्रेण ॥

"शकवाकु साविव इति पशुसमाम्नाये विज्ञायते" स 'कस्मात् सामान्यात्' ? इति, उच्यते,—"कालानुवाद परीत्य ' सवितु कालमसौ वक्तीति एव परीत्य परिज्ञाय समाम्नाये तस्य सावित्रत्व शकवाकुशब्दमधुना निर्वक्ति। "शकवाका पूर्व शब्दानुकरणम्" शकवाकुशब्दस्य पूर्वपद शब्दानुकरणं शक —इत्य वमसौ शब्दङ्करोति, "वचेरुत्तरम्" वाकुरित्ये तत्, शक —इत्येव वक्तीति शकवाकु ॥

"भग" वक्तव्य । स पुनरय "व्याख्यात" स्त्रीभगेन शब्दव्युत्पत्तित । "तस्य काल प्रागुत्सर्पणात्" तस्मात्सावित्रा-त्कालात परत एतदुत्तम ज्योतिर्भगाख्य भवति ॥

"तस्य एषा भवति"—॥ २ (१२) ॥

प्रा॒त॒र्जितं॒ भग॑मु॒ग्रं हु॑वेम व॒यं पु॒त्रमदि॑ते॒र्यो वि॑ध॒र्ता। आ॒ध्रश्चि॒द्यं मन्य॑मानस्तु॒रश्चि॒द्राजा॑ चि॒द्यं भगं॑ भ॒क्षीत्याह॑ ॥ प्रातर्जितं भगमुग्रं ह्वयेम वयं पुत्रमदितेर्यो विधारयिता सर्वस्या-धश्चिद्यं मन्यमान आध्यालुर्दरिद्रस्तुरश्चित्तुर इति यमनाम तरतेर्वा त्वरतेर्वा त्वरया तूर्ण-गतिर्यमो राजा चिद्यं भगं भक्षीत्याहान्धो भग

इत्याहुरनुत्सृप्तो न दृश्यते प्राशित्रमस्याक्षिणी निर्जघानेति च ब्राह्मणं जनं भगो गच्छतीति वा विज्ञायते जनं गच्छत्यादित्य उदयेन सूर्यः सर्त्तेर्वा सुवतेर्वा स्वीर्य्यतेर्वा तस्यैषा भवति ॥ ३ (१४) ॥

"प्रातर्जितं भगम्"—इति (ऋ० सं० ५, ४, ८, २)। वसिष्ठस्यार्षम्। प्रातः प्रातस्तमांसि यो जयति, स भवति प्रातर्जित्, तम् 'प्रातर्जितं' 'भगं' सूर्य्यम्, 'उग्रम्' उद्गूर्णम् अभ्युद्यतमुदयाय 'हुवेम' आह्वयामहे 'वयम्'। 'पुत्रमदितेः', यः "विधर्त्ता" "विधारयिता" "सर्वस्य" जगतः स्वेनानुग्रहेण। किञ्च 'आध्रश्चिद्' मन्यमानः' "आध्यालुः" आध्यानां स्तह-यिता "दरिद्रः" स यं मन्यमानः आकाङ्क्षन्नहन्यहनि पूजय-न्नास्ते, अपि नामोदियात् भगस्ततो वाञ्छार्थं पर्य्यटेयमिति। 'तुरश्चित्' तुरोऽपि "यमः तूर्णगतिः" सर्वान् प्राणिन आभिमु-ख्येनोपसंहाराय तूर्णगतिस्त्वरितगतिः यं मन्यमान आस्ते प्रेताधिपतिः, तदुदयाद्धि कालातिक्रमेणासावुपसंहरति प्राणिनः। 'राजा चित्' राजापि पार्थिवानां कार्य्यं चिकीर्षया 'यं भगं भक्षि' तम् उदयं भजति इत्येव माह। तं वयं भग-माह्वयामहे॥

आह,—"अन्धः भगः इत्याहुः" तस्य कोऽर्थः? इति, उच्यते—स हि सूर्य्यभावम्, "अनुत्सृप्तो न दृश्यते" नास्मिन् द्रष्टॄणां ध्यानं दर्शनमस्तीत्यन्धः। न पुनरन्धावेव न पश्यति, —"प्राशित्रमस्याक्षिणी निर्जघानेति च"—इति। ऐतिहा-सिकपक्षाभिप्रायोऽयमर्थवादः प्राशित्रभागस्यानन्वीक्षस्त-

त्यर्थम्। "जन भगो गच्छतीति"। तदेतत् प्रसिद्धमेव, यदा तदा सदात्मना जनमादित्यो गच्छति ॥

"सूर्यः"—इति वक्तव्यम्। स पुनरयं भगकालात्मृतः सूर्यो भवति। "मर्त्ते वा" सूर्यः। "सुवतेर्वा" प्रसवार्थस्य, स एव हि इद सर्वं प्रसुवति जनयतीत्यर्थ.। "स्वीर्यतेर्वा" सुपूर्वस्य वा ईरयतेः गत्यर्थस्य, वायुना ह्यय सुष्ठु ईर्य्यते प्रेर्यत इत्यर्थ ॥

"तस्य एषा भवति" प्राधान्यस्तुति —॥ ३ (१४) ॥

उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम् ॥ उद्वहन्ति तं जातवेदसं रश्मयः केतवः सर्वेषां भूतानां दर्शनाय सूर्यमिति कमन्यमादित्यादेवमवक्ष्यत् तस्यैषापरा भवति ॥ ४ (१५) ॥

"उदु त्य जातवेदसम्"—इति (ऋ० सं० १, ४, ७, १। य० वा० सं० ७, ४१। सा० सं० छ० आ० १, १, ३, १०)। प्रस्कण्वस्यार्षम्। आश्विने विनियोग। य 'उद्वहन्ति' उदय-मुपनयन्ति 'जातवेदसम्' इति 'सूर्य' 'केतव' "रश्मय" अश्वा वा यमुद्वहन्ति, "सर्वेषा भूताना" 'दृशे' "दर्शनाय" सूर्यम्, त वयमभिप्रेतार्थसिद्धयेऽभिष्टुमः ॥

"तस्य एषा अपरा भवति"—। सा पुन किमर्थम्? जात-वेदस सूर्यमिति श्रवणात् सन्देहः,—किमिय जातवेदस्युत सौरीति? यदा लसशयमेव सौरीति यदा-निजगाद- ॥ ४ (१५) ॥

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च॥ चायनीयं देवानामुदगमदनीकं ख्यानं मित्रस्य वरुणस्याग्नेश्चापूपुरद् द्यावापृथिव्यौ चान्तरिक्षञ्च महत्त्वेन तेन सूर्य आत्मा जङ्गमस्य च स्थावरस्य चाथ यद्रश्मिपोषं पुष्यति तत् पूषा भवति तस्यैषा भवति॥ ५ (१६)॥

"चित्रं देवानाम्"—इति (ऋ० सं० १, ८, ७, १। य० वा० स० ७, ४२)। कुत्सस्यार्षम्। आश्विने विनियोगः। 'चित्रं' "चायनीयं" पूजनीयम्। किं पुनस्तत्? 'देवानां' रश्मीनां यदेतत् 'उदगात्' 'अनीकं' समूहः। किमस्य? 'चक्षुर्मित्रस्य वरुणस्याग्नेः' एतस्मिन् मित्रस्य वरुणस्य अग्नेश्च चक्षुः "ख्यानम्"-इत्यर्थः। य एषः सूर्यः 'आत्मा' "जङ्गमस्य च स्थावरस्य च" सर्वभूतानुप्रवेशो 'आप्राः' "आपूपुरत्" आपूरयति "द्यावापृथिव्यौ" च "अन्तरिक्षञ्च" महत्त्वेन सूर्य आत्मा। एतस्मिन् मित्रवरुणाग्न्यादीनां देवतानां ख्यानमनेन सूर्यात्मना, य एतान् मित्रप्रभृतीन् पश्यति, स साधु पश्यतीत्यभिप्रायः। विज्ञायते हि रहस्यब्राह्मणे—"य एष सूर्य आत्मा जगतस्तस्थुषश्चेति एतद्दैवेपिस्यम्"—इति॥

भेदपक्षे तु मित्रप्रभृतीनां एतच्चक्षुरिति याज्ञिकपक्षे चक्षुषां ते पश्यन्तीति। तथापि विज्ञायते हि—"एष वै विष्णुर्या देवानां चक्षुः"—इति।

"अथ", "यत्" यदा "रश्मिपोषम्" आपूर्णस्तेजसा रश्मीन् सूर्य्ये. "पुष्यति" बिभर्त्ति, "तत्" तदैव "पूषा भवति" ॥

"तस्य एषा भवति"—॥ ५ (१६) ॥

शुक्रन्ते अन्यद्यजतन्ते अन्यद्विषुरूपे अहनी द्यौरिवासि। विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु ॥

शुक्रन्ते अन्यल्लोहितन्ते अन्यद्यजतन्ते अन्यद्यज्ञियन्ते अन्यद्विषमरूपे ते अहनी कर्म द्यौरिव चासि सर्वाणि प्रज्ञानान्यवस्यन्नवन् भाजनवती ते पूषन्निह दत्तिरस्तु तस्यैषापरा भवति ॥ ६ (१७) ॥

"शुक्रन्ते अन्यत्"—इति (ऋ० स ४, ८, २४, १। सा० स० छ० आ० १, २, ३, ३)। भरद्वाजस्यार्षम्। चातुर्मास्येषु विनियोग, पौष्णे हविषि। हे 'पूषन्!' 'शुक्रम्' 'अन्यत्' 'ते' तव रूप यल्लोहितम्, अन्यत्तव रूपं शुक्लेन व्यपदेशात्सामर्थ्याल्लोहितादि। 'यजत' "यज्ञिय" यज्ञार्हम्, अन्यत् अयज्ञियमयज्ञार्हमन्यत्। भगाख्यरूपेण हि नायमिज्यते, विज्ञायते हि—"तस्मादेतो भगाग्नी यज्ञेन यजन्ते"—इति। किञ्च 'विषुरूपे' भवत', एते शुक्लकृष्णे रूपे 'अहनी' अहोरात्रे, कर्मणा—उदयेन शुक्लमहः करोषि, अस्तमयेन कृष्णम्। 'द्यौरिवासि' यथा द्यौराहत्य सर्वं वर्त्तते, एव त्वमपि। किञ्च 'विश्वाः हि मायाः' सर्वाः प्रज्ञाः प्रज्ञायता त्वम् 'अवसि' पालयितृत्वात्पालयसि। उद्यन् अनुग्रह्णासि

हे 'स्वधावः" "अन्नवन्"! पूषन्! यस्त्वामिवमादिगुणयुक्त-मद्राक्ष, तव तस्य 'भद्रा' भन्दनीया, स्तुत्या 'रातिः' दानम् 'इह' अस्मिन् कर्मणि अस्मान् प्रति 'अस्तु'।—इत्येतदाशा-स्महे ॥

"तस्य एषा अपरा भवति"। सा पुनः किमर्थम्? इति,—पथिरक्षित्वे पूष्णोऽधिकारः, तत्परिप्रख्यापनार्थम्। अथवा "इयं वै पूषा"—इति विज्ञायते, तद्व्युदासार्थम्॥ ६ (१७)॥

प॒थस्प॑थ॒: परि॑पतिं वच॒स्या कामे॑न कृ॒तो अ॒भ्या॑नड॒र्कम्। स नो॑ रासच्छु॒रुध॑श्च॒न्द्राग्रा॒ धियं॑धियं सीषधाति॒ प्र पू॒षा॥ पथस्पथोऽधिपतिं वचनेन कामेन कृतोऽभ्यानडर्कमभ्यापन्नोऽर्कमिति वा स नो ददातु चायनीयाग्राणि धनानि कर्म कर्म च नः प्रसाधयतु पूषेत्यथ यद्विषितो भवति तद्विष्णुर्भवति विष्णुर्विशतेर्वा व्यश्नोतेर्वा तस्यै-षा भवति॥ ७ (१८)॥

"प॒थस्प॑थ॒: परि॑पतिम्"—इति (ऋ॰ सं॰ ७, १, ८, ८। य॰ वा॰ स॰ ३४, ४२)। ऋजिश्वन आर्षम्। पौष्णे हविषि पञ्चमेऽहनि व्यूढे विनियोगः। 'पथस्पथः' सर्वमार्गाणामित्यर्थः। किम्? इति—'परिपतिम्' "अधिपति" 'वचस्या' "वचनेन" स्तुत्या 'कामेन' स्वेन, पूषणं कामेनैव प्रत्यभिमुखीकृत्य 'अर्कम्' अहम् 'अभ्यानट्' स्तुत्या काम-प्राप्त्यर्थमभिव्याप्नोति। सोऽभिव्याप्तः सन् नोऽस्मभ्यं 'रासत्'

"ददातु"। किम्? 'शुरुधश्चन्द्रोग्राः' शुचं संरुन्धन्ति यानि धनानि, "चायनीयायाणि" अभिपूजितागमानि धर्म्यं आगमो येषाम्। किञ्च तैर्धनैर्धमेलुब्धैः 'धियं धियं सीषधाति' साधयति 'प्रपूषा' "कर्म कर्म" अस्माकं इष्टिपशुसोमादिलक्षणं प्रसाधयतु पूषा, यागाययविघ्नेनोपनामयतु इत्यर्थः॥

"अथ" "यत्" यदा "विषि" व्याप्तोऽयमेव सूर्यो रश्मिभिः "भवति" "तत्" "तदा" विष्णुर्भवति। "विशतेर्वा" यदाविष्ट प्रविष्ट, सर्वतो रश्मिभिर्भवति तदा विष्णुर्भवति। "व्यश्नोतेर्वा" विपूर्वस्य वाश्नोतेः, यदा रश्मिभिरतिशयेनायं व्याप्तो भवति, व्याप्नोति वा रश्मिभिरयं सर्वम्, तदा विष्णुरादित्यो भवति॥

"तस्य एषा भवति"—॥ ७ (१८)॥

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूळ्हमस्य पांसुरे॥ यदिदं किञ्च तद्विक्रमते विष्णुस्त्रिधा निधत्ते पदं त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः समारोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः समूळ्हमस्य पांसुरे प्यायनेऽन्तरिक्षे पदं न दृश्यतेऽपि वोपमार्थे स्यात् समूळ्हमस्य पांसुल इव पदं न दृश्यत इति पांसवः पादैः सूयन्त इति वा

मन्त्राः शेरत इति वा पिंशनीया भवन्तीति वा ॥ ८ (१९) ॥

इति निरुक्ते द्वादशाध्यायस्य द्वितीयः पादः ॥१२,२॥

"इदं विष्णुः"—इति (ऋ० सं० १, २, ७, २। य० वा० सं० ५, १५, सा० सं० उ० प्रा० ८, २, ५, २। अथ० सं ७, २६, ४)। मेधातिथेरार्षम्। प्रायश्चित्ते प्राज्यासादने च विनियोगः। यदिदं किञ्चिद्विभागेनावस्थितं तद्विक्रमते विष्णुरादित्यः। कथमिति ? यत आह—'त्रेधा निदधे पदम्' "निधत्ते पदम्" निधानं पदैः। क्व ? तत्र तावत्—"पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः"। पार्थिवोऽग्निर्भूत्वा पृथिव्यां यत्किञ्चिदस्ति तद्विक्रमते, तदधितिष्ठति, अन्तरिक्षे विद्युदात्मना, दिवि सूर्यात्मना। यदुक्तम्—"त मू' अकृण्वन् त्रेधा भुवे कम्"—इति (ऋ० सं० ८, ४, ११, ५)। "समारोहणे" उदयगिरावुद्यन् पदमेकं निधत्ते, "विष्णुपदे" मध्यन्दिनेऽन्तरिक्षे, "गयशिरसि" अस्तङ्गिरौ।—"इत्यौर्णवाभ." आचार्यो मन्यते एवम्। "समूळ्हमस्य पांसुरे"। अस्मिन् "प्यायने" एतस्मिन् "अन्तरिक्षे" सर्वभूतहितहेतौ यन्मध्यन्दिन "पदम्" विद्युदाख्यम्, तत् 'समूळ्हम्' अन्तर्हितं "न" नित्य "दृश्यते"। तदुक्तम्—"स्वप्नमेतन्मध्यमं ज्योतिरनित्यदर्शनम्" —इति। "अपि वोपमार्थे स्यात्,—समूळ्हमिव पांसुले पद न दृश्यत इति" यथा पांसुले प्रदेशे पदं न्यस्तमुत्क्षेपणसमनन्तरमेव पांसुभिराकीर्णत्वात् न दृश्यते, एवमस्य मध्यमं विद्युदात्मकं पदमाविष्कृतिसमकालमेव व्यवधीयते, नावतिष्ठत इत्यर्थः॥

"पौसुरे"—इति रो मत्वर्थ । अथ 'पासव" कस्मात् ? ते हि "पादै सुयन्ते" जन्यन्त इत्यर्थ, अथवा "पन्नाः शेरत इति" अथवा "पिशनीया" व्यसनीया व्यसनार्हा ते "भवन्ति" तदाकीर्णस्य दुर्गशोकत्वात् ॥ ८ (१९) ॥

इति ऋज्वर्थाया निरुक्तवृत्तौ सप्तदशस्य (द्वादशस्य) अध्यायस्य द्वितीय पाद ॥ १२।२ ॥

तृतीय पाद ।

विश्वानरो व्याख्यातस्तस्यैष निपातो भवत्यैन्द्राग्न्यृचि ॥ १ (२०) ॥

"विश्वानर" वक्तव्य:। स पुनरेव 'व्याख्यात" अभिधानव्युत्पत्तित,—"प्रत्यृत सर्वाणि भूतानि"—इति, इह तु निगमतो व्याख्यान ॥

"तस्यैष निपातो भवत्यैन्द्राग्न्यृचि"—॥ १ (२०) ॥

विश्वानरस्य वस्पतिमनानतस्य शवसः। एवैश्च चर्षणीनामूती हुवे रथानाम् ॥ विश्वानरस्यादित्यस्यानानतस्य शवसो महतो बलस्यैवैश्च कामैरयनैरवनैर्वा चर्षणीना मनुष्याणामूत्या च यथा रथानामिन्द्रमस्मिन् यज्ञे ह्वयामि वरुणो व्याख्यातस्तस्यैषा भवति ॥ २ (२१) ॥

"विश्वानरस्य वस्पतिम्'—इति (ऋ० स० ६, ५, १, ४। सा० स० छ० आ० ४, २, ३, ५)। 'आ त्वा रथ यथोतये"—

इत्येतस्मिन्नैन्द्रे सूक्ते प्रियमेधेन दृष्टे निष्कैवल्ये विनियोगः। 'विश्वानरस्य' "आदित्यस्य "अनानतस्य" शवसः' अनानत-ज्योतिर्बलस्य अनभिभूतप्रकाशस्यान्यैर्ज्योतिर्भिः बलपतिं पातारं रक्षितारमिन्द्रम् अस्मिन् यज्ञे 'वः' युष्माकमर्थसिद्धये आह्वयामः। केन? इति—"एवैः" "कामैरयनैः" 'चर्षणीना' "मनुष्याणाम्" "अवनैः" गमनैः तं प्रति निमित्तभूतैः। 'ऊती' "ऊत्या च" "पथा" येन मार्गेण रंहणा रक्षय इमं लोकमागच्छन्ति, तेन पथा भवतामहमिन्द्रमाह्वयामि ॥

"विश्वानरस्य वस्पतिम्"—इति पतिशब्देनैन्द्रवाचिना व्यपदेशात् षष्ठ्यन्तस्य विश्वानरशब्दस्य द्युस्थानवाचित्वे सामर्थ्यमुपपद्यते ॥

"वरुणः" "व्याख्यातः" निर्वचनात्, इह त्वादित्यः ॥

"तस्य एषा भवति"—॥ २ (२१) ॥

येना॑ पावक॒ चक्ष॑सा भुर॒ण्यन्त॑ं जनाँ॑ अनु॑। त्वं॑ व॑रुण॒ पश्य॑सि॥ भुरण्युरिति क्षिप्र-नाम भुरण्युः शकुनिर्भूरिमध्वानं नयति स्वर्गस्य लोकस्यापि वोढा तत्सम्पातो भुरण्यु-रनेन पावकख्याने न। भु॒र॒ण्यन्त॑ं जनाँ॑ अनु॑। त्वं॑ व॑रुण॒ पश्य॑सि। तत्ते वयं स्तुम इति वाक्यशेषोऽपि वो॑त्तर॒स्याम् ॥ ३ (२२)॥

"येना॑ पावक॒ चक्ष॑सा"—इति (ऋ॰ स॰ १, ४, ७, ५। मा॰ स॰ आर॰ सा॰ ५८॰ ११)। प्रस्कण्वस्यैतार्षं सर्वा आर्षम्। आश्विने विनियोगः। "भुरण्युरिति क्षिप्रनाम"। 'भुरण्युः' क्षिप्रगामी "शकुनि"। स पुनरयमेव योऽधियज्ञे अग्निर्बो-

यते स सुपर्ण.। विज्ञायते हि—"स्वर्गाय वै लोकायाग्निश्चीयते"—इति। "तत्सम्पाती" तेन युक्तोऽग्निचिदुपात्तापूर्वः सम्भारः। स्वर्गं लोकं प्रति तदेव शीघ्रं य पतति, गन्तुमिच्छति, स भुरण्यति। हे भगवन्। 'वरुण'! 'पावक' पावयित। 'येन' "ख्यानेन" दर्शनेन अनुग्राहकेण 'त्वं' पुण्यकृतो 'जनाननु भुरण्यन्त" पूर्वया पुण्यकृता मार्गेण देवयानेन क्षिप्रं गच्छन्तमनुपश्यसि। किं तस्य दर्शनस्येति अपरिसमाप्त वाक्यमिति यदुवृत्तमपेक्ष्य तदुवृत्तमध्याजहार। "तत्ते" दर्शनमनुग्राहक "वय स्तुम."—इति वाक्यशेष ॥

"अपि वोत्तरस्याम्"। अपि चैव यथोक्तमपि चैव मन्यथा स्यात्। कथमिति? यथोत्तरा ऋक्, तयापि सह कवाक्यतोपेक्ष्या। कथम्? इति, यत पुन पठति—
॥ ३ (२२) ॥

येना पावक चक्षसा भुरण्यन्तं जनाँ अनु। त्वं वरुण पश्यसि॥ वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः। पश्यञ्जन्मानि सूर्य॥ व्येषि द्यां रजश्च पृथु महान्तं लोकमहानि च मिमानो अक्तुभी रात्रिभिः सह पश्यञ्जन्मानि जातानि सूर्यापि वा पूर्वस्याम्॥
४ (२३) ॥

"येना पावक"—इति। 'येन' हे 'पावक'। 'वरुण'। 'चक्षसा' "ख्यानेन" 'जनान् अनु भुरण्यन्त पश्यसि'—तेनैव ख्यानेन तयैव ख्याता प्रज्ञया युक्तस्त्वं 'वि द्यामेषि' विविध-

मेषि अतिशयेन वा एषि। किमेषि ? द्यु लोकम्। 'रजः' "च" 'पृथु' "महान्तं लोकम्" अन्तरिक्षम्। किं कुर्वाणः ? 'अहा' "अहानि" च 'मिमानः' कुर्वन् 'अक्तुभिः' रात्रिभिः "सह" "पश्यन्" च 'जन्मानि' "जातानि" सर्वभूतान्यनुग्राहकत्वेन 'सूर्यः' ॥

यदि वोत्तरस्यामेकवाक्यता स्यात्, "अपि" तर्हि "पूर्वस्याम्" अभ्युपेक्षा। कथम् ? इति, यतः पठति—॥ ४ (२३) ॥

येना पावक चक्षसा भुरण्यन्तं जना अनु। त्वं वरुण पश्यसि॥ प्रत्यङ्देवानां विशः प्रत्यङ्ङुदेषि मानुषान् प्रत्यङ् विश्वं स्वर्दृशे॥ प्रत्यङ्ङिदं सर्वमुदेषि प्रत्यङ्ङिदं सर्वमिदामभिविपश्यसीत्यपि वैतस्यामेव ॥ ५ (२४) ॥

"येना पावक"—इति। हे 'वरुण !' 'पावक !' 'येन' "ख्यानेन" यथैवानुग्रहबुद्धा 'जनान् अनु भुरण्यन्तं पश्यसि' —तथैव ख्यात्वा प्रज्ञया युक्तः 'प्रत्यङ् देवानां' या विशस्ताः कृत्वा पुरस्तात्तासाम् 'उदेषि' 'मानुषान्' चैवमेव प्रत्यङ् कृत्वा तेषामपि पुरस्तादेव उदेषि। किं बहुना हे 'स्वः' आदित्य। 'प्रत्यङ्' "इदं सर्वम्" आत्मनः कृत्वा पुरस्तादुद्यन् "सर्वमभिविपश्यसि" ॥

न चेत् पूर्वस्यामुत्तरस्यां वा एकवाक्यता स्यात् "अपि" तर्हि "एतस्यामेव"—॥ ५ (२४) ॥

येना पावक चक्षसा भुरण्यन्तं जना

अनु। त्वं वरुण पश्यसि॥ तेन नो जना-नभिविपश्यसि॰ केशी केशा रश्मयस्तैस्तद्वान् भवति काशनाद्वा प्रकाशनाद्वा तस्यैषा भवति ॥ ६ (२५)॥

कथमिति? यतः पुनः पठति।—"येना पावक"—इति। हे "पावक" वरुण! येन ख्यानेन ययैवानुग्राहक-प्रज्ञया 'जनानन् भुरण्यन्तं पश्यसि त्वम्' पुण्यकारिण, तेनैव ख्यानेन तयैवानुग्रहकारकबुद्धा अस्माकं जनानभि-विपश्यसि॥

को विशेष. प्रथमादध्याहारात्? प्रथमे हि तत्ते वय स्तुम इति स्तुत्वा परिसमापितम्, इह पुनराशिषा। "तेन नो जनानभिविपश्यसि" स्तुत्याशिषोः सम्बन्धनित्यत्वाद्वा-क्यस्य। एष साकाङ्क्षाणां मन्त्राणामेकवाक्यताप्रकार उप-प्रदर्शित.॥

"केशी"—इति वक्तव्यम्। अत्र "केशा रश्मयः, तैस्त-द्वानादित्य." यो मध्यन्दिने भवति। "काशनाद्वा" प्रकाश-नादित्यर्थः। रश्मयोऽपि केशा, काशनादेव॥

"तस्य एषा भवति"—॥ ६ (२५)॥

केश्य१ग्निं केशी विषं केशी बिभर्त्ति रोदसी। केशी विश्वं स्वर्दृशे केशीदं ज्योति-रुच्यते॥ केश्यग्निं च विषञ्च विषमित्युदकनाम विष्णातेर्विपूर्वस्य स्नातेः शुद्ध्यर्थस्य विपूर्वस्य वा सचतेर्द्यावापृथिव्यौ च धारयति केशीदं सर्व-

मिदमभिविपश्यति केशीदं ज्योतिरुच्यत इत्या-
दित्यमाहाथाप्येते इतरे ज्योतिषी केशिनी
उच्येते धूमेनाग्नी रजसा च मध्यमस्तयोरेषा
भवति ॥ ७ (२६) ॥

"केश्य१ग्निम्"—इति (ऋ० सं० ८, ७, २४, १)। जूतेरार्षम्। 'केश्यग्नि बिभर्त्ति' वर्षणोदकेनौषधीरभिनिष्पादयन्नाहुतिद्वारेण 'केशी विष बिभर्त्ति'। "विषमुदकम्" "विष्णातेर्विपूर्वस्य स्नातेः शुद्ध्यर्थस्य, विपूर्वस्य वा सचतेः" सर्वत्र ह्यतिशयेन यत्नात्मिति, तदपि केशी बिभर्त्ति। 'रोदसी' अपि च केश्येव बिभर्त्ति तन्निवासीनि भूतानि अनुगृह्णाति। अपि चाय स्वरादित्यः 'केशी विश्वमिदम्' "सर्वमिदम् अभिविपश्यति" यथाभिद्रष्टव्यम्। कोऽयं केशीति? यत आह दर्शयन्नेवादित्यम्—"केशीदं ज्योतिरुच्यते"—इति ॥

अत परं विचार।—"अथाप्येते इतरे ज्योतिषी" प्रथम-माध्यमिके "केशिनी उच्येते"। तत्र तावत् "धूमेनाग्निः" केशी, स हि तस्य प्रकाशनाय निरूढस्यापि भवति। "रजसा च मध्यमः" असावप्यमूर्त्तत्वात् अप्रकाशः सन् रजसोद्धूतेन प्रकाशते—असौ वायुरागच्छतीति,—उदके न च वैद्युतः ॥

"तेषां" त्रयाणामपि केशिनाम् "एषा" साधारण्येन प्रधानस्तुतिः "भवति"—॥ ७ (२६) ॥

त्रयः केशिन ऋतुथा विचक्षते संवत्सरे वपत एक एषाम्। विश्वमेको अभि चष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम् ॥ त्रयः

केशिन ऋतुथा विचक्षते काले कालेऽभिविपश्य-न्ति संवत्सरे वपत एक एषामित्यग्निः पृथिवीं दहति सर्वमेकोऽभिविपश्यति कर्मभिरादित्यो गतिरेकस्य ददृशे न रूपं मध्यमस्याथ यद्रश्मि-भिरभिप्रकम्पयन्नेति तद् वृषाकपिर्भवति वृषा-कम्पनस्तस्यैषा भवति ॥ ८ (२७) ॥

"त्रयं केशिनः"—इति (ऋ० सं० २, ३, २२, ४, मण्ड० सू० ८, २८, ६)। दीर्घतमस आर्षम्। महाव्रते वैश्वदेवे शस्यते। य एते 'त्रय' 'केशिन' अग्निवायुसूर्या 'ऋतुथा' कालेकाले 'विचक्षते' यथाकालम् "अभिविपश्यन्ति" स्वक-र्माधिकारयुक्तेनानुग्रहेण लोकमनुगृह्णन्ति, 'एषाम्' 'एक' पृथिवीस्थान "अग्नि" 'संवत्सरे' "पृथिवी" "वपते' 'दहति" इत्यर्थः। तथा हि सा कर्मणा सम्पद्यते। "विश्वमेको अभि चष्टे" स्वाधिकारयुक्तो "कर्मभि" "अभिविपश्यति" अनुगृह्णाति "आदित्य"। "धाजिरेकस्य ददृशे"। "गति-रेकस्य" रजसोद्भूतेन पार्थिवेन उदकेन वा "दृश्यते" 'न रूपम्' "मध्यमस्य" ॥

"अथ यद्रश्मिभिरभिप्रकम्पयन्नेति"। 'अथ' 'यत्' यदा आदित्य, 'रश्मिभि' उपसद्धृतैरुपसम्यन्भूतानि 'अभिप्रक-म्पयन् एति' "तत्" तदा "वृषाकपिर्भवति" वर्षिता पाव-श्यायाना कम्पनश्च भूतानाम्, सर्वो हि भगवन्तद्दृश्ये तद्भयात् कम्पते ॥

"तस्य एषा भवति"—॥ ८ (२७) ॥

पुनरेहि वृषाकपे सुविता

य एष स्वप्नंनंशनोऽस्तमेषि यथा पुनर्विश्वस्मा-दिन्द्र उत्तरः॥ पुनरेहि वृषाकपे सुप्रसूतानि वः कर्माणि कल्पयावहै य एष स्वप्ननंशनः स्वप्नान्नाशयत्यादित्य उदयेन सोऽस्तमेषि यथा पुनः सर्वस्माद्य इन्द्र उत्तरस्तमेतद् ब्रूम आदित्यं यमो व्याख्यातस्तस्यैषा भवति॥ ८ (२८)॥

"पुनरेहि वृषाकपे"—इति (ऋ० सं० ८, ४, ४, ६)। वृषाकपेरार्षम्। पृष्ठस्य षष्ठेऽहनि ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्ता। हे 'वृषाकपे' भगवन्! 'यः एषः' त्वं 'स्वप्नंनंशनः' स्वप्ननाशनः "स्वप्नान्" "उदयेन" "नाशयसि" "सोऽस्तमेषि यथा पुनः"। यश्च त्वं 'विश्वस्मात्' "सर्वस्मात्" जगतः 'इन्द्रः' ईश्वरः 'उत्तरः' उद्गततरः, स त्वं 'पुनः' 'एहि' आयाहि, उदयं प्राप्नुहि। तत आवां 'सुविता' "सुप्रसूतानि" सुप्रवृत्तानि शोभनमर्थमुद्दिश्य जगतोऽनुग्रहमेतानि शोभनानि "कर्माणि" प्रवृत्तानि 'कल्पयावहै' सगुणानि कुर्वः,—त्वमुदयेनाहमनुष्ठानेनेति॥

"यमः" वक्तव्यः, स पुनः "व्याख्यातः" निर्वचनतः, इह त्वादित्योऽभिधेयः॥

"तस्य एषा भवति"—॥ ८॥ (२८)॥

यस्मिन् वृक्षे सुपलाशे देवैः सम्पिबते यमः। अत्रा नो विश्पतिः पिता पुराणाँ अनु वेनति॥ यस्मिन् वृक्षे सुपलाशे स्थाने

वृतक्षये वापि वोपमार्थे स्यात् वृक्ष इव सुप-
लाश इति वृक्षो व्रश्चनात्पलाशं पलाशनाद्देवैः
सङ्गच्छते यमो रश्मिभिरादित्यस्तत्र नः सर्वस्य
पाता वा पालयिता वा पुराणाननुकामयेता-
जएकपादजन एकः पाद एकेन पादेन पातीति
वैकेन पादेन पिबतीति वैकोऽस्य पाद इति वा।
एक' पादुन्नोत्खिदतीत्यपि निगमो भवति
तस्यैष निपातो भवति वैश्वदेव्यामृचि॥ १०
(२६)॥

'यस्मिन् वृचे सुपलाशे"—इति (ऋ० सं० ८, ७, २३,-१)। कुमारस्य यामायनस्यार्षम्। 'यस्मिन् वृचे' आदित्ये, स हि स्वगत्या कालम् अतिक्रामयन् सर्वभूतानामायूंषि चय-यति। "वृश्चतीति वृच."। "वृतक्षये वा" पुण्यकृद्भिर्वृते निवासे इत्यर्थः। 'सुपलाशे' सुष्ठुपराशीर्णमले दीप्तिमति 'देवैः' सह "रश्मिभि." 'सम्पिबते' "सङ्गच्छते" अस्त गच्छत्यादित्य.। तत्र किमिति? 'अत्र' 'नः' अस्मान् पुण्येन कर्मणा विद्यया च तत्प्रापिकया गतात्मनः 'पुराणान्' इव तन्निवासिनः 'अनु' 'वेनति''वेनतु "कामयेत" कामयतु सम्प्रीणयत्वित्यर्थः॥

"वृचे इव सुपलाशे"—इति, ऐतिहासिकपचे स्वगृह-सुपागतानस्मान् सुपलाशवृक्षप्रख्यसुखनिवासे पितृराजो 'यम' 'पुराणान्' इव तल्लोकनिवासिनः पितॄन् अनु काम-यतु। अस्मिन् पचे देवैः सम्पिबत इति तदनुचारिणो गृह्यन्ते देवा इति॥

"अज एकपात्"—इति वक्तव्यम्। स पुनः अयमादित्यः नित्यम्, "अजनः" गमनः "एक." च "पादः" अस्य, विज्ञायते हि—"अग्निः पादो वायुः पाद आदित्यः पादो दिशः पादः" इति। "एकेन पादेन पातीति वा"। सर्वमिदं जगत् एकेनांशेनानुप्रविश्य पाति रक्षति स्वापकाले आत्मात्मनाऽत्र पचद्रजनयेत्यज एकपात्। "एकेन पादेन पिबतीति वा"। एकेनांशेनोदकं सर्वस्माज्जगतः पिबत्यजनयत्यजएकपात्। अथ "वा" अजनो गमनः, "एकोऽस्यपाद इति" अज एकपात्। जीवभूतोऽस्य कृत्स्ने जगति एकः पादोऽनुप्रविष्टः।

निगमोऽपि हि भवत्येवास्मिन्नर्थे—"एकं पादं नोत्खिदति सलिलाद्धंस उच्चरन्। स चेत्समुद्धरेदङ्ग न मृत्युर्नामृत भवेत्"। एकमात्मनः पादमंश नोत्खिदति नोद्धरति इति आदित्यो हंसः महतस्तमसो वाध्वनो वाहन्ता। कुतः पुनर्नोत्खिदति? 'सलिलात्' सप्तमे ब्रह्मणि लीनादेतस्माज्जगतः, 'उच्चरन्' अहन्यहनि उद्यन्नित्यर्थः। 'स चेत्' 'त' जीवभूतमात्मनः पादमेतस्मात् जगतः 'उद्धरेत्' ततस्तदुद्धरणसमकालमेव 'अङ्ग' क्षिप्रं 'न मृत्युर्नामृतं भवेत्'—सर्वमिदमव्यपदेश्यं सदेव स्यादित्यर्थः॥

"तस्य एष निपातो भवति" साधारणेन "वैश्वदेव्यामृचि"—॥ १० (२८)॥

पावीरवी तन्यतुरेकपादजो दिवो धर्त्ता सिन्धुरापः समुद्रियः। विश्वे देवासः शृणवन् वचांसि मे सरस्वती सह धीभिः पुरन्ध्या॥ पविः शल्यो भवति यद्विपुनाति काय-

न्तद्वत्पवीरमायुधन्तद्वानिन्द्रः पवीरवान् । अ-
तितस्थौ पवीरवानित्यपि निगमो भवति ।
तद्देवता वाक् पावीरवी पावीरवी च दिव्या
वाक् तन्यतुस्तनित्री वाचोऽन्यस्या अजमैक-
पाद्दिवो धारयिता च सिन्धुरापश्च समुद्रियाः
च सर्वे च देवाः सरस्वती च सह पुरन्ध्या
स्तुत्या प्रयुक्तानि धीभिः कर्मभिर्युक्तानि इदमवन्तु
वचनानीमानीति पृथिवी व्याख्याता तस्या एष
निपातो भवत्यैन्द्राग्न्याम्यृचि ॥ ११ (३०) ॥

"पावीरवी तन्यतु"—इति (ऋ० स० ८, २, ११, ३)। वसुकर्णस्यार्षम्। वैश्वदेवे शस्त्रे विनियोगः। "पवि शल्यो भवति"। कस्मात्? "यद्" "विपुनाति" विदारयति "कायम" तेन शल्येन "तद्वत् पवीरमायुधम"। रोमत्वर्थे। तेन शल्यवता आयुधेन "तद्वानिन्द्र पवीरवान्"॥

यथा चेतदेव तथैव निगम।—"अतितस्थौ पवीरवान"—इति। "यो जनान् महिषां इवातितस्थौ पवीरवान्। उतापवीरवान् युधा॥"—इति (ऋ० म० ८, १, २४ ३)। विप्रवन्धोरार्षम्। 'य' इन्द्र 'महिषान्' अतिमहतोऽप्यसुरजनान् 'युधा' युद्धेन 'अति' अतीत्य 'तस्थौ' 'तिष्ठति' 'पवीरवान्' आयुधवान्। अपि च 'अपवीरवान्' अनायुध इत्यर्द । सायुधो निरायुधश्च नित्यमसुरजनान् महतोऽपि अतितिष्ठति य, स इद नामास्माक करोत्विति॥

"तद्देवता वाक् पावीरवी" स इन्द्रो यस्या माध्यमिकाया

वाचो देवता, सैन्द्री वाक् पावीरवी, 'तन्यतु,' "तनित्री" तनयित्री "वाचोऽन्यस्या"। तदुक्तम्—"ता विश्वरूपा. पशवो वदन्ति"। सा च "दिव्या वाक्" "अजयैकपात् दिवो धारयिता"। एतदत्र द्युस्थानत्वम् अजस्यैकपद । "सिन्धुश्च" नदः, "आपश्च" समुद्रिया, 'विश्वे च देवा' "सर्वे च देवा" 'शृण्वन्' "शृण्वन्तु" "इमानि वचनानि" स्तुतिलक्षणानि। किं वचनान्येव ? कि तर्हि ? 'सह धीभि' "कर्मभि" हविर्दानयुक्तो सहितानि। 'सरस्वती' "च" शृणोतु 'पुरन्ध्या' "सह" बहुधात्रा, माध्यमिकया वाचा।—इत्येतदाशास्महे॥

निर्वचनस्यास्या ऋच्युत्तरे पादे सम्यक् पाठोऽन्वेष्य॥

"पृथिवी" "व्याख्याता"। "तस्या एष निपातो भवति" दिव पृथिव्या "ऐन्द्राग्न्यामृचि"—न स्तुत्यत्वेन, कि तर्हि ? नैघण्टुकेन केवलम्॥ ११ (३०)॥

यदिन्द्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवमस्यामुतस्थः। अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य॥ इति सा निगदव्याख्याता समुद्रो व्याख्यातस्तस्यैष निपातो भवति मार्वमान्याम्टचि॥ १२ (३१)॥

"यदिन्द्राग्नी परमस्याम्"—इति (ऋ० स० १, ७, २७, ३)। कुत्सस्यार्षम्। हे 'इन्द्राग्नी!' 'वृषणौ' 'यद्' यदि युवा 'परमस्या पृथिव्या' द्युलक्षणायाम्, यदि 'मध्यमस्या मध्यमायामन्तरिक्षे, यदि 'अवमस्याम्' अस्यामेव भूम्याम्, 'उत स्थ' तथापि 'परि आयातम्' अस्मान् प्रति पर्य्येत्य। 'अथ सोमस्य पिबतम्' अभिषुतस्य स मंत्रमिति॥

"समुद्र." "व्याख्यातः" इह तु आदित्य इति विशेष । अत्रापि "समुद्रवन्त्यस्मादापः"—इत्येवमादि तदेव निर्वचनम् ॥

"तस्य एष." समुद्रस्य "निपातो भवति, पावमान्यामृचि" —॥ १२ (३१) ॥

पवित्रवन्तः परि वाचमासते पितैषां प्रत्नो अभि रक्षति व्रतम्। महः समुद्रं वरुणस्तिरो दधे धीरा इच्छेकुर्धरुणेष्वारभम् ॥ पवित्रवन्तो रश्मिवन्तो माध्यमिका देवगणाः पर्य्यासते माध्यमिकां वाचम् मध्यमः पितैषां प्रत्नः पुराणोऽभिरक्षति व्रतं कर्ममहः समुद्रं वरुणस्तिरोऽन्तर्दधात्यथ धीराः शक्नुवन्ति धरुणेषूदकेषु कर्मण आरम्भमारब्धुमज एकपाद्व्याख्यातः पृथिवी व्याख्याता समुद्रो व्याख्यातस्तेषामेष निपातो भवन्त्यपरस्यां बहुदेवतायामृचि ॥ १३ (३२) ॥

"पवित्रवन्तः परि वाचम्"—इति (ऋ स० ७, २, २८, ३)। पवित्रस्यार्थम्। प्रवर्ग विनियोग । रश्मय पवित्रम, तेऽमुष्मादादित्यमण्डलात् प्रसृताः मध्यस्थाने मरुत्प्रभृतिभिर्देवगणैः सयुज्यन्ते, तत्सयोगात् "माध्यमिका देवगणा" 'पवित्रवन्तः' "रश्मिवन्त." भवन्ति। ते च "माध्यमिका" 'वाच' 'परि' वार्य्य 'आसते'। स. 'वरुण.' विद्युदाख्यो मध्यमः 'पिता' पाता रक्षिता, 'एषा' मरुत्प्रभृतीनां 'प्रत्नः' "पुराण."

'व्रतं' 'कर्म' तदधिकारयुक्तम् 'अभिरचति'। कथमिति? तदुच्यते,—'मह.' महान् 'वरुण:' मध्यमः, महान्तं वा 'समुद्रम्' आदित्यं मेघजालेन यदा "तिरोदधाति" दुर्दिनं कृत्वा, वर्षति ओषधीषु, अथ 'धीराः' धीमन्तः 'धरुणेषु' "उदकेषु" 'शेकुः' "शक्नुवन्ति" "कर्मण." कृष्यादेः, वैदिकस्य वा 'आरम्भम्' "आरब्धुम्" प्रारम्भम् इत्येवमभिरचति। तेषां माध्यमिकानां व्रतं यदि छादयावावृणोति मेघैस्ततस्तेषामधिकारप्रतिलम्भो भवति ॥

"अज एकपाद्" "व्याख्यात.' इह तूत्तमः ॥

"पृथिवी" "व्याख्याता" ॥

"समुद्र" "व्याख्यात" ॥

"तेषामेष निपातो भवति" स्तुतिसाधारण्येन "अपरस्यां बहुदेवतायामृचि"—॥ १३ (३२) ॥

उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात् पृथिवी समुद्रः। विश्वे देवा ऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ता अवन्तु ॥ अपि च नोऽहिर्बुध्न्यः शृणोत्वजश्चैकपात् पृथिवी च समुद्रश्च सर्वे च देवाः सत्यवृधो वा यज्ञवृधो वा हूयमाना मन्त्रैः स्तुता मन्त्राः कविशस्ता अवन्तु मेधाविशस्ता दध्यङ् प्रत्यक्तो ध्यानमिति वा प्रत्यक्तमस्मिन् ध्यानमिति वाथर्वा व्याख्यातो मनुर्मननात्तेषामेष निपातो भवत्यैन्द्र्यामृचि ॥ १४ (३३) ॥

"उत नोऽहिर्बुध्न्यः शृणोतु"—इति (ऋ० सं० ४, ८, १०, ४, । य० वा० सं० ३४, ५३)। ऋजिश्वन आर्षम्। आग्निमारुते विनियोगः। 'उत नः' अप्यस्माकम् 'अहिर्बुध्न्यः' 'शृणोतु'। अपि "अज एकपाद्" अपि च 'पृथिवी' अपि च 'समुद्रः' 'विश्वेदेवाः' सर्वे एते, एवमादयो देवाः 'ऋतावृधः' "सत्यवृधः" "यज्ञवृधः" उदकवृधो वा 'हुवाना' आह्वयमानाः मन्त्रैः यजुर्मयैः, 'स्तुताः' च स्तोत्रैः सामभिः, 'कविशस्ता' कविभिः नैघण्टुकत्वेन मेधाविभिः शस्तैः शस्ताः स्तुतास्तेऽस्मानवन्तु।—इत्येतदाशास्महे॥

"दध्यङ्" "मनुः" "अथर्वा"—इति त्रितयमप्येतदादित्य एवैते तद्गुणयोगाद् भवन्ति; द्युस्थाने समाम्नानात्, पृथक्त्वे पुनर्द्युस्थानाः तत्सहचारिण एते ऋषयः॥

"दध्यङ्" "प्रत्यक्तो ध्यानम्" प्रतिगतो ध्यानमिति, ध्यानारम्भे ह्येष उक्तः स्वमधिकारमनुतिष्ठति। अथवा "प्रत्यक्तमस्मिन् ध्यानमिति वा" अधिकरणं कारकम् तथा हि तस्मिन् ध्यानकार्यं सफलं लभ्यत इति॥

"अथर्वा" "व्याख्यातः" निर्वचनतः, न ह्ययं स्वस्मादधिकारात् थर्वति, न कदाचित् स्वमधिकारं मुञ्चति॥

"मनुः" अयं "मननात्" न हि तदस्ति यदयं न मनुते॥

"तेषा मेष निपातो भवति ऐन्द्राग्न्यृचि"—। १४ (३१)॥

या मथर्वा मनु॑ष्पिता द॒ध्यङ् धिय॒मत्न॑त। तस्मि॒न् ब्रह्मा॑णि पू॒र्वथेन्द्र॑ उ॒क्था सम॑ग्मता॒र्चन्नु॑ स्व॒राज्य॑म्॥ यामथर्वा च मनुश्च पिता मानवानां दध्यङ् च धियमतनिषत तस्मिन्

ब्रह्माणि कर्माणि पूर्वेन्द्र उक्थानि च सङ्ग-
च्छन्तामर्चन्यो ऽनूपास्ते स्वाराज्यम् ॥१५ (३४)॥

इति निरुक्ते द्वादशाध्यायस्य
तृतीयः पादः ॥ १२, ३ ॥

"या मर्थर्वा"—इति (ऋ० सं० १, ५, ३१, ६)। गोतम-स्यार्षम्। पाष्ठिके पञ्चमेऽहनि विनियोग ऐन्द्रे सूक्ते। 'याम्' 'अथर्वा' 'मनुः' "च" 'पिता' "मानवानाम्" 'दध्यङ्' "च" धियम् 'अव्रत' "अतनियत"। एतद्गुणविशिष्टोऽयमादित्यः, यत्तत्कर्माद्योनिर्हृत्यादिलक्षणं तनोति, 'तस्मिन्' सति 'ब्रह्माणि' "अन्नानि" "उक्थानि" च शस्त्राणि, 'पूर्वथा' पूर्ववत्, 'इन्द्रे' 'समग्मत' "सङ्गच्छन्ताम्" समागच्छन्तु यज्ञेषु। किंलक्षणे इन्द्रे? इति, यत आह—'अर्चन्' "यः" इन्द्रः अभिपूजयते "स्वाराज्यम्" "अनु"—"उपास्ते" यथाशास्त्रमनुतिष्ठतीत्यर्थः ॥

पृथक्पक्षे आदित्यसहचारिण एते ऋषयः। तदा योज्यम् —य ऋषयः एते कर्म अतनियत यागम्, तस्मिन् ब्रह्माणि अन्नानि इन्द्रे पूर्ववत् समग्मत समागच्छन्तीति। शेषं समान-मेवेति ॥ १५ (३४) ॥

इति ऋज्वर्थाया निरुक्तवृत्तौ सप्तदशस्याध्यायस्य
(द्वादशाध्यायस्य) तृतीयः पादः ॥ १२, ३ ॥

चतुर्थः पादः।

अथातो द्युस्थाना देवगणास्तेषामादित्याः

प्रथमागामिनो भवन्त्यादित्या व्याख्यातास्तेषां भवति ॥ १ (३५) ॥

"अथातो द्युस्थाना देवगणाः"—इति। एवमादि वक्तव्यम्। अतः परमेतद्देवोत्तमं ज्योतिर्गणशब्दाभिधेयत्वेन निर्वाच्यम्, एतदेव हि गुणविकारोपलनापेचया भेदाभेदाभ्यां मन्त्रदृशः पश्यन्तः स्तुवते, तदर्थं विशेषतः पुनरधिकारवचनम् —"अथातो द्युस्थाना देवगणाः" इति। द्यौरेषां स्थानं त इमे द्युस्थाना इति। के पुनस्ते ? देवगणाः इति,—देवानां मित्र-प्रभृतीनां गणाः, पृथक्पचे गणा इति बहुवचनमर्थवत् ॥

"तेषामादित्याः प्रथमागामिनो भवन्ति"। ते कस्मात् ? प्रत्यचत्वाच्छब्दस्य, 'सप्तऋषयः' इत्येवमादीनाञ्च परोच-त्वात्। "आदित्याः" ते पुनरभिधाननिर्वचनतो "व्याख्याता." —"आदत्ते रसान्"—इत्यत्र, केवलन्त्वत्र बहुवचनमिति विशेषः ॥

"तेषाम्" आदित्यानाम् "एषा" प्राधान्यस्तुतिः "भवति" यां दृष्ट्वेह द्युस्थाने गणाभिधानेन समाम्नाताः ॥ १ (३५) ॥

इ॒मा गिर॑ आ॒दि॒त्येभ्यो॑ घृ॒तस्नूः॑ स॒ना-द्राज॑भ्यो जु॒ह्वा॑ जुहो॑मि। शृ॒णोतु॑ मि॒त्रो अ॑र्य॒मा भगो॑ नस्तुविजा॒तो वरु॑णो दक्षो॒ अंशः॑ ॥ घृतस्नू घृतप्रस्राविन्यो घृतप्रस्राविण्यो घृतसारिण्यो घृतसानिन्य इति वाहुतीरादि-त्येभ्यश्चिरञ्जुह्वा जुहोमि चिरञ्जीवनाय चिरं राजभ्य इति वा शृणोतु न इमा गिरो मित्र-

अर्य्यमा च भगश्च बहुजातश्च धाता दक्षो वरुणोंऽशश्चांशोऽशुना व्याख्यातस्तस्मक्षयो व्याख्यातास्तेषामेषा भवति ॥ २ (३६) ॥

"इमा गिर आदित्येभ्यः"—इति (ऋ० सं० २, ७, १, १,। य० वा० सं० ३४, ५४)। कूर्मस्य गार्त्समदस्य गृत्समदस्य वेयमार्षम्। 'इमा गिरः' 'घृतस्नूः' घृत माहुतिलक्षणं याः प्रस्नुवन्ति प्रक्षरन्ति ता घृतस्नूः। अथवा "घृतप्रस्नाविण्यः" धात्वन्यत्वमर्थैकत्वम्। "घृतसानिन्यः" वा, घृतम् देवान् प्रति सानयन्ति सम्भाजयन्तीति तथा, सनोतेः सम्भजनार्थस्य। "घृतसारिण्य." वा, "सृ गतौ"—इत्यस्य, देवान् प्रति घृतं याः सारयन्ति गमयन्तीति। ताभिः गीर्भिः, तैर्मन्त्रैः। 'सनाद्राजभ्य.' "चिरं राजभ्य." चिरन्तनेभ्यः सर्वलोकराजभ्य., अथवा सनादिति यावदायुष मनुष्यर्मेण 'जुह्वा' जुह्वसञ्ज्ञकेन पात्रेण 'जुहोमि'। ताः पुनर्गिरोऽस्मदाशीर्युक्ताः, तत्सर्हनाय 'शृणोतु' 'न.' अस्माकं 'मित्रः' 'अर्य्यमा' 'भगः "च" 'तुविजातः' "बहुजातश्च" "धाता" 'दक्ष.' 'वरुण' 'अंश.' "च"।

तुवीति बहुनाम। सर्वविधात्वाद्बहुजन्मा धाता, यावदधिकारं जन्मेति। "अंशः अशुना व्याख्यातः"॥

प्रत्येकमप्यते मित्रादयो व्याख्यानत्वेनोपेक्ष्याः, आम्नातिगौरवभयात्तु न पृथक् पृथक् व्याख्यानत्वेन समाम्नाताः। ते त्वादित्यलिङ्गलिङ्गितेषु मन्त्रेषु पृथक् पृथक् उपेक्ष्याः, तत्स्तुतीनां पृथगपि विद्यमानत्वात्॥

"सप्तऋषय." वक्तव्याः। ते पुनरमी "व्याख्याता." निर्वचनत, इह त्वभिधेया रश्मय इन्द्रियाणि वा.—"सप्त

ऋता मख्या" "ऋषिदर्शनात्"—इति, सप्त च ते ऋषयश्च सप्तर्षय ॥

"तेषामेषा" प्राधान्यस्तुति "भवति"—॥ २ (२६) ॥

सप्त ऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् । सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ ॥ सप्त ऋषयः प्रतिहिताः शरीरे रश्मय आदित्ये सप्त रक्षन्ति सदमप्रमादं संवत्सरमप्रमाद्यन्तः सप्तापनास्त एव स्वपतो लोकमस्तमितमादित्यं यन्त्यत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ वाय्वादित्यावित्यधिदैवतमथाध्यात्मं सप्त ऋषयः प्रतिहिताः शरीरे षडिन्द्रियाणि विद्यासप्तम्यात्मनि सप्त रक्षन्ति सदमप्रमादं शरीरमप्रमाद्यन्ति सप्तापनानीमान्येव स्वपतो लोकमस्तमितमात्मानं यन्त्यत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ प्राज्ञश्चात्मा तैजसश्चेत्यात्मगतिमाचष्टे तेषामेषापरा भवति ॥ ३ (२७) ॥

"सप्त ऋषयः प्रतिहिता"—इति (य० वा० सं० ३४, ५५)। हिरण्यगर्भस्यार्षम् । आथर्वणे आत्मस्तुतौ विनियोग, उत्तरा च। शृणाति सर्वमिदमिति शरीरमादित्य, आत्म-

यथाह्या सर्वमिदमस्मिन्नाश्रितमिति। तस्मिन् 'सप्त ऋषयः' "रश्मयः" 'प्रतिहिताः' प्रत्येकं हिताः निहिताः। ते पुनः सप्तैव अन्यूनाधिकाः सन्तः, सार्वदिकमुदकमुपनयन्तः, तेनेहास्तमादित्यं 'सद' सदैव 'अप्रमादम्' "अप्रमाद्यन्तः" अनुक्रमेण स्वस्य कर्मणः 'रक्षन्ति' निरिन्धनः पार्थिवोऽपि ह्यग्निः इन्धनक्षयान्निर्वाप्येत, "त एव" सप्त स्वप्ताः "आपनाः" सर्वस्य लोकस्य व्यापनाः, 'स्वपतः' अस्तमुपगच्छतः, अस्यादित्यस्यैव तं 'लोकम्' आत्मानं गच्छन्ति, वाह्यं मण्डलं प्रविशन्ति। तेष्वनुप्रविष्टेषु 'तत्र' सुप्तेषु उपरतप्रकाशवृत्तिषु तत्रास्तमितौ 'जाग्रतः' तन्मण्डलान्तरपुरुषः, तदधिष्ठाता, योऽसौ हिरण्यश्मश्रुः हिरण्यकेश इति विज्ञायते, वायुश्च।— "इत्यधिदैवतम्"।

"अथाध्यात्मम्"।—मण्डलवदस्यच्छरीरे रश्मिवदिन्द्रियाणि प्रतिहितानि निहितानि, तच्छरीरं नित्यं रूपाद्यालोकनाद्युपकारेण रक्षन्ति अप्रमाद्यन्ति, सप्तापनानि व्यापनानि विषयाणां शरीरस्य वा। तान्येव स्वपतोऽस्य जीवस्य सुखदुःखभोक्तुः लोकं शरीरमेव प्रत्यस्तमितमीयुः,—बुद्धिद्वारेण भोक्तर्य्येव भावनानुरूपेण लीयते। तद्भावनोपपादकः स्वप्नभोक्तुः स्वप्नो भवति, तत्र जाग्रतः शरीरपरिपालनार्थम्, प्राज्ञश्चात्मा परमात्मा चिन्मात्रेण यः शरीरं व्याप्य वर्त्तते, तैजसश्च प्राणोऽयं पानं पवनव्यूहश्च रसान्तर्भूत तेजोवायुवृत्तिः।

"तेषामेषा अपरा भवति"—। सा पुनः किमर्थम्? रश्मय एवेति स्फुटतायै॥ २ (३७)॥

तिर्य्यग्बिलश्चमस ऊर्ध्वबुध्नो यस्मिन्यशो

निहितं विश्वरूपम्। अत्रासत ऋषयः सप्त साकं ये अस्य गोपा महतो बभूवुः॥ तिर्य्यग्बिलश्चमस ऊर्ध्वबन्धन ऊर्ध्वबोधनो वा यस्मिन्यशो निहितं सर्वरूपमत्रासत ऋषयः सप्त सहादित्यरश्मयो ये अस्य गोपा महतो बभूवुरित्यधिदैवतमथाध्यात्मं तिर्य्यग्बिलश्चमस ऊर्द्ध्वबन्धन ऊर्द्ध्वबोधनो वा यस्मिन्यशो निहितं सर्वरूपमत्रासत ऋषयः सप्त सहेन्द्रियाणि यान्यस्य गोप्तृणि महतो बभ्रुवुरित्यात्मगतिमाचष्टे देवा व्याख्यातास्तेषां मेषाभवति ॥ ४ (३८) ॥

"तिर्य्यग्बिलश्चमस"—इति (अथ० सं० १०, २६, ८)। तिर्य्यञ्चोऽस्य मण्डलस्य मधुपूर्णस्येव रश्मिच्छिद्राणि। चमन चोदकमेष सनीतीति चमस। ऊर्द्धं चैतद्दमाभूतसमन्नवन्ध निपध्यत इति 'ऊर्ध्वबुन्ध' ऊर्ध्वं वार्वास्थित प्रकाशेन बाधयतीति ऊर्ध्वबुध्न, तस्मिन् चमसे' मण्डले 'यश' उदक 'निहित' नियमेन अधिक वा हितमवस्थापितम, 'विश्वरूपम्' अनेकप्रकारमनेकरूपम्। के पुनस्तन्निहितम्? इति—'ये' अस्य' 'महत' जगत, आत्मनो वा 'गोपा' गोप्तार, एते रश्मय 'बभूवु' भवन्ति। ये' च 'अत्र' एतस्मिन् मण्डले 'साकम्' एकीभूतास्तदधिष्ठाता सह 'आसते'। तैर्हि चतसृषु दिक्षु ऊर्ध्वमधो मण्डल चोत्सृष्टानि यानि ज्योतींषि अस्य ते

रश्मय, सप्त सर्पणा', ऋपणाद्दर्शनादस्य धर्मस्य' भवय उच्यन्ते ।—"इत्यधिदैवतम्" ॥

"अथाध्यात्मम्"—इति। तिर्यक्छिद्रमिदमेव शिरश्-मस', चम्यन्ते ह्यनेन रसा इति। "ऊर्ध्वबन्धनश्च" उपरि ह्यवस्थितमेतद्बन्धनमस्य शरीरस्य, एतद्वियोगे हि विस्रस्यते शरीरम्। यस्मिन् यशो निहित विश्वरूप नानाप्रकार मिन्द्रियत्वेन भृत रसाख्य प्राणाख्य वा। तस्य चमसस्य ये विधातार, तद्द्वारेण अस्य शरीरस्य महतो गोप्तार, तत्रैव चमसान्तरमनुप्रविष्टा 'साक' "सप्त" तदाश उपजीवन्त आसते—"इत्यात्मगतिमाचष्टे" ॥

"देवा" वक्तव्या:। ते पुन' "देवो दानाद्वा दीपनाद्वा द्योतनाद्वा"—इत्यत्र निर्वचनत "व्याख्याता" इह तु रश्मयो बहुवचनेनोच्यन्त इति विशेष ॥

"तेषामेषा" प्राधान्यस्तुति "भवति"—॥ ४ (३८) ॥

दे॒वानां॑ भ॒द्रा सु॑म॒तिॠ॑जूय॒तां दे॒वानां॑ रा॒तिर॒भि नो॒ निव॑र्त्तताम्। दे॒वानां॑ स॒ख्यमुप॑-सेदिमा व॒यं दे॒वा न॒ आयु॒: प्रति॑रन्तु जी॒वसे॑ ॥ देवानां वयं सुमतौ कल्याण्यां मता-वृजुगामिनामृतुगामिनामिति वा देवानां दानमभि नो निवर्त्ततां देवानां सख्यमुपसी-देम वयं देवा न आयुः प्रवर्द्धयन्तु चिरञ्जीव-नाय विश्वेदेवाः सर्वे देवास्तेषामेषा भवति ॥ ५ (३९) ॥

"देवानां भद्रा"—इति (ऋ० सं० १; ६, ५; २) । गोतमस्यार्षम्। देवेभ्यो वशामालभेतेति विनियोगः। अस्य पशोर्वपायाः पुरोऽनुवाक्या। य एते 'देवाः' रश्मयः नित्यं ऋज्वेव मण्डलादनावरणत्वादन्तरिक्षस्य सर्वतो यन्ति। अथ वा 'ऋजूयताम्' "ऋतुगामिनाम्" ऋताद्वती यथाकालमस्मात् मण्डलात् गच्छताम्। 'सुमतिः' शोभना मतिः, प्रसादाभिमुखी मतिः। सा "नः" अस्मान् प्रति 'निवर्त्तताम्' नियमेन वर्त्तताम्, तत्पूर्विका च 'रातिः' धनलाभोऽस्मान् प्रति नियमेन वर्त्तताम्। ततश्च तेन धनलाभेन उपजनितसामर्थ्याः सन्तः 'वयम्' तेषामेव 'देवानां' 'सख्यं' समानता याज्ञे कर्मणि समानमङ्गभावम् 'उपसेदिम' "उपसीदेम", उपगच्छेम वयम्। ततश्च तथाभूतानामस्माकम् 'आयुः' ते देवाः 'प्रतिरन्तु' "प्रवर्द्धयन्तु" 'जीवसे' "चिरं जीवनाय"।—इत्येतदाशास्महे ॥

"विश्वेदेवाः" वक्तव्याः। "सर्वे देवाः" त एव रश्मयः, उपहितविश्वविशेषणाः सन्तो विश्वेदेवा भवन्ति ॥

"तेषां" तदभिधानविशिष्टाम् "एषा" प्राधान्यस्तुतिः "भवति"—॥ ५ (२८) ॥

ओमासश्चर्षणीधृतो विश्वेदेवास आगत। दाश्वांसो दाशुषः सुतम्॥ अवितारो वावनीया वा मनुष्यधृतः सर्वे च देवा इहागच्छत दत्तवन्तो दत्तवतः सुतमिति तदेतदेकमेव वैश्वदेवं गायत्रं तृचं दशतयीषु विद्यते यत्तु किञ्चिद्बहुदैवतं तद्वैश्वदेवानां स्थाने

युज्यते अदेव विश्वलिङ्गमिति शाकपूणिरन्त्यन्तगतस्त्वेष उद्देशो भवति बभ्रुरेक इति दश द्विपदाश्चलिङ्गाः भूतांशः काश्यप आश्विनमेकलिङ्गमभितष्टीयं सूक्तमेकलिङ्गं साध्या द्वैवाः साधनात्तेषामेषा भवति ॥ ६ (४०) ॥

"ओमासश्चर्षणीधृत"—इति (ऋ० सं० १, १, ६, ११ य० वा० स० ७, ३३)। मधुच्छन्दसा दृष्टा। प्रउगे पड़े विनियोग। वैश्वदेवग्रहेन प्रातःसवने यहो गृह्यते। हे 'विश्वेदेवा।' ये यूयम् 'ओमास.' "अवितार" रक्षितार, 'चर्षणीना' मनुष्याणा स्वेनोपकारेण, "अवनीया वा" तर्पणार्हा। 'धृत' धारयितारश्च स्थितिकर्त्तार। ते यूय 'दाश्वास' "दत्तवन्त" मनसा कृतसङ्कल्पा भूत्वा इद नामास्माभिरस्मै देयमिति। तत अस्य 'दाशुष' "दत्तवत" हवींषि यजमानस्येत 'सुतम्' अभिषुत सोम पातुम् "आगत"।—इत्येतदाशास्महे ॥

अधुना विश्वान् देवानधिकृत्य तद्गतमेवाधियज्ञं विचार विधित्सुराहन्ति।—"तदेतदेकमेव वैश्वदेव गायत्र तृचम्"—इत्येवमादि। 'तत्'—इति समाम्नायस्यानुस्मृतये। 'एतत्'—इति वक्ष्यमाणार्थसन्निधीकरणाय। 'एकं' 'तृच' 'सूक्तं' 'वैश्वदेव' 'गायत्र' गायत्रेण छन्दसा युक्त 'दशतयीषु' सर्वास्वपि बह्वृचु शाखासु 'विद्यते'—नान्यदस्त्येवाकिञ्छन्दसि, प्रयोजन च गायत्रच्छन्दोयुक्तैरन्यैरपि बहुभिर्वाद्दैवैर्मन्त्रैर धियज्ञ। तत्र किं कर्त्तव्यम्?—इति, यत आह,—"यत्तु किञ्चिद्बहुदैवत" मन्त्रजात गायत्रेण छन्दसा युक्तम्, "तद्वैश्व-

देवानां स्थाने युज्यते"। न्याय्यमित्यतः "यदेव" "विश्वलिङ्गम्" विश्वशब्दोपेत मन्त्रजात सूक्तं वा, तदेव वैश्वदेवाना स्थाने विनियुज्यते,— न बहुदेवतामात्रेण—"इति" "शाकपूणि." मन्यते। तत् किमस्यापि यास्काचार्य्यस्यैतदेवाभिमतमुत न? इति, यत आह,—"अनत्यन्तगतस्त्वेष उद्देशो भवति" अनैकान्तिक एष उद्देश । उद्देश प्रतिज्ञा,—"यदेव विश्वलिङ्गोपेत तदेव वैश्वदेवाना स्थाने विनियुज्यते"—इति। कथमनैकान्तिकम्? इति, वैश्वदेव हि मन्त्रजात समाम्नाये क्रियार्थ सुत्पद्यमानमाम्नायस्य क्रियार्थत्वाद्गायत्रे छन्दसि तावदेवोत्पत्तुमर्हति, विश्वयुक्तमन्त्रजातवद्यावत्कर्मसु सर्ववैश्वदेवेषु तच्छन्दस्केषु अलमिति,— न च तत्सर्वास्वपि दश तयीष्वस्ति छन्दस्यलङ्कर्मोत्पादे, प्रयोजन च तच्छन्दोयुक्तैरपि विविधैर्मन्त्रैर्भवति, न च ते तथाविधा सन्तीति बहुदेवताश्च तस्मिन् छन्दसि सन्ति। तत्किमस्तु तस्य कर्मण प्रहाणम्, उत वा तत्स्थाने बहुदेवतानि सूक्तान्योप्यन्ताम? इति उच्यते,—युक्तं यद्बहुदेवतानि प्रोप्येरन्निति यास्काचार्य्य पश्यन्नाह—"यत्तु किञ्चिद्बहुदेवत तद्वैश्वदेवाना स्थाने युज्यते"। सेयमनुपपत्तिर्गायत्रे छन्दसि वैश्वदेवाना मन्त्राणा यावदलङ्कर्मणि गमयति। बहुविश्वशब्दयोरितरतरार्थाभिधेयप्रत्यासत्त्या बहुदेवान्यपि वैश्वदेवाना स्थाने युज्यन्त एवेति। अपि चैवमनत्यन्तगत इत्युद्देशः। येन "भूतांश काश्यप आश्विनमेकलिङ्गम्"। भूतांशो नाम ऋषि काश्यप, स एकेनाश्विलिङ्गेन युक्तमनेकर्चं सूक्त ददर्श, तत्र यास्वप्यश्विलिङ्गमृचु नास्ति तासामप्याश्विनीत्वं तेनैवैकेनाश्विलिङ्गेन, यथैकेनापि छत्रिणा मध्यगतेन छत्रिणो भवन्ति,—एवमेकेन विश्वलिङ्गवचेन यावन्ति सूक्तानि कर्माणि सयुज्यन्ते तई

देवतानि अविस्पष्टलिङ्गान्यपि तानि तदर्थसाधकानीति ॥

ऋध्याम अग्निलिङ्गम्, येन पर्कोसूक्तं सर्वमाग्निनम्।
"ऋध्याम स्तोमं सनुयाम वाजमा नो मन्त्रं सरथेहोपयातम्।
यशो न पक्वं मधु गोष्वन्तरा भूतांशो अश्विनोः काममप्राः॥"—
इति (ऋ॰ सं॰ ८, ६, २, ६। १०, ८, १, ११,)। हे अश्विनौ!
वयं 'स्तोमं' त्रिवृत्पञ्चदशादिकम् 'ऋध्याम' ऋध्याम, वर्द्ध-
येम। किञ्च, 'वाजं' हविर्लक्षणमन्नं युवाभ्यां 'सनुयाम' प्रय-
च्छेम। तस्माद् युवां 'सरथा' सरथौ, समानरथौ, एकमेव
रथमारूढौ सन्तौ 'इह' अस्मिन् कर्मणि 'नः' अस्मदीयं 'मन्त्रं'
मननीयं स्तोत्रम् 'उपयातम्' उपागच्छतम्। 'गोष्वन्तः' गोषु-
अन्तर्वर्त्तिनं 'पक्वं' परिणतम्, तदेव 'मधु' मधुरं 'यशो न'
यश इवान्नम्, पयोऽर्थं, क्षीराद्यादिलक्षणम्, शरावीरपात्रे
अवनीयमानम्, अवदानादिव आगच्छतमिति सम्बन्धः। एव-
मुक्तप्रकारेण 'भूतांशः' एतन्नामा ऋषिः 'अश्विनोः' 'कामम्'
अभिलाषमाप्नीयाभिः स्तुतिभिः 'अप्राः' आपूरयत्, सम्पूर्णमका-
र्षीदित्यर्थः। "प्रा पूरणे" आदादिकः (प॰), व्यत्ययेन मध्यमः॥

"अभितद्दीयं सूक्तम्" ऐन्द्रम्, तदपि "एकलिङ्गम्"—इति॥

यथा—"इमं तु षमिन्द्र सुषवाणमिन्द्रमस्मिन् भरे नृतमं
वाजसातौ। शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि
सञ्जितं धनानाम्॥"—इति। विजयाय 'समत्सु' संग्रामेषु
नित्यं 'घ्नन्त' 'वृत्राणि' वारकाणि शत्रुजातानि, 'सञ्जितं'
समस्तानां वीराणां धनानाञ्च जेतारम्, 'उग्रम्' शूरम्,
उत्साहेन महान्तम्, 'नृतमम्' जगत, अतिशयेन नेतारम् 'ऊतये'
रक्षणाय 'अस्मिन्' 'भरे' सङ्ग्रामे 'वाजसातौ' अस्मिन् सङ्ग्रामे
हिंसकानि अस्मत्प्राणे तस्मिन्, 'हुवेम' वयमाह्वयामहे, तम्
'इन्द्रम्' अवमादिगुणयुक्तमात्मनो विजयायेति॥

"साध्या" "देवाः" "साधनात्" ते हि सर्वमिदं साधयन्ति, यदन्येन सर्वकर्मभिरसाधितं तत्साधयन्तीति साध्या उच्यन्ते। ते च पुनः प्राणाः विश्वसृज ऋषयः, ये सहस्रसंवत्सरसत्रेणेदं विश्वमसृजन्त, त एवैतेऽधिदैवं रश्मय। विज्ञायते हि—"प्राणा वै सप्त ऋषयः साध्या विश्वसृज."—इति।

"तेषामेषा" प्राधान्यस्तुति "भवति"—॥ ६ (४०) ॥

य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वास्तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन्। ते ह॒ नाकं॑ महि॒मानः॑ सचन्त॒ यत्र॒ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः॥ यज्ञेन यज्ञमयजन्त देवा अग्निनाग्निमयजन्त देवाः अग्निः पशुरासीत्तमालभन्त तेनायजन्तेति च ब्राह्मणं तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः समसेवन्त यत्र पूर्वे साध्याः सन्ति देवाः साधना द्युस्थानो देवगण इति नैरुक्ताः पूर्वं देवयुगमित्याख्यानं वसवो यद्विवसते सर्वमग्निर्वसुभिर्वासव इति समाख्या तस्मात् पृथिवीस्थाना इन्द्रो वसुभिर्वासव इति समाख्या तस्मान्मध्यस्थाना वसव आदित्यरश्मयो विवासनात्तस्माद् द्युस्थानास्तेषामेषा भवति ॥ ७ (४१) ॥

"यज्ञेन यज्ञमयजन्त—इति (ऋ० सं० २, १, २१, ४। ८, ४, १८, ६। य० वा० सं० ३१, १६)। दीर्घतमस आर्षम्। "अग्निनाग्निमयजन्त देवाः"। उक्तञ्च—"तमु त्रिन्ययुः अर्वगणं सर्वनामानम्"—इति, 'तम्' अग्निं स्थावरजङ्गमभावेनेति। "तं मंथरार्था वयं यमत्वा"—इत्येतस्माद् गमनतः प्रयोक्तुः सर्वमिदमग्निरित्यभिप्रेत्य ब्रवीति।—'यज्ञेन' "अग्निना" स्थावरजङ्गमभावमापन्नेन हविर्भूतेन 'यज्ञम्' "अग्निम्" एव सर्वदेवताभूतमादित्यादिमण्डलाश्रयिणं महान्तमात्मानम् 'अयजन्त' 'देवाः' देवभाविनः, 'पूर्वे' ज्ञानकर्मसमुच्चयकारिणो यजमानभावमापन्ना, 'साध्याः' विश्वसृजः ऋषयः, प्राणाः। 'तानि धर्माणि' तानि कर्माणि, तथाविधज्ञानयुक्तानि, 'प्रथमानि' मुख्यानि महदात्मभावापत्तये 'आसन्' तैरपि क्रियन्ते इत्यर्थः। 'ते' च तानि कृत्वा नियमेनैवानन्यभावित्वात् तत्फलस्य 'महिमानः' तदानुपूर्व्येण जातमहदात्मभावाः सन्तः, तमेव 'नाकं' महान्तमात्मानम् एकान्तसुखं 'सचन्त' तद्भावमेव ते आपेदिरे। किं त एव? इति, नेत्युच्यते,—"यत्र पूर्वे साध्याः सन्ति देवाः"। शब्दार्थोपदेशनित्यत्वाद्यत्र पूर्वे च पूर्वतरे च ज्ञानकर्मसमुच्चयकारिण आसते सन्ति जग्मुरित्यर्थः। विज्ञायते हि—"विश्वसृजः प्रथमं सत्रमासत"—इति॥

शिरो ह्याध्यात्मं मुख्यानभक्तिः, अतः सप्त ऋषयः, देवाः, विश्वे देवाः, साध्या इति सर्वे एते प्राणाः, रश्मयो वेत्युपपद्यते॥

ब्राह्मणमपि चैतमर्थमेवानुविदधाति।—"अग्निः पशुरासीत्"—इत्येवमादि॥

"वसवः"—इति, वक्तव्यम्। ते पुनरमी विज्ञाताः। ते

यस्मात् सर्वमिदं विभागेनावस्थितमाच्छादयन्ति। कथम्? इति:—"वासवोऽग्निरिति समाख्या, तस्मात् पृथिवीस्थाना" "इन्द्रो वसुभिर्वासव —इति समाख्या, तस्मात् मध्यस्थाना:" "वसव आदित्यरश्मयो विवासनात्, तस्मात् द्युस्थाना:"॥

"तेषाम्" "एषा" प्राधान्यस्तुति: "भवति"—॥ ७ (४१)॥

सुगा वो॑ देवा॒ सुपथा॑ अकर्म॒ य आज॒ग्मु॒: सवनमिदं जुषाणा:। जक्षिवांस॑: पपिवांसश्च॒ विश्वे॒ऽस्मे धत्त वसवो॒ वसू॑नि॥ स्वागमनानि वो देवा: सुपथान्यकर्म य आगच्छत सवनानीमानि जुषाणा: खादितवन्त: पीतवन्तश्च सर्वेऽस्मासु धत्त वसवो वसूनि तेषामेषापरा भवति॥ ८ (४२)॥

"सुगा वो॑ देवा॒:"—इति (य० वा० म० ८, १८)। परमेष्ठिन आर्षम्। समिष्टयजु:षु विनियोग:। हे 'देवा:!' ये यूयम् 'आजग्मु:' नित्यमागच्छत 'इदं सवनम्' इमं यज्ञम्, पत्नीभि: सह 'जुषाणा:' प्रीयमाणा:। तेषां 'व:' 'अनुगच्छताम्' सुगा:' "स्वागमनानि" शोभनानि आगमनानि पुन:पुनरध्वरेषु। एवमेव "सुपथानि" सुमार्गाणि सन्तु। किञ्च एतस्मिन् यज्ञे 'जक्षिवांस:' "खादितवन्त:" हवींषि, 'पपिवांसश्च' "पीतवन्तश्च" सोमम्, यूयं सन्त:, 'अस्मे' "अस्मासु" 'धत्त' निधत्त हे 'वसव:!' 'वसूनि'।—एतदाशास्महे।

समिष्टयजु:षु तृतीयसवने विनियोगादेव दुरूहाना: वसव:॥

"त्रिस्थाना"—इत्युक्तम्, यत इतरयोरपि स्थानयो प्रदर्शयति,—"तेषाम्" एषा "अपरा भवति"—॥ ८ (४२) ॥

ज्मया अत्र वसवोरन्तदेवा उरावन्तरिक्षे मर्जयन्त शुभ्राः। अर्वाक् पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य॥ ज्मया अत्र वसवोऽरमन्त देवा ज्मा पृथिवी तस्यां भवा उरौ चान्तरिक्षे मर्जयन्त गमयन्त शुभ्राः शोभमाना अर्वाच एनान् पथो बहुजवाः कुरुध्वं शृणुत दूतस्य जग्मुषो नो अस्याग्नेर्वाजिनो व्याख्यातास्तेषामेषा भवति ॥ (४३) ॥

"ज्मया अत्र वसव"—इति (ऋ० स० ५, ४, ६, ३)। वसिष्ठस्यार्षम्। "ज्मा पृथिवी" "तस्या" "भवा" ये निय भवन्ति, ते 'ज्मया'। 'रन्त' "अरमन्त"। 'अत्र' एतस्मिन् कर्मणि, अस्मिन् वा लोके। 'देवा' "वसव"। ये "च" "उरौ" विस्तृते अन्तरिक्षे विस्तीर्णे 'मर्जयन्त' मार्ष्टिर्गत्यर्थे, "गमयन्त" यदाक्षेपां गमयितव्यम्, अथवा वर्त्तमानाः। 'शुभ्रा' "शोभमाना."। एवमनयो स्थानयो वसून् विभज्याधुना युष्मानाह्वान् कृत्वा ब्रवीति,—ये यूयमिह त्रिस्थाना, तान् वा ब्रवीमि,—निष्ठम् 'अस्य' "अग्ने" 'न' अस्मद् "दूतस्य" 'जग्मुष' युष्मान् प्रति गतवतः "शृणुत" यदय ब्रवीति, श्रुत्वा चास्मान् 'अर्वाग्' आभिमुख्येन उरुज्रय' "बहुजवा." बहु

प्रकार शतसहस्रमागमनेनैव 'पथ.' मार्गान् प्रहतान् "कुरुध्वम्" ।—इत्येतदाशास्महे ॥

"वाजिन." "व्याख्याता:"—"अपि स वाजी वेजनवान्" —इत्यत्र, केवलमत्र बहुवचनकृतो विशेष:, रश्मयश्च अभिधेया.। पृथक्त्वे देवाश्वा: ॥

"तेषाम् एषा भवति" प्राधान्यस्तुति'—॥ ८ (४३) ॥

शन्नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः । जम्भयन्तोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः ॥ सुखा नो भवन्तु वाजिनो ह्वानेषु देवतातौ यज्ञे मितद्रवः सुमितद्रवः स्वर्काः स्वञ्चना इति वा स्वर्चना इति वा स्वर्चिष इति वा. जम्भयन्तोऽहिञ्च वृकञ्च रक्षांसि च क्षिप्रमस्मद्यावयन्त्वमीवा देवाश्वा इति वा देवपत्न्यो देवानां पत्न्यस्तासामेषा भवति ॥ १० (४४) ॥

"शन्नो भवन्तु वाजिन"—इति (ऋ० स० ४, २, २८, ७। य० वा० स० ६, १६)। वसिष्ठस्यार्षम्। वाजिनयागे विनियोग.। 'देवताता' एतस्मिन् "देवतातौ" "यज्ञे" "हवेषु" "ह्वानेषु" 'शम्' 'न.' अस्माकं "सुखा." 'भवन्तु' सन्तु 'वाजिन.'। किंलक्षणा: ? 'मितद्रव.' "सु" ष्ठिटं शोभनं ये द्रवन्ति, 'स्वर्का' ये "स्वञ्चना." शोभनम् अञ्चन्ति, गच्छन्ति, "स्वर्चना" शोभन वा अर्चन येषां स्तुति:, "स्वर्चिष. वा" येषां शोभना अर्चिषो दीप्तय. त आगच्छन्तु ।

आह्वानेष्वस्माक 'जम्भयन्त'। किम्? इति,—'अहिम्' "च" 'वृकम्' "च" ययास्मानाहन्ति, यश्च वृकस्तस्करो मुष्णाति, 'रक्षांसि' "च" येऽस्मान् रहसि चिखन्ति, तान्यस्मत्तः 'जम्भयन्त' हिंसन्त 'सनेमि' "चिप्रम्"। सामर्थ्यादिह सनेमि —इति चिप्रनाम। 'युयवन्' सामर्थ्यात् अपेत्यध्याहृत्य अप "यावयन्तु" अपमिश्रयन्त्वित्यर्थं, दृष्टश्च रक्षसा नाशन न मिश्रणमिति॥

"देवपत्न्यः" वक्तव्याः। ता पुन "देवाना पत्न्यः" पालयित्र्यः पालनीया वा। पत्नीसयाजेष्वेता इज्यन्त इत्यत स्तृतीयसवनभक्तित्वादादित्य भजन्ते। तदुक्तम्,—"अथैता न्यादित्यभक्तीन्यसौ लोकस्तृतीयसवनम्"— इति॥ १० (४४)॥

दे॒वानां॒ पत्नी॑रुश॒तीर॑वन्तु॒ नः॒ प्राव॑न्तु नस्तु॒जये॒ वाज॑सातये। याः पार्थि॑वासो॒ या अ॒पामपि॑ व्र॒ते ता नो॑ देवीः सु॒हवाः॒ शर्म॑ यच्छत॥ देवानां पत्न्य उशत्योऽवन्तु नः प्रावन्तु नोऽपत्यजननाय चान्नसंसननाय च याः पार्थिवासो या अपानपि कर्मणि व्रते ता नो देव्यः सुहवाः शर्म यच्छन्तु शरणान्तासाम॒पापरा भवति॥ ११ (४५)॥

"दे॒वाना॒ पत्नी॑"—इति (ऋ॰ स॰ ४, २, २८, ७)। प्रति पदव्याख्यानम्। आग्निमारुते पत्नीसयाजेषु च विनियोग। या एता देवपत्न्यो नित्यमस्मत्तो हविरश्नन्ति कामयन्ते, ता अस्मत्तो हविरुपभुज्य ततोऽस्मानवन्तु प्रतितर्पयन्तु

धनेन। किञ्च, "प्रावन्तु नस्तुजये"। प्रकर्षेण अवन्तु रक्षन्तु "अपत्यजननाय" 'वाजसातये' च "अन्नसमननाय" अन्नसम्भजनाय "च"। कतमास्ता.? 'या. पार्थिवास.' पृथिव्या भवा, 'याः अपामपि' 'व्रते' "कर्मणि" वर्षोत्सर्गे व्याप्ता, सर्वा. 'सुहवा.' स्वाह्वानाः अस्माकं 'यच्छत' "यच्छन्तु" ददतु 'शर्म' "शरण" गृह सुखं त्राणं वा।—इत्येतदाशास्महे॥

"तासाम् एषा अपरा भवति"—। सा पुनः किमर्थम्? सामान्यतः पूर्वस्यामुक्ता, विशेषतः परस्यामुच्यन्ते, पूर्वयैव समानार्थविनियोगा॥ ११ (४५)॥

उत ग्ना व्यन्तु देवपत्नीरिन्द्राण्य१ग्नाय्यश्विनी राट्। आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर्य ऋतुर्जनीनाम्। अपि च ग्ना व्यन्तु देवपत्न्य इन्द्राणीन्द्रस्य पत्न्यग्नाय्यग्नेः पत्न्यश्विन्यश्विनोः पत्नी राट् राजते रोदसी रुद्रस्य पत्नी वरुणानी च वरुणस्य पत्नी व्यन्तु देव्यः कामयन्तां य ऋतुः कालो जायानां य ऋतुः कालो जायानाम्॥ १२ (४६)॥

इति द्वादशाध्यायस्य चतुर्थः पादः॥१२, ४॥

"उत ग्ना व्यन्तु देवपत्नीः"—इति (ऋ० स ४, २, २८, ८। अथ० सं० ७, ४, ११, २)। पुरुषैः पीतमस्त्यादिभि, 'उत' "अपि" 'ग्ना' स्त्रियः 'व्यन्तु' पिबन्तु एतदाज्यम्। कतमाः? "इन्द्राण्य१ग्नाय्यश्विनी राट्"। 'आशृणोतु' च य 'रोदसी' 'वरुणानी' च आभिमुख्येन च स्थित्वा शृणोतु।

"रोदसी रुद्रस्य पत्नी"। आथर्वणे रोदसीत्यप्रगृह्यं पदम्, तदपेक्ष्यैकवचनेन भाष्यकारो निराह—"रोदसी रुद्रस्य पत्नी" इति। "वरुणानी च वरुणस्य पत्नी"। सर्वाः अप्येताः 'व्यन्तु' पिबन्तु एतदाज्यम्। "य ऋतुर्जनीनाम्"। यः "काल" भोजनकालः "जायानाम्"। तस्मिन् काले दीयमानम्। कथासौ? भुक्तवत्सु पुरुषेष्विति ॥१२ (४६)॥

इति ऋज्वर्थायां निरुक्तवृत्तौ सप्तदशाध्यायस्य (द्वादशाध्यायस्य) तुरीयः पादः॥ १२। ४॥

जम्बूमार्गाश्रमवासिनो भगवद्दुर्गाचार्यस्य कृतौ
ऋज्वर्थायां निरुक्तवृत्तौ
सप्तदशोऽध्यायः (द्वादशोऽध्यायः) समाप्तः॥१२॥

(अथातोद्युस्थानावसातिपुरुषे हृजाततांमा-

तर्युजामातर्यजप्यसुपस्तच्चित्रमेताउत्याःसुकिंशु-

९ १० ११ १२ १३
कंदपाकपाय्यपागूहन्त्वष्टादुहिचेसविताविश्वा-

१ १४ १५ १६ १७ १८ १९
रूपाणिमातर्जितसुदुत्यञ्चित्रंशुक्रन्तेपयस्सयद्द्रं-

२० २१ २२—२५
विष्णुर्विश्वानरोविश्वानरस्ययेनापावकेतिचतु-

२६ २७ २८ २९ ३०
ष्कंवेष्य१ग्निंवयःकेशिनःपुनरेहियस्मिन्वृक्षेपा-

३१　३२　३३　३४
वीरवीयदिन्द्राग्नीपविचवन्तउतनोह्रियमथर्वा-
३५　३६　३७　३८
थातोद्य स्थानादेवगणाद्माग्गिरःसप्तऋषयस्ति-
३९　४०　४१　४२　४३
र्यगुविलोदेवानाम्भद्रोमांसोयज्ञेनसुगावोजम-
४४　४५　४६
याश्वत्थन्नोभवन्तुदेवानांपत्नीरुतग्नाव्यन्त्विति
षट्चत्वारिंशत् ॥)

इति निरुक्ते (उत्तरषट्के) द्वादशोऽध्याय: ॥१२॥

(दैवत काण्ड समाप्तम ।)

इति नैरुक्तोत्तरार्द्ध: समाप्त: ।

अथ परिशिष्टम् ।



अथ त्रयोदशाध्यायस्य

प्रथमः पादः ।

अथेमा अतिस्तुतय इत्याचक्षतेऽपि वा सम्प्रत्यय एव स्यान्माहाभाग्याद्देवतायाः सोऽग्निमेव प्रथममाह त्वमग्ने द्युभिस्त्वमाशुशुक्षणिरिति यथैतस्मिन् सूक्ते न हि त्वदारे निमिषश्च नेश इति वरुणस्याथैन्द्रस्य ॥ १ ॥

"अथेमा अतिस्तुतय इत्याचक्षते"—इत्येवमादि वक्तं प्रकृतशेषमनुवर्त्तते। किञ्चात्र प्रकृतम् ? स्तुतिलब्धा देवतेति—"यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते", —इत्यत्र। ताः स्तुतयः कर्माधिकारनिरताः, स्वकर्माधिकारातिक्रमेण स्वगुणातिशयेन च याः, ता उपप्रदर्श्या', तदर्थं विशेषत. पुनरधिकारवचनम्—"अथ"—इति। "इमाः" या वक्ष्यमाणास्ताः "अतिस्तुतयः–इत्याचक्षते" अन्येऽप्याचार्या एवमेवैताः 'आचक्षते' कथयन्ति शिष्येभ्यः अतिस्तुतय एता इति, प्रसिद्धा ह्येयमेतासु सञ्ज्ञेत्यभिप्रायः। "अपि वा" अथवा नैवैतदतिस्तवनम्। किं तर्हि ? "सम्प्रत्यय एव स्यात्" देवतासमानमेव। किं कारणम् ? न ह्यतिशयो नाम देवतायाः स्तुतिरस्ति। कस्मात् ? "माहाभाग्याद् देवतायाः"—इति, न हि विभूतेरियत्तास्ति, यामतिरिच्य

सूयेत। तदुक्तम्—"कवी'यम"—इति। तथा च "नार्वा मिन्द्रं प्रतिमानानि देभु"—इति॥

नैरुक्तसमयानुवृत्तये अतिस्तुतय प्रदर्श्यन्ते—"स" इति, स्तोता असावाचार्य्यं "अग्निमिव," अधिकृत्य "प्रथममाह"। किं कारणम्? येनैव हि क्रमेण स्तुतय उपप्रदर्शिता तेनैवात्र क्रमेणातिस्तुतयो न्याय्या प्रदर्शयितुम्, न ह्यसति कारणे मुख्यातिक्रमो न्याय्य इति। क? यथा,—

"त्वमग्ने द्युभिस्त्वमाशुशुक्षणि"—इति। यथैतस्मिन् सूक्ते स्वकर्माधिकारव्यतिरकेण, अतिशयेन वा स्तुति॥

मध्यस्थाने—"न हि त्वदारे निमिषश्च नेशे"—इति (ऋ० सं० २, ७, १०, १)। "वरुणस्य"। 'अपो सु म्यक्ष वरुण भियसं मत्सम्राडृतावोऽनु मा गृभाय। दामेव वत्साद्विमुमुग्ध्यंहो न हि त्वदारे निमिषश्च नेशे॥'—इति (ऋ० सं० २, ७, १०, १)। हे भगवन्! 'वरुण!' 'सम्राट्!' 'ऋतवन्!' यदेतत् 'अप' कर्म किञ्चित्, 'भियसम्' भयङ्करमस्मासु 'अंह' पापं यदालन कायकृतम्, तदस्मत्ता 'दामेव वत्सात्' 'विमुमुग्धि' त्वं प्रमुञ्च। ततश्च तन्मुच्य 'सुम्यक्ष' सुष्ठु गमय, नाशयेत्यर्थ। कस्मात्, न रव ब्रूमहे? इत,—यस्मात् "न हि त्वदारे निमिषश्च नेशे" त्वदन्तिकेऽपि वर्त्तमानस्य दूरेऽपि च य: कश्चित्तस्यापि त्वदन्यो नेशे, त्वमेव दूरे चान्तिके च ईशिषे इत्यभिप्राय॥

"यद् द्याव इन्द्रस्य"—॥ १॥

यद्द्याव इन्द्र ते शतं शतं भूमीरुत स्युः। न त्वा वज्रिन् सहस्रं सूर्य्या अनु न जातमष्ट रोदसी॥ यदि त इन्द्र शतं दिवः शतं

भूमयः प्रतिमानानि स्युर्न त्वा वज्रिन् सहस्रमपि सूर्य्या न द्यावापृथिव्यावप्यभ्यश्नुवीतामित्यथैषादित्यस्य ॥ २ ॥

"यद् द्याव इन्द्र ते शतम्"—इति (ऋ॰ स॰ ६, ५, ८, ५। सा॰ सं॰ छ॰ आ॰ ३, २, ४, ६)। पुरुहन्मन आर्षम्। बृहती। वैरूपे स्तोत्रियानुरूपे। हे भगवन्। 'इन्द्र!' 'यत्' "यदि" 'ते' तव 'शतम्' 'द्याव' "दिव" 'शत' च "भूमी" "भूमय" 'सहस्र' च 'सूर्य्या' 'रोदसी' 'उत' "अपि" च सम' ते "प्रतिमानानि" उपमानानि 'स्यु' भवेयु', कथञ्चित्, —तथापि 'त्वा' त्वा 'जातमात्रमपि सर्वाणि अपि तानि 'नाष्ट' "नैवाभ्यश्नुवीरन्"। किं तर्हि? त्वमेवैतानि सर्वाणि अभ्यश्नुवीथा, अतिरिच्य वर्त्तथा इत्यर्थ ॥

"अथ एषा आदित्यस्य"—॥ २ ॥

यदुदञ्चो वृषाकपे गृहमिन्द्राजगन्तन। क्व१स्य पुल्वघो मृगः कमगञ्जनयोपनो विश्वस्मादिन्द्र उत्तरः॥ यदुदञ्चो वृषाकपे गृहमिन्द्राजगमत क्व स्य पुल्वघो मृगः क्व स बह्वादी मृगो मृगो मार्ष्टेर्गतिकर्मणः कमगमद्देशं जनयोपनः सर्वस्माद्य इन्द्र उत्तरस्तमेतद्ब्रूम आदित्यमथैषादित्यरश्मीनाम् ॥ ३ ॥

"यदुदञ्चो वृषाकपे" इति (ऋ॰ स॰ ८, ४, ४, २)। पङ्क्तिः। इन्द्राण्या आर्षम्। पृष्ठस्य षष्ठेऽहनि विनियोग। हे भगवन्। 'वृषाकपे!' 'इन्द्र!' यदा त्वम् 'उदञ्च' उदङ्केव वर्स-

मान, प्रदक्षिणं भुवनानि परिगच्छन् 'गृहम्' 'अजगन्तन' गृहानुप्रवेशे हि व्यवधीयते, व्यवधीयते च भगवानस्तं गच्छ-न्नादित्य,—इत्येतस्मात् सामान्यादुच्यते "गृहमिन्द्राजगन्तन" —इति। तदा त्वयि गृहमुपगते, अदृश्ये निरालोको लोक सहसैव विस्मितो ब्रवीति—"क्व १_ स्य पुल्वघो मृग:"। 'स्य' "स." । 'पुल्वघ:' पुरुशब्दात् पूर्वपदम्, घसेरुत्तरपदम्, क्व स. "बह्वादी" 'मृग' बहुसावत्ति सर्वप्राणिष्ववस्थित.। तदुक्तम्— "सूर्य्य आत्मा जगतस्तस्थुषश्च—इति (ऋ० सं० १, ८, ७, १, सा० स० आर० आ०)। "मृगो मार्ष्टेर्गत्यर्थस्य न ह्यसाववति-ष्ठते, मार्ग्य एव हि मृग'। 'कमगन्' "क देशमगमत्" गत-वान् ?—येनास्माकमदृश्य, स देवो 'जनयोपन:' जनमोहनो बभूव, उदयास्तमयपरिगमनादादित्यस्य जना मुह्यन्ते, तत्त्वापरिज्ञानात्। 'विश्वस्मात्' "सर्वस्मात्" जगत 'य' त्वम् 'इन्द्र।' 'उत्तर, "तमेतन्त्वामादित्यम्" एव "ब्रूम:"— "यदुदञ्चो वृषाकपे"—इति ॥

"अथ एषा आदित्यरश्मीनाम्" अभिस्तुति —॥ ३ ॥

वि हि सोतोरसृक्षत नेन्द्रं देवममंसत। यत्रामदद्वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः ॥ व्यसृक्षत हि प्रसवाय न चेन्द्रं देवममंसत यत्रामादद्वृषाकपिरर्य्य ईश्वर: पुष्टेषु पोषेषु मत्सखा मम सखा मद्-नसखा ये न: सखायस्तै: सहेति वा सर्वस्माद्य इन्द्र उत्तरस्तमेतद्ब्रूम आदित्यमथै पार्श्विनो: ॥ ४ ॥

मे जरायुजरं मरायु । एतज्जरायुजं शरीरं शरदमजीर्णमथैषा सोमस्य ॥ ५ ॥

तरत्स मन्दी धावति धारा सुतस्यान्धसः । तरत्स मन्दी धावति ॥ तरति स पापं सर्व मन्दी यः स्तौति धावति गच्छत्यूर्ध्वां गतिं धारा सुतस्यान्धसः । धारयाभिषुतस्य सोमस्य मन्त्रपूतस्य वाचा स्तुतस्याथैषा यज्ञस्य ॥ ६ ॥

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ॥ चत्वारि शृङ्गेति वेदा वा एत उक्तास्त्रयो अस्य पादा इति सवनानि त्रीणि द्वे शीर्षे प्रायणीयोदयनीये सप्त हस्तासः सप्त छन्दांसि त्रिधा बद्धस्त्रेधा बद्धो मन्त्रब्राह्मणकल्पैर्वृषभो रोरवीति रोरवणमस्य सवनक्रमेण ऋग्भिर्यजुर्भिः सामभिर्यदेनमृग्भिः शंसन्ति यजुर्भिर्यजन्ति सामभिः स्तुवन्ति महो देव इत्येष हि महान् देवो यद्यज्ञो मर्त्यां आविवेशेत्येष हि मनुष्यानाविशति यजनाय तस्योत्तरा भूयसे निर्वचनाय ॥ ७ ॥

स्वर्यन्तो नापे॑क्षन्त॒ आ द्यां रो॑हन्ति॒ रोद॑सी । य॒ज्ञं ये वि॒श्वतो॑धार॒ं सुवि॑द्वांसो वितेनि॒रे ॥ स्वर्गच्छन्त ईजाना वा नेक्षन्ते तेऽमुमेव लोकं गतवन्तमिक्षन्त॒मिति॑ । आ द्यां रोह॒न्ति रोद॑सी । यज्ञं ये विश्वतोधारं सर्वतोधारं सुविद्वांसो वितेनिर इत्यथैषा वाच॒ः प्रवल्ह्ति॒तेव ॥ ८ ॥

च॒त्वारि॒ वाक् परि॑मिता प॒दानि॒ तानि॑ विदुर्ब्राह्म॒णा ये म॑नी॒षिण॑ः । गु॒हा त्रीणि॒ निहि॑ता॒ नेङ्ग॑यन्ति तु॒रीयं॑ वा॒चो म॑नु॒ष्या॑ वदन्ति ॥ चत्वारि वाचः परिमितानि पदानि तानि विदुर्ब्राह्मणा ये मेधाविनो गुहायां त्रीणि निहितानि नार्थं वेदयन्ते गुहा गूहतेस्तुरीयं त्वरतेः कतमानि तानि चत्वारि पदान्योङ्कारो महाव्याहृतयश्चेत्यार्षं नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणा मन्त्रः कल्पो ब्राह्मणं चतुर्थी व्यावहारिकीति याज्ञिका ऋचो यजूंषि सामानि चतुर्थी व्यावहारिकीति नैरुक्ताः सर्पाणां वाग्वयसां क्षुद्रस्य सरीसृपस्य चतुर्थी व्यावहारिकीत्येके पशुषु तूणवेषु मृगेष्वा-

त्मानि चेत्यात्मप्रवादा अथापि ब्राह्मणं भवति सा वै वाक् सृष्टा चतुर्द्धा व्यभवदेष्वेव लोकेषु त्रीणि पशुषु तुरीयं या पृथिव्यां साग्नौ सा रथन्तरे यान्तरिक्षे सा वायौ सा वामदेव्ये या दिवि सादित्ये सा बृहति सा स्तनयित्नावथ पशुषु ततो या वागत्यरिच्यत तां ब्राह्मणेष्वदधुस्तस्माद् ब्राह्मणा उभयीं वाचं वदन्ति या च देवानां या च मनुष्याणामित्यथैपाच्चरस्य ॥९॥

"चत्वारि वाक्परिमिता पदानि"—इति (ऋ० सं० २,३, २२, ५। अथ० म० ९, २५, २०। २९, १)। दीर्घतमस आर्षम्। वाग्देवते पशौ विनियोगः। प्रयत्नहितेत्वनभिव्यक्ति-विशिष्टो वाक्यार्थः। 'चत्वारि' 'वाक्परिमिता' "वाचः परि-मितानि" 'पदानि' न पञ्चम पदमस्ति। 'तानि' पुनः 'ब्राह्मणा विदु.'। किं सर्वे? न,—'ये मनीषिणः' "मेधा-विन"। तेषाञ्च पुनः पदानां 'गुहा' "गुहाया" 'त्रीणि' 'निहिता' "निहितानि" 'नेङ्गयन्ति' "नार्थं वेदयन्ते" न प्रख्यापयन्ति, 'तुरीयं' चतुर्थभागम्, एकपदं 'मनुष्याः' परिणामार्थं 'वदन्ति'। "तुरीयन्त्वरते." तद्धि त्वरित-मिव निर्गतं भवति विस्पष्टं। "कतमानि तानि चत्वारि पदानि?"—इति विचार्य्यः प्रश्नः। तत्र तावत्, "नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणाः" मन्यन्ते। तत्राऽप्रसिद्धा-र्थत्वादाख्यातोपसर्गनिपातपदानि अर्थं न वेदयन्ते, नामानि तु प्रसिद्धतरार्थत्वाद् गवाश्वादीन् वेदयन्त्यर्थान्।

एव "मन्त्रः कल्पो ब्राह्मणं चतुर्थी व्यावहारिकीति याज्ञिकाः" अत्रापि व्यावहारिकीव तु वेदयत्यर्थम्। "ऋचो यजूंषि सामानि, चतुर्थी व्यावहारिकीति नैरुक्ताः" अत्रापि व्यावहारिकीव वेदयते। "सर्पाणां वाक्, वयसाम्, क्षुद्रस्य सरीसृपस्य, चतुर्थी व्यावहारिकील्येके" सर्पादीनामित्यधिभूतविदः। अत्रापि व्यावहारिकीव वेदयते, नेतरा। "पशुषु तूणवे स्तेरिष्वात्मनि चेत्यात्मप्रवादाः"। आत्मानं ये प्रवदन्ति आचार्यास्ते आत्मप्रवादाः। "ब्राह्मणमपि च भवति" एतस्मिन्नर्थे, —"सा वै वाक् सृष्टा चतुर्धा व्यभवत्"—इत्येवमादि। तदेतदभिव्यक्त्यर्थमेव। "ततो या वागत्यरिच्यत, तां ब्राह्मणे न्यदधु" निहितवन्तः, "तस्माद् ब्राह्मणा उभयीं वाचं वदन्ति, —या च देवानां, या च मनुष्याणाम्" लौकिकीं वैदिकीं चेत्यर्थः॥

"अथ" पुनः "एषा" "अक्षरस्य" अक्षरस्तुतिः प्रतिलिङ्गितेव॥८॥

ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः। यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते॥ ऋचो अक्षरे परमे व्यवने यस्मिन्देवा अधिनिषण्णाः सर्वे यस्तन्न वेद किं स ऋचा करिष्यति य इत्तद्विदुस्त इमे समासत इति विदुष उपदिशति स तमेतदेतदक्षरमोमित्येषा वागिति शाकपूणिः ऋचश्च ह्यक्षरे परमे व्यवने धीयन्ते नाना-

देवतेषु च मन्त्रेष्वेतद्ध वा एतदक्षरं यत्सर्वा-
न्त्रयीं विद्यां प्रतिप्रतीति च ब्राह्मणम् ॥१०॥

"ऋचो अक्षरे परमे"—इति (ऋ० स० २, ३, २१, ४। अथ० स० ९, २८, ८)। दीर्घतमस आर्षम्। अस्या निर्वचनत्रय अधिदैवाधियज्ञाध्यात्मिकत्वेन ॐकार आदित्य आत्मा चेति। तत्र तावच्छाकपूणिपक्षमाश्रित्याधियज्ञगतमुच्यते।—

"कतमत् तदक्षरम्"? "ॐ"—"इत्येषा वाक्"—"इति शाकपूणे" अभिप्राय' ॐकारमृते न ह्यर्चयन्ति। तस्य 'अक्षरे' 'परमे' 'व्योमन्' व्योम—विविधमस्मिन् शब्दजात-मोतमिति व्योम तस्मिन्, तिसृषु मात्रासु अकारोकारम कारलक्षणासूपशान्तासु यदवशिष्यते, तदक्षर परम व्योम, शब्दसामान्यमभिव्यक्तमित्यभिप्राय। "यस्मिन् देवा अधि निषण्णा सर्व"। ऋगादिषु ये देवा, ते मन्त्रद्वारेणाऽक्षरे निषण्णा, तस्य शब्दकारणत्वात्। अथवा, प्रथमाया मात्राया पृथिवी, अग्नि, ऋग्वेद, पृथिवीलोकनिवासिन इत्येव, द्वितीयाया मात्रायाम, अन्तरिक्षम, वायु, यजूंषि तल्लोकनि वासिनो जना इति, तृतीयाया मात्राया द्यौ, आदित्य, सा-मानि, तल्लोकनिवासिनो जना इति। विज्ञायते हि—"ॐकार एवेद सर्वम्"—इति। 'यस्तन्न वेद' अनया विभूत्याक्षरम्, 'किम्' असौ 'ऋचा' ऋगादिभिर्मन्त्रै 'करिष्यति'? यस्तन्ना क्षरात्मना पश्यति। "य इत्तद्विदुस्त इमे समासते—इति विदुष उपदिशति"। ते हि तत्परिज्ञानात्ताद्भाव्यमुपगता प्रणवविग्रहमात्मानमनुप्रविश्य समीकृता निर्वान्ति शान्ता-र्चिष इवानला इति॥ १०॥

आदित्य इति पुनः शाकपूणेरेषर्ग्भवति

यदेनमर्चन्ति प्रत्यृच: सर्वाणि भूतानि तस्य यदन्यन्मन्त्रेभ्यस्तदक्षरं भवति रश्मयोऽत्र देवा उच्यन्ते य एतस्मिन्नधिनिषण्णा इत्यधिदैवत-मथाध्यात्मं शरीरमत्र ऋगुच्यते यदेनेनार्चन्ति प्रत्यृच: सर्वाणीन्द्रियाणि तस्य यदविनाशिधर्म तदक्षरं भवतीन्द्रियाण्यत्र देवा उच्यन्ते यान्यस्मिन्नधिनिषण्णानीत्यात्मप्रवादा: ॥ ११ ॥

"आदित्य इति पुत्र: शाकपूणि एष ऋग्भवति"—इति, मण्डलमभिप्रेतम्। "यदेनमर्चन्ति" यस्मादेनमर्चन्ति, तस्मादृक्। "तस्य" "यदन्यत्" "मन्त्रेभ्य" मण्डलगतेभ्यो-ऽवयवेभ्य', "तत्" परम् "अक्षरं" अव्ययम्, तत्र सर्वमोत-मिति, "य एषोऽन्तरादित्ये हिरण्मय: पुरुषो दृश्यते"—इति (तै॰ आ॰ १०, १३) श्रुते:। "रश्मयोऽत्र देवा उच्यन्ते, य एतस्मि-न्नधिनिषण्णा इति"। यस्तन्मण्डलमक्षरात्मना न वेद, किं स ऋचा आदित्येन मण्डलात्मना करिष्यति? नासौ यथाव-दादित्यं वेदेत्यर्थ:। "य इत्तद्विदुस्त इमे समासते"—इति व्याख्यातम् (४२३ पृ॰ २१ पं॰) ॥

आत्मेत्यात्मप्रवादा:। अयमृग्भवति शरीरमिति। "इन्द्रियाण्यत्र देवा उच्यन्ते" तानि हि विषयेषु द्योतयन्त इति देवा:। "तस्य यदविनाशिधर्म" चेतनासतत्त्वमात्रवि-ज्ञानम्, "तत्" परमम् "अक्षर" अव्ययम्। यस्तदक्षरं न वेद, किमसौ ऋचा शरीरेण करिष्यति? न तस्य जीवितेनार्थ'। "य इत्तद्विदु:"—इति, व्याख्यातम् (४२३ पृ॰ २१प॰) ॥ ११ ॥

अक्षरं न क्षरति न क्षीयते वाक्षयो भवति वाचोऽक्ष इति वाक्षो यानस्याञ्जनात्तत्प्रकृतीतरद्वर्त्तनसामान्यादित्ययम्मन्त्रार्थचिन्ताभ्यूहोऽभ्यूढोऽपि श्रुतितोऽपि तर्कतो न तु पृथक्त्वेन मन्त्रा निर्वक्तव्याः प्रकरणश एव तु निर्वक्तव्या न ह्येषु प्रत्यक्षमस्त्यनृषेरतपसो वा पारोवर्य्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवतीत्युक्तं पुरस्तान्मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन् को न ऋषिर्भविष्यतीति तेभ्य एतं तर्कमृषिं प्रायच्छन् मन्त्रार्थचिन्ताभ्यूहमभ्यूढं तस्माद्यदेव किञ्चानूचानोऽभ्यूहत्यार्षं तद्भवति ॥ १२ ॥

“अक्षरम्” कस्मात्? तद्धि “न क्षरति” नान्यथाभावमापद्यते। अथवा “न क्षीयते” न कदाचिदप्यामूलतो विनश्यति। अथवा “वाक्क्षयो भवति” नादो हि वर्णलक्षणाया वाचो निवासः। “वाचोऽक्ष —इति वा” अक्षरो ह्यक्ष इवानुप्रविश्य व्यञ्जनानि धारयति॥

अथ “अक्ष” कस्मात्? उच्यते,—“यानस्य” यानाक्ष तावत् “समञ्जनात्” नित्यमसौ म्रक्ष्यते तैलादिना, “तत्प्रकृतीतरत्” स्वराख्यमक्षरम्, “वर्त्तनसामान्यात्” स्वरमधिरूढानि व्यञ्जनानि वर्त्तन्ते। “इति” परिसमाप्त्यर्थ इतिकारः, उपप्रदर्शनार्थो वाक्यस्य॥

एवमर्थं "मन्त्रार्थचिन्ताभ्यूहोऽभ्यूढः" मन्त्रार्थचिन्ताया अभ्यूहो मन्त्रार्थचिन्ताभ्यूहः, वितर्कितः; प्रकाशते एतावता मन्त्रार्थोऽभ्यूहितुमिति। पुनः अयम् "अपि श्रुतितः"—"अपि तर्कतः" श्रुतिभ्यो ब्राह्मणेभ्यो निगमशेषेभ्यश्चोदीतार्थाभिधानसामर्थ्येभ्यो वाक्यार्थसामर्थ्यात् तस्योपरि पर्य्यायास्तर्कोऽभ्यूहो लक्षणन्याय इति। यद्यप्ययमभ्यूहः, तथापि "न तु पृथक्त्वेन मन्त्रा निर्वक्तव्याः"। कुतः पृथक्त्वेन ? प्रकरणात्। किं तर्हि ? "प्रकरणश एव तु निर्वक्तव्याः"। तान्येतानि प्रकरणानि मन्त्राणां यानि दैवतमध्यात्ममितिहासानुप्रवेश इति। किं कारणम् ? "न ह्येषु" मन्त्रेषु "प्रत्यक्षम्" अर्थदर्शनम् "अस्ति"। किं नास्त्येव ? न नास्ति। किं तर्हि ? "अनृषेः अतपसो वा"—इति, तस्येदानीमपि स्याद् ऋषिस्तपस्वी च, निर्दग्धकल्मषयोस्तयोः प्रतिबन्धकाभावाद् यथावदर्थं मन्त्राणां पश्यतः। येऽन्ये पुनरौपदेशिकाः, तानधिकृत्योच्यते —"पारोवर्य्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति —इत्युक्तं पुरस्तात्"—इति। य एतेषु उपदेशतः पारोवर्य्येण परोवरभावेन मन्त्रार्थान् प्रतिपद्यन्ते, ते पारोवर्य्यविदः, तेषु यः कश्चिद्भूयोविद्यः बहुश्रुतो भवति, स एव मन्त्रार्थपरिज्ञाने प्रशस्यो भवति। मन्त्रार्थ एव स्वयं विद्यास्थानभावेन विप्रभृतो लोकव्यवहारभावेन च विप्रकीर्णो विजृम्भत इति नाबहुश्रुतो नालमुन्नेतुमिति,—युक्तं यत्तत्परिज्ञानप्रयोगे भूयोविद्यः प्रशस्यत इति। पुरस्तादपि चैतदुक्तम्, इह तु प्रसङ्गादुच्यते॥

अत उत्तरमागमविशुद्धये ब्रवीति।—"मनुष्या वा ऋषिषु उत्क्रामत्सु देवानब्रुवन्"—इति। पूर्वमपि हि "साक्षात्कृतधर्माण ऋषयो बभूवुः"—इत्युक्तम्, इह तु मन्त्रार्थाभ्युपदर्श-

नार्थमिति विज्ञायते—"मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन् को न ऋषिर्भविष्यति"—इति। एवमादिपुराकल्परूपोऽर्थविद: प्राज्ञावतारस्तुतये, तेभ्य: "एत मन्त्रार्थचिन्ताभ्यूहमभ्यूढ़ प्रायच्छन्" ते देवा: एतं समस्तार्थमूहमपि भवन्तोऽनेन मन्त्रार्थान् शक्यन्तेऽभ्यूहितुमिति। यस्मादेतदेव "तस्मात्" अस्मिन् सूक्ते निरुक्तशास्त्रे य: "अनूचान." विद्वान्, यदेव किञ्चिन्मन्त्रार्थेषु "अभ्यूहति" "आर्षं तत् भवति" तथैव तद्यथोऽभ्यूहितवन्त इत्यभिप्राय: ॥ १२ ॥

हृदा तष्टेषु मनसो जवेषु यद्ब्राह्मणाः संयजन्ते सखाय:। अत्राह त्वं विजहुर्वेद्याभिरोहब्रह्माणो विचरन्त्युत्वे ॥ हृदा तष्टेषु मनसाञ्जवेषु यद्ब्राह्मणा: संयजन्ते समानख्याना ऋत्विजोऽत्राह त्वं विजहुर्वेद्याभिर्वेदितव्याभि: प्रवृत्तिभिरोहब्रह्माण ऊहब्रह्माण ऊह एषां ब्रह्मेति वा सेयं विद्या श्रुतिमतिबुद्धिस्तस्यास्तपसा पारमीप्सितव्यं तदिदमायुरिच्छता न निर्वक्तव्यं तस्माच्छन्द:सु शेषा उपेक्षितव्या अथागमो यां यां देवतां निराह तस्यास्तस्यास्ताद्भाव्यमनुभवत्यनुभवति ॥ १३ ॥

१-न तत् क्षमनीयिकयोच्यते, मन्त्रार्थोऽप्येतस्मिन् विषये बृहस्पतिना दृष्टो ब्रह्म वा स्वयं प्राह। तद्यथा,—

"हृदा तष्टेषु"—इति (ऋ० स० ८, २, २४, १। १०, ६,

एवमर्थं "मन्त्रार्थचिन्ताभ्यूहोऽभ्यूढ." मन्त्रार्थचिन्तामामभ्यूहो मन्त्रार्थचिन्ताभ्यूहः, वितर्कितः, शक्यते एतावता मन्त्रार्थोऽभ्यूहितुमिति। पुनः अयम् "अपि श्रुतित."—"अपि तर्कतः" श्रुतिभ्यो ब्राह्मणेभ्यो निगमशेषेभ्यश्चोक्तार्थाभिधानसामर्थ्येभ्यो वाक्यार्थसामर्थ्यात् तस्योपरि पर्य्यायास्तर्कोऽभ्यूहो लक्षणन्याय इति। यद्यप्ययमभ्यूहः, तथापि "न तु पृथक्त्वेन मन्त्रा निर्वक्तव्या."। कुतः पृथक्त्वेन? प्रकरणात्। किं तर्हि? "प्रकरणश एव तु निर्वक्तव्या."। तान्येतानि प्रकरणानि मन्त्राणां याज्ञं दैवतमध्यात्ममितिहासानुप्रवेश इति। किं कारणम्? "न ह्येषु" मन्त्रेषु "प्रत्यक्षम्" अर्थदर्शनम् "अस्ति"। किं नास्त्येव? न नास्ति। किं तर्हि? "अनृषेः अतपसो वा"—इति, तस्येदानीमपि स्याद्य ऋषिस्तपस्वी च, निर्दग्धकल्मषयोस्तयोः प्रतिबन्धकाभावाद् यथावदर्थं मन्त्राणां पश्यत.। येऽन्ये पुनरौपदेशिका', तानधिकृत्योच्यते —"पारोवर्य्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति —इत्युक्तं पुरस्तात्"—इति। य एतेषु उपदेशतः पारोवर्य्येण परोवरभावेन मन्त्रार्थान् प्रतिपद्यन्ते, ते पारोवर्य्यविद, तेषु यः कश्चिद्भूयोविद्यः बहुश्रुतो भवति, स एव मन्त्रार्थपरिज्ञाने प्रशस्यो भवति। मन्त्रार्थ एव स्वयं विद्यावस्थानभावेन विप्रभृतो लोकव्यवहारभावेन च विप्रकीर्णो विजृम्भत इति तमबहुश्रुतो नालमुन्नेतुमिति,—युक्तं यत्तत्परिज्ञाननयोगे भूयोविद्यः प्रशस्यत इति। पुरस्तादपि चैतदुक्तम्, इह तु प्रसङ्गादुच्यते॥

अत.परमागमविग्रहये प्रस्तौति।—"मनुष्या वा ऋषिषु उत् क्रामत्सु देवानब्रुवन्"—इति। पूर्वमपि हि "साक्षात्कृतधर्माण ऋषयो बभूवुः"—इत्युक्तम्, इह तु मन्त्रार्थाभ्युपप्रदर्श-

मार्थमिति विशिष्यते—"मनुष्या वा ऋषिषूत्क्रामत्सु देवा नब्रुवन् को न ऋषिर्भविष्यति"—इति। एवमादिपुराकल्परूपोऽर्थविद शास्त्रावतारस्तुतये, तेभ्य "एतं मन्त्रार्थचिन्ताभ्यूहमभ्यूह प्रायच्छन्" ति देवा एत समस्तार्थसूहमपि भवन्तोऽनेन मन्त्रार्थान् शक्यन्तेऽभ्यूहितुमिति। यस्मादेत देव "तस्मात्" अस्मिन् सूक्ते निरुक्तशास्त्रे य "अनूचान" विद्वान्, यदेव किञ्चिन्मन्त्रार्थेषु "अभ्यूहति" "आर्षं तत् भवति" तथैव तद्वयोऽभ्यूहितवन्त इत्यभिप्राय ॥ १२ ॥

हृदा तष्टेषु मनसो जवेषु यद् ब्राह्मणाः संयजन्ते सखायः। अत्राह त्वं विजहुर्वेद्याभिरोहब्रह्माणो विचरन्त्युत्वे ॥ हृदा तष्टेषु मनसाञ्जवेषु यद् ब्राह्मणाः संयजन्ते समानख्याना ऋत्विजोऽत्राह त्वं विजहुर्वेद्याभिर्वेदितव्याभिः प्रवृत्तिभिरोहब्रह्माण ऊहब्रह्माण ऊह एषां ब्रह्मेति वा सेय विद्या श्रुतिमतिबुद्धिस्तस्यास्तपसा पारमीप्सितव्यं तदिदमायुरिच्छता न निर्वक्तव्यं तस्माच्छन्दःसु शेषा उपेक्षितव्या अथागमो यां यां देवतां निराह तस्यास्तस्यास्ताद्भाव्यमनुभवत्यनुभवति ॥ १३ ॥

न तत् स्वमनीषिकयोच्यते, मन्त्रार्थोऽप्येतस्मिन् विषये बृहस्पतिना दृष्टो ब्रह्म वा स्वय प्राह। तद्यथा,—

"हृदा तष्टेषु"—इति (ऋ० सं० ८, २, २४, ३। १०, ६,

३. ८)। 'हृदा' हृदयेन बुद्ध्या, 'तष्टेषु' सूक्ष्मतामापादितेषु अचिन्त्याध्यात्मादिषु विदद्भिः, 'मनसो जवेषु, "मनसां" "प्रजवेषु" ये प्रजवाः प्रगमाः न साक्षात्ते दृश्यन्ते, तेष्वर्थेषु स्वर्गापूर्वदेवतादिषु 'ब्राह्मणा' अधिगतमन्त्रार्थतत्त्वाः विचारयन्तः,—किमत्र तत्त्वं किं वा अतत्त्वमिति, प्रवचनेन ततः 'संयजन्ते' परस्परेण संपूजयन्ति। कतमे ते ? इति,—'सखायः' "समानख्यानाः ऋत्विजः" ते हि प्रयोगे अभियुक्तत्वादितरतरा विद्वांसः। तेषु किम् ? इति,—"अत्राह त्वम्"—इति। 'अत्र' तत्र तेषु अर्थेषु सूक्ष्मेषु 'विजहुः' तत्यजुः, 'त्वम्' एकम् त्यक्तवन्तः। मन्त्रार्थव्याख्याने कमविद्वांसं के न तत्यजुः ? 'वेद्याभिः' "वेदितव्याभिः" "प्रवृत्तिभिः" न हि तासां मनोवृत्तीनामन्तोऽस्ति, यासु प्रतिभानवतामपि मनोवृत्तयो न प्रवर्त्तन्ते, अतस्ता वेदितव्या एव भवन्त्यविद्वद्भिः। ये पुनः 'ओहब्रह्माणः'। इदं निरुक्तशास्त्रम् ऊहब्रह्म, येषामस्ति ते शब्दार्थसङ्कटेष्वप्रतिबध्यमाना अतिक्रम्य अविद्वांसः 'वि' विशेषतः सर्वत्रैव प्रतिपूज्यमानाः 'चरन्ति 'त्वे' एके इत्यर्थः ॥

एवमेतस्मिन्मन्त्रे अस्या उदाहितार्थानिर्वोढिस्य मन्त्रार्थचिन्ताभ्यूहस्य ब्रह्मत्वं श्रूयते। तस्मादिदमपि निरुक्तशास्त्रं ब्रह्मैव वेद इत्यर्थः ॥

इदानीमुपसंहरति—"सेयं विद्या"—इति। श्रुतिमतोऽत्यर्थमेवैका विद्या बुद्धि वर्धति, ज्यायसी सर्वाभ्यो विद्याभ्यो महानेष तर्कः। "तस्याः तपसा पारमीप्सितव्यम्" गन्तुमिति वाक्यशेषः। पदवाक्यप्रमाणविदा ब्राह्मणेन यस्मादेदो विधिनिषेधप्रतिप्रसवनियमपरिसङ्ख्यापुनर्वचनपराः घेशदगहनः, अर्थवादाश्च यथाश्रुतप्रमाणाद्भुतो विदुर्षोऽपि

परमम्राख्तैतव', तस्मात् परमदुर्विज्ञानवेदनीयत्वात् वेदवाक्यानामिमा विद्यामन्तरेण सम्यगर्थावगमो न भवति। अतोऽस्या अखिलपुरुषार्थोपकारप्रवृत्ताया अन्तरेण तपःपारगमनं नास्तीत्यत इदमुक्तमाचार्य्येण,—"तस्यास्तपसा पारमीप्सितव्यम्" इति, अयमभ्युपाय. तस्याः पारगमने। "तदिदम्" अतपस्विना सर्वथापि "आयुरिच्छता" निरुक्तशास्त्रं "न निर्वक्तव्यम्" अतपस्वी ह्यागमवान् अपि मलिनान्त.करणत्वान्न शक्नुयात्, ततोऽस्यायुश्छिद्येत, तपस्विनापि च निर्बुवता "तस्मात्" "छन्दःसु" शाखान्तरेषु निगमोदाहरणानामाकाङ्क्षितनिराकाङ्क्षार्थे "शेषा." वाक्यशेषा, पादार्द्धर्चादिलक्षणा उपेक्षितव्या. ॥ १३ ॥

इति ऋज्वर्थाया निरुक्तवृत्तौ अष्टादशाध्यायस्य
(त्रयोदशाध्यायस्य) प्रथमः पाद ॥ १३ । १॥
जम्बूमार्गाश्रमवासिनो भगवद्दुर्गाचार्य्यस्य कृतौ
ऋज्वर्थाया निरुक्तवृत्तौ
अष्टादशाध्याय. (त्रयोदशाध्याय) समाप्तः ॥ १३ ॥
इति सपादसप्तदशाध्यायी ऋज्वर्थी नाम
निरुक्तवृत्तिः समाप्ता ॥

व्याख्यातं दैवतं यज्ञाङ्गञ्चेत्यादि ॥

(अथेमायद्यावीयदुदश्वोविहिंसीतोःवृत्ये-

ब्रतरत्ष्चत्वारिंश्द्द्वाश्यर्योन्नयत्वारिशृचो

११ १२ १२
अक्षर आदित्य इत्यक्षरन्नक्षरतिष्ठदातष्टेष, त्रयोदश ॥)

इति निरुक्ते त्रयोऽदशाध्यायः समाप्तः ॥१३॥

(अतिस्तुति प्रकरण समाप्तम्) ।

इति नैरुक्ते प्रथमं परिशिष्टं समाप्तम् ॥१॥

अथ चतुर्दशाध्यायः ।*

अथवा त्रयोदशस्यैव द्वितीयादित्रिपादी ।

तत्राद्य, द्वितीयपाद ।

व्याख्यातं दैवतं यज्ञाङ्गं चाथात ऊर्द्ध-मार्गगतिं व्याख्यास्यामः सूर्य आत्मेत्युदितस्य हि कर्मद्रष्टाऽथैतदनुप्रवदन्त्यथैतं महान्तमात्मानमेषर्गणः प्रवदन्तीन्द्रं मित्रं वरुणमग्निमाहुरित्यथैष महानात्मात्मजिज्ञासयात्मानं प्रोवाचाग्निरस्मि जन्मना जातवेदा अहमस्मि प्रजमना इत्येताभ्याम् ॥ १ (१४) ॥१॥

अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतम्म आसन् । अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम ॥ अहमस्मि प्रथमजा ऋतस्य पूर्वन्देवेभ्यो अम-

तस्य नाम । यो मा ददाति स इदेव मावदहमन्नमन्नमदन्तमद्मि ॥ इति स ह ज्ञात्वा प्रादुर्बभूवेदं तं व्याजहारा यं तमात्मानमध्यात्ममभिक्रमन्यस्मा आ चचक्षेति ॥ २ (१५) ॥ २ ॥

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् । स सध्रीचीः स विषूचीर्वसान आवरीवर्त्ति भुवनेष्वन्तः ॥ आवरीवर्त्ति भुवनेष्वन्तरित्यथैष महानात्मा सत्त्वपाचथास्तत्परं तद्ब्रह्म तत् सत्यं तत् सलिलं तदव्यक्तं तदस्पर्शं तदरूपं तदरसं तदगन्धं तदमृतं तच्छुक्लं तन्निष्ठो भूतात्मा सैषा भूतप्रकृतिरित्येके तत् क्षेत्रं तज्ज्ञानात् क्षेत्रज्ञमनुप्राप्य निरात्मकमथैष महानात्मा त्रिविधो भवति सत्त्वं रजस्तम इति सत्त्वं तु मध्ये विशुद्धं तिष्ठत्यभितो रजस्तमसी रजः इति कामद्वेषस्तम इत्यविज्ञातस्य विशुध्यतो विभूतिं कुर्वतः क्षेत्रज्ञपृथक्त्वाय कल्पते परिभातिलिङ्गो महानात्मा तमोलिङ्गो विद्या प्रकाशलिङ्गस्तमोऽपि निश्चयलिङ्ग आकाशः ॥ २ (१६) ३॥

आकाशगुणः शब्द आकाशाद्वायुर्द्विगुणः स्पर्शेन वायोर्ज्योतिस्त्रिगुणं रूपेण ज्योतिष आपश्चतुर्गुणा रसेनाद्भ्यः पृथिवी पञ्चगुणा गन्धेन पृथिव्या भूतग्रामस्थावरजङ्गमास्तदेतदहर्युगसहस्रं जागर्त्ति तस्यान्ते सुषुप्स्यन्नङ्गानि प्रत्याहरति भूतग्रामाः पृथिवीमपि यन्ति पृथिव्यप आपो ज्योतिषं ज्योतिर्वायुं वायुराकाशमाकाशो मनो मनो विद्यां विद्या महान्तमात्मानं महानात्मा प्रतिभां प्रतिभा प्रकृतिं सा स्वपिति युगसहस्रं रात्रिस्तावेतावहोरात्रावजस्रं परिवर्त्तेते स कालस्तदेतदहर्भवति युगसहस्रपर्यन्तमहर्यद्ब्रह्मणो विदुः रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जना इति ॥ ४ (१७) ॥ ४ ॥

वं परिवर्त्तमानमन्योऽनुप्रवर्त्तते स्रष्टा द्रष्टा विभक्तातिमात्रोऽहमिति गम्यते स मिथ्यादर्शनेदम्यावकं महाभूतेषु चिरोस्वाकाशाद्वायोः प्राणः चक्षुश्च वक्तारञ्च तेजसोऽद्भ्यः स्नेहं पृथिव्या मूर्त्तिः पार्थिवांस्त्वष्टौ गुणान् विद्यात् त्रीन्मातृतस्त्रीन् पितृतोऽस्थिस्नायुम-

ज्ञान: पितृतस्त्वङ्मांसशोणितानि मातृतोऽन्नं पानमित्यष्टौ सोऽयं पुरुष: सर्वमय: सर्वज्ञानोऽपि क्लृप्त: ॥ ५ (१८) ॥ ५ ॥

स यद्यनुरुध्यते तद्भवति यदि धर्मोऽनुरुध्यते तद्देवो भवति यदि ज्ञानमनुरुध्यते तदमृतो भवति यदि काममनुरुध्यते संच्यवत इमां योनिं सन्दध्यात् तदिदमत्र मतं श्लेष्मा रेतस: सम्भवति श्लेष्मणो रसो रसाच्छोणितं शोणितान्मांसं मांसान्मेदो मेदस: स्नावा स्नाव्नोऽस्थीन्यस्थिभ्यो मज्जा मज्जातो रेतस्तदिदं योनौ रेत: सिक्तं पुरुष: सम्भवति शुक्रातिरेके पुमान् भवति शोणितातिरेके स्त्री भवति द्वाभ्यां समेन नपुंसको भवति शुक्रेण भिन्नेन यमौ भवति शुक्रशोणितसंयोगान्मातृपितृसंयोगाच्च तत् कथमिदं शरीरं परं संयम्यते सौम्यो भवत्येकरात्रोषितं कललं भवति पञ्चरात्राद् बुद्बुदा: सप्तरात्रात् पेशी द्विसप्तरात्रादर्बुद: पञ्चविंशतिरात्र: स्वस्थितो घनो भवति मासमात्रात्कठिनो भवति द्विमासाभ्यन्तरे शिर: सम्पद्यते मासत्रयेण ग्रीवा-

व्यादेशो मासचतुष्केण त्वग्व्यादेशः पञ्चमे मासे नखरोमव्यादेशः षष्ठे मुखनासिकाक्षिश्रोत्रं च सम्भवति सप्तमे चलनसमर्थो भवत्यष्टमे बुद्ध्याध्यवस्यति नवमे सर्वाङ्गसम्पूर्णो भवति। मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः। नाना योनिसहस्राणि मयोषितानि यानि वै। आहारा विविधा भुक्ताः पीता नानाविधा स्तनाः। मातरो विविधा दृष्टाः पितरः सुहृदस्तथा। अवाङ्मुख पीड्यमानो जन्तुश्चैव समन्वितः। साङ्ख्यं योगं समभ्यसेत् पुरुषं वा पञ्चविंशकमिति ततश्च दशमे मासे प्रजायते जातश्च वायुना स्पृष्टो न स्मरति जन्ममरणेऽन्ते च शुभाशुभं कर्मैतच्छरीरस्य प्रामाण्यम् ॥ ६ (१८) ६ ॥

अष्टोत्तरं सन्धिशतमष्टाकपालं शिरः सम्पद्यते षोडश वपापलानि नव स्नायुशतानि सप्तशतं पुरुषस्य मर्मणामर्धचतस्रो रोमाणि कोट्यो हृदयं ह्यष्टकपालानि द्वादशकपालानि जिह्वा वृषणौ ह्यष्टसुपर्णौ तथोपस्थगुदपायु-तन्मूत्रपुरीषं कस्मादाहारपानसिक्तत्वादनु-

पचितकर्मणावन्योन्यं जयेते इति तं विद्या-
कर्मणी समन्वारभेते पूर्वप्रज्ञा च महत्यज्ञान-
तमसि मग्नौ जरामरणक्षुत्पिपासाशोकक्रोध-
लोभमोहमदभयमत्सरहर्षविषादेर्ष्यासूयात्म-
कैर्द्वन्द्वैरभिभूयमानः सोऽस्मादार्जवञ्जवीभा-
वानां तन्निर्मुच्यते सोऽस्मात्पान्वं महाभूतिकाव-
च्छरीरान्निमेषमात्रैः प्रक्रम्य प्रकृतिरधिपरीत्य
तैजसं शरीरं कृत्वा कर्मणोऽनुरूपं फलमनु-
भूय तस्य सङ्क्षये पुनरिमल्लोकं प्रतिपद्यते ॥
॥ ७ (२०) ॥ ७ ॥

अथ ये हिंसामाश्रित्य विद्यामुत्सृज्य
महत्तपस्तेपिरे चिरेण वेदोक्तानि वा कर्माणि
कुर्वन्ति ते धूममभिसम्भवन्ति धूमाद्रात्रिं रात्रे-
रपक्षीय-माणपक्षमपक्षीयमाणपक्षाद्दक्षिणायनं
दक्षिणायनात् पितृलोकं पितृलोकाच्चन्द्रमसं
चन्द्रमसो वायुं वायोर्वृष्टिं वृष्टेरोषधयश्चैत-
द्भूत्वा तस्य सङ्क्षये पुनरेवेमल्लोकं प्रतिपद्यते ॥
८ (२१) ॥ ८ ॥

अथ ये हिंसामुत्सृज्य विद्यामाश्रित्य
महत्तपस्तेपिरे ज्ञानोक्तानि वा कर्माणि कुर्वन्ति

तेऽर्चिरभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षादुदगयनमुदगयनाद्देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं वैद्युतान्मानसं मानसः पुरुषो भूत्वा ब्रह्मलोकमभिसम्भवन्ति ते न पुनरावर्त्तन्ते शिष्टा दन्दशूका य इदं न जानन्ति तस्मादिदं वेदितव्यमथाप्याह ॥ ८ (२२) ॥ ८ ॥

न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव । नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥ न तं विद्यथा विदुषो यमेवं विद्वांसो वदन्त्यक्षरं ब्रह्मणस्पतिमन्यद्युष्माकमन्तरमन्यदेषामन्तरं बभूवेति नीहारेण प्रावृतास्तमसा जल्प्या चासुतृप उक्थशासः प्राणं सूर्य्यं यत्पथगामिनश्चरन्त्यविद्वांसः चेदनमनुप्रवदन्त्यथाह्यो विद्वांसः चेत्रज्ञोऽनुकल्पते तस्य तपसा सहाप्रमादमेत्यथाप्रव्यो भवति तेनासन्ततमिच्छेत्तेन सत्त्वमिमिच्छेदेष हि सखा श्रेष्ठः सञ्जानाति भूतं भवद्भविष्यदिति ज्ञाता कस्माज्जायतेः सखा कस्मात् सख्यतेः सह भूतेन्द्रियैः शेरते महा-

भूतानि सेन्द्रियाणि मन्त्रया कर्म कारयतीति, वा, तस्य यदापः प्रतिष्ठाशीलमुपशम ; श्रात्मा ब्रह्मेति स ब्रह्मभूतो भवति सात्त्विमावो व्यवतिष्ठतेऽवन्थो ज्ञानकृतोऽथात्मनो महतः प्रथमभूतनामधेयान्यनुक्रमिष्याम: ॥ १० (२३) ॥ १०

हंसः। घर्मः। यज्ञः। वेनः। मेषः। कृमिः। भूमिः। विभुः। प्रभुः। शम्भुः। राभुः। बभ्रुकर्मा। सोमः। भूतम्। भुवनम्। भविष्यत्। आपः। महत्। व्योम। यशः। महः। स्वर्णीकम्। स्मृतीकम्। स्वृतीकम्। सतीकम्। सतीनम्। गहनम्। गभीरम्। गह्वरम्। कम्। अन्नम्। हविः। सद्म। सदनम्। ऋतम्। योनिः। ऋतस्य योनिः। सत्यम्। नीरम्। हविः। रयिः। सत्। पूर्णम्। सर्वम्। अक्षितम्। बर्हिः। नाम। सर्पिः। अपः। पवित्रम्। अमृतम्। इन्दुः। हेम। स्वः। सर्गाः। शम्बरम्। अम्बरम्। वियत्। व्योम। बर्हिः। धन्व। अन्तरिक्षम्। आकाशम्। आपः। पृथिवी। भूः। स्वयम्भूः। अध्व। पुष्करम्। सगरम्। समुद्रः। तपः।

तेजः। सिन्धुः। अर्णवः। नाभिः। रूपं। वृषः। तत्। यत्। किम्। ब्रह्म। मरेरप्यम्। हंसः। आत्मा। भवन्ति। वध्नन्ति। अधीनम्। यद्धाहिंथा। शरीराणि। अव्ययङ्की संस्कुरुते। यज्ञः। आत्मा। भवति। यदेनं तन्वतेऽथैतं महान्तमात्मानमेतानि सूक्तान्येता ऋचोऽनुप्रवदन्ति ॥ ११ (२४) ॥ ११ ॥

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः। जनिताग्नेर्जनिता सूर्य्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ सोमः पवते जनयिता मतीनां जनयिता दिवो जनयिता पृथिव्या जनयिताग्नेर्जनयिता सूर्य्यस्य जनयितेन्द्रस्य जनयितोत विष्णोः सोमः पवते सोमः सूर्यः प्रसवनाज्जनिता मतीनां प्रकाशकर्मणामादित्यरश्मीनां दिवो द्योतनकर्मणामादित्यरश्मीनां पृथिव्याः प्रथनकर्मणामादित्यरश्मीनामग्नेर्गतिकर्मणामादित्यरश्मीनां सूर्य्यस्य स्वीकरणकर्मणामादित्यरश्मीनामिन्द्रस्यैश्वर्य्यकर्मणामादित्यरश्मीनां विष्णोर्व्याप्तिकर्मणामादित्यरश्मीनामित्यधिदैवतम-

याध्यात्मं, सोम आत्माप्येतस्मादेवेन्द्रियाणां जनितेत्यर्थः। अपि वा सर्वाभिर्विभूतिभिर्विभूतत आत्मेत्यात्मगतिमाचष्टे ॥ १२ (२५) ॥ १२ ॥

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम्। श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन्॥

ब्रह्मा देवानामित्येष हि ब्रह्मा भवति देवानां देवनकर्मणामादित्यरश्मीनां पदवीः कवीनामित्येष हि पदं वेत्ति कवीनां कवीयमानानामादित्यरश्मीनामृषिर्विप्राणामित्येष हि ऋषिणो भवति विप्राणां व्यापनकर्मणामादित्यरश्मीनां महिषो मृगाणामित्येष हि महान् भवति मृगाणां मार्गणकर्मणामादित्यरश्मीनां श्येनो गृध्राणामिति श्येन आदित्यो भवति श्यायतेर्गतिकर्मणो गृध्र आदित्यो भवति गृध्यते स्थानकर्मणो यत एतस्मिंस्तिष्ठति स्वधितिर्वनानामित्येष हि स्वयङ्कर्माण्यादित्यो धत्ते वनानां वननकर्मणामादित्यरश्मीनां सोमः पवित्रमत्येति रेभन्नित्येष हि पवित्रं रश्मीना-

भवेति सूयमान एष एवैतत् सर्वमक्षर-मित्यधिदैवतमथाध्यात्मं ब्रह्मा देवानामित्यय-मपि ब्राह्मा भवति देवानां देवनकर्मणामिन्द्रि-याणां पदवीः कवीनामित्ययमपि पदं वेत्ति कवीनां कवीयमानानामिन्द्रियाणां ऋषिर्वि-प्राणामित्ययमृषिणो भवति विप्राणां व्यापनकर्मणामिन्द्रियाणां महिषो मृगाणा-मित्ययमपि महान् भवति मृगाणां मार्गण-कर्मणामिन्द्रियाणां श्येनो गृध्राणामिति श्येन आत्मा भवति श्यायतेर्ज्ञानकर्मणो गृध्रा-णीन्द्रियाणि गृध्यतेर्ज्ञानकर्मणो यत एतस्मिं-स्तिष्ठति स्वधितिर्वनानामित्ययमपि स्वयङ्क-र्माण्यात्मनि धत्ते वनानां वननकर्मणामिन्द्रि-याणां सोमः पवित्रमत्येति रेभन्नित्ययमपि पवित्रमिन्द्रियाण्यत्येति सूयमानोऽयमेवैतत् सर्वमनुभवत्यात्मगतिमाचष्टे ॥ १३(२६) ॥ १३॥

ति॒स्रो वाच॒ ईर॑यति॒ प्र वह्नि॑र्ऋ॒तस्य॑ धी॒तिं ब्रह्म॑णो मनी॒षाम् । गावो॑ यन्ति॒ गोप॑तिं पृ॒च्छमा॑ना॒ः सोमं॑ यन्ति म॒तयो॑ वावशा॒नाः ॥

वह्निरादित्यो भवति स तिस्रो वाचः प्रेरय-

ऋचो यजूंषि सामान्यृतस्यादित्यस्य कर्माणि
ब्रह्मणो मतान्येष एवैतत् सर्वमक्षरमित्यधि-
दैवतमथाध्यात्मं वङ्गिरात्मा भवति स तिस्रो
वाच ईरयति प्रेरयति विद्यामतिबुद्धिमतामृत-
स्यात्मनः कर्माणि ब्रह्मणो मतान्ययमेवैतत्
सर्वमनुभवत्यात्म गतिमाचष्टे ॥ १४ (२७) ॥१४॥

सोमं गावो धेनवो वावशानाः सोमं
विप्रा मतिभिः पृच्छमानाः । सोमः सुतः पूयते
अज्यमानः सोमे अर्कास्त्रिष्टुभः सन्नवन्ते ॥
एत एव सोमं गावो धेनवो रश्मयो वावश्य-
मानाः कामयमाना आदित्यं यन्त्येवमेव सोमं
विप्रा रश्मयो मतिभिः पृच्छमानाः कामय-
माना आदित्यं यन्त्येवमेव सोमः सुतः पूयते
अज्यमान एतमेवार्काश्च त्रिष्टुभश्च सन्नवन्ते
तत एतस्मिन्नादित्य एकं भवन्तीत्यधिदैवत-
मथाध्यात्ममेत एव सोमं गावो धेनव इन्द्रि-
याणि वावश्यमानानि कामयमानान्यात्मानं
यन्त्येवमेव सोमं विप्रा इन्द्रियाणि मतिभिः
पृच्छमानानि कामयमानान्यात्मानं यन्त्येव-
मेव सोमः सुतः पूयते अज्यमान इममेवात्मा

च सप्त ऋषयश्च सन्नवन्ते तानीमान्येतस्मिन्ना-त्मन्येकं भवन्तीत्यात्म_गतिमाचष्टे ॥ १५ (२८) ॥ १५ ॥

अक्रान् समुद्रः प्रथमे विधर्मं जनयन् प्रजा भुवनस्य राजा। वृषा पवित्रे अधि सानो अव्ये बृहत् सोमो वावृधे सुवान इन्दुः॥ अत्यक्रमीत् समुद्र आदित्यः परमे व्यवने वर्षकर्मणा जनयन् प्रजा भुवनस्य राजा सर्वस्य राजा वृषा पवित्रे अधि सानो अव्ये बृहत् सोमो वावृधे सुवान इन्दुरित्यधिदैवत-मथाध्यात्ममत्यक्रमीत् समुद्र आत्मा परमे व्यवने ज्ञानकर्मणा जनयन् प्रजा भुवनस्य राजा सर्वस्य राजा वृषा पवित्रे अधि सानो अव्ये महत् सोमो वावृधे सुवान इन्दुरित्या-त्म_गतिमाचष्टे ॥ १६ (२९) ॥ १६ ॥

महत्तत्सोमो महिषश्चकारापां यद्गर्भो-ऽवृणीत देवान्। अदधादिन्द्रे पवमान ओजो-ऽजनयत्सूर्ये ज्योतिरिन्दुः॥ महत्तत् सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवानामधि-मत्वमदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये

ज्योतिरिन्द्राद्वित्व इन्द्रात्मा ॥ १७ (३०)॥ १७ ॥

विधुन्द्राणं समने बहूनां युवानं सन्तं पलितो जगार। देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥ विधुं विधमनशीलं दद्राणं दमनशीलं युवानं चन्द्रमसं पलित आदित्यो गिरति सद्यो म्रियते स दिवा समुदितेत्यधिदैवतमथाध्यात्मं विधुं विधमनशीलं दद्राणं दमनशीलं युवानं महान्तं पलित आत्मा गिरति रात्रौ म्रियते रात्रिः समुदितेत्यात्मगतिमाचष्टे ॥ १८ (३१) ॥ १८॥

साकञ्जानां सप्तथमाहुरेकजं षलिद्यमा ऋषयो देवजा इति। तेषामिष्टानि विहितानि धामश स्थात्रे रेजन्ते विकृतानि रूपशः ॥ सहजातानां षण्णामृषीणामादित्यः सप्तमस्तेषामिष्टानि वा कान्तानि वा क्रान्तानि वा गतानि वा मतानि वा नतानि वाद्भिः सह सम्मोदन्ते यत्रैतानि सप्तऋषीणानि ज्योतींषि तेभ्यः पर आदित्यस्तान्येतस्मिन्नेकं भवन्तीत्यधिदैवतमथाध्यात्मं सहजातानां षण्णामिन्द्रि-

याणामात्मा सप्तमस्तेषामिष्टानि वा कान्तानि वा क्रान्तानि वा गतानि वा मतानि वा नतानि वान्नेन सह सम्मोदन्ते यत्रेमानि सप्तऋषीणानीन्द्रियाण्येभ्यः पर आत्मा तस्मिन्नेकं भवन्तीत्यात्म_गतिमाचष्टे ॥ १९ (३२) ॥ १९ ॥

इति नैरुक्ते त्रयोदशस्यैव द्वितीयः पादः समाप्तः॥

अथ तृतीयः पादः ।

स्त्रियः॑ स॒तीस्ताँ उ॑ मे पुं॒स आ॑हुः॒ पश्य॑द॒क्षण्वा॒न्न वि चे॑तद॒न्धः । क॒विर्यः पु॒त्रः स ई॒मा चि॑केत॒ यस्ता वि॑जा॒नात् स पि॒तुष्पि॒ताऽस॑त् ॥

स्त्रिय एवैताः शब्दस्पर्शरूपरसगन्धहारिण्यस्ता अमुं पुंशब्देन निराहारः प्राण इति पश्यन् कष्टान्न विजानात्यन्धः कविर्यः पुत्रः स इमा जानाति यः स इमां जानाति स पितुष्पितासदित्यात्मगतिमाचष्टे ॥ २० (३३) ॥ १ ॥

स॒प्तार्द्ध॒ग॒र्भा भुव॑नस्य॒ रेतो॒ विष्णो॑स्तिष्ठन्ति प्र॒दिशा॒ विध॑र्मणि । ते धी॒तिभि॒र्मन॑सा॒ ते वि॑प॒श्चितः॑ परि॒भुवः॒ परि॑भवन्ति वि॒श्वतः॑ ॥

सप्तैतानादित्यरश्मीनयमादित्यो गिरति मध्यस्थानोर्ध्वशब्दो यान्यस्मिंस्तिष्ठन्ति तानि धीतिभिश्च मनसा च विपर्य्ययन्ति परिभुवः परिभवन्ति सर्वाणि कर्माणि वर्षकर्मणेत्यधिदैवतमथाध्यात्मं सप्तेमानीन्द्रियाण्ययमात्मा गिरति मध्यस्थानोर्ध्वशब्दो यान्यस्मिंस्तिष्ठन्ति तानि धीतिभिश्च मनसा च विपर्य्ययन्ति परिभुवः परिभवन्ति सर्वाणीन्द्रियाणि ज्ञानकर्मणेत्यात्मगतिमाचष्टे ॥ २१ (३४) ॥ २ ॥

न वि जानामि यदि वेदमस्मि निण्यः सन्नद्धो मनसा चरामि। यदा मागन् प्रथमजा ऋतस्यादिद्वाचो अश्नुवे भागमस्याः ॥ न विजानामि यदि वेदमस्मि निण्यः प्रसन्नद्धो मनसा चरामि न हि विजानन् बुद्धिमतः पुष्टिः पुनः परिवेदयन्तेऽयमादित्योऽयमात्मा ॥ २२ (३५) ॥ ३ ॥

अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः। ता शश्वन्ता विषूचीना वियन्तान्य१न्यं चिक्युर्न नि चिक्युरन्यम् ॥ अपाञ्चयति प्राञ्चयति स्वधया गृभीतोऽमर्त्यं

आदित्यो मर्त्येन मनसा सह तौ सध्रीचीनौ विश्वगामिनौ वहुगामिनौ वा पश्यत्यादित्यं न चन्द्रमसमित्यधिदैवतमथाध्यात्ममपाङ्प्राङेति प्राङ्यति स्वधया गृभीतोऽमर्त्यं आत्मा मर्त्येन मनसा सह तौ सध्रीचीनौ विश्वगामिनौ वहुगामिनौ वा पश्यत्यात्मानं न मन इत्यात्मगतिमाचष्टे ॥ २३ (२६) ॥ ४ ॥

तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः । सद्यो जज्ञानो निरिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥ तद्भवति भूतेषु भुवनेषु ज्येष्ठमादित्यं यतो जज्ञ उग्रस्त्वेषनृम्णो दीप्तिनृम्णः सद्यो जज्ञानो निरिणाति शत्रूनिति निरिणातिः प्रीतिकर्मा दीप्तिकर्मा वानुमदन्ति यं विश्व ऊमा इत्यधिदैवतमथाध्यात्मं तद्भवति भूतेषु ज्येष्ठमव्यक्तं यतो जायत उग्रस्त्वेषनृम्णो ज्ञाननृम्णः सद्यो जज्ञानो निरिणाति शत्रूनिति निरिणातिः प्रीतिकर्मा दीप्तिकर्मा वानुमदन्ति यं सर्वं ऊमा इत्यात्मगतिमाचष्टे ॥ २४ (२७) ॥ ५ ॥

को अद्य युङ्क्ते धुरि गा ऋतस्य शिमी

वतो भामिनो दुर्हणायून्। आसन्निषून् हृत्स्वसो मयोभून्य एषां भृत्यां मृणधत्स जीवात्॥ क आदित्यो धुरि गा युङ्क्ते रश्मीन् कर्मवतो भानुमतो दुराधर्षानसून्य सुनवन्तोषूनिपुणवन्ति मयोभूनि सुखभूनि य इमं सम्भृतं वेद कथं स जीवतीत्यधिदैवतमथा-ध्यात्मं क आत्मा धुरि गा युङ्क्ते इन्द्रियाणि कर्मवन्ति भानुमन्ति दुराधर्षानसून्य सुनवन्तो-षूनिपुणवन्ति मयोभूनि सुखभूनि य इमानि सम्भृतानि वेद चिरं स जीवतीत्यात्मगति-माचष्टे ॥ २५ (३८) ॥ ६ ॥

क ईषते तुज्यते को बिभाय को मंसते सन्तमिन्द्रं को अन्ति। कस्तोकाय क इभा-योत रायेऽधिब्रवत्तन्वे३ को जनाय॥ क एव गच्छति को ददाति को बिभेति को मंसते सन्तमिन्द्रं कस्तोकायापत्याय महते च नो रणाय रमणीयाय दर्शनीयाय ॥२६ (३९)॥७॥

को अग्निमीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर्ध्रुवेभिः। कस्मै देवा आ-वहानाशु होम को मंसते वीतिहोत्रः

आदित्यो मर्त्येन मनसा सह तौ शश्वद्गामिनौ विश्वगामिनौ बहुगामिनौ वा पश्यत्यादित्यं न चन्द्रमसमित्यधिदैवतमथाध्यात्ममपान्वयति प्रान्वयति स्वधया गृभीतोऽमर्त्य आत्मा मर्त्येन मनसा सह तौ शश्वद्गामिनौ विश्वगामिनौ बहुगामिनौ वा पश्यत्यात्मानं न मन इत्यात्मगतिमाचष्टे ॥ २३ (३६) ॥ ४ ॥

तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः । सद्यो जज्ञानो निरिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥ तद्भवति भूतेषु भुवनेषु ज्येष्ठमादित्यं यतो जज्ञ उग्रस्त्वेषनृम्णो दीप्तिनृम्णः सद्यो जज्ञानो निरिणाति शत्रूनिति निरिणातिः प्रीतिकर्मा दीप्तिकर्मा वानुमदन्ति यं विश्व ऊमा इत्यधिदैवतमथाध्यात्मं तद्भवति भूतेषु ज्येष्ठमव्यक्तं यतो जायत उग्रस्त्वेषनृम्णो ज्ञाननृम्णः सद्यो जज्ञानो निरिणाति शत्रूनिति निरिणातिः प्रीतिकर्मा दीप्तिकर्मा वानुमदन्ति यं सर्व ऊमा इत्यात्मगतिमाचष्टे ॥ २४ (३७) ॥ ५ ॥

को अद्य युङ्क्ते धुरि गा ऋतस्य शिमी

वतो भामिनो दुहृणायून्। आसन्निषून् हृत्स्वसो मयोभून्य एषां भृत्या मृणधत्स जीवात्॥ क आदित्यो धुरि गा युङ्क्ते रश्मीन् कर्मवतो भानुमतो दुराधर्षानसून्य सुनवन्तीषूनिषुणवन्ति मयोभूनि सुखभूनि य इमं सम्भृतं वेद कथं स जीवतीत्यधिदैवतमथाध्यात्मं क आत्मा धुरि गा युङ्क्ते इन्द्रियाणि कर्मवन्ति भानुमन्ति दुराधर्षानसून्य सुनवन्तीषूनिषुणवन्ति मयोभूनि सुखभूनि य इमानि सम्भृतानि वेद चिरं स जीवतीत्यात्मगतिमाचष्टे ॥ २५ (३८) ॥ ६ ॥

क ईषते तुज्यते को बिभाय को मंसते सन्तमिन्द्रं को अन्ति। कस्तोकाय क इभायोत रायेऽधिब्रवत्तन्वे३ को जनाय॥ क एव गच्छति को ददाति को बिभेति को मंसते सन्तमिन्द्रं कस्तोकायापत्याय महते च नो रणाय रमणीयाय दर्शनीयाय ॥२६ (३९)॥७॥

को अग्निमीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर्ध्रुवेभिः। कस्मै देवा आवहानाशु होम को मंसते वीतिहोत्रः

सुदे॒वः ॥ क आदित्यं पूजयति हविषा च घृतेन च स्रुचा यजाता ऋतुभिर्वेभिरिति कस्मै देवा आवहानाशु होमार्थान् को मंसते वीतिहोत्रः सुदेवः कल्याणदेव इत्यधिदैवतमथाध्यात्मं क आत्मानं पूजयति हविषा च घृतेन च स्रुचा यजाता ऋतुभिर्वेभिरिति कस्मै देवा आवहानाशु होमार्थान् को मंसते वीतिहोत्रः सुमन्त्रः कल्याणमन्त्र इत्यात्मगतिमाचष्टे ॥ २७ (४०) ॥ ८ ॥

त्वम॒ङ्ग प्र शं॑सिषो दे॒वः श॑विष्ठ॒ मर्त्य॑म् । न त्वद॒न्यो म॑घवन्नस्ति मर्डि॒तेन्द्र॒ ब्रवी॑मि ते॒ वचः॑ ॥ त्वमङ्ग प्रशंसीर्देवः शविष्ठ मर्त्यं न त्वदन्योऽस्ति मघवन् पाता वा पालयिता वा जेता वा सुखयिता वेन्द्र ब्रवीमि ते वच इति स्तुतिसंयुक्तम् ॥ २८ (४१) ९ ॥

इति निरुक्ते त्रयोदशाध्यायस्यैव तृतीयः पादः ॥

अथ चतुर्थः पादः ।

हं॒सः शु॑चि॒षद्व॑सुरन्तरिक्ष॒सद्धोता॑ वेदि॒षदति॑थिर्दुरोण॒सत् । नृ॒षद्व॑र॒सदृ॑त॒सद्व्यो॑म॒स-

दजा गोजा ऋतजा अद्रिजा ऋतम्॥ हंस इति हंसा सूर्य्यरश्मयः परमात्मा परं ज्योतिः पृथिवी व्याप्तेति व्याप्तं सर्व्वं व्याप्तं वननकर्मणा-नभ्यासेनादित्यमण्डलेनेति त्ययतीति लोको त्ययतीति हंसयन्त्ययतीति हंसाः परमहंसाः परमात्मा सूर्य्यरश्मिभिः प्रभूत गभीर वसतीति त्रिभिर्वसतीति वा रश्मिर्वसतीति वावह्निर्वसतीति वा सुवर्णरेताः पूषा गर्भो रिभेति रिभन्ता वनकुटिलानि कुटन्ता रिभन्तान्तरिक्षा चरत्यथान्तरिक्षा चरदिति दिवि भुवि गमनं वा सुभानुः सुप्रभूतो होतादित्यस्य गता भवन्त्यतिथिर्दुरोणसत् सर्वं दुरोणसद्र द्रवं सर्वं रसा विकर्षयति रश्मिविकर्षयति वह्निविकर्षयति वनन-स्रवत्यन्नगोजा अद्रिगोजा धरित्रिगोजाः सर्वे गोजा ऋतजा बहुशब्दा भवन्ति निगमो निगमव्यति भवत्यपे निर्वचनाय॥ २८ (४२)॥ १॥

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि-

सुदेवः॥ क आदित्यं पूजयति हविषा च घृतेन च स्रुचा यजाता ऋतुभिर्धुवेभिरिति कस्मै देवा आवहानाशु होमार्थान् को मंसते वीतिहोत्रः सुदेवः कल्याणदेव इत्यधिदैवतमथाध्यात्मं क आत्मानं पूजयति हविषा च घृतेन च स्रुचा यजाता ऋतुभिर्धुवेभिरिति कस्मै देवा आवहानाशु होमार्थान् को संसते वीतिहोत्रः सुप्रज्ञः कल्याणप्रज्ञ इत्यात्मगतिमाचष्टे॥ २७ (४०)॥ ८॥

त्वमङ्ग प्र शंसिषो देवः शविष्ठमर्त्यम्। न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः॥ त्वमङ्ग प्रशंसीर्देवः शविष्ठ मर्त्यं न त्वदन्योऽस्ति मघवन् पाता वा पालयिता वा जेता वा सुखयिता वेन्द्र ब्रवीमि ते वच इति स्तुतिसंयुक्तम्॥ २८ (४१) ९॥

इति निरुक्ते त्रयोदशाध्यायस्यैव तृतीयः पादः॥

अथ चतुर्थः पादः।

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमस-

न्ते ॥ सुपर्णा सयुजा सखायेत्यात्मानं द्वात्मानं परमात्मानं प्रत्युत्तिष्ठति शरीर एव तज्जायते दृशं रच शरीरं दृशं पञ्चौ प्रतिष्ठापयति तयो-रन्यद्भक्षान्नमनन्नन्यां सरूपतां सलोकताम-श्नुते य एवं विद्वाननन्नन्यो अभिचाकशीती-त्यात्मगतिमाचष्टे ॥ ३० (४३) ॥ २ ॥

आयाहीन्द्र पथिभिरीलितेभिर्यज्ञमिमं नो भागधेयं जुषस्व। तृप्तां जुहुर्मातुलस्येव योषा भागस्ते पैतृष्वसेयी वपामिव ॥ आगमिष्यन्ति शक्रो देवतास्ताभिस्त्रिभिस्तीर्थैर्भिः शक्रमतरैरीलितेभिस्त्रिभिस्तीर्थैर्यज्ञमिमन्नो यज्ञ-भागमग्नीषोमभागाविन्द्रो जुषस्व तृप्तामेवं मातुलयोगकन्या भागं सतृकेव सा या देवता-स्तास्तत्स्थाने शक्रं निदर्शतिम् ॥ ३१ (४४) ॥३

विप्रं विप्रासोऽवसे देवं मर्त्तास ऊतये। अग्निं गीर्भिर्हवामहे ॥ विप्रं विप्रासोऽवसे विदुर्वेद विन्दतेर्वेदितव्यं विमलशरीरेण वायुना विप्रस्तु हृत्पद्मनिलयस्थितमकारसं-स्थितमुकारं पूरयेन्मकारनिलयं गतं विप्रं प्राणेषु विन्दुसिक्तं विकसितं वह्नितेजःप्रभङ्ग-

नैकपद्मे व्यस्तशरीरमस्तजातस्थितमस्तवाचा-
न्तसुखे वदन्ति । अग्निङ्गीर्भिर्हवामहे ।
अग्निं सम्बोधयेदग्निः सवा देवता इति तस्यो-
त्तरा भूयसे निर्वचनाय ॥ ३२ (४५) ॥ ४ ॥
जातवेदसे सुनवाम सोममरातीयतो
निदहाति वेदः । स नः पर्षदतिदुर्गाणि
विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ जातवे-
दस इति जातमिदं सर्वं सचराचरं स्थित्युत्प-
त्तिप्रलयन्यायेनाच्छाय सुनवाम सोममिति
प्रसवेनाभिषवाय सोमं राजानमस्तमराती-
यतो यज्ञार्थमिति स्नो निश्चये निदहाति
दहति भस्मीकरोति सोमो ददादित्यर्थः । स
नः पर्षदतिदुर्गाणि दुर्गमनानि स्थानानि
नावेव सिन्धुं यथा कश्चित्कर्णधारो नावेव
सिन्धोः स्यन्दनान्नदीं जलदुर्गां महाकूलान्ता-
रयति दुरितात्यग्निरिति तानि तारयति
तस्य पापर्ता भवति ॥ ३३ (४६) ॥ ५

इदन्तेऽन्याभिरसमानमद्भिर्याः काश्च
सिन्धुं प्रवहन्ति नद्यः । सर्पो जीर्णामिव
त्वचं जहाति पापं सशिरस्कोऽभ्युपेत्य ॥

१५ १६ १७ १८
ईरयतिसोमक्षावोऽक्षान्मक्षत्सोमोविधुन्दद्रायं-
१९ २० २१ २२ २३
धाकस्थानां त्रियःसतोःसप्तार्द्धगर्भानविशानाम्य-
२४ २५ २६ २७
पाण्प्राडेतितदिदासको अद्यायुङ्क्तो कद्रूपतेको-
२८ २९ ३० ३१
अग्निमीट्टेलसङ्कंसः शुचिषद्वासुपर्णोऽऽयाहीं=
३२ ३३ ३४ ३५
न्द्रविप्रं विप्रासोजातवेदसङ्कदऽन्तेन्याभिस्यम्बकं-
३६ ३७
यतञ्जीवमातेराधांसीति सप्तचिंशत् ॥

(१) (२) (३) (४) (५)
अथेमायद्द्यावोयदुदञ्चोविङ्क्षितोतोहृण्ये -
(६) (७) (८) (९) (१०)
वतरत्वश्चत्वारिश्टङ्गास्वर्यन्तश्चत्वारिवाग्चोश्र-
(११) (१२) (१३) (१४)
चरआदित्यइत्यचरन्नचरतिह्रदातश्चेपुव्याव्या-
(१५) (१६) (१७)
तन्दैवतमग्निरस्मिनश्मनापश्यङ्गोपामाकायगु-
(१८) (१९) (२०) (२१)
यास्तम्परिवर्त्तमानंसयद्यनुरुध्यतेऽष्टोत्तरमथयेहिं-
(२२) (२३) (२४) (२५)
सामायित्याथयेहिंसामुत्सृज्यनतंहंसोघर्मःसोमः-

(२६) (२७) (२८)
पवतेब्रह्मादेवानान्तिसोवाचईरयतिसोमश्चावो-
(२९) (३०) (३१) (३२) (३३)
ऽक्रान्समुद्रस्त्सोमोविधुन्द्राणंसाकञ्जानांत्रिवः-
(३४) (३५) (३६) (३७)
सतोःपशार्वगर्भानविजानाम्यपाङ् प्राङ् तित-
(३८) (३९) (४०) (४१)
दिदासकोअद्ययुङ्क्ते कईपतेकोअग्निमीट्टेत्वम-
(४२) (४३) (४४) (४५)
ग्नहंसः शुचिषद्द्वासुपर्णाऽऽहीन्द्र विप्रं विप्रा-
(४६) (४७) (४८) (४९) (५०)
सोजातवेदसइदन्तेन्याभिरूध्यन्वकंशतंजीवमाते-
राधांसीति पञ्चाशत् ॥

इति निरुक्ते चतुर्दशाध्यायः समाप्तः ॥ १४ ॥

(ऊर्ध्वमार्गगतिप्रकरण समाप्तम् ।)

इति नैरुक्ते द्वितीय-परिशिष्टं समाप्तम् ॥

(इति परिशिष्टम्)

